भवत्विति । 'भवतु' आस्तां विमर्शः 'कुटुम्बिनी' भार्याम् 'आहूय पृच्छामि' सैव तथ्यं कथयिष्यति । ('नेपथ्यस्य' वेषरचनास्थानस्य 'अभिमुखं' यथा तथा 'अवलोक्य' आह) । अन्वयः—हे गुणवति, उपायनिलये, स्थितिहेतोः त्रिवर्गस्य साधिके, कार्य्याचार्य्ये, मद्भवननीतिविद्ये, द्रुतम् उपेहि । व्याख्या—'हे गुणवति' दयादाक्षिण्यादिभूषिते, हे उपायानां' गृहकर्मोपाटवादीनां 'निलये' निवासभूते, हे 'स्थितेः' गृहस्थाश्रमस्थितेः यो 'हेतुः' निमित्तं तस्य 'त्रिवर्गस्य' धर्मार्थकामात्मकस्य 'साधिके' निर्वाहयित्रि, हे 'कार्यस्य' कर्मणोऽस्य 'आचार्य्ये' उपदेष्ट्रि अतएव हे 'मद्भवनस्य' मदगृहस्य 'नीतिविदे' नयशास्त्रस्वरूपे सत्पत्नि 'द्रुतमुपेहि'झटिति आगच्छ । नीतिरपि सन्धादिभिर्गुणवती, सामादिभिरुपायनिलया, दृष्टादेः त्रिवर्गस्य साधिका, कार्य्याचार्या च । एतेन नाटकेऽस्मिन् नीतिविद्यायाः विलासः सुतरां प्रकटीभविष्यति इति सूच्यते । आर्य्याछन्दः । "यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि । अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या ॥" इति लक्षणात् ।

CHARCHA

1. भवतु—An idiomatic expression when dropping a subject. It is often treated as an अव्यय ।

2. कुटुम्बिनीम्—कुटुम्बमस्ति अस्याः कुटुम्बिनी । ताम् । Refers to the *wife*.

3. नेपथ्य &c.—नेपथ्य means वेष also वेषरचनास्थान । Here the latter. "नेपथ्यन्तु प्रसाधने रङ्गभूमौ वेषभेदे" इति हैमः ।

4. गुणवति—Not the double sense. When applied to नीतिविद्या the गुण्s are six in number, namely, सन्धि, विग्रह, यान, आसन, द्वैध, आश्रय।
1 2 3 4

5. उपायनिलये—उपाय applied to नीतिविद्या is expedient. These are four in number, viz, सामन्, दान, भेद, दण्ड। उपायाः-निलीयन्ते अस्याम् इति उपाय + नि + ली + अच् अधिकरणे स्त्रियाम् उपायनिलया। Thus derived the word is not necessarily masculine. Usually घञन्त, अचन्त and अजन्त words are masculine in the भाववाच्य, but in other cases they are often treated as वाच्यलिङ्ग।

6. स्थितिहेतोः—स्थिति is preservation ; स्थितेः हेतुः। तस्य। Qual. त्रिवर्गस्य। Or स्थितिरेव हेतुः स्थितिहेतुः। तस्मात्। हेतौ पञ्चमी। It is हेतु of क्रिया in अधिकरे।

7. त्रिवर्गस्य—त्रिवर्ग is a संज्ञा of the three धर्म, अर्थ, काम ; also of the three वृद्धि, स्थान, क्षय। It has the latter sense when taken in connection with नीतिविद्या। त्रयाणां वर्गः त्रिवर्गः। तस्य।

8. कार्य्याचार्य्ये—आ + चर + ण्यत् कर्मणि स्त्रियाम् आचार्य्या Instructress, by the Varttika "आचार्य्यादणत्वञ्च"। The feminine of आचार्य्य is आचार्य्या or आचार्य्यानी। The former means स्वयमुपदेष्ट्री, and the latter the wife of आचार्य्य and its न is dental and not cerebral. कार्य्याणामाचार्य्या &c.

9. उपेहि—उप ÷ आ + इ + लोट् हि। Here we have उप + आ + इहि = उप + एहि = उपेहि by परूप by the rule "ओमाङोश्च"।

10. *Remark*—For गुण, उपाय and त्रिवर्ग, cf.—*Sisupala* Canto II, Sl. 26. Kirat I, and Manu VII.

6. (प्रविश्य) नटी—अज्ज, इअम्हि। अप्पाणिओएण मं अज्जो अणुगेण्हदु (आर्य्य, इयमस्मि। आत्मनियोगेन माम् आर्य्यः अनुगृह्णातु)।

(Entering) *Nati*—Here I am, Noble Sir. Let Noble Sir favour me with his command for work.

सूत्र—आर्ये निष्टतु तावदाज्ञानियोगः। कथय किमद्य भवत्या तत्रभवतां ब्राह्मणानाम् उपनिमन्त्रणेन कुटुम्बकम् अनुगृहीतम्, अभिमता वा भवनम् अतिथयः सम्प्राप्ताः, यत् एष पाकविशेषारम्भः।

Sutra:—Noble lady, let command for work stay. Tell me if this house-hold has been favoured by thee to-day by the invitation of worthy Brahamans, or if esteemed guest have reached the house, that there is this special preparation for the cooking.

नटी—अज्ज, आमन्तिदा मए भअवन्त बम्हणा [आर्य, आमन्त्रिता मया भगवन्तो ब्राह्मणाः]।

Nati—Noble Sir, mighty Brahamanas have been invited by me.

सूत्र—कथय कस्मिन्निमित्ते ?

Sutra—Tell me for what reason.

नटी—उवरज्जदि किल भअवं चन्दोत्ति [उपरज्यते किल भगवान् चन्द्र इति]॥

Nati—For what reason that the mighty moon will be eclipsed.

सूत्र—आर्ये, क एवमाह।

Sutra—Noble lady, who says so?

नटी—एवं खु नअरवासी जणो मन्तेदि [एवं खलु नगरवासी जनो मन्त्रयते]।

Nati—So do people living in the city say.

प्रविश्येति—'नटी' सूत्रधारपत्नी 'प्रविश्य' रङ्गमञ्चमागत्य प्राह हे 'आचार्य्य' पूज्य 'इयमस्मि' एषा अहं प्राप्ता। 'आर्य्यः' मान्यो भवान् 'माम् आज्ञया' आदेशेन यो 'नियोगः' कर्मसु प्रेरणम् तेन 'अनुगृह्णातु'। सूत्रधारः प्राह 'आर्य्ये आज्ञानियोगः तावत्' तत्काले 'तिष्ठतु' आस्तां, तत्कथा यातु इत्यर्थः। 'कथय अद्य भवत्या तव भवतां पूज्यानां' ब्राह्मणानाम् उपनिमन्त्रणेन कुटुम्बकं पौष्यवर्गः 'अनुगृहीतं किम्'? 'अनिमन्त्रिता' आदरार्हा 'अतिथयः भवनं सम्प्राप्ताः वा' आगताः किम्? 'यतः' यस्मात्-हेतोः 'एष पाकविशेषस्य' विशिष्टस्य आरम्भः' दृश्यते। आरम्भं दृष्ट्वा मन्ये ब्राह्मणा निमन्त्रिताः अतिथयो वा प्राप्ताः बूहि कतमदेतयोः। नटी प्राह—हे आर्य्य मया भगवन्तो ब्राह्मणाः निमन्त्रिताः। नटी आह 'भगवान् चन्द्रः उपरक्ष्यते किल' राहुग्रस्तो भविष्यति खलु 'इति' हेतोः निमन्त्रिताः। गृहस्थेषु ब्राह्मणभोजनं भूतये भवति इति भावः।

CHARCHA

1. अर्य्य—आर्य्यते इति कृ+ण्यत् कर्मणि आर्य्यः noble. Addressed to the husband here. आर्य्यपुत्र is the more common form of address. The deviation is because of the etiquette of the नाट्यशाला which requires that नटी and सूत्रधार should address each other as आर्य्य। Cf.—"विप्रामात्यागार्य्या नटीसूचभृती मिथः"—*Dasarupa.* सूत्रवत् is सूत्रधार।

2. आज्ञानियोगः—नि+युज् भावे नियोगः employment. Now see व्याख्या। Nom. to तिष्ठतु।

3. तवभवताम्—This is equivalent to तेषां भवताम् and implies respect. तेषाम् is changed into तव with the addition of वत् by the rule "इतराभ्योपि दृश्यन्ते"। Thus स भवान्=तव भवान्। तं भवन्तम्=तव भवन्तम्। तेन भवता=तव भवता etc. Here the two words are not necessarily compounded. If compounded, say ते भवन्तः तव भवन्तः, सुप्सुपा। तेषाम्। Qual. ब्राह्मणानाम।

4. कुटुम्बकम्—कुटुम्बानां समूहः इति कुटुम्ब + कन् etc.

5. पाकविशेष &c.—वि + शिष + घञ् भावे विशेषः speciality, excellence, etc. पाकस्य विशेषः पाकविशेषः = विशिष्टः पाकः। तस्य आरम्भः।

6. कस्मिन् निमित्ते—See under कस्य हेतोः, sl. 1. *Ante.*

7. उपरज्यते—उप + रञ्ज + लट् ते कर्मणि ; lit. is being tinted. The moon becomes a dull red—*becomes tinted*—just before an eclipse. Hence an eclipse is called उपराग। "उपरागस्तु पुंसि स्यात् राहुग्रासेऽर्कचन्द्रयोः" इति विश्वः quoted in अमरटीका।

8. आह—ब्रू + लट् तिप् स्थाने आह। Sometimes it is used in a past sense also (= उवाच) but then the word is an अव्यय।

7. सूत्र—आर्ये कृतश्रमोऽस्मि चतुःषष्टाङ्गे ज्योतिःशास्त्रे। तत् प्रवर्त्यतां भगवतो ब्राह्मणान् उद्दिश्य पाकः चन्द्रोपरागं प्रति तु केनापि विप्रलब्धासि। पश्य—

क्रूरग्रहः स केतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम्।
अभिभवितुमिच्छति बलात्——— ॥ ७ ॥

Sutra=Noble lady, I have toiled through the science of Astronomy with its sixty four branches ; so let cooking be done for the mighty Brahamanas, but, as to the eclipse of the moon, you have been misled by some one. Mark—That wicked planet Ketu is now trying forcibly to overcome the not-yet-full-orbed moon—

(इत्यर्धोक्ते) नेपथ्ये—आः क एष मयि स्थिते—

(When half uttered) In the dressing room,—Ha ! who is it that I living,—

सूत्र———रवियोगं तु बुधयोगः ॥ ७ ॥

Sutra—But conjunction with Mercury saves him.

आर्ये इति। हे 'आर्ये' मान्ये 'चतुःषष्टिः अङ्गानि' यस्य तादृशे दुःखसाध्ये 'ज्योतिःशास्त्रे कृतश्रमः अस्मि' श्रमः कृतः स च श्रमो मे सफलः। तत् ममापि अत्र वक्तव्यमस्ति 'तत्' तस्मात् ब्रवीमि 'भगवतो ब्राह्मणान् उद्दिश्य पाकः प्रवर्त्यतां' कियतां तत्र मया न निषिध्यते। 'चन्द्रोपरागं प्रति तु' चन्द्रग्रहणविषये पुनः 'केनापि विप्रलब्धा' प्रलापिता 'असि'। चन्द्रग्रहणमद्य नैव भविष्यति। कुत एवं ब्रवीमि इति चेत् 'पश्य'—अन्वयः॥ स क्रूरग्रहः केतुः इदानीम् असम्पूर्णमण्डलं चन्द्रं बलात् अभिभवितुम् इच्छति। व्याख्या—'स क्रूरग्रहः' असौ प्रसिद्धः पापग्रहः 'केतुः' [राहुग्रास इव केतुग्रासोऽपि सम्भवति। ठुण्टिराजस्तु उभयोरेकदेहोद्भवत्वात् अभेदाध्यवसानेन राहुरेव अत्र केतुशब्देन व्यपदिष्टः इति मन्यते] 'इदानीम्' अद्य 'असम्पूर्णमण्डलम्' असमग्रकलं 'चन्द्रम्' अपूर्णचन्द्रमित्यर्थः 'बलात्' साहसेन 'अभिभवितुं' कवलीकर्तुम् 'इच्छति' यतते न तु अभिभवति अभिभविष्यति वा, इच्छामात्रमस्ति नातः परं किञ्चित्। पूर्णस्यैव ग्राससम्भवात्, अद्य तु अपूर्ण इति साहसमेव। अत्र श्रोतृभिः 'स केतुः' इत्यस्य 'सकेतुः' इति समस्तरूपेण ग्रहणमपि सम्भवति, अर्थस्तु तदा भिद्यते यथा—अन्वयः॥ क्रूरग्रहः सकेतुः सन् इदानीम् असम्पूर्णमण्डलं चन्द्रं बलात् अभिभवितुमिच्छति। व्याख्या—'क्रूरः' घोरः 'ग्रहः' आग्रहः अन्द्रगुप्तपराभवाध्यवसायः यस्य स राक्षसः 'केतुना' मलयकेतुना 'सह' तदन्वितः सन् इत्यर्थः 'इदानीम्' अधुना 'असम्पूर्णम्' अवशीकृतं 'मण्डलं' कृत्स्नं प्रकृतिमण्डलं येन तं 'चन्द्रं' चन्द्रगुप्तं 'बलात्' अहता म्लेच्छबलेन जातो यो दर्पः तस्मात् 'अभिभवितुमिच्छति'। (एतमर्थमवलम्ब्य कश्चित् 'नेपथ्ये वेषरचनाभूमौ 'अङ्गीकृते' एव सूत्रधारवचने सकोपसाहं) 'आः क एष मयि स्थिते' मामनादृत्य चन्द्रगुप्तमभिसवितुमिच्छति? मयि रक्षितरि विरमतु दुर्व्यसनात् आर्यः। ततः सूत्रधारः समापयति 'बुधेन' बुधग्रहेण यौ 'योगः' एकराशिस्थितिः, स 'तु' स पुनः 'एनं' चन्द्रं 'रक्षति' ग्रासात् त्रायते। पक्षे—'बुधस्य' नयशास्त्रस्य विदुषः चाणक्यस्य यो 'योगः' सामादुपायप्रयोगः स 'तु' स पुनः 'रक्षति' चन्द्रगुप्तं त्रायते। द्वितीयेन अर्थेन काव्यवस्तु उपक्षिप्तं भवति। इत्तमार्या। लक्षणमुक्तम्।

CHARCHA

1. चतुःषष्यङ्गे—The वाचस्पत्य quotes गर्ग for twenty-four अङ्गs and forty उपाङ्गs of Astronomy. Here the distinction between *angas* and *upangas* is ignored and all are treated as अङ्ग।

2. प्रवर्त्यताम्—प्र + वृत् + णिच् + लोट् ताम् कर्मणि। कामचारानुज्ञायां लोट्।

3. चन्द्रापरागम्—उपराग eclipse (see *ante.* Para 6) चन्द्रस्य उपरागः etc. 'प्रति'इति कर्मप्रवचनीययोगे द्वितीया।

4. विप्रलब्धा—वि + प्र + लभ + क्त कर्मणि। Mis-informed.

5. क्रूरग्रहः—गृह्णाति रवितेजांसि इति ग्रह + अच् कर्त्तरि ग्रहः plant. Now कर्मधा—(see व्याख्या)। Also ग्रह + अप् भावे persistence. Now बहुव्रीहि (see व्याख्या)। In the latter case the epithet refers to the minister राक्षस (see व्याख्या)।

6. स केतुः—Uncompounded, स is प्रसिद्धार्थ' and केतु is the lower half of the body of राहु (The latter was cut down into two by विष्णु at the time when अमृत was being distributed to the gods after the churning of the ocean). In the second explanation, the words are compounded, giving the बहुव्रीहि compound सकेतुः (=केतुना सह)। केतु now is a contraction for मलयकेतु (Comp. भीम for भीमसेन)। And सकेतुः is a विशेषण of क्रूरग्रहः which refers to राक्षस। We may however even in this case leave the two words uncompounded and explain—स भवतां पूर्वपरिचितः केतुः मलयकेतुः etc. क्रूरग्रहः now qualifies केतुः। We have given above the mythological account of केतु। Astronomically राहु is the ascending node and केतु the descending node of the moon's orbit. Eclipses take place at both nodes. Those in the one being राहुग्रास while those in the other are मोक्षग्रास।

7. चन्द्रमसम्पूर्णमण्डलम्—दृष्टि splits up चन्द्रमसं पूर्णमण्डलम्। This however contradicts the last line of the verse (see under बुधयोगः below).

8. बलात्—See व्याख्या। In the first interpretation it is an अव्यय। In the second say बलमुपसंख्यत्व इति स्वप्योपे ङसी। Note

that बलमाश्रित्य, relying upon strength, suits the first interpretation also.

9. बुधयोग:-बुध, Mercury is very close to sun and has his orbit much closer than that of the earth. Hence, as seen from the earth, it is always close to the sun, being only a few degrees from it even when most remote. The moon having बुधयोग is thus also close to the sun. Hence the time is near अमावस्या। Consequently the moon is bound to be असम्पूर्णमण्डल। Hence the contradiction indicated. This also explains why we prefer our reading to Telang's चन्द्रमसं पूर्णमण्डलम्।

8. नटी—अज्ज, को उण एसो धरणीगोअरो भविअ चन्दं गहाभिजोआदो रक्खिदुं इच्छदि [आर्य्य कः पुनरेष धरणीगोचरो भूत्वा चन्द्रं ग्रहाभियोगात् रक्षितुम् इच्छति]।

Nati—Noble Sir, who is this that, having the earth for his quarters, ventures to guard the moon from planetary aggression?

सूत्र—आर्य्ये, यद्यप्यं मयापि नोपलक्षितः। भवतु भूयोऽभियुक्तः खल्वप्यसावुपलप्स्ये (क्रूरग्रहः इत्यादि पुनस्तदेव पठति)।

Sutra—Noble lady, really he was not noticed by me too. However attempting again, I shall obtain the identification of his voice *(respeats* the verse क्रूरग्रहः *etc.)*.

(नेपथ्ये)—आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति।

(In the dressing room)—Ha! who is it that, I living, dares to overcome Chandragupta?

सूत्र—(आकर्ण्य) आर्य्य, ज्ञातम्—

कौटिल्यः—(इत्यर्द्धोक्ते नटो भयं नाटयति)

Sutra—Listening, Ha! found. Kautilya—(*when half uttered Nati acts fright*).

सूत्र———कुटिलमतिः स एष येन
क्रोधाग्नौ प्रसभमदाहि नन्दवंशः।
चन्द्रस्य ग्रहणमिति श्रुतेः सनाम्नो
मौर्य्येन्दोर्द्विषदभियोग इत्यवैति ॥ ८ ॥
तदित आवां गच्छावः (इति निष्क्रान्तौ)।

इति प्रस्तावना।

Sutra—Kautilya it is, who, on hearing of the ग्रहण (suppression) of चन्द्र, understands enemy-attack upon the moon like Mauryya who has a similar name—Kautilya, at heart in-sincere, by whom the race of Nanda was promptly consumed in the fire of his warth. So let us be off from here (*They depart*).

Here ends the Prelude.

आर्य्य कः इति। नेपथ्योक्तं प्रति नटी प्राह 'हे आर्य्य' भवान् ब्रवीति आकाशे बुधयोगश्चन्द्रमसं रक्षतीति 'एष पुनः कः धरणी गोचरः' देशो यस्य तादृशो 'भूत्वा' नेपथ्यस्थित एव इत्यर्थः 'चन्द्रं ग्रहस्य अभियोगात्' पीडनात् 'रक्षितुमिच्छति' ? सूत्रधार आह 'आर्य्ये यत्सत्यम्' तत्त्वत एव भवत्या इव 'मयापि न उपलक्षितः' न निरूपितः क एष इति। 'भवतु' यावत् तत् 'भूयः' पुनरपि 'अभियुक्तः' व्यापृतः सन् क्रूरयज्ञ इत्यादि वदन् 'खरस्य' कण्ठध्वनेः व्यक्तिम्' अभिव्यञ्जनं निर्णयनित्यर्थः 'उपलक्षये' प्राप्स्यामि ज्ञास्यामि ज्ञास्यामि इत्यर्थः कण्ठ इति भावः। एवम् अभिनन्द्य ('तदेव क्रूरयज्ञ इत्यादि पुनः पठति') तच्छ्रुत्वा सोऽपि 'नेपथ्ये' स्थितः पुरुषः पुनराह सकोपम् 'आः मयि स्थिते कः एष' मूर्खः 'चन्द्रगुप्तम् अभिभवितुमिच्छति' सद्यः सगुप्तं यथास्यैनम्। ('आकर्ण्य' श्रुत्वा) सूत्रधारः प्राह 'आर्य्ये ज्ञातम्' खरव्यक्तिरुपलब्धा। अन्द्रगुप्तस्य अमात्यः 'कौटिल्यः

चाणक्यः ('अर्धोक्ते' असमाप्ते एव वचसि 'नटो भयं नाटयति' अभिनयते) सूत्रधारो वदन्नेवासीत्—अन्वयः ॥ येन क्रोधाग्नौ नन्दवंशः प्रसभमदाहि स एष कुटिलमतिः कौटिल्यः चन्द्रस्य ग्रहणम् इति श्रुतेः सनात्रः मौर्य्येन्दोः द्विषदभियोगः इति अवैति । व्याख्या—'येन' ब्राह्मणेन 'क्रोधाग्नौ' कोपवह्नौ 'नन्दवंशः' राज्ञो नन्दस्य कुलं नव नन्दा इति यावत् 'प्रसभं' झटिति 'अदाहि' दग्धः चन्द्रगुप्तश्च राजा कृतः 'स एषः' नेपथ्यगतो जनः 'कुटिलमतिः' क्रूराशयः 'कौटिल्यः' चाणक्यः 'चन्द्रस्य ग्रहणमिति श्रुतेः' अस्य श्रवणात् 'सनात्रः' तुल्याख्यस्य मौर्य्येन्दोः इन्दुतुल्यस्य मौर्य्यस्य चन्द्रगुप्तस्य आत्मप्रतिष्ठापितस्य 'द्विषता' शत्रुणा 'अभियोगः' आक्रमणम् 'इति अवैति' एतत् मन्यते ततश्च कोपादेव भाषते । कष्टं स्यात यदि स आगत्य तथा मन्त्रयमाणौ नौ पश्येत 'तत्' तस्मात् 'आवाम् इतः' अस्मात स्थानात् 'गच्छावः' (इत्युभौ 'निष्क्रान्तौ' रङ्गमुच्चादपगतौ) । एतन्मात्रं 'प्रस्तावना' कथामुखम । ["ना त्रौ गस्त्विदृश्यतिः प्रहर्षिणीयम्" इति प्रहर्षिणीलक्षणम्] ।

CHARCHA

1. धरणीगोचरः—गावश्चरन्ति अस्मिन् इति गो + चर + घ अधिकरणे संज्ञायाम् **गोचरः** lit. pasture land, but it is a सज्ञा of *any site* Next बहुव्रीहि (See व्याख्या) । Pred. to कः ।

2. ग्रहाभियोगात्—अभि + युज + घञ् भावे अभियोगः attack. ग्रहस्य (see ante para 7) अभियोगः । तस्मात् । भूमौ in connection with the ताण्ड root in रचितुम् ।

3. अभियुक्तः—अभि + युज + क्त कर्तरि अभियुक्तः employed, attentive. This may mean either that he wants to *employ* bimself in repeating the verse, or to be more *atte ntive* after the repetition.

4. स्वरव्यक्तिम्—वि + अञ्ज + क्तिन् भावे व्यक्तिः disclosure, identification, etc. स्वरस्य व्यक्तिः etc. obj. of उपलप्स्ये उप + आ + लभ लृट् स्ये) ।

5. आकर्ण्य—आ सम्यक् कर्णेन गृहीत्वा इति आ + कर्ण + णिच् (नामधातु) + ल्यप् ।

6. कुटिलमतिः—चाणक्य was a hard-hearted politician, hence necessarily कुटिलमतिः । Illustrations of his कुटिलता may be seen

in the total destruction of the नन्द family, but pre-eminently in the assassination of the mountain-prince पर्वतक who had helped him in raising चन्द्रगुप्त to the throne of नन्द। See *Intro.*

7. प्रसभम्—The Puranas say नन्द with his eight sons was killed within seven days of the insult to Chanakya (see Introduction). Hence प्रसभम् quickly. Our poet, however, does not seem to believe this story of quick work, for we see that चाणक्य after having vowed the destruction of नन्द got hold of a friend, introduced him to नन्द's ministers and waited till his friend became intimate with राक्षस (see अस्माकं सहाध्यायि मित्रम् etc. Act I *Infra*). This could not have been done in such a short time as one week only.

7. A. अदाहि—दह+लुङ् त कर्मणि। was burnt. Nom येन। Agrees with उक्तकर्म—नन्दवंशः।

8. नन्दवंशः—चाणक्य was insulted by नन्द and vowed his destruction in which he was successful (see *Intro*).

9. चन्द्रस्य ग्रहणम्—This is only for the sake of the metre; the actual words used were चन्द्रमभिभवितुमिच्छति (see *ante*)।

10. श्रुतेः—ईतौ ५मी। (See under दाहभीतेः, sl 2).

11. सनाम्नः—समानं नाम अस्य सनामा। तस्य। Qual. मौर्य्येन्दोः। समान becomes स by the rule "ज्योतिर्जनपद—"। The moon is चन्द्र, and मौर्य was चन्द्रगुप्त which is often contracted into चन्द्र; hence the similarity in name.

12. मौर्य्येन्दोः—सुरा, a Sudra woman, was, according to the पुराणs, the second wife of नन्द। सुरायाः अपत्यं पुमान् इति सुरा+ण्य मौर्य्यः (by "कुर्वादिभ्यो ण्यः"। कुर्वादि includes सुर and therefore the feminine सुरा also), *i. e.*, चन्द्रगुप्त। मौर्य्यः इन्दुरिव मौर्य्येन्दुः। तस्य, ग्रहे षष्ठी or उभयप्राप्तौ कर्मणि षष्ठी (see next). ढुण्ढिराज says चन्द्रगुप्त was a son of सर्वार्थसिद्धि। This is not however our poet's story. The poet also seems to be inclined not to treat सुरा as wife of नन्द (see *Intro.*).

13. विषदभियोगः—विषता अभियोगः or विषतः अभियोगः। Before

componnding, we had द्विषन् सौर्य्येण्डुम् अभियुङ्क्ते। On going to attach a क्त we see that there is उभयप्राप्ति here. So we attach ष्ठतीया to कर्त्ता and षष्ठी to कर्म। Thus द्विषता अभियोगः। द्विषतः अभियोगः is also allowable by the Varttika "शेषे विभाषा"। शेषषष्ठी is of course available in all cases. इति योगे १मा।

14. प्रस्तावना—प्र+स्तु+णिच्+युच् भावे स्त्रियां प्रस्तावना prelude. The साहित्यदर्पण thus defines प्रस्तावना—"नटी विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥ चित्रैर्वाक्यैः स्वकार्य्यैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥" The प्रस्तावना here is a कथोद्घात in which the actor enters taking up the words of the सूत्रधार। Thus—"स्वसंविद्वत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः। गृहीत्वा प्रविशेत् पात्रं कथोद्घातो हि देव सः॥"—*Dasarupa.* Here सूत्रिणः = सूत्रधारस्य।

15. अवैति—अव+इ+लट् ति। Knows. Nom. कौटिल्यः।

9. (ततः प्रविशति मुक्तां शिखां परामृशन् चाणक्यः)

चाणक्यः—कथय क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति।

आस्वादितद्विरदशोणितशोणशोभां
सन्ध्यारुणामिव कलां शशलाञ्छनस्य।
जृम्भाविदारितमुखस्यमुखात् स्खलन्तीं
को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम्॥ ९॥

(Now Chanakya enters feeling the loose tuft of hair on his crest).

Chanakya—Tell me, who is it that, I living, dares to overcome chandragupta? Who dares defiantly to extract form the mouth of the lion whose jaws have been opened by a yawn, the fiery tooth which is red in appearance from the elephant's blood just tasted and is thus shining like the lunar digit reddened at dusk?

ततः प्रविशति इति। 'ततः' तदनन्तरं 'मुक्ताम्' असंयतां 'शिखां' चूडां शिरःस्थं केशसंघातमिति यावत् 'परामृशन्' करेण स्पृशन् 'चाणक्यः प्रविशति' ब्रूते च 'मयि स्थिते' स्थितं मामनादृत्य ["षष्ठी चानादरे" इति चकारात् अनादरे सप्तमी] 'क एष चन्द्रगुप्तमभिभवितुमिच्छति कथय' तस्य नाशाय पुनः प्रतिज्ञाम् आरोहामि। अन्वयः॥ कः जृम्भाविदारितमुखस्य हरेः मुखात् आस्वादित-स्थिरदशोणितशोणशोभां मृगलाञ्छनस्य सन्ध्यारुणां कलाम् इव स्फुरन्तीं दंष्ट्रां परिभूय हर्तुमिच्छति। व्याख्या—'कः' एष 'जृम्भया' श्रान्तिजनितचेष्टाविशेषेण 'विदारितं' व्यात्तं 'मुखं' यस्य तस्य 'हरेः' सिंहस्य 'मुखात् आस्वादितं' यत् 'स्थिरदशोणितं' मजारक्तं तेन 'शोणा' अरुणा 'शोभा' यस्याः तादृशीम् अतएव 'मृगलाञ्छनस्य' चन्द्रस्य 'सन्ध्यया अरुणां कलामिव स्फुरन्तीम्' अवभासमानां 'दंष्ट्रां' दशनं 'परिभूय' अवमत्य 'हर्तुम्' उन्मूलयितुम् 'इच्छति' कथय इतिपूर्वेण अन्वयः। गजघातनात् श्रान्तेन हरिणा जृम्भितम्। एतदवसरे दन्तोत्पाटनचेष्टा निश्चितं प्राणनाशिनी। एव नन्दगजं विनाश्य चाणक्यकेसरी किञ्चिदिव श्रान्तो जृम्भते, न हि स सृतः, अतान्तरे क एष अस्य दंष्ट्रास्वरूपं चन्द्रगुप्तम् उन्मूलयितुमिच्छति? अहो साहसम्! इति भावः। [वसन्त-तिलकं छन्दः। "स्यादियं वसन्ततिलकं तभजा जगौ गः" इति लक्षणात्]।

CHARCHA

N. B—The Scene lay in चाणक्य's house at Kusumapura.

1 मुक्तां शिखां परामृशन्—प्राक् प्रतिज्ञावसरे मुक्ता शिखा। तीर्थयात्रां अपि प्रतिज्ञायां चन्द्रगुप्तलक्ष्मीः यद्यपि स्थैर्यं न आसादिता इति न पुनर्बध्ना। cf. "आरुह्यारुढकोपस्फुरणविघलिताग्राकुलीमुक्तचूडां लोकप्रत्यक्षमुग्रां सकलरिपुकुलोच्छेद-दीक्षां प्रतिज्ञाम्" etc., Act III. sl. 27. परामृशन्=touching. This shows readiness for another vow. It was a habit, a kind of another instinct, with चाणक्य to unloosen the tuft when uttering a vow. On the present occasion, the सूत्रधार's words prompted him to take another vow, and instinctively the hand flew to the tuft though the tuft was hanging loose already. cf. "शिखां मोक्षु वज्रामपि पुनरयं यावति करः" etc. Act. III. sl. 29

2. *Remark*—After this, some read पश्य आस्वादितस्थिर etc. :

But taking पश्य with the verse following, we get पश्य क इच्छति which seems incongruous. We have therefore omitted पश्य।

3. आस्वादित etc—दो रदौ दन्तौ अस्य द्विरद। Now see व्याख्या। द्विरद draws attention to the formidable tusks and implies great effort in killing the elephant, next follows a full meal of blood hence the जृम्भा। Qual. दृप्तम्।

4. सन्ध्यारुणाम्—The lunar digit is seen at dusk at the beginning of the bright fortnight Hence the कला will grow which implies further accession to चन्द्रगुप्त's power

5. जृम्भाविदारित etc.—For analysis see व्याख्या। The lion only yawns, and is not dead yet, so beware (Qual. हरे।

6. मुखात्—From the very jaws! Look at the impudence.

7. हरे—Of the lion himself, not of an ordinary dog or of a mean jackal

8 परिभूय—Used intransitively परिभवनानुकूलव्यापार कृत्वा। The implication is of course हरिं परिभूय दृप्त इच्छति, though this is not said directly.

9 *Remark*—"चाणक्य is हरि" implies wakefulness in चाणक्य and also power to punish. चन्द्रगुप्त is चाणक्य's tooth, because, owing to delegated power it is through him that चाणक्य bites दृढिराज's remarks here are worth-quoting—"का नाम इति (? क एष) राक्षसस्य साहसिकत्व दु.खसाध्यसाधकत्वादयो गुणा सूचिता। हरे दृप्तमिति मौर्य्यश्रियो दुरुद्धरत्व सूचितम। आस्वादितेति अचिरकृतगन्दवश्यवधरोष. अद्यापि न शान्त इत सूचितम। सन्ध्यारुणचन्द्रकलादृष्टान्तेन मौर्य्यश्रा. अभिनवा वर्द्धिष्णु. विश्वासिनन्या इति च सूचितम्। जम्भाविदारितमुखस्य इति स्वस्य अस्मिन् विषये अतिजागृत्ता ध्वनिता। स्फुरन्तौमिति समग्राङ्गतया लक्ष्या वैरिदु साध्यत्वमुक्तम्। एव जागृतोऽपि मम पौरुष परिभूय अवज्ञाय मौर्य्यलक्ष्मीं हर्तुम् यतते इत्यहो अतिशूर दक्षनीतिपारदृश्वा स्वामिकार्य्यधुर्य्य. राक्षस: अवश्य संग्राह्य. इति चाणक्यौत्सुक्य-मात्ररूपा बीजस्य आरम्भावस्था अर्थत: सूचिता। चन्द्रगुप्तलक्ष्मीर्य्यफलकस्य राक्षससंग्रहरूपकार्य्यस्य हेतु: अनुकूलदैव: चाणक्यनीतिप्रयोगो बीजम्।"

10. अपिच—

नन्दकुलकालभुजगीं कोपानलबहुलनीलधूमलताम् ।
अद्यापि बद्ध्यमानां वध्यः को नेच्छति शिखां मे ॥ १० ॥

Moreover, whe is it that deserves death and does not even now like the tuft of hair on my crest being tied back—the tuft which is like the deep black line of smoke of my fiery wrath like a cobra to the family of the Nandas ?

अन्वयः ॥ वध्यः कः नन्दकुलकालभुजगीं कोपानलबहुलनीलधूमलता मे शिखाम् अद्यापि बद्ध्यमानां न इच्छति । व्याख्या—'वध्यः' वधार्हः 'कौ' जनः 'नन्दकुलस्य' सम्बन्धे "कालभुजगीं" कृष्णसर्पीमिव 'अनलः' इव यो मे 'कोपः' तस्य 'बहुलनीलाम्' अतिकृष्णां 'धूमलताम्' इव 'मे शिखाम् अद्यापि' नन्दवंशध्वंसेऽपि 'बद्ध्यमानां' संयम्यमानां 'न इच्छति' ? को जनः मां भूयोऽपि मुक्तया शिखया प्रतिज्ञारूढं कृत्वा आत्मविनाशं प्रार्थयते ? एष तं हन्मि इति भावः । अत्र ढुण्ढिराजः "मलयकेतुनिगृहं विना शिखां न बध्नामि इति पदस्य निष्कृष्टोऽर्थः" इति । इयमार्या ; उक्तं लक्षणम् ।

CHARCHA

1. नन्दकुल etc.—कालभुजगी = कृष्णसर्पी, नित्यसमास । जातौ ङीष् । By transference of epithets this means *like* कालभुजगी । नन्दकुलस्य कालभुजगी etc. Qual. शिखाम् ।

2. कोपानल etc.—बहुल = excessive. बहुलं नीला, मुण्मुपा । बहुल-नीलधूमलता = *like* बहुलनीलधूमलता as before. कोपानलस्य बहुलनील-धूमलता etc Qual. शिखाम् । mark the destructive natue of the शिखा ।

3 अद्यापि—The attempt at invasion by मलयकेतु shows that मौर्य्यलक्ष्मी is not yet स्थिरा, hence the necessity of leaving the शिखा untied. Otherwise I would have tied it back.

4. वध्यः—वधमर्हति इति वध + य । मलयकेतु is वध्य because of this attempt at invasion.

5. *Remark*—Here ढुण्ढि remarks "नैल्यकौटिल्यगुणेन कालभुजगी-धूमलतात्वेन निरूपणम्" । In other words, he makes a रूपक by identifying शिखा with कालभुजग and धूम । But it grates the ear to have in one breath an identification, at first with a कालभुजग

and again with धूम, and lastly to have it taken in its own character as a शिखा (वर्त्तमाना requires that शिखा should be taken as शिखा and not as कालभुजग or धूम) । उपमा, however, as explained in the व्याख्या is quite legitimate, because the common attributes differ with कालभुजग and धूम । Of course दृष्टि makes the common attributes the same (see नैस्वकौटिल्य etc.), but it will be advantageous to say that the शिखा resembles कालभुजगी owing to its deadly effects on the नन्दs । (see Intro.)

11. अपिच—

उल्लङ्घयन्ममसमुज्ज्वलतः प्रतापं
कोपस्य नन्दकुलकाननधूमकेतोः ।
सद्यः परात्मपरिमाणविवेकमूढः
कः शालभेन विधिना लभतां विनाशम् ॥ ११ ॥

शार्ङ्गरव, शार्ङ्गरव ।

Besides, who, slow to gauge the strength of self and adversary, is forthwith to suffer destruction after the fashion of a moth, crossing the flame of my wrath—the fire unto the forest of the family of Nanda—that is about to blaze (*Or blazing*) the brighter ? Sarangarva, Sarangarva.

उल्लङ्घयन् इति । अन्वयः ॥ परात्मपरिमाणविवेकमूढः कः मम समुज्ज्वलतः नन्दकुलकाननधूमकेतोः कोपस्य प्रतापं शालभेन विधिना उल्लङ्घयन् सद्यः विनाशं लभताम् ? व्याख्या—'परस्य' प्रतिपक्षस्य 'आत्मनः' स्वस्य च यत् 'परिमाणं' मात्रा सामग्री सामर्थ्यमिति यावत् तस्य 'विवेके' विविच्य ग्रहणे 'मूढः' असमर्थः 'कः मम समुज्ज्वलतः' दीप्यमानस्य 'नन्दकुलम्' एव यत् 'काननं' वनं तस्य सम्बन्धे 'धूमकेतुः' अग्निरिव यः 'कोपः' तस्य 'प्रतापं' शिखातुल्यं प्रभावं 'शालभेन विधिना' पतङ्गरीत्या पतङ्ग इव स्वयमेव 'उल्लङ्घयन्' उल्लङ्घयिष्यन् [वर्त्तमानसामीप्ये शतृ] 'सद्यः' सत्वरं 'विनाशं लभतां' मरणं भजताम् [विधौ लोट]। वसन्ततिलकं वृत्तम् । लक्षणन्तु उक्तम् ।

CHARCHA

1. उल्लङ्घयन्—समुज्ज्वलन precedes उल्लङ्घन। Hence with वर्त्तमान in समुज्ज्वलतः we should have भविष्यत् in उल्लङ्घयन् making it उल्लङ्घयिष्यन्। For कोप, this means, setting at naught. For धूमकेतु, it means, leaping over.

2. समुज्ज्वलतः—For कोप this means *rising*; for धूमकेतु it = *kindling*.

3. प्रतापम्—For कोप this = brunt; for धूमकेतु it = heat, flame.

4. नन्दकुल etc.—धूमकेतुरिव कोपः is preferable to धूमकेतुरूपः कोपः, because the aggressor is not identified with शत्रुभ। कः शालभेन विधिना observes a distinction between शत्रुभ and the person referred to by कः।

5. परात्म etc.—For analysis see व्याख्या। Qual. कः। None but a मूढ़ can thus behave with me.

6. शालभेन विधिना—The aggressor's methods are *like* those of a शत्रुभ, the aggressor is not identified with शत्रुभ; hence we have rejected ड्रूस्ड्रि's रूपक in नन्दकुलवाननधूमकेतोः।

7. लभताम्—The speaker wishes the destruction of the aggressor, and over and above that, vaunts of his power to realise the wish. Hence there is here not a mere आशीः as in Magha's "तव दुरासदवीर्य्यविभावसौ शलभता लभतामसृदग्रहः", but also the pronouncement of a doom. It is a विधि। Hence विधौ लोट्। Nom. कः।

8. शार्ङ्गरव—This is the name of a disciple. The repetition implies impatience (संभ्रम), because चाणक्य soliloquises standing and he notices no seat provided for him. This shows the temper of the speaker.

12. (प्रविश्य) शिष्यः—उपाध्याय, आज्ञापय।

Pupil (*entering*)—preceptor, command me.

चाणक्यः—वत्स, उपवेष्टुमिच्छामि।

Chanakya—I mean to sit down, my boy.

शिष्यः—उपाध्याय, ननु इयं सन्निहितवेत्रासना एव द्वार प्रकोष्ठशाला। तदस्यामुपवेष्टुमर्हति उपाध्यायः।

Pupil—Well preceptor, the shed at the entrance of the gate yard has indeed the cane-seat arranged therein; so therein it behoves the preceptor to sit down.

प्रविश्य इति। आगते शिष्ये चाणक्यः किञ्चिदिव कोपेनाह 'वत्स' किं न पश्यसि स्थित एवाहम् तत् 'उपवेष्टुम् इच्छामि' आसनं कल्पय। विस्मितः शिष्य आह 'ननु उपाध्याय' आचार्य्य किमेव ब्रवीषि 'द्वारप्रकोष्टे' द्वाराङ्गने या 'शाला' कुटी सा 'सन्निहितं' समीपस्थं 'वेत्रासनं' यस्यां तथाविधा 'एवं भवदर्थं कल्पितासना एव पुरो दृश्यते न हि विस्मृता मया त्वदीया आसनसज्जा 'तत् अस्यां' शालायां वेत्रासने 'उपाध्यायः उपवेष्टुमर्हति'।

CHARCHA

1. उपाध्याय—उपेत्य अधीते अस्मात् इति उप + अधि + इङ् + घञ् अपादाने संज्ञायाम् Professor, Preceptor etc. Case of address.

2. वत्स etc.—This is a mild rebuke to the pupil. I have been standing long without a seat being offered by you!

3. ननु—The pupil is a little piqued because of the undeserved rebuke, and answers with some warmth. ननु implies आक्षेप (censure) "नन्वाक्षेपे परिप्रश्ने प्रत्युक्तावधारणे" इति हैमः।

4. सन्निहित etc.—सम + नि + धा + क्त कर्मणि सन्निहित placed near, at hand. वेत्रनिर्मितम् आसनं वेत्रासनम्। Next वह—, see व्याख्या। चाणक्य had not noticed this through pre-occupation.

13. चाणक्यः—वत्स, कार्य्याभियोग एव अस्मान् व्याकुलयति, न पुनः उपाध्यायसहभूः शिष्यजने दुःशीलता। (नाट्येन उपविश्य आत्मगतम्) कथं प्रकाशतां गतः अयमर्थः पौरेषु, यथा किल नन्दकुलविनाशजनितरोषो राक्षसः पित्र-

बधामर्षितेन सकलनन्दराज्यपरिपणनप्रोत्साहितेन पर्वतकपुत्रेण मलयकेतुना सह संधाय तदुपगृहीतेन च महता म्लेच्छबलेन परिवृतो वृषलमभियोक्तुमुद्यत इति ? (विचिन्त्य) अथवा येन मया सर्वलोकप्रकाशं नन्दवंशवधं प्रतिज्ञाय निस्तीर्णा दुस्तरा प्रतिज्ञासरित् सोऽहम् इदानीं प्रकाशीभवन्तमपि एनमर्थं न समर्थं किं प्रशमयितुम् ?

Chanakya—My child, it is only application to work that distracts me and not the inborn perverseness of preceptors towards disciples. (*Acting sitting—to himself*) What! has this matter got currency among the citizen that Rakshasa, with his ire excited by the destruction of the family of Nanda having entered into a compact with Malayaketu, son of Pavrataka, who is angered by the murder of his father and is incited with the offer of the entire kingdom of Nanda, is about to war upon Vrishala being backed by a vast force of *Mlechhas* called by Malayaketu ? (*Reflecting*) But am I not able now this matter though going (*? gone*) out—I by whom has been successfully crossed the hardly crossable stream of vow after the destruction of the family of Nanda was vowed publicly before the whole world ?

वत्स इति । ह्रै 'वत्स' व्याकुलत्वात् मया आसनं न दृष्टम्, अकारकम् उपाध्यायोऽसि । 'कार्य्याणां' यः 'अभियोगः' युगपदुपस्थितिः—यद्वा 'कार्य्येषु' यः अभियोगः एकाग्रता—स 'एव अज्ञान्' मां 'व्याकुलयति' व्याकुलं करोति 'न पुनः उपाध्यायानाम्' आचार्य्याणां 'सहजः' सहजा स्वाभाविकी इत्यर्थः या 'शिष्यजने' छात्रं प्रति 'दुःशीलता' दुर्वृत्तता व्याकुलयति । कार्य्यचिन्तया व्याकुलोऽहम् न च त्वयि दुःशीलः, तत् तिरस्कृतो मा शोची: । ('नार्य्यं न उपविश्य' उपविश्यनमिनीय 'आत्मगतम्' अन्वीक्ष्यतं यथा मृतया आह) 'कथम्' आश्चर्य्ये । 'अयमर्थः' एव इत्यादः:—'यथा किल' यत् खलु

'नन्दकुलस्य विनाशेन जनितः रोषः' यस्य तादृशः 'राक्षसः' तन्नामा नन्दामात्यः 'पिटवधेन' हेतुना 'अमर्षितेन' कोपितेन 'सकलनन्दराज्यस्य' यत् 'परिपणनं' द्यूतकलेन अवस्थापनं तेन 'प्रोत्साहितेन' प्रेरितेन राज्ञः 'पर्व्वतकस्य पुत्रेण मलयकेतुना सह संधाय' मिलित्वा 'तेन' मलयकेतुना 'उपगृहीतेन' सम्भृतेन 'महता' विपुलेन 'म्लेच्छबलेन' यवनसैन्येन 'परिवृतस्य' समेत एव 'हृतं' गृहं चन्द्रगुप्तम् 'अभियोक्तुम्' आक्रमितुम् 'उद्यतः' उद्युक्तः 'इति' अयमर्थः—'पौरेषु' नगरवासिषु 'प्रकाशतां गतः' प्रचारं प्राप्तः किम्? (प्राप्ता विपत्, किमत्र कार्य्यम् इति 'विचिन्त्य' ध्यात्वा) 'अथवा' अलं चिन्तया, प्रकाशं गत एव चेत् किं मे तेन? 'येन मया सर्वेषु' न केवलं पौरेषु 'प्रकाशं' प्रकटं यथा तथा 'नन्दवंशबंध प्रतिज्ञाय दुस्तरा' दुरतिक्रमा 'प्रतिज्ञारूपा सरित्' नदी 'निस्तीर्णा' अतिक्रान्ता 'स' तथाविधः तीर्णदुःखप्रतिज्ञः 'अहं प्रकाशीभवन्तमपि' प्रचारं गच्छन्तमपि 'एनमर्थं' राक्षसाक्रमणरूप 'प्रशमयितुं' निराकर्तुं 'न समर्थः' शक्तः 'किं' शक्त एव। तद्वत प्रकाशं का चिन्ता इति भावः। एतेन उपस्थिते विग्रहे राक्षसस्य पराजयं सूचयति चाणक्यः।

CHARCHA

1. कार्य्याभियोगः—अभि+युज+घञ् भावे अभियोगः attention, pressure- Now see व्याख्या। Remembering that अभि implies आभिमुख्य, the latter sense yields the meaning युगपदुपस्थिति as in the व्याख्या। Some read अभिनियोग but throughout the book we have अभियोग which is therefore preferred.

2. व्याकुलयति—वि+आ+कुल+अच् कर्त्तरि व्याकुलः। व्याकुलं करोति इति व्याकुल+च्वि+णिच् तिप्।

3. उपाध्यायसहभूः—सह युगपत् भवति इति सह+भू+क्विप् कर्त्तरि सहभूः born simultaneously with. उपाध्यायानां सहभूः etc. Qual. दुःशीलता। This implies that preceptors are as a rule very hard towards their pupils.

4. नन्दकुल etc.—For analysis see व्याख्या। The story of the destruction of the नन्द's will be found in the Introduction.

5. पिटवध etc.—मर्षणं मर्षः भावे घञ् forbearance. न मर्षः; अमर्षः

anger. अमर्षः सञ्जातः अस्य इति अमर्षितः। Or अमर्षेण योजित इति अमर्ष + णिच् + क्त कर्मणि अमर्षितः। पितृवधेन अमर्षितः। His father पर्वतक was caused to be assassinated by चाणक्य। See *Intro.*

6. सकलनन्द etc.—For analysis see व्याख्या। परि + पण व्यवहारे (to trade) + ल्य ट् भावे परिपणनम् staking. परिपणायन is an optional form by the rule "आयादय आर्धधातुके वा"। The whole kingdom was offered in exchange for the service मलयकेतु will have to render. There is emphasis on सकल। The *whole*, because, with the death of सर्वार्थसिद्धि, Nanda's line had become extinct and there was no real heir to the throne (see Intro.). The price offered was too tempting to resist.

7. पर्वतकपुत्रेण—पर्वतक was a mountain-prince somewhere near the northern border of India, as is seen from the fact that कुसुमपुर was about a week's journey to the south from the capital of पर्वतक। cf.—"योजनशतं समधिकम्", "युष्माकमुत्तरस्यां दिशो दक्षिणां दिशं प्रस्थितानाम्" etc. Act. IV,

8. तदुपगृहीतैः—उपगृहीत signifies that the force was not मलयकेतु's standing army but brought together by him for the present purpose.

9. म्लेच्छबलेन—म्लेच्छन्ति इति म्लेच्छ + अच् कर्तरि म्लेच्छाः those who speak an unintelligible tongue, म्लेच्छानां बलं म्लेच्छबलम्। तेन। Some read म्लेच्छराजबलेन। म्लेच्छानां राजानः म्लेच्छराजाः। तेषां बलेन etc., म्लेच्छ was a general name for all people who spoke a different tongue from the Aryans. In time it came to be applied also to those who differed in manners and customs. In the present war the *Mlechchas* speak Sanskrit, observe Hindu rites and ceremonies and are in almost all respects undistinguishable from the Hindus. We shall see later that these princes came from the borders of India.

10. वृषलम्—वृषल is a शूद्र। चन्द्रगुप्त was a शूद्र by birth. Hence he was so called by चाणक्य। Some of the मौर्यs read

वृषलो गच्छने गुप्ते चन्द्रगुप्ते च वाजिनि" making वृषल a proper name of चन्द्रगुप्त। Our poet differs. Cf.—"तत् स्थाने खलु अस्य वृषलोत्थः चन्द्रगुप्तः"—Act III.

11 सर्वलोकप्रकाश्यम्—For analysis see व्याख्या। The force is—My vow was in presence of the *whole world* (सर्वलोक), yet I got through it successfully. The present matter has spread in this city only (पौरेषु)। This is a much smaller matter. The fact is चाणक्य thought, no one knew of the coming invasion. But what he then heard from the सूत्रधार led him to think otherwise and suspect that the news had already spread among the citizens. However, he did not care.

12. निस्तीर्णा दुस्तरा—निर् or निस् तॄ+क्त कर्मणि। दुर् or दुस्+तॄ+खल कर्मणि। स does not become ष because it is पदान्त, the rule being "पदान्तस्य मूर्द्धन्यः"। दुष्कर, निष्क्रम्य etc. fall under a special rule—"इदुदुपधस्य चाप्रत्ययस्य"—when कवर्ग or पवर्ग follows.

13 प्रकाशीभवन्तम्—Better say प्रकाशीभूतम्, because a few lines above we have प्रकाशं गतः अयमर्थः not प्रकाशं गच्छन् etc.

14 कुतः ? यस्य मम—

श्यामीकृत्याननेन्दूनरियुवतिदिशां सन्ततैः शोकधूमैः
कामं मन्त्रिद्रुमेभ्यो नयपवनहृतं मोहभस्म प्रकीर्य्य।
दग्ध्वा सम्भ्रान्तपौरद्विजगणरहितान् नन्दवंशप्ररोहान्
दाह्याभावान्न खेदाज्ज्वलन इव वने शाम्यति क्रोधवह्निः ॥११

Whence (is this assurance) ? (Is that what you ask of me ? Mark then)—The fire of my wrath, like fire in a forest, after having blackened the moons of the faces of the quarters in the shape of the damsels of my enemies with the soot of grief that was ceaseless, having liberally scattered over the trees of ministers the ash of delusion carried by the wind of

my polity, and after having burnt down the reed of Nanda and its sprouts that were deserted by the startled birds of the citizens, now goes out not through exhaustion but from lack of further materials to burn.

कृत: इति : 'कृत:' एव ब्रवीमि इति चेत्—अन्वय: ॥ यस्य (? पश्य) मम क्रोधवह्नि:' अरियुवतिदिशाम् आननेन्दून् सन्ततै: शोकधूमै: श्यामीकृत्य मल्लिद्रुमेभ्य: नय-पवनहृतं मौढ्यभस्म कामं प्रकीर्य्य, संभ्रान्तपौरद्विजगणरहितान् नन्दवंशप्ररोहान् दग्ध्वा वने ज्वलन इव दाह्याभावात् शाम्यति न खेदात्। व्याख्या—'यस्य' (? पश्य) 'मम क्रोधवह्नि:' कोपानल: 'अरीणां' शत्रूणां' नन्दानां युवतय: रमण्य एव 'दिश:' दिग्-विभागा: तासाम् 'आननरूपान् इन्दून्' चन्द्रान् 'सन्ततै:' अविच्छिन्नै: शोकरूपै: 'धूमै: श्यामीकृत्य' मलिनीकृत्य सततरुदितेन रिपुवनितानां मुखानि मलिनयित्वा इत्यर्थ: 'मल्लि-रूपेभ्यो द्रुमेभ्य:' वृक्षेभ्य: 'नयरूपेण नीतिरूपेण 'पवनेन हृत'' चालित 'मौढ्यरूपम्' अज्ञानरूपं भस्म कामं' यथेच्छं यथा तथा 'प्रकीर्य्य' प्रक्षिप्य स्वनीतिवैभवेन नन्दा-नत्यान् मौढ्यित्वा इत्यर्थ: 'संभ्रान्ता:' सन्त्रस्ता: भीता इति यावत् ये 'पौरा:' पुरवासिन: ते एव ये 'द्विजगणा: पक्षिसमूहा: तै: रहितान्' परित्यक्तान् 'नन्दरूपी वंश:' वेणु: तस्य 'प्ररोहान्' अङ्कुरांश्च 'दग्ध्वा' भस्मीकृत्य 'वने ज्वलन इव' अग्निरिव दावानल इव 'दाह्या-भावात्' दग्धव्यस्य अपरस्य अप्राप्त्या [हेतौ पञ्चमी] 'शाम्यति' निर्वाति 'न खेदात्' न हि श्रमात् शाम्यति [श्रमे: दैवादिकात् लट्तिप्]। कोपाग्निर्मे सम्प्रति दाह्यापेक्षी वर्त्तते, तदेतु मलयकेतु:, वार्त्ता प्रचरतु पौरेषु, अरण्यस्तु भूयो ज्वलितस्य कोपानलस्य इन्धनं भविष्यन्ति इति भाव:। खण्डराङ्कृतम्। लक्षणमुक्तम्।

CHARCHA

N. B.—This verse is in justification of the assurance expressed in the prose preceding. My wrath is equal to all emergencies, disaffected citizens notwithstanding. The fear of destroying the Nandas just achieved is cited as proof.

1. यस्य—On this Telang justly observes—"यस्य मम seems to have nothing answering to it in the preceding sentence

consequence of the intervening कुतः, and nothing in the following sentence in consequence of the intervening Stanza 12, which is not syntactically co-ordinate with Stanza 11." The difficulty may be removed if we read पश्य for यस्य।

2. आननेन्दून्—आननानि इन्दवः इव—कर्मधा—by the rule "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे"। तान्। The scene lay in a forest in a moonlit night. Obj. of श्यामीकृत्य (अश्यामान् श्यामान् कृत्वा इति अभूततद्भावे चिः)।

3. अरियुवति etc.—For analysis see व्याख्या। The females are identified with the quarters and each quarter is assigned a moon to itself!

4. सन्ततैः—सम्+तत=सन्तत or सतत by "समो वा ततहितयोः"।

5. मन्दिद्रुमेभ्यः—See Tika. In a forest fire, trees that are not dried up are not burnt altogether, but only tinged and blackened, unless the fire is a very big one. Here the counsellors were not killed; they are represented as so many big trees darkened by the soot and standing with the ash settled on them. अपादाने ५मी।

6. नयपवन etc.—Analysis in व्याख्या। The story as it is in the Puranas does not make much mention of नय. but of certain magic rites which killed Nanda with his sons (see Intro). It is a fact that when a big fire is burning, there is a stiff breeze attending it. चाणक्य's policy is the breeze here.

7. मोहभस्म—चाणक्यs policy bewildered the ministers of नन्द। It imparted मोह to them. This मोह is identified with भस्म। Obj. of प्रकीर्य्य (प्र+कृ ल्यप्)।

8. सभ्रान्त etc.—Analysis in व्याख्या। Birds roosting at night are frightened and leave their roost when there is a forest fire. When नन्द was in distress some of the citizens deserted him, and these are here represented as the startled birds.

9. नन्दवंश etc.—Here the temptation is great to say नन्दवंशस्य प्ररोहान्। But then नन्द himself escapes. प्ररोहान् हत्वा न तु वंशमपि (कृत्स्नपदार्थप्रधानसत्पुरुषः)। For this reason, we have taken it as a

इन्दु in the व्याख्या। The epithet shows that the fire was only in a small clump of reeds consisting of one bamboo and eight-shoots about it. Hence the fire itself is small, consequently all big trees in the forest escape with only a dusting with ashes

10. ज्वलन इव—The resemblance is not in burning only but in quickly dying out also.

15. अपि च—

शोचन्तोऽवनतैर्नराधिपभयाद् धिक्शब्दगर्भैर्मुखै-
र्मामग्रासनतोऽवकृष्टमवशं ये दृष्टवन्तः पुरा।
ते पश्यन्ति तथैव सम्प्रति जना नन्दं मया सान्वयं
सिंहेनेव गजेन्द्रमद्रिशिखरात् सिंहासनात् पातितम् ॥१२॥

Furthermore—Those people who, pitying with faces having the cry of "Fie" within but cast down through fear of the king, formerly saw me, helpless, dragged down from the front seat, now see Nanda with his successors cast down by me, the very same way from the lion-seat (throne) like a lordly tusker by a lion from the top of a hill.

अपि च इति। अन्वयः॥ पुरा ये नराधिपभयात् अवनतैः धिक्शब्दगर्भैः मुखैः शोचन्तः अवशं माम् अग्रासनतः अवकृष्टं दृष्टवन्तः, सम्प्रति ते जनाः सिंहेन गजेन्द्रम् अद्रिशिखरादिव मया सान्वयं नन्दं सिंहासनात् तथैव पातितं पश्यन्ति। व्याख्या— 'पुरा' इतः पूर्वं 'ये' जनाः 'नराधिपभयात्' राजभयात् 'अवनतैः' व्याकुलैः किन्तु 'धिक् शब्दः गर्भे' येषां तादृशैः 'मुखैः' शोचन्तः' मामनुकम्पमानाः इत्यर्थः 'अवशं' लुप्तं 'माम् अग्रासनतः' मुख्यासनतः 'अवकृष्टम्' आकृष्य पातितं 'दृष्टवन्तः' दृष्टा नतमुखेन धिगिति राजानं गर्हयन्तः तथ्यः 'सम्प्रति' अद्य 'ते जनाः सिंहेन गजेन्द्रं' करिराजम् 'अद्रि-शिखरादिव' शैलशृङ्गात् पातितमिव 'मया सान्वयं' सपुत्रं 'नन्दं सिंहासनात् तथैव' यथा पुरा मां स इत्यर्थः 'पातितं पश्यन्ति'। दार्ष्टान्तिकाभावादित्यादि यत्प्रयोक्ता न हि तत् शुष्क-विकल्पनमात्रं किन्तु उक्तं सर्वं मया क्रमेण आगमे ये जना दृष्टवन्तः ते सन्ति ते

साक्षिण: इति भाव:। [शार्दूलविक्रीडितं वृत्तम्। 'सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्" इति लक्षणात्]॥

CHARCHA

1. नराधिपभयात्—नराधिपात् नन्दात् भयम् ५तत्। तस्मात्। हेतौ ५मी।

2. धिक्शब्दगर्भैः—धिक् इति शब्दः, कर्मधा—, (रूपकर्मधा)—। धिक् गर्भे येषाम्। गड्वादीनाम् आकृतिगणत्वात् सप्तम्यन्तस्य परनिपातः। People disapproved of Nanda's action but could not openly protest, because Nanda was a haughty prince and respector of no persons. Cf. "नन्दा नव हृदयरोगा इव भुवः" Verse 13 below, "नन्दैर्विधृक्तमनपेक्षितराजवृत्तैः" Act III, Verse 18 etc Qual. मुखैः (which has करणे इया)।

3. अवक्लृप्तम्—This does not agree with the बृहत्कथा as represented in the कथासरित्सागर, nor is it sup-ported by the Puranas (see Intro.)

4. सान्वयम्—अन्वय is here सन्तति children, not वंश (race). With the latter meaning सर्वार्थसिद्धि becomes included among the slain. "सन्ततिर्गोत्रजननकुक्ष्यन्वभिजनान्वयौ। वंशोऽन्ववायः सन्तानः" इत्यमरः Qual. नन्दम्।

5. सिंहासनात् पातितम्—Dethroned, *i. e.*, made away with. It should not be taken to mean as actually dragged down, though तथैव seems to suggest it. Nandas were killed through चाणक्य's agency by magic during the siege of कुसुमपुर which followed (see Intro.)

16. सोऽहम् इदानीम् अवसितप्रतिज्ञाभरोऽपि क्षपणावेषेण शस्त्रं धारयामि। येन मया—

समुत्खाता नन्दा नव हृदयशल्या इव भुवः
लता मौर्य्ये लक्ष्मीः सरसि नलिनीव स्थिरपदा।
द्वयोः सारं तुल्यं हितयमभियुक्तेन मनसा
फलं क्रोपप्रीत्योर्हिंसति च विभक्तं सुहृदि च ॥१२॥

In these circumstances, I, though with the trouble of vow ended, still handle the sword (the emblem of office) out of consideration for Vrishala ; 1, by whom—with an attentive mind, the proper two-fold yield of the two, pleasure and displeasure, has been equally divded between friend and foe—the nine Nandas, like cankers in the heart of the earth, have been uprooted and unto Maurya has Lakshmi been made firmly rooted like the lotus in a lake.

सोऽहम् इति। 'सः' तदानीं कृतप्रतिज्ञः 'इदानीम्' अवसितः' समाप्तः 'प्रतिज्ञाभरः' व्रतपीड़ा यस्य तादृशः 'अपि' तीर्णप्रतिज्ञोऽपि 'अहं वृषली' शूद्रे चन्द्रगुप्ते या 'अपेक्षा' आदरः तया हेतुना 'शस्त्रम्' अधिकारचिह्नं खड्गं 'धारयामि' वहामि। मया आहृता मौर्य्यलक्ष्मीः स्थिरा भवतु इत्यपेक्षया नन्देषु हतेष्वपि तपोवनं न यामि वृषल एव राज्यरक्षां करोमि। तेन किमुपकृतं चन्द्रगुप्तस्य इति चेत् शृणु। अन्वयः॥ सोऽहं शस्त्रं धारयामि येन मया भुवः हृदयरोगा इव नव नन्दाः समूलखाताः, सरसि नलिनीव मौर्य्ये लक्ष्मीः स्थिरपदा कृता—कोपप्रीत्योः द्वयोः सारं हितयं फलम् अभियुक्तेन मनसा द्विषति च सुहृदि च तुल्यं विभक्तम्। व्याख्या—'येन मया भुवः' पृथिव्याः तदवस्थानां जनानाम् इत्यर्थः 'हृदयरोगा इव' अन्तर्गताः व्याधयः इव 'नव नन्दाः समूलखाताः' अवरोपिताः। किञ्च 'सरसि' कासारे 'नलिनी' पद्मिनी 'इव मौर्य्ये' चन्द्रगुप्ते 'लक्ष्मीः' नन्दराजलक्ष्मीः 'स्थिरपदा' अचला 'कृता'। तेन च कार्य्यद्वयेन 'कोपः' अपमानजनितः रोषः 'प्रीतिः' सेवाजनितः तोषः इति 'द्वयोः सारं' मुख्यम् उचितं वा 'हितयं' द्वावयवं 'फलं' [युगपदुद्भवात् एकमेव द्वावयवम् इत्यध्यवसानं] 'अभियुक्तेन मनसा' निविष्टेन चेतसा निपुणं निरूप्य इतर्थः 'द्विषति च' रिपौ नन्दे च 'सुहृदि च' मित्रे मौर्य्ये च तुल्यं विभक्तं' समं व्यवस्थापितम् [यद्वा—'तुल्यम्' इति अत्र युगपदर्थे व्ययवृतम्] सोऽहं शस्त्रं धारयामि इति पूर्वेण अन्वयः। तदेवं शस्त्रे अभियुक्ते च मयि चेतसि भो मलयकेतो, साहसं मा कार्षीः इति भावः। [शिखरिणी वृत्तम्। "रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति लक्षणात्]

CHARCHA

1. अवसित etc.—अव + सो + क्त कर्मणि ended. Now see व्याख्या। भर is excess. By transference of epithets here is *discomfort* through excess. Telang reads भार for भर। The former means weight, अवसित: भार:, weight ended, seems unsuitable. Or say भार is *trouble* caused by weight by लक्षणा, and expound as with भर।

2. इक्ष्वाकुपेक्षया etc.—दृष्टि takes शस्त्र as राजकार्य्य, but cf —विष्णुगुप्त उपानय खड्गम्, चाणक्य:—"शस्त्रमर्पयित्वा"—Act VII, Bengali edition. Also "अगृहीतशस्त्रेण", शस्त्रग्रहणमन्तरेण" Act VII. These seem to imply that like the वेत्रयष्टि of the कञ्चुकिन् the sword was an emblem of office with the prime minister. ईतौ ३या।

3. नन्दा नव—दृष्टि says these were nine brothers, sons of सर्वार्थसिद्धि। The Puranas have नन्द and his eight sons as the nine नन्द's. The poet takes the latter view (see Intro.).

4. हृदयरोगा:—हृदयस्य रोग:। हृद्रोगा: is an optional form by the rule "वा शोकष्यञ्रोगेषु"। The Nandas were unpopular as rulers hence disgusting like diseases. Seepara 15 above

5. द्वितयम्—द्वौ अवयवौ अस्य इति द्वि + तयप् two-fold ; it refers to the effects of pleasure and displeasure, considered as one whole because simultaneously exhibited. Pleasure in friends (सुहृदि) and displeasure seen in (द्विषति)।

17. अथवा अगृहीते राक्षसे किमुत्खातं नन्दवंशस्य, किं वा क्षेप्यमुत्पादितं चन्द्रगुप्तलक्ष्मण:। (विचिन्त्य) अहो राक्षसस्य नन्दवंशे निरतिशयो भक्तिगुण:। स खलु कस्मिंश्चिदपि जीवति नन्दान्वयावयवे इक्ष्वाकुस्य साचिव्यं प्रापयितुं न शक्यते। तदभियोगं प्रति निरुद्योग: शक्य: अवस्थापयितुमस्माभि: अनयैव बुद्ध्या तपोवनं गतोऽपि घातितस्वपक्षो नन्दवंशीय: सर्वार्थसिद्धि:। यावदसौ मलयकेतुमङ्गीकृत्य अस्मद्-

च्छेदाय विपुलतरं प्रयत्नम् उपदर्शयत्येव । (प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा) साधु अमात्य राक्षस साधु ! साधु, श्रोत्रिय साधु ! साधु मन्त्रिबृहस्पते साधु ! सा. Praises his adversary

Or, Raksasa being unsecured, what is upset of the race of Nanda, or what is the permanency given to the Lakshmi of Chandragupta ? (*Reflecting*) Oh ! the unsurpassable devotion of Rakshasa to the race of Nanda ! Indeed any member whatsoever of the race of Nanda living, he cannot be induced to accept the ministership of Vrishala. So with the thought that we can make him sit indifferent towards an expedition, we got Sarvarthasiddhi killed though retired to the hermitage. But he (Rakshasa), embracing Malayaketu, is indeed making a mightier effort to extirpate us ! (*Fixing his eye on the sky as on something visible*) Bravo, minister Rakshasa, Bravo ! Bravo, Oh Brahmana Bravo ! Bravo, Oh Brihaspati-like counsellor, Bravo !

अथवा इति । 'अम्बा' पक्षान्तरे 'राक्षसे अगृहीते' अवशीकृते सति ["यस्य च भावेन भावलक्षणम्" ङि भावे ञमी] 'नन्दवंशस्य किम् उत्खातम्' उन्मूलितं न किञ्चिदपि [उदपूर्वकस्य खनधातोः कर्मणिक्तः] ; 'चन्द्रगुप्तलक्ष्म्याः वा किं स्थैर्यम्' अचाञ्चल्यम् 'उत्पादितं' स्थापितं न किमपि । यतमाने राक्षसे मन्ये नन्दा जीवन्ति एव, चन्द्रगुप्तार्थे च तस्मिन् अभियुज्यमाने मन्ये अप्रतिष्ठिता एव चन्द्रगुप्तस्य लक्ष्मीः । तत् राक्षसं नियम्य चन्द्रगुप्तम् साचिव्यं कारयामः । ('विचिन्त्य') 'अहो' आश्चर्यं 'राक्षसस्य नन्दवंशे निरतिशयो भक्तिरूपो गुणः' ! तेन गुणेन 'स खलु' निर्मितं 'कञ्चिदपि' नगण्येऽपि 'नन्दाश्रयम्' नन्दवंशस्य 'आश्रयवे' अंशे 'जीवति' सति 'इक्ष्वाकुस्य साचिव्यम्' अमात्यता 'याचयितुं' कारयितुं 'न शक्यते' । किन्तु 'तदभियोगं प्रति' चन्द्रगुप्तस्य आक्रमणमुद्दिश्य (यत्र—'तत्र' तस्मात् 'अभियोगं प्रति' आक्रमणमुद्दिश्य) 'निरुद्योगः' उद्यमहीनः 'अवस्थापयितुम्' आसयितुम् उद्यमहीनतां गमयितुमित्यर्थः 'अस्माभिः शक्यः इति अनया एव युक्त्या' एवमेव मत्वा राक्षसमुद्यमहीनं कर्तुमित्यर्थ 'नन्दवंशीयः तपस्वी'

वराकः 'सर्वार्थसिद्धिः' तपोवन गतोऽपि घातितः' नाशित. । तदा सर्वार्थसिद्धिरेक एव नन्दवंशीयो जीवति स्म । घातिते तस्मिन् कमवलम्ब्य राक्षसो यतेत ? नूनं चन्द्रगुप्तस्यैव वशसौ भविष्यति इत्याशीन्मे मतिः । किन्तु 'यावत्' पक्षान्तरे 'असौ' राक्षसः 'मलयकेतुम् अङ्गीकृत्य' स्वीकृत्य 'अस्मदुच्छेदाय' अस्मानुन्मूलयितुं 'विपुलतरम्' अतिविपुलं प्रयत्नम् उद्योगम् उपदर्शयत्येव' आविष्करोते एव । ('प्रत्यक्षे' चक्षुर्गोचरे 'इव' वस्तुनि 'आकाशे लक्ष्यं' बद्धा दृष्टिं निधाय) 'साधु अमात्य राक्षस साधु' आर्यमेतत्ते, 'साधु श्रोत्रिय' सुब्राह्मण 'साधु' शोभनमेतत्ते 'साधु मन्त्रिबृहस्पते' बृहस्पतिकल्प मन्त्रिन् 'साधु' सदृश्यमेतत्ते ।

CHARCHA

1. अगृहीते—Hence राक्षस's ग्रहण is the aim of चाणक्य । This is the object of the drama.

2. नन्दान्वयावयवे—अन्वय race, not son as in Sl. 12. सर्वार्थसिद्धि with reference to whom this line is spoken, was only a ज्ञाति and cannot be included by any means if अन्वय means son.

3. स ग्राहयितुं शक्यते—वं ग्राहयितुं शक्नोमि was the original form in which ग्राहयितुम् = ग्राह्यत्वेन बोधयितुम् । Hence बुध्यर्थत्वात् "गतिबुद्धि—" इति णिचकर्तुः कर्मत्वम् etc.

4. तपस्वी सर्वार्थसिद्धिः—तपस्वी poor, not ascetic. "तपस्वी तापसे चानुकम्प्ये" इति मेदिनी । Here अनुकम्प्यो । दृढप्रहार supposes सर्वार्थसिद्धि to be the father of नन्द । But out poet treats him as an insignificant member of Nanda's race, cf.—"कस्मिंश्चिदपि जीवति नन्दान्वयावयवे" above.

5. यावत्—Implies पक्षान्तर (on the other hand). Thus, one पक्ष is—राक्षस stops if सर्वार्थसिद्धि is killed (चाणक्य's पक्ष), the पक्षान्तर is—राक्षस works the harder when सर्वार्थसिद्धि is killed (पक्षान्तर) । "यावत् कार्त्स्न्येऽवधारणे" इत्युपक्रम्य "पक्षान्तरे च" इति मेदिनी ।

6. अस्मदुच्छेदाय—अस्माकम् उच्छेदः अस्मदुच्छेदः । तस्मै । तादर्थ्ये चतुर्थी ।

7. श्रोत्रिय—छन्दस् is Veda. छन्दः अधीते इति छन्दस् + घन् by the rule "श्रोत्रियश्छन्दोऽधीते" which directs श्रोत्र to be substituted here for छन्दस् । श्रोत्रिय thus is a Brahmana versed in the Veda. सुब्राह्मणः ।

3. मन्त्रिबृहस्पते—बृहतां वाचां पतिः बृहस्पतिः। "तद् वदतोः करपत्योः :—" इति सुट् तलोपश्च। मन्त्री बृहस्पतिरिव etc.

18. कुत :—

ऐश्वर्य्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते
तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया।
भर्त्तुर्यैं प्रलयेऽपि पूर्वसुकृतासङ्गेन निःसङ्गया
भक्त्या कार्य्यधुरां वहन्ति कृतिनस्ते दुर्लभास्त्वादृशाः ॥१४॥

(Do you ask) Why ?—The world serves for gain the master not divested of power ; those again who follow him in vicissitudes, do so in tbe hope of his coming back to power. Rare are workers of your stamp who, in memory of past benefits, bear the burden of work from disinterested devotion even after the death of their master.

कुत इति। 'कुतः' एवं राक्षसं स्तौमि इति चेत् शृणु—अन्वयः॥ अयं लोकः ऐश्वर्यात् अनपेतम् ईश्वरम् अर्थतः सेवते। ये पुनः विपत्तिषु तमनुगच्छन्ति ते तत्-प्रतिष्ठाशया। त्वादृशाः कृतिनः ये भर्तुः प्रलयेऽपि पूर्वसुकृतासङ्गेन निःसङ्गया भक्त्या कार्य्यधुरां वहन्ति ते दुर्लभाः। व्याख्या—'अयं लोकः' एष संसारः अवत्याः जना इत्यर्थः 'ऐश्वर्यात्' प्रभुत्वात् 'अनपेतम्' अच्युतम् 'ईश्वरं' स्वामिनम् 'अर्थतः' प्रयोजनाप्रेप्सया 'सेवते' भजते। अयं हि प्रायिको नियमः। 'ये पुनः' पश्चात्तरे ये जनाः 'विपत्तिषु' व्यसनेषु ऐश्वर्यनाशे इत्यर्थः 'तमनु' तस्य पश्चात् 'गच्छन्ति' तमेव सेवन्ते 'ते तस्य' ईश्वरस्य या 'प्रतिष्ठा पुनरैश्वर्यलाभः' स्वपदे प्रत्यवस्थानमित्यर्थः 'तदाशया' तदपेक्षया तथा कुर्वन्ति। 'त्वादृशाः' हे राक्षस त्वत्तुल्याः 'कृतिनः' कृतकर्माणः कृतज्ञा वा 'ये भर्तुः' स्वामिनः 'प्रलयेऽपि' नाशेऽपि 'पूर्वसुकृतस्य' पूर्वोपकारस्य 'आसङ्गेन' सम्बन्धेन पूर्वोपकारस्मरणेन इत्यर्थः 'निःसङ्गया' निःस्पृहया 'भक्त्या' प्रत्याशाशून्येन अनुरागेण 'कार्य्यधुरां' कार्य्यभारं 'वहन्ति' धारयन्ति 'ते दुर्लभाः' दुष्प्रापाः।

तत् साधु भो राक्षस लोकोत्तरचरितोऽसि इति भावः। मादृङ्मिश्रीकृतं इत्तम्। लक्षणमुक्तम्।

CHARCHA

1. अर्थतः—अर्थ = वित्त or प्रयोजन। हेतौ ३या। ततः तस्।

2. तम्—अनु इति कर्मप्रवचनीययोगे द्वितीया।

3. तत्प्रतिष्ठाशया—प्रति + स्था + अङ् भावे प्रतिष्ठा restoration to power. Now see व्याख्या। हेतौ ३या।

4. पूर्वसुकृत etc.—सुकृत is a good turn, *i. e.*, some benefit rendered, पूर्व is पूर्वकृत। आ + सञ्ज + घञ् भावे आसङ्ग lit. contact hence touch, memory. पूर्वं सुकृतं पूर्वसुकृतम्। तस्य आसङ्गः। हेतौ ३या।

5. निःसङ्गया—The rule "उपसर्गात् सुनोति—" makes the cerebrai compulsory in the case of सञ्ज। Hence निःषङ्गया might be expected. But note that निर् or निस् may be a privative particle, as in निरवच्छिन्न, निश्चल etc. ; or again an intensive one, as in निर्गत, निर्लिप्त etc. If derived as निर् or निस् + सञ्ज + घञ् अधिकरणे स्त्रियाम् निःषङ्गा, that in which attachment ceases (निर् or नस् privative), we must have the cerebral, If however, we say निर्गतः सङ्गः अस्याः निःसङ्गा, the निर् or निस् is no longer an उपसर्ग to the root सञ्ज. but to the root गम in निर्गत। Hence the rule "उपसर्गान् सुनोति—" does not apply and the स does not change. Witness the case of प्रनायक with a dental न on which the Vrittikara remarks—"उपसर्गादिति किम्? प्रगताः नायकाः अस्माद्देशात् प्रनायको देशः।" Qual. भक्त्या (which has करणे ३या—भक्ति being the best instrument in कर्त्तव्यभारवहन)।

6. कार्य्यधुराम्—कार्य्यस्य धूः कार्य्यधुरा। "ऋक्पूरब्धूः—" इति समासान्तः अ प्रत्ययः। Feminine by "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः"। Telang reads कार्य्यधुरम् ; explain समासान्तविधेरनित्यत्वात् अ प्रत्ययो न कृतः।

7. कृतिनः—कृतिन् usually means successful. Here seems better to say कृतं पूर्वं कृतं पूर्वोपकारः अस्ति ऐषाम् 'अस्त्यर्थीयत्वन इति कृत + इनि अत्वर्थे कृतिनः those who remember past services. This agrees very well with पूर्वसुकृतासङ्गेन। दृष्टि reads बहवः। But this seems to

lessen the appreciatton of राक्षस। Let बहु alone, even if *two* such people are available, राक्षस ceases to be a unique example. But, cf. 'अचीणभक्तिः चीणेऽपि नन्दे स्वाम्यर्थमुद्वहन्। पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः॥", Act II, Sl. 21. Here प्रमाणे परमे स्थितः is distinctly against the reading बहवः।

19. अतएव अस्माकं त्वत्संग्रहे यत्नः, कथमसौ वृषलस्य सांचिव्यग्रहणेन सानुग्रहः स्यादिति। कुतः—

अप्राज्ञेन च कातरेण च गुणः स्याद्भक्तियुक्तेन कः
प्रज्ञाविक्रमशालिनोऽपि हि भवेत् किं भक्तिहीनात् फलम्।
प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये
ते भृत्या नृपतेः कलत्रमितरे सम्पत्सु चापत्सु च ॥१५॥

Hence indeed, with the thought 'How would he do us a favour by accepting the ministership of Vrishala," is our endeavour to secure you. Why so (do you ask) ? What good comes of one actuated by devotion but unwise or a coward ? What result does indeed accrue from one endowed with wtsdom and valour but wanting in devotion ? Those servants are for the weal of the king in both prosperity and adversity, whose recommendation is wisdom, valour and devotion combined ; others are but so many wives.

अतएव इति। 'अत एव' निमित्तात्—'असौ' राक्षसः कथं' केन विधिना 'वृषलस्य सांचिव्यग्रहणेन सानुग्रहः स्यात्' अस्मान् अनुग्रहीयात् 'इति' चिन्तयमानानाम् 'अस्माकं' सम 'त्वत्संग्रहे' भवद्ग्रीकरणे [विषयाधिकरणे ङमी]'यत्नः' आयासः। स्यात् राक्षसः स्वतेऽपि भर्तरि कार्य-धुरां वहति, तथापि 'कुतः' तदग्रहणे यत्नः इति चेत् शृणु—अन्वयः॥ भक्तियुक्तेन अप्राज्ञेन च कातरेण च कः गुणः स्यात् ? प्रज्ञाविक्रमशालिनः अपि भक्तिहीनात् किं हि फलं भवेत् ? समुदिताः प्रज्ञाविक्रमभक्तयः येषां गुणाः ते भृत्याः नृपतेः सम्पत्सु च आपत्सु च भूतये, इतरे कलत्रम्। व्याख्या—'भक्तियुक्तेन' सानुरागेण 'अप्राज्ञेन च' किन्तु अविवेकेन 'कातरेण च' भीरुणा वा भृत्येन [करणे तृतीया]'कः गुणः स्यात्' किं भवेत् ? न

किमपि। 'प्रज्ञाविक्रमशालिनः अपि' विवेकवीरत्ववतः अपि 'भक्तिहीनात्' अनुरागरहितात् भृत्यात् 'किं हि फलं भवेत्'? न किमपि। 'समुदिताः' मिलिताः 'प्रज्ञाविक्रमभक्तयः' विवेकवीरत्वानुरागाः 'येषां' भृत्यानां 'गुणाः ते भृत्याः नृपतेः सम्पत्सु च' अभ्युदयेषु च 'आपत्सु च' व्यसनेष्वपि 'भूतये' सङ्गलाय भवन्ति। 'इतरे कलत्रवत्' भार्या इव पोष्यमात्रम्। विभिरेतैर्गुणैः समर्थैः कार्यं, न व्यर्थैः। समर्थाश्च राक्षसे एव सन्ति, अतो राक्षससंग्रहाय आयहः। मलयकेतुनिग्रहस्य आनुषङ्गिक एव इति भावः। शार्दूलविक्रीडितं वृत्तम्। लक्षणमुक्तम्।

CHARCHA

1. त्वत्संग्रहे—सम्+ग्रह+क्त्वा भावे संग्रह winning over. तव संग्रहः etc.
2. प्रज्ञाविक्रमशालिनः—प्रज्ञा च विक्रमश्च प्रज्ञाविक्रमौ। ताभ्यां साधु शालते श्लाघते इति साधु कारिणि णिनिः। तस्मात्।
3. भूतये—भूतिं कर्तुम् इति तादर्थ्ये चतुर्थी। "क्रियार्थोपपदस्य—" इति वा।
4. सम्पत्सु च आपत्सु च—द्वन्द्वे construes सम्पत्सु च आपत्सु च कलत्रम्। अधिं ७मी।

20. तत् मयापि अस्मिन् वस्तुनि न शयानेन स्थीयते, यथाशक्ति क्रियते तदग्रहणं प्रति यत्नः। कथमिव? अत्र तावत् "हृषलपर्वतकयोः अन्यतरविनाशेनापि चाणक्यस्य अपक्षतं भवति इति विषकन्यया राक्षसेन अस्माकम् अत्यन्तोपकारि मित्रं घातितस्तपस्वी पर्वतकः" इति सञ्चारितो जगति जनापवादः। लोकप्रत्ययार्थम् अस्यैव अर्थस्य अभिव्यक्तये "पिता ते चाणक्येन घातितः" इति रहसि भाषयित्वा भागुरायणेन अपवाहितः पर्वतकपुत्रो मलयकेतुः। शक्यः खलु एष राक्षसमतिपरिग्रहीतोऽपि व्युत्तिष्ठमानः प्रज्ञया निग्रहीतुम्। न पुनरस्य निग्रहात् पर्वतकवधोत्पन्नं राक्षसस्य अयशः प्रकाशं भवत् प्रमार्ष्टुमिच्छामि।

In this matter, therefore, I too do not lie asleep ; to the best of my power, effort is being made to secure him. (Do you ask) How so ? The evil report has been circulated in the world that—poor Parvataka, a great benefactor of ours, was killed by Rakshasa through a poison-maid, because in this matter injury results unto Chanakya by the death of either one of Vrishala and Parvataka. To make this very thing manifest for the credence of the world, Pravataka's son Malayaketu was scared away, secretly frightening him through Bhagurayana saying "Your father was killed by Chanakya". This prince, making preparations, is capable of being chacked by wit though stayed (Or—guided) by the counsels of Rakshasa. On the other hand, by his arrest I do not like to wipe out the infamy of Rakshasa arising from the murder of Parvataka and now becoming public.

तत् इति। एवं राक्षसस्य ग्रहणमेव मः कार्य्यम् इति स्थितम्। 'तत्' तस्मात् 'मयापि अस्मिन् वस्तुनि' राक्षसग्रहणकर्मणि 'प्रयत्नेन' अवसीन 'न क्षीयते' न कालो यास्यते, किन्तु 'तस्य' राक्षसस्य 'ग्रहणं प्रति यथाशक्ति यत्नः क्रियते'। 'कथमिव' केन वा प्रकारेण यत्नः इति चेत् शृणु—'अत्र तावत्' अस्मिन् कर्मणि खलु लोके राक्षसो निन्द्यो भवतु इत्यभिप्रेत्य 'जगति' लोके 'जनानां' पौराणाम् 'अपवादः' राक्षसस्य दूषणं 'सञ्चारितः' प्रचारितः। अपवादश्च यथा—'राक्षसेन विषकन्यया' स्पर्शघातिन्या कन्यया कयाचित् 'अस्माकम् अत्यन्तोपकारि मित्रं तपस्वी' वराकः 'पर्वतकः घातितः इति' एवंविधः। अकारणं राक्षसस्य न घृणिष्यति अतः 'द्वयोरस्य पर्वतकस्य' च 'अन्यतरस्यापि' एकस्यापि 'विनाशेन चाणक्यस्य अपकृतं भवति' अनिष्टमापद्यते 'इति' एतत् कारणञ्च प्रचारितम्। लोकस्य' जगतः 'प्रत्ययार्थम्' अत्र वस्तुनि श्रद्धार्थितोः लोकः इममपवादं सत्यं मन्यताम् इति 'अस्य एव अर्थस्य' राक्षसकर्तृकपर्वतकवधदूषणस्य 'अभिव्यक्तये' प्रकटी-भवनाय 'पर्वतकपुत्रो मलयकेतुः' न क्षिप्तः परन्तु अज्ञातप्रविधिना 'भागुरायणेन रहसि' एकान्ते 'पिता ते चाणक्येन घातितः' न तु राक्षसेन, चाणक्यस्

शत्रुः न हि मित्रम् 'इति' अनेन प्रकारेण 'व्यवसायित्वा अपवाहितः' अपसारितः अपसरन् उपेक्षित इत्यर्थः। तत्र शङ्का अस्ति सत्यं, स च राक्षसेन संधाय पितृभैर' निर्यातयितुं यतेत, यततां। 'व्युत्थिष्ठमानः' युद्धार्थं यतमानः 'एष' मलयकेतुः राक्षसस्य मत्या' बुद्ध्या 'परिगृहीतः अपि' अवलम्बितः अपि 'प्रज्ञया' मदीयया बुद्ध्या 'नियहीतुं' नियन्तुम् अनुभावयितुं 'शक्यः खलु' सुकर एव। 'पुनः' पश्चान्तरे 'प्रकाशीभवत्' प्रचारं गच्छत् 'पर्वतकवधोत्पन्नं' राक्षसस्य अयशः अस्य' मलयकेतोः 'नियहात्' पर्वतकबधकारी एव दण्डनात् 'प्रमार्ष्टुं' चाययितुं 'न इच्छामि' तदानीं न ऐच्छम्। मलयकेतोरपि दण्डने लोको मन्येत प्रतिश्रुतराज्यार्द्धदानम् अनिच्छता चाणक्येन सुहृत्पर्वतकः घातितः। मिथ्यैव एष ख्याप्यते राक्षसस्यापवादः। इत्याशयः।

CHARCHA

1. न शयानेन—ढुधि compounds the two. Say then नञर्थेन ग शब्देन सुप्सुपेति समासः।

2. विषकन्यया—विषतुल्या कन्या, शाकपार्थिवादि; a damsel whose touch brings death. Cf. "कर्णेनेव विषाङ्कुना—", Act II, Sl. 15.

3. अत्यन्तोपकारि—अत्यन्तम् उपकारि, सुप्सुपा। The उपकार is—Parvataka supplied the army with which चन्द्रगुप्त besieged कुसुमपुर। The reward promised was half the kingdom in case of success.

4. अभिव्यक्तये—अभि + वि + अञ्ज + क्तिन भावे अभिव्यक्ति manifestation. तस्यै। तादर्थ्ये चतुर्थी।

5. भागुरायणेन—भागुरायण was the younger brother of the commander-in-chief and a friend of मलयकेतु। See Act III, Here भागुरायणः मलयकेतुम् अपवहति = वह् भागुरायणेन मलयकेतुम् अपवाहयामि with अनुरूपे कर्तरि तृतीया। The rule "गतिबुद्धि—" apparently applies, because वह is गत्यर्थ; but the Varttika "नौवयोर्न" interferes and we do not get अधिकरणे: कर्म संज्ञा। This is how चाणक्य argues here—This helps me because people would think that if I had killed Parvataka I would not have suffered मलयकेतु to escape. See Act III. In Act V, we shall see *how* this helps in राक्षसवधे by fixing the guilt on Rakshasa.

6. राक्षसमति etc.—परि समन्तात् गृहीतः अवलम्बितः इति परि + ग्रह + क्त कर्मणि परिगृहीतः propped up all round, *i. e.*, stayed, guided etc. मति counsel. Now see व्याख्या।

7. व्युत्तिष्ठमानः—वि + उद् + स्था + शानच् कर्तरि making a great effort (with a view to revenge). Cf. "प्रतिज्ञातमेतत् पुरस्तात्—वक्षस्ताडनभिन्नरत्नवलयम् etc.", Act IV, Sl. 5. आत्मनेपद by "उदोऽनूर्ध्वकर्मणि" taken along with "उद ईहायामिति व्याख्येयम्"। There is ईहा (wish, object, aim etc.) here Cf. "उत्तिष्ठमान निर्वार्थे" etc.

8. प्रमार्ष्टुम्—प्र + मृज + तुमुन् प्रमार्ष्टुम् or प्रमार्जितुम्। Why चाणक्य does not wish to clear राक्षस of this undeserved infamy will be explained in Act V, where the rupture between मलयकेतु and राक्षस is detailed.

21. प्रयुक्ताश्च स्वपक्षपरपक्षयोः अनुरक्तापरक्तजनजिज्ञासया बहुविधदेशवेशभाषाचारसञ्चारवेदिनो नानाव्यञ्जनाः प्रणिधयः। अन्विष्यते च कुसुमपुरवासिनां नन्दामात्य सुहृदां निपुणं प्रचारगतम्। तत्तत् कारणमुत्पाद्य कृतकृत्यतामापादिताः चन्द्रगुप्तसहोत्थायिनो भद्रभटप्रभृतयः प्रधानपुरुषाः। शत्रु प्रयुक्तानाञ्च तीक्ष्णरसदायिनां प्रतिविधानं प्रति अप्रमादिनः परोक्षितभक्तयः क्षितिपतिप्रत्यासन्नाः नियोजितास्तत्र आप्तपुरुषाः। अस्ति च अस्माकं सहाध्यायि मित्रम् इन्दुशर्मा नाम ब्राह्मणः। स च औशनस्यां दण्डनीत्यां चतुःषष्टयङ्गे ज्योतिःशास्त्रे च परं प्रावीण्यमुपगतः। स मया क्षपणकलिङ्गधारी नन्दवंशवधप्रतिज्ञानन्तरमेव कुसुमपुरमुपनीय सर्वनन्दामात्यैः सह सख्यं ग्राहितः विशेषतश्च तस्मिन् राक्षसः समुत्पन्नविश्रम्भः। तेन इदानीं महत् प्रयोजनमनुष्ठेयं भविष्यति।

Emissaries too, conversant with the dress, dialect, manners and movements of (the people of) different countries, have been employed by me under various disguises to find out loyal and disloyal persons on our own and the enemy's side. Everything relating to the movements of the friends of Nanda's ministers who reside at Kusumapura is being carefully ferreted out. Bhadrabhata and other high officials that made common cause with Chandragupta have been rendered well-satisfied by creating suitable grounds for the same. As to checking the administerers of poison employed by the enemy, trusted agents of tried loyalty, ever vigilant and keeping near the person of the king, have been told off towards it. Again, there is my follow-student and friend, a Brahmana Indusarman by name. He has attainded great proficiency in the science of polity of Usanas and in the sceince of Astronomy with its sixty-four sections, and just after my vow to kill Nanda, he was brought over by me to Kusumapura in the garb of a mendicant and made to cultivate frienship with all the ministers of Nanda. Rakshasa has special confidence placed in him. With him a great purpose will have to be worked now.

प्रयुक्ताश्चेति। 'स्वपक्षे परपक्षे' च 'अनुरक्ताः' च 'अपरक्ताः' विरक्ताश्च ये 'जनाः' तेषां 'जिज्ञासया' परिज्ञानार्थं 'बहुविधानां वेशानां' यो 'वेषः' परिच्छदः या च 'भाषा' यः 'आचारः' यश्च 'सञ्चारः' गतागतं तत् सर्वं ये 'विदन्ति' जानन्ति तद्भाविधाः 'नानाव्यञ्जनाः' बहुरूपाः 'प्रणिधयश्च' चरा अपि 'प्रयुक्ताः' व्यापारिताः। नन्दामात्यस्य' राक्षसस्य ये 'कुसुमपुरवासिनः सुहृदः' तेषां 'प्रचारगतं' गमनागमनविषयकं सर्वं 'निपुणं' सूक्ष्मम् 'अन्विष्यते च' निरूप्यते तैः प्रणिधिभिः। 'चन्द्रगुप्तेन सह' ये 'उदतिष्ठन्त' एकनिष्ठतया उद्यमपरा बहवः ते 'भद्रभटादयः प्रधानपुरुषाः' पूर्वं नन्दस्य सम्प्रति चन्द्रगुप्तस्य मुख्यकर्मकराः 'तत्तत् कारणं सन्तोषकारणम् 'उत्पाद्य'

जनयित्वा 'कृतकृत्यता' सफलतां सन्तोषमिति यावत् आपादिताः गमिताः। 'अवृणा' राक्षसेन 'प्रयुक्तानां' व्यापारितानां 'तीक्ष्णरसदायिना' विषदायिनां 'प्रतिविधान' नियमनं प्रति च' इदमनुष्ठितं मया—'तत्र' तस्मिन् प्रतिविधानकर्मणि 'परीक्षितभक्तयः' दृष्टानुरागाः 'अप्रमादिनः' सावधानाः 'चित्तिपतेः' राज्ञश्चन्द्रगुप्तस्य 'प्रत्यासन्नाः' समीपवर्त्तिनः 'आप्तपुरुषाः' विश्वस्तानुचराः 'नियोजिताः व्यापारिताः। 'अस्माकं' मम 'सहाध्यायि मित्रं इन्दुशर्मा नास ब्राह्मणश्च अस्ति'। 'स च औशनस्यां युक्ति-प्रणीतायां 'दण्डनीत्यां' नयशास्त्रे 'चतुःषष्ठ्यङ्गे ज्योतिःशास्त्रे च परं प्रावीण्यम्' अतिदक्षतां 'प्रगतः' प्राप्तः। 'नन्दवंशवधप्रतिज्ञाया अनन्तरमेव' परक्षणे इव 'क्षपणकस्य' जैनसन्यासिनः 'लिङ्गधारी' वेषभृत् 'स' इन्दुशर्मा 'मया कुसुमपुरम् उपनीय' आनीय 'सर्वैः नन्दामात्यैः सह सख्यं' मित्रतां 'ग्राहितः' कारितः। 'राक्षसश्च राक्षसः पुनः 'तस्मिन्' इन्दुशर्मणि 'विशेषतः' आधिक्येन 'समुत्पन्नविश्रम्भः' जात-प्रत्ययः। 'इदानीम् अधुना 'तेन' इन्दुशर्मणा 'महत्' गुरु 'प्रयोजनं' कार्य्यम् 'अनुष्ठेयं' साधनीयं 'भविष्यति'।

CHARCHA

1. अनुरक्तापरक्त etc.—अनु + रञ्ज + क्त कर्त्तरि अनुरक्त attached. अप + रञ्ज + क्त कर्त्तरि अपरक्त disaffected. ज्ञा + सन + अ भावे जिज्ञासा desire to know. Now see व्याख्या। हेतौ श्या।

2. बहुविध etc.—Here विध seems superfluous बहुदेश etc. would do as well.

3. नानाव्यञ्जनाः—नाना is an अव्यय meaning many, various &c. व्यज्यन्ते एभिः इति वि + अञ्ज + ल्युट् करणे व्यञ्जनम् disguises. नाना व्यञ्जनानि एषाम् Cf. माघ—"अमात्यव्यञ्जना राज्ञां etc."

4. प्रणिधीयन्ते इति प्र + नि + धा + कि कर्म्मणि = प्रणिधयः spies.

5. प्रचारगतम्—प्रचार is the same as सञ्चार above ; *i. e.*, move-ments. प्रचारं गतम् प्रचारगतम् relating to movements प्रचाराश्रयम्। Cf "सखीगतं ते पृच्छामः" Sak. Act I. उत्तरकर्म of अन्विष्यते (अनु + इष + लुटस्यते कर्मणि)।

6. तत्तत्कारणम् etc.—कारण refers to *reasons* for satisfaction.

I gave them reasons to be satisfied on several occasions, *i. e.*, they were served well on several occasions and are satisfied. Hence there is no fear of भेद। कृतकृत्य=those who have achieved their end (कृतं कृत्यम् एभिः), *i. e.*, well satisfied. ततः भावे तल्।

7. चन्द्रगुप्तसहोत्थायिनः etc.—See व्याख्या। These are high officials of Nada. They followed चन्द्रगुप्त when he went over to चाणक्य (सहोत्थायिनः)। They now hold responsible positions under चन्द्रगुप्त and are well-satisfied with their work and emolument. ढुण्ढिराज explains this passage thus—"तत्तत्कारणं..... तृतीयाङ्के वक्ष्यमाणम् उत्पाद्य इतो निःसार्थं मलयकेतुना सह संधाय कृतकृत्यताम् एते वयं देवकार्य्येषु अवहिताः स्म इत्येवंरूपां वक्ष्यमाणाम् आपादिता"—a perverse explanation undoubtedly. It will be discussed in Act III.

8. तीक्ष्णरसदायिनाम्=तीक्ष्णरस is bitter draught, *i. e*, poison. Now see Tika.

9. अप्रमादिनः—प्रमाद is अनवधानता। अप्रमाद vigilance. सः अस्ति एषाम etc.

10. परीक्षितभक्तयः—परीक्षित seen. परीक्षितं भक्तिः एषाम where परीक्षित has सामान्ये नपुंसकम as in विदितभक्ति in "सा खलु विदितभक्तिं मां महर्षये निवेदयिष्यति" Sak. Act I.

11. सहाध्यायि—सह अधीते इति सह+अधि+इङ्+णिनि साधुकारिणि कर्तरि। Neuter because मित्र is neuter.

12. औशनस्याम—उशनस् is शुक्र the precepter of the दैत्य। तस्य इयम् इति उशनस्+अण् स्त्रियाम् औशनसी relating to Sukra। तस्याम्।

13. दण्डनीत्याम्—दण्ड is राजदण्ड। दण्डः नीयते अनया इति दण्ड+नी+क्तिन् करणे तस्याम्। Or दण्डस्य नीतिः दण्डनीतिः तस्याम्। अधिं ङ्ङी।

14. प्रावीण्यम्—प्रकृष्टा वीणा अस्य प्रवीणः a good hand at the lyre. तस्य भावः प्रावीण्यम् skill with the lyre ; hence skill generally.

15. क्षपणक &c.—क्षपणक is a Buddhist or a Jaina mendicant. तस्य लिङ्गं चिह्नं धरतीति णिनिः। This means that चाणक्य first caused इन्दुशर्मण् to be disguised as a mendicant and then he introduced him into the city. Had he been a क्षपणक on his

own account—चपणक in reality—the poet would not have added सिद्धधारी।

16. स सख्यं ग्राहितः—Originally, स सख्यं गृहीतवान्=चाणक्यः तं सख्यं ग्राहितवान्=चाणक्येन स सख्यं ग्राहितः। This is on the supposition that ग्राहि is द्विकर्मक, *i. e.*, it is बुद्ध्यर्थक here.

17. तेन इदानीम् etc.—This rouses the curiosity of the audience. The महत्कार्य will be detailed in Act V. इन्दुशर्मन् will henceforth be referred to by चपणक or जीवसिद्धि। The former being the character and the latter the name now assumed by him.

22. तदेवम् अस्मत्तो न किञ्चित् परिहास्यते। वृषल एव केवलं प्रधानप्रकृतिः अस्मासु आरोपितराज्यतन्त्रभारः सततमुदास्ते। अथवा यत् स्वयमभियोगदुःखैः असाधारणैः अपाकृतं तदेव राज्यं सुखयति। कुतः—

स्वयमाहृत्य भुञ्जाना बलिनोऽपि स्वभावतः।
गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ॥१६॥

So, in this matter, nothing will be found wanting through us. Vrishala alone, the principal member, with the burden of ruling the kingdom placed on us, remains ever indifferent. On that kingdom alone brings ease which is relieved of the trouble of attention that is personal and not shared in common with others.) (Do you ask) Why ? Lordly tuskers and mighty kings, though strong by nature, usually droop in discomfort if enjoying after having personally provided for it.

तदिति। 'तत् तस्मात् 'एवम्' अनेन प्रकारेण 'अस्मत्तः' मत्तः मन्निमित्तेन 'न किञ्चित परिहास्यते' ऊनं भविष्यति, यत् यत् कार्यं सर्वं करिष्यते मया। किन्तु 'प्रधानप्रकृतिः' मुख्यप्रकृतिः स्वामी राजा इत्यर्थः 'वृषल एव' चन्द्रगुप्त एव नान्यः 'अस्मासु' मयि 'आरोपितः' न्यस्तः राज्यस्य यः 'तन्त्रः' शासनं तस्य 'भारः' भरः येन तादृशः मन् राज्यचिन्तायां मां व्यवस्थाप्य इत्यर्थः 'सततं केवलम् उदास्ते' उदासीन

एव तिष्ठति। 'अथवा' पक्षान्तरे नासौ निन्द्य एतेन 'असाधारणैः' परैरविभक्तैः 'स्वयमभियोगस आत्मव्यापारस्य यत् 'दुःख" तैः 'अपाकृत" वर्जितं 'यत् राज्यं' तदेव सुखयति'। 'कुतः' एषं ब्रवीमि इति चेत् शृणु—अन्वयः। स्वयम् आहृत्य भुञ्जाना नरेन्द्राश्च गजेन्द्राश्च स्वभावतः बलिनोऽपि प्रायः दुःखिताः (सन्तः) सीदन्ति। व्याख्या—'स्वयम् आहृत्य' परिकल्प्य 'भुञ्जानाः' भोगान् अनुभवतः 'नरेन्द्राश्च' राजमुख्या अपि 'गजेन्द्राश्च' करिमुख्या अपि 'स्वभावतः' प्रकृत्या 'बलिनः अपि' बलवन्तः अपि 'प्रायः' बाहुल्येन 'दुःखिताः' आहरणपरिक्लिष्टाः सन्तः 'सीदन्ति' ग्लायन्ति। तां ग्लानिं परिहरतो बलस्य का निन्दा? तदुदासीनां सः, वयमेव अभियोक्ष्यामहे इति तात्पर्यम्।

CHARCHA

1. अस्मत्तः—अस्माभिः इति तृतीयायां तसि। हेतौ श्या। Cf. "म(त्त) हीनः स्वरतो वर्णतो वा", also below, बलिनोऽपि स्वभावतः etc.

2. परिहास्यते—परि + हा + लृट् ते कर्मकर्तरि।

3. प्रधानप्रकृतिः—प्रकृति is a constituent of a kingdom राज्याङ्ग। "स्वाम्यमात्यसुहृत् कोषराष्ट्रदुर्गबलानि च। राज्याङ्गानि प्रकृतयः".इत्यमरः। प्रधाना प्रकृतिः। Or better प्रधानं प्रकृतिः। Cf. "तिलाः प्रधानम्" (*Bhasya*) in which प्रधान is neuter singular, through तिलाः is masculine plural. प्रधानप्रकृति is the principal member in the above list. This is obviously स्वामी, *i. e.*, the king. Telang reads प्रधानप्रकृतिषु qualifying अस्मासु। But in that case the plural in अस्मासु becomes irregular by the Varttika "सविशेषणानां प्रतिषेधः"। Besides चाणक्य being an अमात्य, he cannot be called the प्रधानप्रकृति।

4. आरोपित etc.—तन्त्र णिच् स्वार्थे + घञ् भावे तन्त्रः = रक्षा, चिन्ता etc. Cf. "प्रजाः प्रजाः स्वा इव तन्त्रयित्वा"—Sak. Act. V. Now see व्याख्या।

4 A. उद् + आस + लट् ते = उदासते remains indifferent.

5. स्वयमभियोग etc.—स्वयम् अभियोगः personal attention, सुपसुपा। तस्य दुःखानि etc.

6. भुञ्जानाः—भुज् to eat, to enjoy. Applies to both नरेन्द्र and गजेन्द्र।

7. बलिनः—स्वभावतो बलिनः ; applies to both. The king is बलिन् by his natural majesty, the tusker by his strong constitution. स्वभावतः = स्वभावेन (तृतीयार्थे तसि) ; प्रकृत्यादित्वात् तृतीया ।

23. (ततः प्रविशति यमपटेन चरः) चरः—

पणमह जमस्स चलणे किं कज्जं देवएहिं अण्णेहिं ।
एसो खु अण्णभत्ताणं हरइ जीअं चडपडन्तम् ॥१७॥

[प्रणमत यमस्य चरणं किं कार्यं दैवतैरन्यैः ।
एष खल्वन्यभक्तानां हरति जीवं परिस्फुरन्तम् ॥]

(Now enters a spy with Yama's canvas)

Spy—Bow down to the feet of Yama , what is the use of other gods ? He indeed snatches away the struggling life of the devotees of other Gods.

ततः इति । ('ततः यमस्य पटेन' यममूर्त्या विचित्रेण पटेन सह 'चरः' चाणक्यप्रणिधिः कश्चित् प्रविशति') अन्वयः ॥—यमस्य चरणं प्रणमत, अन्यैः देवतैः किं कार्यम् । एष खलु अन्यभक्तानां परिस्फुरन्तं जीवं हरति । व्याख्या—'यमस्य चरणं प्रणमत यमं भजध्वम् । 'अन्यैः देवतैः' देवैः [करणे तृतीया] किं स्यात् ? किमपि साध्यते इत्यर्थः । 'एष खलु' यमः 'अन्यस्य' दैवतस्य 'भक्तानां परिस्फुरन्तं' स्पन्दमानं 'जीवं हरति' । ["चडपडन्तम् इति देशीयम् । क्लिश्यमानमित्यर्थः" इति ढुण्ढिराजः] । यम इव चाणक्यः स्वभक्तान् रक्षन्नां योजयति राक्षसभक्तान् मारयति तत् चाणक्यमेव भज इति गूढम् ।

CHARCHA

1. यमपटेन—By this Telang understands "a series of representations of the exploits of Yama. The man draws attention to Death and thus exhorts his listeners to lead a life above board, *i. e.*, he is a धर्मोपदेशक (cf. धर्ममुपदिशामि—*Infra*).

2 *Remark*—That spies should come and go is expected, because चाणक्य has said "प्रयत्नाच्च.....प्रतिभयम्" । This is one of चाणक्य's spies.

24. अवि अ—

पुरिसस्स जीविदव्वं विसमादो होइ भत्तिगहिआदो ।
मारेइ सव्वलोअं जो तेण जमेण जीआमो ॥ १८ ॥
जाव एदं गेहं एबिसिअ जमपडं दंसअन्तो गीआइं गाआमि । [अपि च—

पुरुषस्य जीवितव्यं विषमाद्भवति भक्तिगृहीतात् ।
मारयति सर्वलोकं यस्तेन यमेन जीवामः ॥
यावदिदं गृहं प्रविश्य यमपटं दर्शयन् गीतानि गायामि]

(इति परिक्रामति)

Besides—The livelihood of a man comes even from a precarious line if taken up with earnestness. I live by Yama that kills all people. Well, I will sing songs entering this house and exhibiting Yama's canvas (*walks round*).

अवि च इति । अन्वयः । भक्तिगृहीतात् विषमात् पुरुषस्य जीवितव्यं भवति । यः सर्वलोकं मारयति तेन यमेन जीवामः । व्याख्या—'भक्त्या' एकायतया आदरेण 'गृहीतात्' अङ्गीकृतात् 'विषमात्' घोरादपि कर्मणः 'पुरुषस्य जीवितव्यं' जीविका 'भवति' सम्पद्यते । आत्मानम् अत्र दृष्टान्तत्वेन उपस्थापयति—'यः सर्वं लोकं' जनं 'मारयति तेन यमेन' हेतुना घोरं यमपटं प्रदर्श्य इत्यर्थः वयं 'जीवामः' जीवनयात्रां कुर्मः । स्वकर्मणि तुच्छेऽपि सति एकाग्रो भव । तेनैव प्राणयात्रा सम्पत्स्यते इति धर्मोपदेशः । एतदापाततः, वस्तुतस्तु क्रूरत्वेन लोके गृहीतोऽपि चाणक्यः न हि तत्त्वतः क्रूरः । ये तं भक्त्या समाश्रयन्ते स तेभ्यो भूरि ददाति इत्याशयः ।

CHARCHA

1. जीवितव्यम्—जीव + तव्य भावे livelihood.
2. विषमात्—सम even. विभिन्नः समेभ्यः other than even ; प्रादितत्पु

तस्मात्। अपादाने ५मी। This refers to a *professin* and also to चाणक्य। विषम = difficult, precarious (profession); also = rough, repulsive (चाणक्य)।

3. भक्तिग्रहीतात्—ग्रहीत = accepted, adopted (profession); also = won over, propitiated (चाणक्य)।

4. *Remark*—On these two verses ढुण्ढिराज remarks—"अनेन गीतिद्वयेन चाणक्यस्य यमवत्क्रूरस्य स्वपक्षपरपक्षानुग्रहसामर्थ्यं द्योतयन् स्वस्य गूढचरत्वं सूचयति"। The plain meaning has to suit his character as a धर्मोपदेशक (cf. "यमपटं प्रसार्य्य धर्ममुपदिशामि"—*Infra*).

25. शिष्यः (विलोक्य)—भद्र, न प्रवेष्टव्यम।

Pupil—(*Observing*) Good fellow, no admission.

चरः—हंहो ब्राह्मण, कस्य एदं गेहम् [अहो ब्राह्मण, कस्येदं गृहम्।]।

Spy—Hallo, Brahman, whose house is this?

शिष्यः—अस्माकमुपाध्यायस्य सुगृहीतनाम्नः आर्य्यचाणक्यस्य।

Pupil—Of noble Chanakya, our preceptor of auspicious name.

चरः (विहस्य)—हंहो ब्राह्मण, अत्तकेरकस्स जेव्व मह धम्मभादुणो घरं होदि। ता देहिमे पवेसं जाव दे उवज्झाअस्स जमपडं पसारिअ धम्मं उपदिसामि [अहो ब्राह्मण, आत्मीयस्यैव मम धर्मभ्रातुर्गृहं भवति। तस्माद्देहि मे प्रवेशम् यावत् तवोपाध्यायस्य यमपटं प्रसार्य्य धर्ममुपदिशामि]।

Spy—(*With a sweet laugh*) Hallo Brahmana, this then is the house of a brother-in-duty to myself; so allow me entrance, that I may, opening Yama's canvas, teach duty to your preceptor.

शिष्यः—(सक्रोधं) धिङ्मूर्ख किं भवान् अस्मदुपाध्यायादपि धर्मवित्तरः।

Pupil—(*In anger*) Fie idiot ! are you better acquainted with religious duty than our preceptor ?

चरः—हंहो ब्रह्मण, मा कुप्प। णहि सव्वो सव्वं जाणादि ता किंवि ते उवज्झाओ जाणादि किं वि अह्मारिसा जाणन्दि। [अहो ब्राह्मण, मा कुप्य। नहि सर्वः सर्वं जानाति। तत् किमपि ते उपाध्यायो जानाति किमप्यस्मादृशा जानन्ति]

Spy—Hallo Brahmana, be not angry. All indeed know not all. So something your preceptor knows, and some others do people like us know.

शिष्यः—मूर्ख, सर्वज्ञताम् उपाध्यायस्य चोरयितुम इच्छसि ?

Pupil—Blöckhead, do you mean to deny the omniscience of our preceptor ?

चरः—हंहो ब्रह्मण, जइ तव उवज्झाओ सव्वं जाणादि ता जाणादु दाव कस्स चन्दो अणभिप्पेदो त्ति [अहो ब्राह्मण, यदि तवोपाध्यायः सर्वं जानाति तर्हि जानातु तावत्, कस्य चन्द्रोऽनभिप्रेत इति।

Spy—Hallo Brahmana ! if your preceptor knows all, then let him say "to whom Chandra (moon) is unwelcome ?

CHARCHA

1. सुहृहीत etc.—सुष्ठु गृहीतं सुगृहीतम्। ताद्दग्यं नाम यस्य तस्य ; one whose name is auspicious to utter in the morning. Cf. "स सुगृहीतनामा स्यात् यः स्मर्यते जनैः"।

2. विहस्स—The Dasarupa says "मधुरस्वरं विहसितम्"।

3. धर्मभ्रातुः—धर्मेण भ्राता सुप्सुपा। स इव अहमपि जीवानां धर्ममुपदिशामि इति एककर्मकरणात् धर्मतो भ्रातरौ आवाम् इत्यापाततः। गूढन्तु—धर्मेण सेवा-धर्मेण भ्राता एकस्यैव राज्ञः चन्द्रगुप्तस्य सेवनात् इत्याशयः।

3 A. उपाध्यायस्य—सम्बन्धविवक्षया षष्ठी। प्रमाण्यं इति क्रियायोगे ४र्थी न्याय्यम्।

4. धिअ मूर्ख—This is elliptical; construe हे मूर्ख, त्वां धिक्। Otherwise धिक् would give द्वितीया in मूर्ख—"धिगुपर्यादिषु त्रिषु"।

5. धर्मवित्तरः—धर्मं वेत्ति इति धर्म + विद् + क्विप् कर्त्तरि। अतिशयेन धर्मवित्।

6. मा कुप्य—कुप is दिवादि लोट हि। Here मा is different from माङ्। Hence we do not get लुङ्।

7. अस्मादृशाः—वयमिव पश्यन्ति इति अस्मद् + दृश् कञ् कर्त्तरि by "त्यदादिषु दृशेरनालोचने कञ्च"।

8. अनभिप्रेतः—अभि + प्र + इ + क्त कर्मणि = अभिप्रेत approached very close with alacrity. Hence desired, liked etc न अभिप्रेतः।

26. शिष्यः—मूर्ख, किमनेन ज्ञातेन अज्ञातेन वा ?

Pupil—Fool, what matters if this is known or unkown ?

चरः—तव उवज्झाओ एव्व जाणिस्सदि जं इमिना जाणिदेण होदि। तुमं दाव एत्तिअं जाणासि कमलाणं चन्दो अनभिप्पेदोत्ति। णं पेक्ख—

कमलाणां मणहराणं वि रूआहिन्तो विसंवदइ शीलम्।
+ संपुण्णमण्डलम्मि वि जाइं चन्दे विरुद्धाइं ॥१८॥

[तवोपाध्याय एव ज्ञास्यति यदेतेन ज्ञातेन भवति। त्वं तावत् एतावत् जानासि कमलानां चन्द्रोऽनभिप्रेत इति। ननु पश्य—

कमलानां मनोहराणामपि रूपादिसंवदति शीलम्।
+ संपूर्णमण्डलेऽपि यानि चन्द्रे विरुद्धानि ॥]

Sky—Your preceptor himself will know what comes of this being known; you know but this much that Chandra is unwelcome to lotuses. Well, mark that—Of lotuses though charming the mind, manners militate against the charms—lotues that are opposed to Chandra (moon) even when she is full-orbed.

अन्वयः। मनोहराणामपि कमलानां शीलम् रूपात् विसंवदति यानि सम्पूर्णमण्डले अपि चन्द्रे विरुद्धानि। व्याख्या—'मनोहराणामपि' हृद्यानामपि दर्शनीयानामपि इत्यर्थः; 'कमलानां' पद्मानां 'शीलं' चरितं 'रूपात्' आकृतेः; रूपमपेक्ष्य इत्यर्थः; 'विसंवदति' विरुध्यते। यद्वा 'रूपात्' विसंवदति' भिद्यते। 'यानि' कमलानि 'सम्पूर्णमण्डले अपि' परिपूर्णे अपि (किं पुनरसंपूर्णमण्डले इति अपिशब्दार्थः) 'चन्द्रे विरुद्धानि' ; विपरीतानि। रूपमेषां रमणीयं चरितन्तु विषमम्। नैषां रूपात् चरितानुमानं शक्यम्। बहवोऽपि राक्षसभक्ताः सौम्यदर्शनाः पुरि विचरन्ति ते तु असम्पूर्णमण्डलात् चन्द्रगुप्तात् अपरक्ता एव सम्पूर्णमण्डलादपि तथैव भविष्यन्ति इति गूढम्।

CHARCHA

1. रूपात्—रूपमपेक्ष्य इति ल्यब्लोपे पञ्चमी। Or अन्यार्थयोगे पञ्चमी (see विसंवदति)।

2. विसंवदति—वि + सम् + वद means to disagree. Hence we may take it as भिन्नार्थे। Thus by the rule "अन्यारादितरर्त" it governs the fifth case.

3 सपूर्णमण्डलेऽपि—Even when the orb is full and the moon is charming to every one else in the word, the lotuses do not like it, so perverse is their nature. It then goes without saying that they do not like the moou when it is not full. Note the double sense of मण्डल here as in Sl. 6 *ante.* The hint is the king has enemies here who are thwarting his attempts to be सम्पूर्णमण्डल।

4. चन्द्रे—चन्द्र = moon, also Chadragupta as in Sl. 6 *ante.*

27. चाणक्यः—(आकर्ण्य आत्मगतम्) अये, चन्द्रगुप्तात् अपरक्तान् पुरुषान् जानामि इत्यु पक्षिप्तमनेन।

Chanakya—(*Listening—to himself*) Ha ! it is hinted by this fellow that he knows the people who are averse to Chadragupta.

शिष्यः—मूर्ख, किमिदम् असंबद्धमभिधीयते ?

Pupil—Idiot, why this incoherent talk ?

चरः—हंहो ब्राह्मण, सुसंबद्धं जेव्व एदं भवे [अहो ब्राह्मण सुसंबद्धमेव एतत् भवेत्]—

Spy—Hallo Brahmana, this would be very coherent indeed—

शिष्यः—यदि किं स्यात् ?

Pupil—If what ?

चरः—जदि सुणिदुं जाणन्त लहे [यदि श्रोतुं जानन्तं लभे]।

Spy—If I get one that knew how to listen.

चाणक्यः—भद्र, विश्रब्धं प्रविश, लप्स्यसे श्रोतारं ज्ञातारञ्च।

Chanakya—My good man, enter with confidence, you will get a listener and appreciator.

चरः—एसो पविसामि [एष प्रविशामि] (प्रविश्य उपसृत्य च) जेदु अज्जो [जयतु आर्यः]।

Spy—Here I enter. (*Entering and advancing*) Let Noble Sir prosper.

चाणक्यः—(विलोक्य आत्मगतम्) कथं प्रकृतिचित्त

परिज्ञाने नियुक्तो निपुणकः ! (प्रकाशम) भद्र, स्वागतम्, उपविश ।

Chanakya—(*Seeing—to himself*) Hallo ! This is Nipunaka, employed to know the minds of the subjects. (*Aloud*) Welcome, good fellow, sit down.

चरः—जं अज्जो आणवेदि (भूमौ उपविष्टः) [यदार्य आज्ञापयति] ।

Spy—As Noble Sir commands (*squats on the ground*).

CHARCHA

1. चन्द्रगुप्त etc.—'भ्रुवमपाये—" इति ध्रुवौ ।

2. उपचिप्तम्—उप+चिप्+क्त कर्मणि lit.—placed near, hence given out, hinted etc. Nom. अनेन ।

3. असंबद्धम्—सम् बन्ध+क्त कर्मणि lit.—well-knit together, *i. e.*, coherent etc. उक्त कर्म of अभिधीयते (अभि+धा लट् ते कर्मणि) ।

4. भवेत्, स्यात्—"हेतु हेतुमतोर्लिङ्" इति लिङ् । Incoherent, because you can neither listen, nor appreciate. If yon had listened and appreciated then it would have appeared coherent to you.

5. कथमयं etc.—कथमित्यव्ययम् । आर्यस्य । दृष्टि here notices the reading "कथं प्रभूतत्वात् (बहुत्वात्) कार्य्याणां कस्य परिज्ञाने नियुक्तो निपुणकः इति न स्मायते । आ ज्ञातम् ।"—I have so many thing to do through spies that I do not remember to what purpose Nipunaka was employed. Ah ! I recollect. This passage is not consistent with the wide-awake character of चाणक्य । It suits राक्षस no doubt. प्रकृति here is perhaps better taken in the wider sense "स्वाम्यमात्य etc." See *ante*. स्वागतम् is elliptical for स्वागतं ते where ते has क्रियायोगे ४र्थी ।

28. चाणक्य—भद्र, वर्णय इदानीं स्वनियोगवृत्तान्तम् । अपि वृषलमनुरक्ताः प्रकृतयः ।

Chanakya—Good man, now report the details of your work. Are the subjects attached to Vrishala ?

चरः—अह दं। अज्जेण क्खु तेसु तेसु विरागकारणेसु परिहरिअन्तेसु सुगहीदनामहेए देवे चन्दउत्ते दिढं अणुरत्ताओ पकिदिओ। किंदु उण अत्थि एत्थ णअरे अमच्चरक्खसेण सह पढमं समुप्पण्णसिणेहबहुमाणा तिण्णि पुरिसा देवस्स चन्द्र-सिरिणा सिरिं ण सहन्दि। [अथ किम् ? आर्येण खलु तेषु तेषु विरागकारणेषु परिक्रियमाणेषु सुगृहीतनामधेये देवे चन्द्रगुप्ते दृढमनुरक्ताः प्रकृतयः। किन्तु पुनरस्त्यत्र नगरे अमात्यराक्षसेन सह प्रथमं समुत्पन्नस्नेहबहुमानास्त्रयः पुरुषाः देवस्य चन्द्रश्रियः श्रियं न सहन्ते।

Spy—What else (Yes). As all those reasons for discontent are being removed by your noble self, the subjects have become firmly attached to Sire Chandragupta of auspicious name. But then, in this city, there are three persons, in whom attachment and regard for minister Rakshasa had grown before this, who do not brook the glory of Sire whose splendour is as of the moon.

चाणक्यः (सक्रोधम्)—ननु वक्तव्यं स्वजीवितं न सहन्ते इति। भद्र, अपि ज्ञायन्ते नामधेयतः ?

Chanakya—(*angrily*). You should rather say that they do not brook their own life. Good man, are they known by name ?

चरः—कहं अजाणिअनामहेआ अज्जस्स णिवेदिअन्ति ? [कथम् अज्ञातनामधेया आर्यस्य निवेद्यन्ते ।

Spy—How can those whose names are unknown be reported to Noble Sir.

चाणक्य—तेन हि श्रोतुमिच्छामि ।

Chanakya—Then I wish to know (Lit.—to hear).

CHARCHA

1. स्वनियोग etc.—नियोग employment, work. वृत्तस्य अन्त: वृत्तान्त: details, स्वस्य नियोग: । तस्य वृत्तान्त: etc. Obj. of वर्णय ।

2. वृषलम्—कर्मप्रवचनीययोगे द्वितीया । If अनु is treated as an उपसर्ग then वृषल becomes the आधार of अनुरक्त and takes the सप्तमी विभक्ति । Cf. "देवे चन्द्रगुप्ते अनुरक्ता:" below.

3. अथ किम्—a compound अव्यय implying स्वीकार assent. Here अस्ति is also an अव्यय ।

4. चन्द्रश्रियम्—चन्द्रस्य श्री: । सा इव श्री: अस्य etc. तस्य । Related to श्रियम् ।

5. नामधेयत:—नामधेय = name. तसि स्वार्थे after तृतीया करणे । Or प्रकृत्यादि त्या ।

6 आर्यस्य—शेषे षष्ठी । चतुर्थी was expected. In connection with the root निवेदयन्ते (नि + विद + णिच् + लट अन्ते कर्मणि) ।

29. **चर:—सुणादु अज्जो । पढमं दाव अज्जस्स रिपुपक्खे वद्ध-पक्खपादो खवणओ जीवसिद्धि [शृणोत्वार्य: । प्रथमं तावदार्यस्य रिपुपक्षे बद्धपक्षपात: क्षपणको जीवसिद्धि:] ।**

Spy—Listen, Noble Sir. Foremost is the mendicant Jivasiddhi with a fixed bias towards the side of your enemy.

चाणक्य:—(सहर्षमात्मगतम्) अस्मद्रिपुपक्षे बद्धपक्षपात: क्षपणक: !

Chanakya—(*With joy to himself*) The mendicant with a fixed bias towards the side of our enemy !

चर:—जीवसिद्धी णाम सा जेण सा अमच्चरक्खसप्पहुत्ता विसकण्णा देवे पव्वदीसरे सममावेसिदा । [जीवसिद्धिर्नाम स

येन सा अमात्यराक्षसप्रयुक्ता विषकन्या देवे पर्वतेश्वरे समावेशिता]।

Spy—Jivasiddhi is indeed the same that settled upon king Parvateswara the poision-maid employed by minister Rakahasa.

चाणक्यः—(स्वगतम) जीवसिद्धिरेष तावत् अस्मत्प्रणिधिः। (प्रकाशम्) भद्र, अथापरः कः ?

Chanakya—(To *himself*) This Jivasiddhi is but my emissary ! (*Aloud*) Good fellow, who is the next ?

चरः—अज्ज अवरो वि अमच्चरक्खसस्स पिअवअस्सो कायत्थो सअडदासो नाम [आर्य अपरोऽपि अमात्यराक्षसस्य प्रियवयस्यः कायस्थः शकटदासो नाम]।

Spy—Noble Sir, the next is the Kayastha who is a dear friend of minister Rakshasa, Sakatadasa by name.

चाणक्यः—(विहस्यात्मगतम्) कायस्थ इति लघ्वी मात्रा। तथापि न युक्तं प्राकृतमपि रिपुमवज्ञातुम्। तस्मिन् मया सुहृच्छद्मना सिद्धार्थको विनिक्षिप्तः। (प्रकाशम्) भद्र, तृतीयं श्रोतुमिच्छामि।

Chanakya—(*Laughing—to himself*) A Kayastha is a small matter, still it is not proper to slight even an ordinary enemy. On him Siddharthaka has been set by me in the guise of a friend. (*Aloud*) Good man, I wish to hear of the third.

चरः—तिदीओ वि अमच्चरक्खसस्स दुदीअं विअ हिअअं पुप्पउरणिवासी मणिआरसेट्ठी चन्दनदासो नाम। यस्स गेहे कलत्तं सासोकदुअ अमच्चरक्खसो णअरादो अवक्कन्तो [तृतीयो-

ऽपि अमात्यराक्षसस्य द्वितीयमिव हृदयं पुष्पपुरनिवासी मणिकारश्रेष्टी चन्दनदासो नाम। यस्य गेहे कलत्रं न्यासीकृत्य अमात्यराक्षसो नगरादपक्रान्तः।

Spy—The third is the second self, as it were, of minister Rakshasa, the jeweller-banker known as Chandanadasa that resides at Pushpapura, in whose house having entrusted his wife, minister Rakshasa retired from the city.

CHARCHA

1. वङ्कपचपातः—पचे पातः leaning towards the side. वङ्कः पचपातः अनेन one that has taken a bias. वङ्क—।

2. चपणको जीवसिद्धिः—This is इन्दुशर्मन् spoken of already.

3. जीवसिद्धिर्नाम etc.—The spy is ignorant of the real facts relating to the विषकन्या and tries to refresh Chanakya's memory about जीवसिद्धि ! The false report has been assiduously circulated by चाणक्य and will be of use in Act V. सम्+आ+विश्+क्विप् क कर्मणि समावेशिता was applied. He was the agent through whom Rakshasa sent the poisoned girl.

4. लघौमात्रा—मात्रा is the same as परिमाण in Sl 10, *ante.*; small measure, slight matter. The remark does not refer to Sakatadasa personally, but to the whole class of Kayasthas. They are but scribes and not fighters, what then have kings and ministers to fear from them.

5. तस्मिन् etc.—'तस्मिन्' शकटदासे 'मया सुहृच्छद्मना' मित्रच्छद्मेन 'सिद्धार्थकः' तन्नामा राजपुरुषः 'विनियोजितः', *i. e.*, सिद्धार्थक, who is one of the king's officers and a spy, has been already told off by me to warm himself into Sakatadasa's confidence with professions of friendseip and keep watch.

6. द्वितीयमिव हृदयम्—Lit. like a second heart, *i. e.*, an object of great trust, अतिविश्वासभाजनम्।

7. मणिकारश्रेष्ठी—मणीन् करोति मणिकारः, कर्मण्यण्, a jeweller. श्रेष्ठानि श्रेष्ठवस्तूनि सन्ति अस्य इति श्रेष्ठी a rich man, a banker. मणिकारश्चासौ श्रेष्ठी च ; or—मणिकारनामा श्रेष्ठी—कर्मधा, or शाकपार्थिवादि तत्।

8. न्यासीकृत्य—न्यस्यते इति नि+अस+घञ् सर्वत्र न्यासः trust property. अन्यासं न्यासं कृत्वा इति न्यास+चि+कृ+ल्यप् leaving like trust property, निक्षेप इव समर्प्य।

9. अपक्रान्तः—अप+क्रम+क्त कर्तरि gone away.

30. चाणक्यः—(आत्मगतम्) नूनं सुहृत्तमः। न हि अनात्मसदृशेषु राक्षसः कलत्रं न्यासीकरिष्यति। (प्रकाशम्) भद्र, चन्दनदासस्य गृहे राक्षसेन कलत्रं न्यासीकृतम् इति कथम् अवगम्यते ?

Chanakya—(*To himself*) Surely he is his best friend. Rakshasa will not indeed entrust his wife to one who is not like a second self. (*Aloud*) Good man, how is it known that his wife has been entrusted by Rakshasa to the house of Chandanadasa.

चरः—अज्ज इअं अङ्गुलिमुद्दा अज्जं अवगदत्थं करिस्सदि [इयम् अङ्गुलिमुद्रा आर्य्यम् अवगतार्थं करिष्यति] (इत्यर्पयति)।

Spy—Noble Sir, this signet ring will render Nobie Sir informed of the matter (*Delivers the ring*).

चाणक्यः—(मुद्रामवलोक्य गृहीत्वा राक्षसस्य नाम वाचयति। सहर्षं स्वगतम्) ननु वक्तव्यं राक्षस एव अस्मदङ्गुलिप्रणयी संवृत्त इति। (प्रकाशम्) भद्र, अङ्गुलिमुद्राधिगमं विस्तरेण श्रोतुमिच्छामि।

Chanakya—(*Seeing the ring, takes it up and reads Rakshasa's name. With joy—to himself*) Well, it should be said that Rakshasa himself has become a suitor for (place on)

our fingers (*Aloud*) Good man, I wish to hear in detail the circumstances of your coming by the signt-ring.

चरः—सुणादु अज्जो। अत्थि दाव अहं अज्जेण पौरजण-चरिदम्मसोसणे निउत्तो परघरापवेसे परस्स अणासंकणिज्जेण इमिणा जमपडेण हिण्डन्तो मणिआरसेट्ठिचन्दनदासस्स गेहं पविट्ठोम्हि। तहिं जमपडं पसारिअ पउत्तोम्हि गीदइं गाइदुम [शृणोत्वार्यः। अस्ति तावदहम आर्य्येण पौरजन-चरितान्वेषणे नियुक्तः परगृहप्रवेशे परस्यानाशङ्कनीयेन अनेन यमपटेन आहिण्डमानो मणिकारश्रेष्ठिचन्दनदासस्य गृहं प्रविष्टोऽस्मि। तत्र यमपटं प्रसार्य प्रवृत्तोऽस्मि गीतानि गातुम्]।

Spy—Lisen Noble Sir. The fact is, employed by your noble self at noting the doings of others, I entered the house of the jeweller-banker Chandanadasa roaming with this Yama's canvas which cannot excite suspicion in entering other's houses. There, opening out the Yama's canvas I commenced singing songs.

चाणक्यः—ततः किम्?

Chanakya—What next ?

CHRCHA

1. नूनं सुहृत्तमः etc.—अयं चन्दनदासः 'नूनं' राक्षसस्य 'सुहृत्तमः'। 'आत्मसदृशः' निजानुरूपाः ये 'न' तादृशेषु जनेषु 'राक्षसः कलत्रं' न हि न्यासीकरिष्यति' निध्यास्यति। आत्मना सदृशाः (देहान्तरकल्पाः), इतत्—। न आत्मसदृशाः।

2. अवगतार्थम्—अवगतः अर्थः वस्तु प्रस्तावस्तु येन तम्। You will know all from this signet-ring. अव+गम् means 'to know' cp—"अवगच्छति" her.

3. वाचयति—वाचा योजयति इति णिच्। उच्चारयति।

4. अस्मदङ्गुलि etc.—अस्माकं अङ्गुलयः, तासु प्रणयी। Cf.—"मुद्रा यस्य कराङ्गुलिप्रणयिनी" etc. Act V. It is not simply the ring that has come into my hands, but Rakshasa himself has fallen into my clutches, चाणक्य did not at all expect this piece of good luck. Hence he was in raptures and rapidly arrived at a decision. The entire plot in all its details flashed before his eyes.

5. विस्तरेण—विस्तर, विस्तार, विष्टर all come from the same root स्तृ। The second with घञ् and refers to expanse, width etc., the first with अप restricted to words, speech etc. (the rule being "प्रथने वावशब्दे")। The third has अप् कर्मणि and changes स into ष (restricted to mean tree or kusa grass to sit upon by the rule "हृत्वासनयोर्विष्टरः")।

6. अस्ति etc—अस्ति is an अव्यय and used idiomatically as in the present case to imply "it is a fact." अस्ति तावत् आर्येण भवता 'पौरजनस्य चरितान्वेषणे' व्यापारपरिज्ञाने 'नियुक्तः अहं परगृहस्य प्रवेशे परस्य अनाशङ्कनीयेन' शङ्कानिरासकेन 'अनेन यमपटेन सह आहिण्डमानः' भ्रमन् 'मणिकारश्रेष्ठिनः चन्दनदासस्य गृहं प्रविष्टोऽस्मि etc. हिण्ड् to wander is here अकर्मक। For a सकर्मक use, cf. "आहिण्डमानः अटवीतः अटवीम्"—Sak. Act II.

31. चरः—तदो अ एक्कादो अववरकादो पच्चवरिसदेसीओ अतिदंसणीअसरीराकिदी कुमारओ बालत्तणसुलहकोदूहलो-प्पफुल्लणअणा णिक्कमिदुं पउत्तो। तदो हा णिग्गदो हा णिग्गदो त्ति संकापरिग्गहणिवेदइत्तिओ तस्स एव्व अववरकस्स अब्भन्तरे इत्थिआजणस्स उट्ठदो महन्तो कलअलो। तदो ईसि दारदेसदाविदमुहीए एक्काए इत्थिआए सो कुमारओ णिक्कमन्तो एव्व णिवभच्छिअ अवलम्बिदो कोमलाए बाहुलदाए। तस्साए कुमारसंरोधसंभमप्पवलिदङ्गुलिदो करादो पुरिसअङ्गुलिपरिणा-

हप्पमाणघडिआ विअलिआ इअं अङ्गुलिमुद्दिआ देहलीवन्धम्मि पडिआ उट्ठिदा ताए अणवबुद्धा एव्व मम चलणपासं समागच्छिअ पणामणिहुआ कुलवहु विअ णिच्चला संवुत्ता। मएवि अमच्चरक्खसस्स णामंकिदेत्ति अज्जस्स पाअमूलं पाविदा। ता एसो इमाए आअमो [ततश्च एकस्मात् अववरकात् पञ्चवर्षदेशीयः अतिदर्शनीयशरीराकृतिः कुमारकः बालत्वसुलभकौतूहलोत्फुल्लनयनः निष्क्रमितुं प्रवृत्तः। ततः "हा निर्गतः हा निर्गतः" इति शङ्कापरिग्रहनिवेदयिता तस्यैव अववरकस्य अभ्यन्तरे स्त्रीजनस्य उत्थितः महान् कलकलः। ततः ईषद्दारदेशदापितमुख्या एकया स्त्रिया स कुमारकः निष्क्रामन्नेव निर्भर्त्स्य अवलम्बितः कोमलया बाहुलतया। तस्याः कुमारसंरोधसंभ्रमप्रचलिताङ्गुलेः करात् पुरुषाङ्गुलिपरिणाहप्रमाणघटिता विगलिता इयमङ्गुलिमुद्रिका देहलीबन्धे पतिता उत्थिता तया अनवबुद्धा एव मम चरणपार्श्वं समागत्य प्रणामनिभृता कुलवधूरिव निश्चला संवृत्ता। मयापि अमात्यराक्षसस्य नामाङ्किता इति आर्यस्य पादमूलं प्रापिता। तत् एषोऽस्याः मुद्रायाः आगमः]।

Spy—And then, from a certain room, a boy about five years old, of a very lovely make of frame, attempted to come out with eyes beaming with curiosity that is common in childhood. Thereat, a great hubbub of females shouting "Alas! gone out: Alas! gone out" indicative of alarm arose within that very room. Then the boy, just as he was coming out was seized by his (*Or*—with her) tender ivy-like arm by a

lady who for a moment (*or*—slightly) showed her face at the door and scolded him, This signet-ring, made in the measure of the size of a man's finger and slipping off from her hand in which the fingers worked violently in her hurry for the arrest of the boy, dropped on the cemented ledge, rebounded, rolled up to the edge of my foot unperceived by her, and stopped dead like the bride in a household motionless while making a bow ; and as it is engraved with the name of minister Rakshasa, it has been brought by me to the root of Noble Sir's foot. So this is (the story of) its accession.

ततश्चेति। 'ततश्च एकस्मात् अवरकात्' प्रकोष्ठात् 'पञ्चवर्षदेशीयः' किञ्चिदून-पञ्चवर्षः 'अनिदर्शनीया' परममनोहरा 'शरीराकृतिः' देहघटना अङ्गयोजना यस्य तादृशः 'कुमारकः' कोऽपि बालः 'बालत्वसुलभं' बालकोचितं यत् 'कौतूहलं' कुतुकं तेन 'उत्फुल्लं' विकसिते 'नयने' यस्य तादृशो भूत्वा 'निष्क्रमितुं प्रवृत्तः,' न तु निष्क्रान्तः। तथाविधया आकृत्या मन्ये महाजनस्य कस्यचित् अयं बालः इति। 'ततः तस्य एव अवरकस्य अभ्यन्तरे स्त्रीजनस्य' नारीणां 'शङ्कापरिग्रहस्य' भयाविर्भावस्य 'निवेदयिता' सूचकः [शेषषष्ठ्या समासः] 'हा निर्गतः हा निर्गतः' हा कष्टमपयातः कुमारः 'इति महान् कलकलः उत्थितः'। तन्मन्ये तच्च बालं तत्रत्याः सुगुप्तं रक्षन्ति। 'ततः ईषत्' यथा तथा 'द्वारदेशे दापितं' दत्तं 'मुखं, यया तादृश्या 'एकया स्त्रिया स कुमारकः निष्क्रामन्नेव निर्भर्त्स्य' तिरस्कृत्य 'कोमलया बाहुलतया' बालस्य भुजे निजकरेण वा 'अवलम्बितः' निरुद्धः। भर्त्सनात् मन्ये इयं बालस्य माता इति। 'पुरुषस्य अङ्गुलेः' यः 'परिणाहः' विशालता तस्य 'प्रमाणेन' मात्रया 'घटिता' निर्मिता 'इयं अङ्गुलिमुद्रिका कुमारस्य संरोधे' नियमने यः 'संभ्रमः' त्वरा तेन 'प्रचलिताः अङ्गुलयः' यस्मिन् तादृश्यात् 'तस्याः करात् विगलिता' च्युता सती 'देहलीबन्धे' द्वारस्य पुरोवर्त्तिनि कुट्टिमे 'पतिता' ततश्च अभिघातात् 'उत्थिता' ततः 'तया' रमण्या 'अनवबुद्धा एव' अविदिता एव 'मम चपणपार्श्वं समागत्य प्रणामे' अभिवादनकर्मणि 'निभृता' निश्चला 'कुलवधू-रिव निश्चला कृतोत्तरा'। 'मया अपि' इयम् अङ्गुलिमुद्रा 'अमात्यराक्षसस्य नाम्ना अङ्किता'

चिह्नित 'इति' हेतोः 'आर्य्यस्य' भवतः 'पादमूलं' चरणप्रान्तम् इयं 'प्रापिता' आनीता। नूनमेतेन कुमारोऽयं राक्षसस्य इयञ्च तस्य पत्नी इति प्रतभाति। 'तत्' तस्मात् 'एषः अस्याः' मुद्रायाः 'अगमः' प्राप्तिः प्राप्तिहेतुत्वात् इत्यर्थः।

CHARCHA

1. अववरकात्—अवव्रियते अनेन अस्मिन् वा इति अव + व्र + अप् करणे अधिकरणे वा अववरः that which shelters, a room. स एव अवकरकः, स्वार्थे कन्। Telang takes it as "aperture, window." But here it is 'a room' as is obvious from "अववरकस्य अभ्यन्तरे" below. अपादाने ५मी।

2. पञ्चवर्षदेशीयः—पञ्च वर्षाणि अस्य पञ्चवर्षः of five years. ईषदूनः पञ्चवर्षः इति पञ्चवर्ष + देशीयर् by "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः"।

3. अतिदर्शनीय etc.—For analysis see व्याख्या। Some read प्रियदर्शनीय etc., *i. e.* प्रिया च दर्शनीया च शरीराकृतिः यस्य। प्रियः lovely, दर्शनीय worth-seeing.

4. कुमारकः—अज्ञातः कुमार इति कुमार + कन् आज्ञाते।

5. बालत्वसुलभ—etc.—उद् + फल + क्त कर्त्तरि उत्फुल्ल by "उत्फुल्लरुफुल्लयोरुपसंख्यानम्" and "उत् परस्मात्"। Now see व्याख्या। From his looks I could see he was no ordinary boy but the son of some high personage.

6. भङ्गापरिग्रह etc.—परि + ग्रह + अप् भावे परिग्रहः entertainment. भङ्गायाः परिग्रहः entertainment of fear etc. see व्याख्या। They were alarmed that the boy was going out, hence the boy was in hiding.

7. ईषद्दार etc.—Analysis in व्याख्या। The णिच् in दापित is स्वार्थे। If however we suppose that she was urged in the act by the other females in the room, then the णिच् is regular ; expound —दापितं सुखं यस्याः not यया। Because ईषद्दापित, therefore she too was in hiding.

8. निर्भर्त्स्य etc.—The chiding shows that the lady was the mother of the boy. निर् + भर्त्स + ल्यप्।

9. कुमारसंरोध etc.—See व्याख्या। The fingers were प्रचलित, hence the ring was jerked out.

10 पुरुषाङ्गुलि etc.—See व्याख्या। Hence too large for her fingers, consequently jerked out. The पुरुष was evidently her husband.

11. अङ्गुलिमुद्रिका—मुद्रयति इति मुद्रः पचाद्यच्। स एव मुद्रकः। स्त्रियाम् मुद्रिका। See also व्याख्या।

12. देहलीबन्धे—बन्धनं बन्धः। देहली verandah. देहल्याः बन्धः देहली-बन्धः, which means बद्धदेहली cemented verandah—"भावानयने द्रव्यानयनम्" इति न्यायात्।

13. नामाङ्कितां—Hence minister Rakshasa is the father of the boy, and he placed his family in charge of चन्दनदास when leaving town, the ring being a memento. Cf. "नगरान्निष्क्रामतो मम हस्तात्" etc. Act II.

32. **चाणक्यः—भद्र, श्रुतम्, अपसर। नचिरादस्य परिश्रमस्य अनुरूपं फलम् अधिगमिष्यसि।**

Chanakya—Good man, all is heard, now retire. Before long you will get reward befitting this toil (of yours).

चरः—जं अज्जो आणवेदि [यदार्य्य आज्ञापयति] (इति निष्क्रान्तः)।

Spy—As Noble Sir commands (*exit*).

चाणक्यः—शार्ङ्गरव, शार्ङ्गरव।

Chanakya—Sarngarava, Sarngarava.

(प्रविश्य) शिष्यः—उपाध्याय, आज्ञापय।

Pupil—(*entering*) Preceptor, command me,

चाणक्यः—वत्स, मसीभाजनं पत्रञ्च उपानय।

Chanakya—Bring me ink-pot and a leaf, my boy.

(शिष्यस्तथा करोति)—(*Pupil does as bid*).

चाणक्यः—(पत्रं गृहीत्वा स्वगतम्) किमत्र लिखामि ? अनेन खलु लेखेन राक्षसो जेतव्यः ।

Chanakya—(*Holding the leaf—to himself*) What shall I write on it ? Rakshasa has indeed to be conquered with this letter.

(प्रविश्य) प्रतीहारी—जेदु अज्जो [जयतु आर्यः] ।

Warder—(*entering*) Let Noble Sir conquer.

चाणक्यः (सहर्षमात्मगतम्)—गृहीतो जयशब्दः ।

(प्रकाशम्) शोणोत्तरे, किमागमनप्रयोजनम् ।

Chanakya—(*With joy—to himself*) The anouncement of victory is accepted. (*Aloud*) Sonottara, what is the object of your coming.

CHARCHA

1. नचिरात्—न is an अव्यय difierent from नञ् though meaning the same. चिरात् is another अव्यय meaning चिर । न चिरात्, सुप्सुपा । Comp नैकराग, Act III, Sl. 19, and "नभिन्नहत्तथः"—Kirat I अपवर्गे हतौया । अव्ययत्वात् सुप् लोपः ।

2. पत्रम्—A leaf—a भूर्ज्ज leaf very likely.

3. किमत्र लिखामि—चाणक्य now makes a fresh effort to gain his object, *viz.*, the winning over of Rakshasa. This is technically known as a बिन्दु । "अवान्तरार्थविच्छेदे बिन्दुरुच्छेदकारणम्—Resumption of plans after interruption is बिन्दु which preserves continuity of action. The interruption was here offered by the यमपटचर ।

4. राक्षसो जेतव्यः—No sooner these words are pronounced by चाणक्य, than an unexpected person says जयतु आर्यः । चाणक्य takes this as a happy augury and is assured of जय । So he exclaims गृहीतो जयशब्दः । This is technically called a गण्ड । 'गण्डः प्रस्तुतसम्बन्धि भिन्नार्थं सहसोदितम्" ।

33. प्रतीहारी—अज्ज, देवो चन्दसिरी सीसे कमलमउलाआरमञ्जलिं निवेसिअ अज्जं विण्णवेदि। इच्छामि उज्जेण अब्भणुण्णादो देवस्स पव्वदीसरस्स पारलोइअं कारेदुम्। तेण अ धारिदपुव्वाइं आहरणाइं बम्हणाणं पडिवादेमि त्ति। (आर्य्य देवश्चन्द्रश्रीः शीर्षे कमलमुकुलाकारमञ्जलिं निवेश्य आर्य्यं विज्ञापयति—"इच्छामि आर्य्येण अभ्यनुज्ञातः देवस्य पर्वतेश्वरस्य पारलौकिकं कारयितुम्। तेन च धारितपूर्वाणि आभरणानि ब्राह्मणानां प्रतिपादयामि" इति)।

Warder—Noble Sir, placing on his head his joined palms like a lotus—bud, Sir of moon's splendour, speaks to Noble Sir thus—"Permitted by Noble Sir, I wish to have performed the Sradha of King Parvateshvara, and to make a gift to Brahmanas of the jewellery previously worn by him."

चाणक्यः—(सहर्षमात्मगतम्) साधु वृषल, मनोव हृदयेन सह संमन्त्र्य मन्दिष्टवानसि। (प्रकाशम्) शोणोत्तरे, उच्यताम् अस्मद्वचनाद् वृषलः—"साधु वत्स, अभिज्ञः खल्वसि लोकव्यवहाराणां तदनुष्ठीयताम् आत्मनोऽभिप्रायः। किन्तु पर्वतेश्वरधृतपूर्वाणि गुणवन्ति भूषणानि गुणवद्भ्य एव प्रतिपादनीयानि। तदहम् स्वयमेव परीक्षितगुणान् ब्राह्मणान् प्रेषयामि"।

Chanakya—(*With joy—to himself*) Bravo, Vrishala! you have spoken (as if) having consulted my own heart. (*Aloud*) Sonattara, let Vrishala be informed this in my words—"Bravo, my son! you are indeed aware of the ways of the world; so let your wish be accomplished. But the valuable jewellery formely worn by Parvateswara should be bestowed

upon the worthy alone, so I will myself send you Brahmanas of tested merit.

प्रतीहारी—जं अज्जो आणवेदि [यदार्य आज्ञापयति] (इति निष्क्रान्ता)।

Warder—As Noble Sir commands (*exit*).

चाणक्यः—शार्ङ्गरव, उच्यन्ताम् अस्मद्वचनात् विश्ववसुप्रभृतयः त्रयो भ्रातरः—"वृषलात् प्रतिगृह्य आभरणानि भवद्भिरहं द्रष्टव्यः" इति :

Chanakya—Sarngarava, let the three brothers Visvavasu etc. be told this in my name—"You having received jewellery from Vrishala have to see me."

शिष्यः—तथा (इति निष्क्रान्तः)।

Pupil—So be it (*exit*).

प्रतीहारी इति। हे 'आर्य देवः चन्द्रश्रीः कमलमुकुलस्य आकार इव आकारो' यस्य तादृशम् 'अञ्जलिं शीर्ष' शिरसि 'निवेश्य' बद्धाञ्जलिः सन् भवन्तम् प्रणम्य इत्यर्थः 'आर्यमिति विज्ञापयति—"आर्येण अभ्यनुज्ञातः' दत्तानुमतिः सन् 'देवस्य पर्वतेश्वरस्य पारलौकिकं' श्राद्धकर्म 'कारयितुमिच्छामि'। 'तेन धारितपूर्वाणि च' ददामि च"। 'आभरणानि' अलङ्करणानि 'ब्राह्मणानां' ब्राह्मणेभ्यः 'प्रतिपादयामि च' ददामि च"। चाणक्य इति। हे 'वृषल' एतत् 'साधु'। 'मम हृदयेन सह संमन्त्र्य एव सन्दिष्टवानसि' विज्ञापितवानसि। एतदेव ममापि हृदये वर्त्तते इत्यर्थः। 'लोकव्यवहाराणां' लोकाचाराणाम् 'अभिज्ञः खलु असि तत् आत्मनः अभिप्रायः अनुष्ठीयताम्' क्रियताम् श्राद्धम्, दीयताञ्च ब्राह्मणेभ्यः आभरणम् अन्यथा लोकाचारविरुद्धं स्यात्। 'किन्तु पर्वतेश्वरेण धृतपूर्वाणि भूषणानि गुणवन्ति' विचित्रतामर्हार्हतादिगुणैर्युक्तानि, अतो 'गुणवद्भ्य एव' सत्पात्रेभ्य एव 'प्रतिपादनीयानि' देयानि। 'तत्' तस्मात् 'अहं स्वयमेव परीक्षिताः दृष्टाः 'गुणाः' येषां 'तादृशान् ब्राह्मणान् प्रेषयामि', तेभ्यो देहि।

CHARCHA

1. शीर्षे—This supposes that शीर्ष is not merely an आदेश of शिरस् in special cases only, but exists independently also. But rules like "अचि शीर्षः" (पा ६।२ ६२) seem to argue against it. Amara however supports our poet "उत्तमाङ्गं शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियाम्"।

2. पारलौकिकम्—परः लोकः the other world. स प्रयोजनम् अस्य इति ठञ्। Or परलोके भवम् इति ठञ् by the Varttika "लोकोत्तरपदाच्च"।

3. ममैव etc.—See व्याख्या। Cf. "हृदय, मा उत्तास्य। एष त्वया चिन्तितानि अनसूया मन्त्रयते"—Sak. Act. I.

4. धारितपूर्वाणि—पूर्वं धारितानि, सुप्सुपा। धारित leads because पाणिनि has पूर्व final in भूतपूर्व in the rule" भूतपूर्वे चरट्"। But "ज्ञापकसिद्धं न सर्वत्र", hence पूर्वधारितानि is not wrong.

5. विश्वावसु etc—विश्व becomes विश्वा by "विश्वस्यवसुराटोः"।

6. *Remark*—The three pieces of jewellery will be mentioned in the letter he is going to write now, and will play their part in Act V.

34. चाणक्यः—उत्तरोऽयं लेखार्थः, पूर्वः कथमस्तु ? (विचिन्त्य) आः ज्ञातम्। उपलब्धवानस्मि प्रणिधिभ्यो यथा तस्य म्लेच्छराजलोकस्य मध्यात् प्रधानतमाः पञ्च राजानः परया सुहृत्तया राक्षसमनुवर्त्तन्ते। ते यथा—

कौलूतश्चित्रवर्मा मलयनरपतिः सिंहनादो नृसिंहः
काश्मीरः पुष्कराक्षः क्षतरिपुमहिमा सैन्धवः सिन्धुषेणः।
मेघाख्यः पञ्चमोऽस्मिन् पृथुतुरगबलः पारसीकाधिराजो
नामान्येषां लिखामि ध्रुवमहमधुना चित्रगुप्तः प्रमार्ष्टुं ॥३०॥

Chanakya—Let this be the last thing in the letter ; what should be the first ? (*Reflecting*) Ha ! I have got it. From spies I have come to know that from among that body of

Mlechha kings, the foremost five kings follow Rakshasa with great affection, They are—Chitravarman the King of Kuluta , Simhanada the lion-like King of Malaya ; Puskaraksha the King of Kashmere ; Sindhusena the King of Sindhu by whom the majesty of his enemies has been curtailed ; and the fifth in this is Megha by name, the King of Persia with a vast force of cavalry. I will surely now write the names of these , let Chitragupta blot them out (of his book).

चाणक्य इति। 'अयम्' एषः अलङ्कारहस्तान्तः 'उत्तरः' चरमः 'लेखस्य' पत्रस्य लिख्यमानस्य 'अर्थः' वस्तु भविष्यति। अलङ्करणानि उल्लिख्य लेखम् उपसंहरिष्यामि इत्यर्थः। किन्तु लेखस्य 'पूर्वः' पूर्वार्थः प्रारम्भवस्तु 'कथमस्तु' कौदृशो भवतु तत् नावधारितम्। ('विचिन्त्य') 'आः ज्ञातम्' निर्णीतं मया तदपि वस्तु। तदेव आह— 'प्रणिधिभ्यः उपलब्धवानस्मि' ज्ञातवानस्मि 'यथा तस्य' मलयकेतुसंगृहीतस्य 'म्लेच्छराजलोकस्य मध्यात् प्रधानतमाः पञ्च राजानः परया' परमेण 'सुहृत्तया' मित्रभावेण 'राक्षसम् अनुवर्तन्ते 'अनुगच्छन्ति। के ते? 'ते यथा'—'कौलूतः' कुलूताधिपतिः 'चित्रवर्मा' तन्नामा इत्यर्थः। 'मलयनरपतिः नृसिंहः' पुरुषश्रेष्ठः सिंहनादः' तदाख्य इत्यर्थः। 'काश्मीरः' काश्मीराधिपतिः 'पुष्कराक्षः' तन्नामा इत्यर्थः। 'सैन्धवः' सिन्धुराजः 'क्षतः' उच्छिन्नः 'रिपुमहिमा' शत्रुमाहात्म्यं येन तादृशः 'सिन्धुषेणः' तन्नामा। अस्मिन् राजवर्गे 'पृथु' विपुलं 'तुरगबलम्' अश्वसैन्यं यस्य तादृशः 'मेघाख्यः' मेघनामा मेघनादसंज्ञकः 'पारसीकाधिराजः पञ्चमः'। भवतु किमेभिः पञ्चभिः तदाह—ध्रुवं' निश्चितम् 'अहम् अधुना एषां नामानि' लेखस्य प्रारम्भे 'लिखामि'। तेन किमायातम्? तेन तेषां ध्रुवोमृत्युः तत् लेखकाले एव 'चित्रगुप्तः' यमपुरे जीवितनामलेखनकर्मणि व्यापारितः कायस्थः 'प्रमार्ष्टु' क्षालयतु निजलेखपदात् उत्सारयतु। मदीयेन लेखेनैव कालदष्टा एते पञ्च जीवितेभ्यो बहिष्कृताः इत्यर्थः [प्राप्तकाले लोट्]।

CHARCHA

1. म्लेच्छराजलोकस्य—लोक = समूह ; cf. "स राजलोकः कृतपूर्वसंविद्" इति कालिदासः। म्लेच्छाः राजानः म्लेच्छराजाः with टच् added. तेषां लोकः etc.

2. कौलूतः—कुलूतानां राजा इति कुलूत + अञ् कौलूतः। मलयनरपति is supposed to be the modern *Kulu* in the north-western frontier which at present carries an extensive fruit-trade with India.

3. मलयनरपतिः—Wilson supposes that मलय stands for the Western Ghats. Telang agrees with him. But against this we note that मलयनरपति here is called a म्लेच्छ। In Act V this prince is called मलयनगराधिपः which treats मलय as a city. But the Western Ghats are a district, not a नगर। On this account Telang there questions the authenticity of the reading मलयनगराधिपः। "I doubt much whether मलयनगर is right. Malaya is the name of a mountain and the country about it"= Telang, Notes p. 38. The suspicion naturally arises that Malaya here is not the Western Ghats at all but some city to the North. In Act V we see that the Malaya king wants to share Malayaketu's kingdom with the King of Kuluta and the King of Kashmere. It is possible therefore that these kings are all neighbours of Malayaketu. The poet himself places the kingdom of Malayaketu some seven day's journey to the north of Magadha. Ch. "युष्माकम् उत्तरस्यां दिशि दक्षिणां दिशं प्रस्थितानाम्" etc. Act IV.

4. काश्मीरः—काश्मीर is modern Keshmere. काश्मीराणां राजा. काश्मीरः।

5. सैन्धवः—सिन्धु is modern Sind. तेषां राजा।

6. सिन्धुषेणः—सिन्धुः सेना अस्य। स becomes ष by "एति संज्ञायागात्"।

7. मेघाख्यः—मेघः आख्या अस्य। मेघ here is a contraction for मेघनाद as भीम is of भीमसेन (see Act V).

8. पारसीक—पारसीक is modern Persia.

9. चित्रगुप्त etc.—चित्रगुप्त is the record-keeper of Yama. The record is of the *alive*. The number of the dead is infinite and cannot be recorded. चाणक्य's idea here is that these five kings are as good as dead, so let चित्रगुप्त remove their names

from his record. Some take it as a defiance to चित्रगुप्त *i. e.*, चाणक्य means to say "let चित्रगुप्त remove these names from my writing if he dare". But the question is why चित्रगुप्त should at all think of removing the names from चाणक्य's list. He is concerned with his own *Khata*—and does not care what चाणक्य enters in his *Khata*. प्र+मृज+लोट् तिप् (तु) प्रमार्ष्टु ।

35. (विचिन्त्य) अथवा न लिखामि, पूर्वमनभिव्यक्तमेव आस्ताम् । (नाट्येन लिखित्वा) शार्ङ्गरव ।

(*Reflecting*) Or, I will not write (the name) ; let the first part remain obscure. (*Acting writing*) Sarngarava.

(प्रविश्य) शिष्यः—उपाध्याय, आज्ञापय ।

Pupil—(*entering*) Command me Preceptor.

चाणक्यः—वत्स, श्रोत्रियाक्षराणि प्रयत्नलिखितानि अपि नियतम् अस्फुटानि भवन्ति । तत् उच्यताम् अस्मद्वचनात् सिद्धार्थकः—"एभिः अक्षरैः केनापि कस्यापि स्वयं वाच्यम् इति अदत्तबाह्यनामानं लेखं शकटदासेन लेखयित्वा मामुपतिष्ठस्व । न च आख्येयमस्मै चाणक्यो लेखयतीति ।

Chanakya—My son, the characters of a Srotriya even if written with great care, always become illegible ; so let Siddharthaka be ordered in my words—"Some one has to be personally addressed in these words by some one else ; so having got (these written in) a letter written by Sakatadasa with no name given on the outside, you meet me. It should not be given out to him that Chanakya is causing this to be written.

शिष्यः—तथा (इति निष्क्रान्तः) ।

Pupil—So be it (*exit*).

CHARCHA

1. पूर्वम्—The first part of the letter.

2. लिखित्वा—Writing without mentioning the names. This is only to mislead the शिष्य, चाणक्य would never write himself.

3. अनभिव्यक्तम्—अभि + वि + अञ्ज + क्त कर्मणि अभिव्यक्त disclosed. न तथा। For reasons see below.

4. एभिः अक्षरैः—'एभिः अक्षरैः' इमानि अक्षराणि उच्चार्य्य 'केनापि' जनेन 'कस्यापि' जनस्य अग्रतः 'स्वयं वाच्यम्' आत्मना वक्तव्यम् 'इति' उक्त्वा *i. e.*, some one will have to repeat exactly these words in presence of some one else ; the reciter will get it by heart from the writing, This is to hoax Sakatadasa, but the hoax is a clumsy one and should not have misled Sakatadasa, (see Act V and Intro.).

5. सिद्धार्थकः—This is an officer employed to spy over Sakatadasa. The names were suppressed also to mislead. The letter itself will be found in Act V.

6. अदत्तः etc.—बहिर्भवं बाह्यम् बहिस् + यत् exterior ; अदत्तं बाह्यनाम अस्मिन् not addressed. No address was necessary because the messenger will repeat the words. It was not a letter at all,

7. उपतिष्ठस्व—उप + स्था + लोट् स्व do you meet. "उपाहेवपूजा—" इति सङ्गतिकरणे आत्मनेपदम्।

8 न चाख्येयम् etc.—आ + ख्या (or चक्ष स्थाने ख्या) + यत् कर्मणि। This is to allay suspicion, because Sakatadasa is a leader of Rakshasa's party at Kusumapura.

36. चाणक्यः—(स्वगतम्) हन्त जितो मलयकेतुः।

Chanakya—(To himself) Ha ! Malayaketu is conquered !

(प्रविश्य लेखहस्तः) सिद्धार्थकः—जेदु अज्जो। अज्ज अज्जं से सअडदासेण लिहिदो लेहः [जयतु आर्य्यः, आर्य्य अयं स शकटदासेन लिखितो लेखः]।

Siddharthaka—(*Entering letter in hand*) Let Noble Sir conquer. Here is the letter written by Sakatadasa,

चाणक्य:—(गृहीत्वा) अहो दर्शनीयानि अक्षराणि ! (अनुवाच्य) भद्र, अनया मुद्रया मुद्रयैनम् ।

Chanakya—(*Taking it up*) Oh ! how beautiful are the characters ! (*Having read*) Good man, seal it with this stamp.

सिद्धार्थक:—(तथा कृत्वा) अज्ज अअं मुद्दिदो लेहो । किं अवरं अणुचिट्ठीअदु । [आर्य्य अयं मुद्रित: लेख: । किमपरम् अनुष्ठीयताम्] ।

Siddharthaka—(*Doing as bid*) Noble Sir, here is the letter sealed ; what else bas to be done ?

चाणक्य:—भद्र कस्मिंश्चित् आप्तजनानुष्ठेये कर्मणि त्वां व्यापारयितुमिच्छामि ।

Chanakya—Good man, I wish to employ you in a certain work that has to be done by a trusted person.

सिद्धार्थक: (सहर्षम्)—अज्ज अणुग्गहिदोम्हि । आणवेदु अज्जो किम् इमिणा दासजणेन अज्जस्स अणुचिट्ठिदव्वम् । [आर्य्य अनुगृहीतोऽस्मि । आज्ञापयत्वार्य्य: किमनेन दासजनेन आर्य्यस्य अनुष्ठातव्यम्] ।

Siddharthaka—(*With joy*) Noble Sir, I am favoured. Let Noble Sir command what has to be done for him by this slave.

CHARCHA

1. इत्थं etc.—इत्थं is an अव्यय here हर्षे । He is now sure of success, hence the joy. Note इत्थं जित: and जयतु आर्य्य: in contiguity. Another गण्ड । Cf. "गृहीतो जयशब्द:" *ante*.

2. अनया मुद्रया—This is Rakshasa's signet-ring (see *ante.*)-

3. आप्त etc.—आप्तः प्रत्ययितो जनः आप्तजनः। तेन अनुष्ठेयम् etc. Qual कर्मणि। वि+आ+पृ+णिच् तुमुन् व्यापारयितुम् to employ. आप्त is used deliberately to humour Siddharthaka.

37. चाणक्यः—प्रथमं तावत् वध्यस्थानं गत्वा घातकाः सरोषदक्षिणाक्षिसंकोचसंज्ञां ग्राहयितव्याः। ततः तेषु गृहीतसंकेतेषु भयापदेशात् इतस्ततः प्रद्रुतेषु शकटदासो वध्यस्थानात् अपनीय राक्षसं प्रापयितव्यः। तस्माच्च सुहृत्प्राणपरित्राणपरितुष्टात् पारितोषिकं ग्राह्यम्। राक्षस एव कञ्चित् कालं सेवितव्यः। ततः प्रत्यासन्नेषु परेषु प्रयोजनमिदम् अनुष्ठेयम्। (कर्णे एवमिव)।

Chanakya—First of all the executioners have to be taught by you, after going to the place of execution, the meaning of the signal of contracting the right eye in wrath ; then they having understood the signal and fled hither and thither under the pretence of fright, Sakatadasa has to be removed from the place of execution and led up to Rakshasa, and reward has to be accepted from him overjoyed at the saving of his friend's life. Next Rakshasa has to be served by you for sometime and then when our enemies have come close to us, this service is to be rendered by you (*Whispers into his ears*).

CHARCHA

1, सरोष etc. रोषेण सह वर्तमानम् सरोषम् in wrath. दक्षिणम् अक्षि दक्षिणाक्षि। तस्य संकोचः। सरोषं यथा तथा दक्षिणाक्षिसंकोचः, सुप्सुपा। स एव संज्ञा संकेतः। ताम्।

2. ग्राहयितव्याः—ग्रह+णिच्+तव्य कर्मणि have to be taught ग्राहयितव्याः। The root being बुद्ध्यर्थक we have अधिकर्तृः कर्मसंज्ञा। Thus

—घातका: संज्ञां ग्रहीष्यन्ति=त्वं घातकान् संज्ञां ग्र ह्यिष्यसि etc. Chanal means that this has to be done without the knowledge Sakatadasa, otherwise Sakatadasa will see through the who o the ruse,

2. A तेषु—भावे ७मी। Thus तेषु प्रद्रुतेषु' पलायितेषु—सत्सु etc.

3. भयापदेशात्—भयमेव अपदेश: कलम् तस्मात्। The executione ate to pretend fright. ल्यप् लोपे कर्मणि ५मी। भयापदेशमाश्रित्य इत्यर्थ:

4. सुहृत्प्राण etc.—सुहृत् मित्रं। शोभनं हृदयमस्य etc. by "सुहृत्सुहृ मित्रामित्रयो." । सुहृद: प्राणा:। तेषां परिरक्षणम्। तेन परितुष्ट:। तस्मात Qual. तस्मात् *i. e.* राक्षसात्। परितोष: प्रयोजनमस्य इति परितोष+ट पारितोषिकम् reward. The story will reach Rakshasa through l friend शकटदास and he will rewardthe deliverer of his frienc This is how the plan works—Sakatadasa on seeing his frien सिद्धार्थक whisper into the ears of the executioners, will thin that he is bribing them for his release. Possibly चाणक्य place money with सिद्धार्थक for the purpose. The success of th plan must have been a shock to चाणक्य showing as it did th. *his* servants too were not above corruption, and no wonde these executioners were themselves executed by चाणक्य orders for having allowed शकटदास to escape (See Act VI The situation would have been a queer one if the executioner had known their duty better.

5. प्रत्यासन्नेषु etc.—'परेषु' शत्रुषु मलयकेतुप्रमुखेषु 'प्रत्यासन्नेषु' कुसुमपुर आन्तेषु सत्सु, *i. e.*, when the enemy has marched up close to ou capital. 'इदम्' कर्ण कथ्यमानम्।

38. **सिद्धार्थक:—जं अज्जो आणवेदि [यदार्य आज्ञापयति]।**

Siddharthaka—As Noble Sir commands.

चाणक्य:—शार्ङ्गरव, शार्ङ्गरव।

Chanakya—Sarngarava, Sarngarava.

(प्रविश्य) शिष्य:—उपाध्याय आज्ञापय।

Pupil (*Entering*) Command me Preceptor.

चाणक्यः—उच्यताम् अस्मद्वचनात् कालपाशिको दण्ड-पाशिकश्च यथा—"वृषलः समाज्ञापयति य एष क्षपणको जीवसिद्धिर्नाम राक्षसप्रयुक्तो विषकन्यया पर्वतकं घातितवान् स एनमेव दोषं प्रख्याप्य सनिक्कारं नगरात् निर्वास्यताम्" इति।

Chanakya—Let Kalapasika and Dandapasika be told in my name that Vrishala commands thus—"He, the mendicant known as Jivasiddhi who employed by Rakshasa had killed Parvatesvara, with a poison-girl, be expelled from the city with indignities, with this very offence proclaimed."

शिष्यः—तथा (इति परिक्रामति)।

Pupil—So be it (*goes round the stage*).

चाणक्यः—वत्स तिष्ठ तिष्ठ—"योऽयमपरः कायस्थः शकट-दासो नाम राक्षसप्रयुक्तो नित्यम् अस्मच्छरीरम् अभिद्रोग्धुम् इह प्रयतते स चापि एनं दोषं प्रख्याप्य शूलमारोप्यताम् गृहजनश्चास्य बन्धनागारं प्रवेश्यताम्" इति।

Chanakya—Stop my boy, stop—"And this other, a Kayastha known as Sakatadasa who, here employed by Rakshasa, constantly attempts to harm our person, be put to the stake with this offence proclaimed and the members of his household be led to the prison.

शिष्यः—तथा (इति निष्क्रान्तः)।

Pupil—So be it (*exit*).

CHARCHA

1. कालपाशिकः etc —These two are the executioners.
2. प्रख्याप्य—प्र + ख्या + णिच् + ल्यप् having proclaimed.
3. सनिक्कारम्—नि + क्कृ + घञ् भावे निकार disgrace. तेन सह यथा तथा।

4. *Remark*—From य एष to निर्वास्यताम् are चन्द्रगुप्त's words of command, इति being the कर्म of समाज्ञापयति। जीवसिद्धि was really employed by चाणक्य; Rakshasa was innocent of the murder (See ante. and Intro.). This again is a hoax, the निर्वासन-being a farce. चाणक्य wanted him near Rakshasa.

5. योऽयमपरः etc.—From here to प्रवेश्यत are again चन्द्रगुप्त's words of command. The reader perhaps see that Chandragupta was king in name only चाणक्य wielding power. His words are passed off as words of the king (ध्वनि)।

6. अस्माच्छरीरम्—अस्मद् refers to चन्द्रगुप्त। कर्म of the क्रिया in अभिद्रोग्धुम् by "क्रुधद्रुहोरुपसृष्टयोः कर्म"।

7. अभिद्रोग्धुम्—अभि + द्रुह + तुमुन्। The ह of द्रुह optionally becomes ढ or घ when तुमुन् follows; hence अभिद्रोढुम् is also correct. Again इट् is optional by the rule "रधादिभ्यश्च"। Thus अभिद्रोहितुम् is another form. This charge is a true one against शकटदास। See Act II "चन्द्रगुप्तशरीरम् अभिद्रोग्धुम् etc."

8. प्र + विश + णिच + लोट् ताम् कर्मणि = प्रवेश्यताम् be entered. Nom. त्वया॥ आ + रुह + णिच् लोट् ताम् = आरोप्यताम्। Nom. त्वया।

39. **चाणक्यः (चिन्तां नाटयित्वा आत्मगतम्)—अपि नाम दुरात्मा राक्षसो गृह्येत ?**

Chanakya—(*Acting reflecting—to himself*) would wicked Rakshasa be really caught ?

सिद्धार्थकः—अज्ज गहीदो [आर्य्य गृहीतः]।

Siddharthaka—Noble Sir, caught.

चाणक्यः—(सहर्षमात्मगतम्) हन्त गृहीतो राक्षसः। (प्रकाशम्) भद्र कोऽयं गृहीतः।

Chanakya—(*With joy—to himself*) Ha! Rakshasa is caught! (*Alond*) Good man, who is it that is caught ?

सिद्धार्थकः—गहीदो अज्जसंदेसो। ता गमिस्सं कज्जसिद्धीए। [गृहीत आर्य्यसन्देशः। तस्मात् गमिष्यामि कार्य्यसिद्धये]।

Siddharthaka—Noble Sir's message is caught by me. So may leave (to work) for the suceess of the undertaking.

चाणक्यः—(साङ्गुलिमुद्रं लेखमर्पयित्वा) गम्यताम्। अस्तु ते कार्य्यसिद्धिः।

Chanakya—(*Delivering letter with the signet-ring*) Depart, may success in the work attend you.

सिद्धार्थकः—तह [तथा] (इति निष्क्रान्तः)।

Siddharthaka—So be it (*exit*).

(प्रविश्य) शिष्यः—उपाध्याय, कालपाशिको दण्डपाशिकश्च उपाध्यायं विज्ञापयतः—"इदमनुष्ठीयते देवस्य चन्द्रगुप्तस्य शासनम्" इति।

Pupil—(*Entering*) Preceptor, Kalapasika and Dandapasika say this to you—"Here, command of Sire Chandragupta is being executed."

चाणक्यः—शोभनम्। वत्स मणिकारश्रेष्ठिनं चन्दनदासम् इदानीं द्रष्टुमिच्छामि।

Chanakya—Very well. My son, I wish now to see the jeweller-banker Chandanadasa.

शिष्यः—तथा। (इति निष्क्रम्य चन्दनदासेन सह प्रविश्य) इत इतः श्रेष्ठिन्।

Pupil—So be it. (*Going out and coming back with Chandanadasa*) This way Banker, this way.

CHARCHA

1. नाटयित्वा—Telang reads नाटयति, but as there is continuity, नाटयित्वा seems preferable.

2. अपि नाम etc.—ग्रह + लिङ् ईत कर्मणि गृह्येत। सम्भावनायां लिङ्। I have laid my plans but would they succeed. Nom. मया।

3. गृहीतः—Another omen (गणः)। चाणक्य is elated at this and exclaims हन्त गृहीतो राक्षसः। Cf. "गृहीता जयशब्दः", *ante.*

4. कार्य्यसिद्धि:—कार्य्यस्य सिद्धिः success of tee undertaking as whispered to you. तस्यै। तादर्थ्ये ४थी।

40. चन्दनदासः—(स्वगतम्) चाणक्यम्मि अकरुणे सहसा सद्दाविदस्स जणस्स निद्दोसस्स वि सङ्का, किं उण मह जाददोसस्स। ता भणिदा मए धनसेणप्पमुहा णिअणिवेसंठिआ—कदावि चाणक्कहदओ गेहं विचिणावेदि। ता अवहिदा णिव्वहेह भट्टिणो चमच्चरक्खसस्स घरअणम्। मह दाव जं होदि तं होदुत्ति [चाणक्ये अकरुणे सहसा शब्दायितस्य जनस्य निर्दोषस्यापि शङ्का, किं पुनर्मम जातदोषस्य। तस्मात् भणिता मया धनसेनप्रमुखा निजनिवेशसंस्थिताः—"कदापि चाणक्यहतको गेहं विचिनोति। तस्मादवहिता निवहत भर्त्तुरमात्यराक्षसस्य गृहजनम्। मम तावत् यद्भवति तद्भवतु" इति।।

Chandanadasa—(*To himself*) Chanakya being heartless, apprehension arises even in an innocent person, when unexpectedly summoned ; what is to be said of me with guilt attached ? So Dhanasena and others who live in my house have been instructed by me thus—"Wretched Chanakya might any moment search my house, so remove with care the members of the household of our master Minister Rakshasa. Let come what may unto me."

शिष्यः—भोः श्रेष्ठिन्, इत इतः।

Pupil—This way, O Banker, this way.

चन्दनदासः—अयमागच्छामि [अयमागच्छामि]। (उभौ परिक्रामतः)।

Chandanadasa—Here I am coming (*Both go round the stage.*).

शिष्यः—(उपसृत्य) उपाध्याय अयं श्रेष्ठी चन्दनदासः।

Pupil—(*Approaching*) Preceptor, herei s Chandanadasa the Banker.

चन्दनदासः—जेदु अज्ज [जयतु आर्यः]।

Chanakya—Let Noble Sir prosper.

चाणक्यः—(नाट्येन अवलोक्य) श्रेष्ठिन् स्वागतम्। इदमासनमास्यताम्।

Chanakya—(*Acting seeing*) Welcome, Banker. Here is a seat, be seated.

चाणक्य इति। 'चाणक्ये अकरुणे' दयाहीने निर्दयत्वेन प्रसिद्धे सति 'सहसा शब्दायितस्य' अतर्कितमाहूतस्य 'निर्दोषस्यापि जनस्य शङ्का' भवति 'किं पुनर्मम जातदोषस्य'। 'तस्मात् धनसेनप्रमुखाः निजनिवेशे' मदगृहे 'संस्थिताः' कृतवासाः पुरुषाः "मया भणिताः"—'चाणक्यहतकः कदापि गेहं' मद्भवनं 'विचिनोति' निरूपयति 'तस्मात् भर्तुः अमात्यराक्षसस्य गृहजनम् अवस्थिताः सन्तः 'निर्वहत' अपनयत। 'मम तावत् एतेन कर्मणा 'यद्भवति तद्भवतु'।

CHARCHA

1. शब्दायितस्य—शब्दं कारित इति शब्द + क्यङ् + णिच् + क्त कर्मणि lit. made to shout; hence summoned. दृष्टि's अपि here seems superfluous. Qual. जनस्य। Nom. to विचिनोति।

2. चाणक्यहतकः—हत एव हतकः hapless. चाणक्यासौ हतकश्च "कुत्सितानि कुत्सनैः" इति समासः।

3. विचिनोति—The Prakrita reads विचिणावेदि with णिच्। This

is for विचाययति। लट् is optional by the rule "विभाषा कदाकर्ह्योः"। विचाययिष्यति is the sense.

4. निर्वर्हित—वह means to carry; hence this = do remove. Cf. "निर्वाहित आत्मा"—Sak. Act VI.

5. स्वागतम् is elliptical for ते स्वागतं भवतु—ते taking क्रियायोगे ४थी॥ आस + लोट तामभावे = आस्यताम्। Nom. त्वया; construe—इदमासनं भवति त्वया आस्यताम्।

41. चन्दनदासः (प्रणम्य)—किं ण जाणादि अज्जो जह अणुचिदो उवआरो हिअअस्स परिहवादोवि दुःखमुप्पादेदि। ता इह ज्जेव उचिदाए भूमीए उपविसामि [किं न जानाति आर्यः यथा अनुचित उपचारो हृदयस्य परिभवादपि दुःख-मुत्पादयति ? तस्मात् इहैव उचितायां भूमावुपविशामि]।

Chandanadasa—(*Bowing*) Is not Noble Sir aware that honour unbecoming gives greater pain to the heart than even indignity ? So I sit here on the ground itself as becomes me.

चाणक्यः—भोः श्रेष्ठिन् मा मैवम्। संभावितमेव इदम् अस्मद्विधैः भवतः। तत् उपविश्यताम् आसन एव।

Chanakya—Ho Banker ! Don't do so, don't. This (a seat) for you is indeed thought of by people of our stamp. So do you sit down on the seat itself.

चन्दनदासः (स्वगतम्)—उवक्खित्तमणेण दुट्ठेण किंवि [उपक्षिप्तमनेन दुष्टेन किमपि] (प्रकाशम्) जं अज्जो आण-वेदि [यदार्यः आज्ञापयति] (इति उपविष्टः)।

Chandanadasa— (*To himself*) Something is started by this villain. (*Aloud*) As Noble Sir commands (*sits down*).

चाणक्यः—भोः श्रेष्ठिन् चन्दनदास, अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः।

Chanakya—Ho ! Banker Chandanadasa, do profits of your investments improve (*Or*—accrue) ?

चन्दनदासः (स्वगतम्)—अच्चादरो संकणीओ [अत्यादरः शङ्कनीयः]। (प्रकाशम्) अह दं। अत्तस्स पसाएण अखण्डिदा मे वाणिज्जा [अथ किम्। आर्य्यस्य प्रसादेन अखण्डितं मे वाणिज्यम्।

Chandanadasa—(*To himself*) Too much interest is to be dreaded. (*Aloud*) Through Noble Sir's favour, my trade is uninjured.

चाणक्यः—न खलु चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणान् अधुना स्मारयन्ति प्रकृतीः।

Chanakya—Do not indeed the lapses of Chandragupta now remind the subjects of the virtues of the king departed ?

चन्दनदासः (कर्णौ पिधाय)—सन्तं पावम्। सारअणिसासमुग्गएण विअ पुण्णिमाचन्देन चन्दसिरिणा अहिणन्दन्ति पकिदिओ। [शान्तं पापम्। शारदनिशासमुद्गतेनेव पूर्णिमाचन्द्रेण चन्द्रश्रिया अधिकं नन्दन्ति प्रकृतयः]।

Chandanadasa—(*Blocking his ears*) Begone sin ! Subjects are the greater pleased with Chandrasri as with the full-moon well up (in the sky) in an autumnal night.

CHARCHA

1. अनुचित etc.—उपचर्य्यते अनेन इति उप+चर्+घञ् करणे उपचारः honour. Construe—'अनुचितः' अनुपयुक्तः उपचारः' सम्मानं हृदयस्य दुःखम् उत्पादयति। परि+भू+अप् भावे परिभवः disgrace. तस्मात्। अपादाने पञ्चमी। I do not deserve a seat in the presence of you ; you know it, yet you offer me a seat. The offer is a mockery which pains me more than disgrace.

2. सम्भावितम् etc.—सम्भावनं योग्यताध्यवसानम् deeming as fit. Cf. 'सम्भावनामणसवेहि तमीसराणाम्"—Sak Act VII. 'अम्हाहिधेः' मादृशैः

जनैः 'भवतः' सम्बन्धे 'इदम् आसनम् आसनदानमित्यर्थः' 'सम्भावितमेव' योग्यतया अध्यवसितमेव—you really deserve a seat in our presence. टुण्डि takes इदम् with *both* उपचार and परिभव: in चन्दन's speech. He overcomes the difference of gender by writing उपचारकरणम् and परिभवकरणम्, *i. e.*, चाणक्य wants to say इदं परिभवकरणम् सम्भावितमेव because you are a criminal. Chandananasa understands इदम् उपचारकरणं सम्भावितमेव।

3. उपक्षिप्तम्—उपक्षेप is introduction. उपक्षिप्तम् set on foot (Telang). उप समीपे क्षिप्तम् इति उप+क्षिप+क्त। The villain is going to introduce something unpleasant.

4. प्रचायन्ते—प्र+चि+लट् अन्ते कर्मकर्तरि। Nom. वृद्धिलाभाः।

5. संव्यवहाराणाम्—सम्+वि+अव+हृ+घञ् भावे संव्यवहारः mercantile transaction, investment.

6. वृद्धिलाभाः—वृद्धि refers to interest on loans, and लाभ to trade-profits. वृद्धयश्च लाभाश्च etc. The inquiry is relevant as there has been a change of dynasty which often ruins merchants.

7. वाणिज्यम्—वणिज् a trader. वणिजः कर्म 'इति वणिज्+ष्यञ् वाणिज्यम् trade. टुण्डि reads वाणिज्या in the feminine; but वाणिज्य is neuter; the feminine form is वणिज्या not वाणिज्या। Cf. "वाणिज्यं तु वणिज्या स्यात्" इत्यमरः। "वणिज्यमिति काशिका। 'माधवस्तु 'वाणिज्या-शब्दः स्वभावात् स्त्रीलिङ्गः। भावे एव चात्र प्रत्ययो न तु कर्मणि इत्याह। भाष्ये तु 'दूतवणिग्भ्याञ्च' इति नास्त्येव। ब्राह्मणादित्वात् वाणिज्यमपि" इति दीक्षितः।

8. चन्द्रगुप्तदोषाः etc—An artfully worded question; yes or no, whichever is the answer, assumes चन्द्रगुप्तदोषः। But चन्दनदास cleverly avoids the trap. प्रकृतीः is the अणिकर्तृकर्म। Thus प्रकृतयः अतिक्रान्तपार्थिवगुणान् स्मरन्ति—चन्द्रगुप्तदोषाः प्रकृतीः अतिक्रान्तपार्थिवगुणान् स्मारयन्ति; because स्मरण having a kind of बोध, the root बुद्ध्यर्थक। But grammarians differ from the poet—"सूत्रे ज्ञानसामान्यार्थानामेवग्रहणम् न तु तद्विशेषाणाम्.....तेन स्मरति जिघ्रति इत्यादीनां न"—भट्टोजिः। Hence read स्मारयन्ति प्रकृतिभिः।

9. पिधाय—This stands for अपिधाय cf. "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपञ्चापि दृश्यन्तां यथा वाचा निशा दिशा"।

10. शान्तं पापम्—A common expression with dramatists. Cf. 'शान्तं पापं प्रतिहतममङ्गलम्'—Sak. Act V.

11. शारद etc.—शरदि भवा शरद्+अण् स्त्रियाम् शारदी (शरद् being a ऋतु)। शारदी निशा gives शारदनिशा with पुंवद्भाव। तव समुद्भतः etc.,

12. पूर्णिमा etc.—पूरी आप्यायने+क्त भावे पूर्णम्, *i. e.*, पूरणम्। पूर्णेन पूरणेन चन्द्रस्य पूरणेन निर्वृत्ता इति पूर्ण+इमप् स्त्रियाम् पूर्णिमा full-moon by "भावप्रत्ययान्तात् इमन् वक्तव्यः"। "पौर्णमासी तु पूर्णिमा" इत्यमरः। पूर्णिमायाश्चन्द्रः। तेन। ३या करणे।

42. चाणक्यः—भोः श्रेष्ठिन् यद्येवं प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

Chanakya—Ho Banker, if so the king expects pleasure in return from the pleased subjects.

चन्दनदासः—आणवेदु अज्जो किं कित्तिअं इमादो जनादो इच्छीअदि त्ति [आज्ञापयतु आर्यः किं कियत् अस्माज्जनादिष्यत इति]।

Chandanadasa—Let Noble Sir command what and how much is desired of this person.

चाणक्यः—भोः श्रेष्ठिन् चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। यतो नन्दस्यैव अर्थरुचेः अर्थसम्बन्धः प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

Chanakya—Ho Banker, it is Chandragupta's rule now, not Nanda's rule. For of greedy Nanda touch with money alone, but of Chandragupta it is only your absence of distress, that causes pleasure.

चन्दनदासः (सहर्षम्)—अज्ज अणुग्गहीदोह्मि [आर्य अनुगृहीतोऽस्मि]।

Chandanadasa—(*With joy*) Noble Sir I am favonred.

चाणक्यः—भोः श्रेष्ठिन् स च अपरिक्लेशः कथमाविर्भवति इति ननु भवता प्रष्टव्याः स्मः ।

Chanakya—But, Ho Banker, it should have been asked of me how that absence of distress may appear.

चन्दनदासः—आणवेदु अज्जो [आज्ञापयतु आर्यः] ।

Chandanadasa—Let Noble Sir command.

चाणक्यः—संक्षेपतो राजनि अविरुद्धाभिर्वृत्तिभिर्वर्तितव्यम् ।

Chanakya—Briefly one has to conduct oneself in a manner not hostile to the king.

चन्दनदासः—अज्ज, क उण अधण्णो रण्णा विरुद्धोत्ति अज्जेण अवगच्छीअदि [आर्य कः पुनरधन्यः राज्ञा विरुद्ध इति आर्येण अवगम्यते] ।

Chandanadasa—But Noble Sir, who is the hapless chap deemed hostile to the king by Noble Sir ?

CHARCHA

1. कियत्—किं परिमाणमस्य इति किम्+वतु (वतु) कियत् how much. उक्तकर्म of इष्यते (इष+लट ते कर्मणि) ।

2. नन्दस्यैव etc.—एव is misplaced ; construe अर्थसम्बन्ध एव etc. Reference to the greediness of Nanda occurs elsewhere also. Cf. 'स्वामिनो मुक्तश्रद्धाः" Act III, Sl. 14.. Construl—अर्थे रुचि यस्य तादृश्य लुब्धस्य इत्यर्थः नन्दस्य, अर्थसम्बन्धः, धन लाभः एव प्रीतिमुत्पादयते ।

3. अपरिक्लेशः—भवताम् अपरिक्लेशः क्लेशाभाव एव प्रीतिमुत्पादयति । The नञ् implies अभाव । "ततत्साहश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥" An अव्ययीभाव would give अपरिक्लेशम् ।

4. ननु भवता etc.—This is a mild rebuke to the Banker. You should have asked how the अपरिक्लेश is to be secured ; but you did not,

4. A. प्रच्छ+तव्य =प्रष्टव्याः are to be asked. Pred. to वयम् ॥ अस्+लट मस्, =स्मः । Nom. वयम् ।

5. संक्षेपतः etc.—चाणक्य here explains how the अपरिक्लेश comes—one should not be hostile to the king.

6. राज्ञा विरुद्धः—वि+रुध्+क्त कर्मणि विरुद्धः hostile क्रतविरोधः। राज्ञा सह विरुद्धः क्रतविरोधः etc. राज्ञा taking सहार्थे तृतीया।

7. अधन्यः—न धन्यः luckless, because he will meet with instant death.

43. चाणक्यः—भवानेव तावत् प्रथमम्।

चन्दनदासः (कर्णौ पिधाय)—सन्तं पावं, सन्तं पावं। कीदिसी तिणाणं अग्गिणा सह विराही [शान्तं पापं शान्तं पापम्। कीदृशः तृणानाम् अग्निना सह विरोधः]?

Chandanadasa—(*Blocking tne ears*) Begone sin, Avaunt sin! What sort of conflict is of straw with fire?

चाणक्यः—अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणः अमात्यराक्षसस्य गृहजनं स्वगृहमभिनीय रक्षसि।

Chanakya—The conflict is of this kind—that even now you are hiding, taking over to your house, the house-hold members of minister Rakshasa who is doing injury to the king.

चन्दनदासः—अज्ज, अलअं एदं केणावि अणभिण्णेण अज्जस्स निवेदिदम् [आर्य अलीकमेतत् केनापि अनभिज्ञेन आर्यस्य निवेदितम्]।

Chandanadasa—Noble Sir, this untruth must have been reported to Noble Sir by some one unacquainted (with facts).

चाणक्यः—भोः श्रेष्ठिन् अलमाशङ्क्या। भीता पूर्वराजपुरुषाः पौराणाम् अनिच्छतामपि गृहजनं निक्षिप्य देशान्तरं व्रजन्ति। ततः तत्प्रच्छादनं दोषमुत्पादयति।

Chanakya—Ho Banker, away with alarm. Frightened officials of the former king depart for other countries after

leaving the members of their household in the house of even unwilling citizens. The hiding of them afterwards attaches guilt.

चन्दनदासः—एवं खे दम्। तस्मिं समन आसि अह्मघरे अमचरक्खसस्स घरअह्ना त्ति [एवं नु इदम्। तस्मिन् समये आसीत् अस्मद्गृहे अमात्यराक्षसस्य गृहजन इति]।

Chandanadasa—So is this indeed. The household members of minister Rakshasa were in my house at that time.

चाणक्यः—पूर्वम् "अनृतम्" इदानीम् "आसीत्" इति परस्परविरोधिनी वचने।

Chanakya—At first "untruth", now "were"—these are mually contradictory statements.

चन्दनदासः—एत्तिअं ज्जेव अत्थि मे वाआछलम् [एतावदेव अस्ति मे वाक्छलम्]।

Chandanadasa—There is only this much of verbal fraud in me.

चाणक्यः—भोः श्रेष्ठिन्, चन्द्रगुप्ते राजनि अपरिग्रहच्छलानाम्। तत् समर्पय राक्षसस्य गृहजनम्, अच्छलं भवतु भवतः।

Chanakya—Ho Banker, no adoption of fraud, Chandragupta being king! So give up the household members of Rakshasa; let there be complete absence of fraud with you.

CHAROHA

1. राजापथ्य etc.—पथिन्+यत् पथ्यम् beneficial. न पथ्यम् not beneficial, *i, e.*, an injury. राज्ञः अपथ्यम्। तत् करोति इति णिनिः।

2. अभिनीय—अभि + नी + ल्यप् having led towards—a rare use. However, Cf "अभिनीय च दर्शितः" Act VI, Sl. 15.

3. अलीकम्—Untrue. This may mean (1) never was, or (2) is not. The first is not a fact, but the second is true ; cf. "अवहिता निर्वहत भर्तुः अमात्यराक्षसस्य गृहजनम्".—*Ante.*

4. अनिच्छतामपि—You are needlessly frightened. The निक्षेप was *his* doing. You did not like it, so no fault attaches to you.

5. तत्प्रच्छादनम्—तस्य गृहजनस्य प्रच्छादनम्। The प्रच्छादन is *your* work, hence दोष।

6. अनृतम्—*i. e.*, अलीकम् as above. Here चाणक्य uses the word in the first sense, *i. e.*, never was, which is an obvious contradiction.

7. परस्परविरोधिनौ—परेण परेण विरुध्येते = परस्परेण विरुध्यते = परस्पर + वि + रुध + णिनि साधुकारिणि कर्तरि। Compare the rules "कर्मव्यतिहारे सर्वनाम्नो हे वाच्ये—", "अन्यपरयोग समासवत्", "असमाससङ्गावे पूर्वपदस्य सुपः सुर्वक्तव्यः"। The सु in परस्पर does not become विसर्ग because परस्पर is of the कस्कादि class, and it does not disappear in the final compound owing to बहुलम् in "समासवच्च बहुलम्"।

8. वाक्छलम्—वाचि छलम् fraud in speech. सुप्सुपा। He calls it a fraud beceuse his object was to mislead with the double sense in अलीकम्।

9. अपरिग्रहः—परि + ग्रह + अप् भावे परिग्रहः adoption etc.

10. अच्छलम्—छलस्य अभावः, अव्ययीभावः।

44. **चन्दनदासः—अज्ज, णं विण्णवेमि आसी अम्हघरे अमच्चरक्खसस्स घरअणो त्ति [आर्य्य, ननु विज्ञापयामि आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति]।**

Chandanadasa—But Noble Sir, I say that the household members of minister Rakshasa *were* in my house.

चाणक्यः—अथ इदानीं क्व गतः।

Chanakya—Well, whither are they gone now ?

चन्दनदासः—ण आणामि [न जानामि]।

Chanakya—I do not know,

चाणक्यः—(स्मितं कृत्वा) कथं न ज्ञायते नाम। भोः श्रेष्ठिन्, शिरसि भयम् अतिदूरे तत्प्रतीकारः।

Chanakya—(*Smiling*) Hallo ! not known indeed ! Ho Banker ! the danger is overhead and its remedy very far.

चन्दनदासः (स्वगतम्)—

उवरि घणं घणरडिअं दूरे दइदा किमेददावडिअम्।
हिमवदि दिव्वोसहिओ सीसे सप्पो समाविट्ठो ॥ २१ ॥

[उपरि घनं घनरटितं दूरे दयिता किमेतदापतितम्।
हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः ॥]

Chandanadasa—(*To himself*) What is this that has come to pass ? The deep roar of clouds above, but the beloved is away ! Snake mounted on head, divine herbs on the Himalaya !!

CHRCHA

1. आसीत् अस्मदभ्यर्णे etc.—The emphasis is on आसीत्। आसीत् not अस्ति।

2. शिरसि भयम्—The भय is from the king who is at your very door. The प्रतीकार is expected from Rakshasa who is very far away. अन्वयः॥ एतत् किमापतितम् ? उपरि घनं घनरटितम् etc. as in the sloka व्याख्या—'एतत् किमापतितम्' समायातं मे। व्याकुलीभूतोऽहम् अनेन कर्तव्यं न जाने। कौड्डयसेतत् इत्याह—प्रवासस्थस्य जनस्य यथा 'उपरि' मस्तकाग्रे 'घन' गभीरं 'घनरटितं' मेघगर्ज्जनं किन्तु 'दूरे' तत्प्रतीकारो 'दयिता' प्रिया एतदपि तथैव। यथा—'हिमवति' दूरस्थे हिमगिरौ 'दिव्यौषधयः' विषहरा ज्योतिर्लताविशेषाः किन्तु 'शीर्ष' मस्तके 'सर्पः समाविष्टः' गाढ़ इति बाढ़ग्रहं एतदपि-ताढ़ग्रहमेव। शिरसि भयं दूरे प्रतीकारः इति भावः। The verse is only a

paraphase of चाणक्य's शिरसि भयम् etc. above. दृष्टि is perhaps right in treating this an interpolation. Our suspicions were aroused by the fact that भोज in his सरस्वतीकण्ठाभरण takes the first half in this verse as representing the matter which has to be illustrated (दार्ष्टान्तिक), the second half furnishing the illustration itself (दृष्टान्त) । "अत्रापि दार्ष्टान्तिकमभिधाय उत्तरकालमेव दृष्टान्तः"—सरस्वतीकण्ठाभरण । From our context the first portion cannot be the दार्ष्टान्तिक, because it does not at all suit चन्दनदास's case. भोज evidently takes the verse as coming from some traveller away from his native place. Very significant again is the fact that भोज quotes the verse in Sanskrit while here it is in the Prakrita.

श्रीर्ष—See "ऐक्ष्वाकश्रीः श्रीर्षं कमलमुकुल &c.", *ante*.

45. चाणक्यः—अन्यच्च । नन्दमिव विष्णुगुप्तः (इत्यर्धोक्तं लज्जां नाटयित्वा) चन्द्रगुप्तम् अमात्यराक्षसः समुच्छेत्स्यति इति मा मैवं मंस्थाः । पश्य—

विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीवर्धनासादिभि-
र्नन्दे जीवति या तदा न गयिता स्थैर्यं चलन्ती मुहुः ।
तामेकत्वमुपागतां द्युतिमिव प्रह्लादयन्तीं जगत्
कस्चन्द्रादिव चन्द्रगुप्तनृपतेः कर्तुं व्यवस्येत् पृथक् ॥ २२ ॥

अपिच (आक्षादितद्विरदशोणितशोणशोभाम् इति पूर्वोक्तं पठति) ।

Chanakya—Besides, as Vishnugupta did Nanda (*blushing at this half utterance*) so minister Rakshasa will extirpate Chandragupta, don't you think so. Mark—Who would attempt to separate from King Chandragupta, as from the moon the *Sri* which, now unified, is delighting the world like

moon-light, but which when the Nandas were (*Or*—Nanda-was) alive, flickering ever and anon, was not given steadiness by eminent ministers, valiant and diplomatic, such as Vakra-nasa and the rest Moreover (Recites the verse "आस्वादित-द्विरदशोणितशोण-श्रीभाम्" etc. as said before).

चन्दनदासः—(स्वगतम्) फलेण संवादिदं दे विकत्थिदम्

[फलेन संवादितमस्य विकत्थितम्] (नेपथ्ये कलकलः)।

Chandanadasa—(*To himself*) His brag agrees with the result (*Hubbub in the dress-ing-room*).

CHARCHA

1. विष्णुगुप्तः—another name of चाणक्य।

2. मा मा—सम्भ्रमे द्विरुक्तिः।

3. संख्याः—मन + लुङ् थास्। "माङि लुङ्" इति भविष्यति लुङ्। "म माङ्योगे" इत्यडागमप्रतिषेधः। Nom. त्वम्।

4. अन्वयः॥ तदा नन्दे जीवति मुहुः चलन्ती या श्रीः विक्रान्तैः नयशालिभिः वक्रणासादिभिः सुसचिवैः स्थैर्य्यं न गमिता, द्युतिमिव एकत्वमुपागतां जगत् प्रह्लादयन्तीं ताम् चन्द्रादिव चन्द्रगुप्तनृपतेः पृथक् कर्तुं कः व्यवस्येत्। व्याख्या—'तदा' तस्मिन् काले चन्द्रगुप्ताभिषेकात् पूर्वं 'नन्दे' जीवति सुहुः चलन्ती' नितान्तं कम्पमाना सती पराभियोगभयात् इति भावः 'या श्रीः राजलक्ष्मीः 'विक्रान्तैः' शूरैः 'नयशालिभिः' नीतिनिपुणैः 'वक्रणासादिभिः सुसुचिवैः' तदाख्यैः सन्मन्त्रिभिः 'स्थैर्य्यं' स्थिरतां 'न गमिता' न प्रापिता 'द्युतिमिव' ज्योत्स्नामिव कान्तिमिव वा 'एकत्वमुपागताम्' अभिन्नतामापन्नां 'जगत्' लोकं 'प्रह्लादयन्तीम्' आनन्दयन्तीं 'ताम्' श्रियं 'चन्द्रात् इव चन्द्रगुप्तनृपतेः पृथक् 'कर्त्तुम्' वियोजयितुं 'कः व्यवस्येत्' यतेत न कोऽपि। चन्द्रात् कान्तिवियोजनमिव चन्द्रगुप्तात् राजलक्ष्मीवियोजनम् असम्भवि। तत् दूरे समुच्छेदः, तदर्थम् अध्यवसायोऽपि सुतरां ह्रास्यः इति भावः।

5. विक्रान्तैः—वि + क्रम् + क्त वर्त्तमाने etc. Qual. सुसचिवैः।

6. नयशालिभिः—नीयते अनेन इति नी + अच् करणे बाहुलकात् नयः, or नयति राजानम् इति नी + अच् कर्त्तरि नयः Polity, तेन शालन्ते etc. Here करणे अच is बाहुलकात्, because the rule 'स्त्रियामुदोऽनुपसर्गे" enjoins. अच्, yielding नायः।

7. वक्रणासादिभिः—वक्रा नासा अस्य वक्रणासः having an aquiline nose. This requires the dental न, but as the word is used here is a संज्ञा and not a विशेषण we have the cerebral by "पूर्वपदात् संज्ञायामगः"। आदि here includes राक्षस also, and thus refers to Rakshasa's previous discomfiture. Qual. समुचितैः।

8. चन्द्रात्—This is usually explained as पृथक्‌योगे ५मी ; but कर्तुम्, *i. e.* पृथक् कर्तुम् gives क्रियायोग and attaches कारकत्व। Instead of treating it as an उपपदविभक्ति it is therefore better to have कारकविभक्ति by "ध्रुवमपाये अपादानम्"। This will be clear if वियोजयितुम् substituted. The विभक्ति is still ५मी though पृथक् no longer exists, proving that the विभक्ति is not due to पृथक्।

9. एकत्वसुपागताम्—This means चन्द्रगुप्तेन एकत्वसुपागताम्। As कान्ति is identical with चन्द्र so श्री has become identieal with चन्द्रगुप्त। Hence separation is impossible.

10. चन्द्रगुप्तनृपतेः—चन्द्रगुप्तश्चासौ नृपतिश्च, कर्मधा—। Those who do not see विशेषणभाव here, may say चन्द्रगुप्तनामा or चन्द्रगुप्ताख्यः नृपतिः like शाकपार्थिव। अपादाने ५मी as in चन्द्रात्।

11. व्यवस्येत्—वि + अव + सो + लिङ् यात्। सम्भावनायां लिङ्।

12. आखादित etc.—कः कर्तुं व्यवस्येत्, so राक्षस won't make the attempt. If he does, forgetting the physical impossibility of separating what are identical (एकत्वसुपागताम्), then let him reckon with me first.

13. फलेन etc.—सम् + वद + णिच् क्त कर्मणि made to agree. वि + कत्थ + क्त भावे विकत्थितम् boast. 'अस्य' चाणक्यस्य 'विकत्थितं' दम्भः 'फलेन' नन्दवध-रूपेण फलेन सह 'संवादितं' सामञ्जस्यं गमितम्। फलानुरूपोऽस्य दम्भः शोभते इत्यर्थः।

49. चाणक्यः—शार्ङ्गरव, ज्ञायतां किमेतत्।

Chanakya—Sarngarava, see what it is ?

शिष्यः—तथा। (इति निष्क्रम्य पुनः प्रविश्य) उपाध्याय एष राक्षसश्चन्द्रगुप्तस्य आज्ञया राजापथ्यकारी क्षपणको जीव-सिद्धिः सनिकारं नगरान्निर्वास्यते।

Pupil—So be it. (*Going out and coming back*) Preceptor, it is the mendicant Jivasiddhi, who did something injurious to the king, and is being expelled from the city with disgrace by the king's order.

चाणक्यः—क्षपणकः, अहह ! अथवा अनुभव राजापथ्यकारित्वस्य फलम् । भोः श्रेष्टिन् चन्दनदास एवमयमपथ्यकारिषु तीक्ष्णदण्डो राजा । तत् क्रियतां पथ्यं सुहृदचः । समर्प्यतां राक्षसगृहजनः । अनुभूयतां चिरं विचित्रो राजप्रसादः ।

Chanakya—The mendicant ! Alas !! Or reap the consequences of being a worker of evil to the king. Ho Banker Chandanadasa, thus is this king a grim punisher of evil workers, so listen to the wholesome advice of a friend—deliver up the house-hold members of Rakshasa. Let unique royal favour be long enjoyed.

चन्दनदासः—णत्थि मे गेहे अमच्चघरअणो [नास्ति मे गेहे अमात्यगृहजनः] । (नेपथ्ये पुनः कलकलः) ।

Chandanadasa—The house-hold members of the Minister are not in my house. (*Hubbub again in the dressing room).*

CHARCHA

1. राजापथ्य etc.—See राजापथ्यकारिषु अमात्यराक्षसस्य, *ante.*
2. सनिकारं—See उच्चलामबन्धनात् etc. *ante.*
3. सुहृदचः etc.—प्रसाद will be विचित्र and will continue चिर। A temptation indeed !

47. **चाणक्यः**—शार्ङ्गरव, आयतां किमेतत् ।

Chanakya—Sarngarava, see what this is.

शिष्यः—तथा। (इति निष्क्रम्य पुनः प्रविश्य) उपाध्याय, अयमपि राजापथ्यकारी एव कायस्थः शकटदासः शूलमारोपयितुं नीयते।

Pupil—Very well. (*Going out and coming back*) Preceptor, this too is a worker of evil to the king—Kayastha Sakatadasa is being led to the stake (lit.—to be put on the stake).

चाणक्यः—स्वकर्मफलमनुभवतु। भोः श्रेष्ठिन्, एवमयं राजा अपथ्यकारिषु तीक्ष्णदण्डो न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः। तद्गच्छ परकलत्रेण आत्मनः कलत्रं जीवितञ्च।

Chanakya—Let him enjoy the consequences of his deeds. Ho Banker, thus a grim punisher of evil workers, this king will not brook your hiding of the wife of Rakshasa, so with another's wife save your own wife and life.

चन्दनदासः—अज्ज किं मे भयं दावेसि। सन्तं वि गेहे अमच्चरक्खसस्स घरअणं न समप्पेमि किं उण असन्तम्। [आर्य्य किं मे भयं दर्शयसि। सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्]।

Chandanadasa—Noble Sir, why do you point out danger o me? The wife of minister Rakshasa I would not give up even if existing in my house, what to say when non-existent.

चाणक्यः—चन्दनदास, एष ते निश्चयः।

Chanakya—Chandandasa is that your resolve?

चन्दनदासः—बाढं एसो धीरो मे निच्छओ [बाढम् एष धीरो मे निश्चयः]।

Chandanadasa—Certainly, this is my firm resolve.

चाणक्यः—(स्वगतम्) साधु चन्दनदास साधु !
सुलभेष्वर्थलाभेषु परसंवेदने जनः ।
क इदं दुष्करं कुर्य्यादिदानीं शिविना विना ॥२३॥

Chanakya—(*To himself*) Bravo ! Chandanadasa Bravo ! Sivi no longer existing, who now is the person that would do this hard-to-do thing at another's distress disregarding easily accessible gifts of wealth.

CHARCHA

1. मर्षयिष्यति—मृष + णिच् + लृट् स्यति would excuse ; चमिष्यते ।

2. राक्षसकलत्र etc.—राक्षसस्य कलत्रम् । तस्य प्रच्छादनम् । Now see next. Here चाणक्य treats गृहजन as कलत्र ignoring राक्षस's child Perhaps he takes the word as synonymous with गृहिणी ।

3. भवतः—भवता is also correct. Thus भवान् राक्षसकलत्रं प्रच्छादयति (तिङ् योगे) = भवता भवतो वा राक्षसकलत्रस्य प्रच्छादनम् by "शेषे विभाषा"—when a कृत् other than अ and अक leaves both कर्त्ता and कर्म as अनुक्त, we have optionally "षष्ठी कर्मण्येव" (पाणिनि २।३।६०) or "कर्तृकर्मणोः" (पाणिनि २।३।६५) । Hence प्रच्छादनम् has भावे ल्युट् । Hence the Varttika applies. But with भवता we shall have राक्षसकलत्रस्य प्रच्छादनं भवता, the कृत् being barred by "कर्मणि च" (पाणिनि २।३।६६) while भवतः gives us राक्षसकलत्रप्रच्छादनं भवतः ।

4. बाढम्—An अव्यय meaning certainly.

5. अन्वयः—इदानीं शिविना विना को जनः परसंवेदने सुलभेषु अर्थलाभेषु दुष्करमिदं कुर्य्यात् । व्याख्या—'इदानीम्' अधुना अस्मिन् कलौ 'शिविना विना' शिविविरहिते जगति 'को जनः परस्य' आत्मेतरस्य संवेदने दुःखे 'सुलभेषु' सुखप्राप्येषु अर्थलाभेषु, परस्य दुःखे सति सुलभो यः अर्थागमः तमनादृत्य इत्यर्थः ["षष्ठी चानादरे" इति ७सी] 'दुष्करमिदं कुर्य्यात्' न कोऽपि [शक्ति लिङ्] । दिवं गते शिवौ दुष्करस्यास्य कर्त्ता नासीत् अद्य तु चन्दनदासेन तत् कृतम् अहो पौरुषम् ! इति स्तुतिः ।

6. सुलभेषु—Not mere भावे ७मी (see व्याख्या) ।

7. परसंवेदने—सम् + विद + ल्युट् भावे संवेदनम् suffering etc. भावे ७मी or अधिकरणे ७मी (the translation adopts the latter view). The force of पर is that अर्थलाभ usually comes through personal suffering, but here it is in plenty through another's (पर) suffering with perfect ease to self.

8. जनः—दृष्टि reads जने and explains— परस्य' परकीयार्थस्य 'संवेदने' समर्पणे कृते सति स्वस्य अर्थलाभेषु सुलभेषु सत्सु स्वार्थं तृणीकृत्य परसंरक्षणरूपमेव दुष्करं कर्म 'जनं' लोकै एकेन 'शिविना विना' त्वदन्यः कः कुर्य्यात्। शिविरपि पुरा कृतयुगे कृतवान् त्वं तु इदानीं पापिनि कलौ करोषि इति ततोऽपि अतिशयितसुचरितत्वम् इति भावः। Justice Telang and Professer Goswami object to this interpretation, saying, संवेदन does not mean समर्पण nor is जन usually equivalent to लोक, but strangely enough they neither attempt a different interpretation, nor adopt a better reading, though जनः is available and mentioned by Telang himself in his collection of readings.

9. शिविना विना—Sivi was a very pious king in the country of the उशीनरs. To test him, once upon a time, अग्नि took up the form of a dove, and इन्द्र in the shape of a hawk chased him up to the king whom the dove reached as a protector. Sivi offered meat to the hawk cutting out of his own body of a weight equal to that of the dove. He went on cutting lump after lump, but the dove outweighed them all, when the king went bodily into the scales. So great was Sivi's sacrifice. The gods then disclosed themselves.

48. (प्रकाशम्) चन्दनदास एष ते निश्चयः ?

(*Aloud*) Chandanadasa is this your resolve ?

चन्दनदासः—बाढ़म् ।

Chandanasasa—Undoubtedly.

चाणक्यः—(सक्रोधम्)—दुरात्मन् तिष्ठ दुष्टवणिक्। अनुभूयतां तर्हि नरपतिक्रोधः ।

Chanakya—(*In anger*) Vile-hearted, wicked Banker, then feell the king's wrath.

चन्दनदासः—सज्जोऽस्मि। अणुचिट्ठदु अज्जो अत्तणो अहि-आरसरिसम् [सज्जोऽस्मि। अनुतिष्ठतु आर्यः आत्मनः अधि-कारसदृशम्]।

Chandanadasa—I am ready. Let Noble Sir, do as befits his post.

चाणक्यः—शार्ङ्गरव, उच्यताम् अस्मद्वचनात् कालपाशिको दण्डपाशिकश्च। शीघ्रमयं दुष्टवणिक् निगृह्यताम्। अथवा तिष्ठतु, उच्यतां दुर्गपालको विजयपालः—"गृहीतगृहसारम् एनं सपुत्रकलत्रं संयम्य तावद्यत्न यावन्मया वृषलाय कथ्यते। वृषल एव अस्य प्राणहरं दण्डम् आज्ञापयिष्यति।

Chanakya—Sarngarava, tell Kalapasika and Dandapasika in my words—"Let this wicked Banker be punished quick." Or stay, tell Vijayapala the keeper of the fort—"Keep this one with son and wife bound and the valuables in his house seized until report is made by me to Vrishala who himself will anounce the sentence to take away his life."

शिष्यः—यदाज्ञापयत्युपाध्यायः। श्रेष्ठिन् इत इतः।

Pupil—As Preceptor commands. This way, Banker, this way.

चन्दनदासः—अज्ज अणमाअच्छामि [आर्य्य अयमा-गच्छामि] (स्वगतम्) दिट्ठिआ मित्तकज्जेण मे विणासो ण पुरिसदोसेण [दिष्टया मित्रकार्य्येण मे विनाशः न पुरुषदोषेण] (परिक्रम्य शिष्येण सह निष्क्रान्तः)।

Chandandasa—I am coming Noble sir. (*To himself*) Luckily my death is in friend's cause and not through human failings (*Walks round the stage and departs with the pupil*).

CHARCHA

1. अधिकार etc.—This is a taunt implying that the high-handed proceedings are out of keeping with चाणक्य's high position.

2. तिष्ठतु—Cf. "आर्ये तिष्ठतु तावत् आज्ञानियोगः", *ante*.

3. गृहीतगृहसारम्—गृहीतं गृहस्य सारं श्रेष्ठवस्तु यस्य etc,

4. पुरुषदोषेण—पुरुषस्य दोषः such as, felony, forgery etc.

49. चाणक्यः—(सहर्षम्) हन्त लब्धः इदानीं राक्षसः। कुतः—

त्यजत्यप्रियवत् प्राणान् यथा तस्यायमापदि।
तथैवास्यापदि प्राणाः नूनं तस्यापि न प्रियाः ॥ २४ ॥

(नेपथ्ये कलकलः)

Chanakya—(*With joy*) Ha, now Rakshasa is secured. (*Do you ask*) How ?—As this one renounces life as a hated thing at his straits, the very same way, at this one's distress, life will surely not be agreeable to him aslo (*Hubbub in the dressing room*).

CHARCHA

1. हन्त—अव्यय expressing joy.

2. अन्वयः ॥ यथा अयं तस्य आपदि प्राणान् अप्रियवत् त्यजति नूनं तस्य अपि अस्य आपदि प्राणाः तथैव प्रियाः न। व्याख्या—'यथा अयं' चन्दनदासः 'तस्य' राक्षसस्य 'आपदि' प्रियनाशरूपायां प्राप्तायां 'प्राणान्' आत्मजीवनम् 'अप्रियवत्' अप्रियान् पदार्थान् इव 'त्यजति' अकातरं जहाति 'नूनं' निश्चितं 'तस्य अपि' राक्षसस्यापि 'अस्य' चन्दनदासस्य 'आपदि' राजदण्डरूपायां प्राप्तायां 'प्राणाः' जीवनं 'तथा एव' यथा चन्दनदासस्य 'प्रियाः न' अप्रियवत् भविष्यन्ति। संन्यसिते चन्दनदासस्य जीविते राक्षसः तस्य वाञ्छार्फम् आत्मानम् अचिरात्करतलगतं करिष्यति इत्याशयः।

3. अग्रियवत्—अग्रिः तुल्यम् इति अग्रिय + वति। An अव्यय connected with त्यजति। "तृतीयान्तादेव पूर्वसूत्रेण प्रत्ययो भविष्यति। तथा च 'पूर्ववत्सनः' इति पञ्चम्यन्तात् वतिर्दृश्यते"—हरदत्त on "तत्र तस्येव"।

50. चाणक्यः—शार्ङ्गरव, शार्ङ्गरव।

Chanakya—Sarngarava, Sarngarava.

(प्रविश्य) शिष्यः—उपाध्याय, आज्ञापय।

Pupil—(*entering*) Let Precepter, command.

चाणक्यः—किमेष कलकलः।

Chanakya—Why is this hubbub ?

शिष्यः (विभाव्य)—उपाध्याय, एष खलु शकटदासं वध्यमानं वध्यभूमेरादाय समपक्रान्तः सिद्धार्थकः।

Pupil—(*Noticing*) Preceptor, here Siddharthaka has marched away leading Sakatadasa from the place of execution when he was about to be killed.

चाणक्यः—(स्वगतम्) साधु सिद्धार्थक, कृतः कार्यारम्भः। (प्रकाशम्) प्रसह्य किमपक्रान्तः ? (सक्रोधम्) वत्स उच्यतां भागुरायणो यथा त्वरितं संभावय इति।

Chanakya—(*To himself*) Bravo Siddharthaka, the beginning of the work is made. (*Aloud*) Has he marched away by force ? (*In anger*) My boy, tell Bhagurayana to set matters right quick.

(निष्क्रम्य प्रविश्य च) शिष्यः (सविषादम्)—उपाध्याय हा धिक् कष्टम्। अपक्रान्तो भागुरायणोऽपि।

Pupil—(*Going out and re-entering sorrowfully*) Ah fie ! How hard !! Preceptor, Bhagurayana too has run away.

चाणक्यः—(स्वगतम्) व्रजतु कार्यसिद्धये। (प्रकाशम् सक्रोधमिव) वत्स, उच्यताम् अस्मद्वचनात् भद्रभट-पुरुषदत्त-डिङ्गरात बलगुप्त राजसेन रोहिताक्ष-विजयवर्माणः शीघ्रमनुसृत्य गृह्यतां दुरात्मा भागुरायणः।

Chanakya—(*To himself*) Let him go for success in the work. (*Aloud—as if in anger*) My boy, tell Bhadrabhata, Dingaratha, Balagupta, Rajasena, Rohitaksha and Vijayavarman to march out quick and arrest the wicked Bhagurayana.

शिष्यः—तथा। (इति निष्क्रम्य पुनः प्रविश्य सविषादम्) हा धिक् कष्टम्। सर्वमेव तन्त्रम् आकुलीभूतम्। तेऽपि खलु भद्रभटप्रभृतयः प्रथमतरम् उषसि एव अपक्रान्ताः।

Pupil—So be it, (*Going and re-entering sorrowfully*) Ah fie ! How hard !! The whole department (state) is in confusion ; they too, Bhadrabhata and others, deserted much earlier even at dawn.

CHARCHA

1. प्रसह्य—An अव्यय here meaning forcibly.

2. सम्भावय—A peculiar use. एतत् असम्यक् भूतम् this has turned out as it should not have been. त्वम् एतत् सम्यक् भावय = त्वम् एतत् सम्भावय। The order is to mend matters that have gone wrong, *i. e.*, to go out and arrest the party.

3. तन्त्रम्—तन्त्र is here राष्ट्र the state "तन्त्रं सिद्धान्ते राष्ट्रे च परच्छन्द-प्रधानयोः" इत्यादि हैमः।

4. प्रथमतरम्—अतिशयेन प्रथमं यथा तथा earlier, अतिशायने तरप् *i. e.*, *long* before Bhagurayana left.

51. चाणक्यः (स्वगतम्)—सर्वथा शिक्षाः पश्चात्तापः खलु। (प्रकाशम्) वत्स अलं विषादेन। यस्य—

ये याता: किमपि प्रधार्य्य हृदये पूर्वं गता एव ते
ये तिष्ठन्ति भवन्तु तेऽपि गमने कामं प्रकामोद्यमा: ।
एका केवलमर्थसाधनविधौ सेनाशतेभ्योऽधिका
नन्दोन्मूलनदृष्टवीर्य्यमहिमा बुद्धिस्तु मा गान्मम ॥ २५ ॥

Chanakya—(*To himself*) Be the journey safe to all of them. (*Aloud*) My boy, away with dejection. Note—Those that have left, cherishing something at heart, are indeed gone beforehand ; those who stay, let them too, I say, be quite ready to go. Only let not that wonderful wit leave me—the wit the majesty of whose power was witnessed at the extirpation of the Nandas (*Or*—Nanda) and which in the matter of accomplishing ends, alone excels hundreds of armies.

अन्वय: ॥ ये हृदये किमपि प्रधार्य्य याता:, ते पूर्वमेव गता: । ये तिष्ठन्ति ते अपि कामं गमने प्रकामोद्यमा: भवन्तु । अर्थसाधनविधौ एका सेनाशतेभ्य: अधिका नन्दोन्मूलनदृष्टवीर्य्यमहिमा मम बुद्धिस्तु केवलं मा गात् । व्याख्या—'ये' जना: 'हृदये' मनसि 'किमपि' अनभिव्यक्तस्वरूपं वस्तु 'प्रधार्य्य' अनुध्याय 'याता:' अपक्रान्ता: 'ते पूर्वमेव' हृदये प्रधारणकाले एव 'गता:' अपक्रान्ता: । यानि हृतमनस: गता: एव, स्थित्वा किं कुर्य्यु:, तत् यान्तु ते । 'ये तिष्ठन्ति' स्थिता एव 'ते अपि कामम्' अनुमन्ये अहं 'गमने प्रकामोद्यमा:' प्रयत्नवन्त: 'भवन्तु' तानपि नाहं गणयामि । एवं सति स्वार्थं केन साधयिष्यामि इति चेत् शृणु—'अर्थसाधनविधौ' प्रयोजनसिद्धौ 'एका' असहाया तथापि 'सेनाशतेभ्य: अधिका' किञ्च 'नन्दानाम् उन्मूलने' 'दृष्ट: उत्साधने वीर्य्यमहिमा' प्रभावातिशय: यस्या: तादृशी 'मम बुद्धिस्तु मा गात्' तयैव कार्य्यं साधयिष्यामि ।

CHARCHA

1. जिवा: पन्थान: सन्तु—A common expression. Cf. "थालालुकुल-वलनच्च विवच पर्य्याय:"—Sak. Act IV.

2. किमपि—बुद्धि sees purpose in leaving the object un-

defined. चाणक्य wants his pupil to understand अनादिरोधं प्रधार्य्य while he himself means अनन्तकार्य्यं प्रधार्य्य।

3. अर्थसाधन etc.—अर्थानां साधनं, तदेव विधिः or तस्य विधिः etc. Telang reads केवलमेव साधनविधौ। But then it is not easy to parse एव which appears to be superfluous. अर्थ is not necessarily superfluous in अर्थसाधन। Cf. "व्रजतु कार्य्यसिद्धये" above, where from parity of reasoning कार्य्य would be superfluous.

4. सेनायतेभ्यः—Refers to *several* hundreds, hence p'ural; "विंशत्यादयः सदैकत्वे" इत्यमरः। अधिकयोगे ५मी। Cf. "यतश्चाधिकम्—" (पाणिनि २।३।९)।

5. नन्दोन्मूलन etc.—See व्याख्या। The word ends in महिमन् or महिमा by "डाबुभाभ्यामन्यतरस्याम्", and ङीप् is optional by "अन उपधा लोपिनोऽन्यतरस्याम्"। Hence we have three forms '—महिमन्' without डाप्, '—महिमा' with डाप्, '—महिमी' with ङीप्।

6. गात्—'माङि लुङ्' इति लुङ्, "न माङ्योगे" इत्यडागमप्रतिषेधः।

52, (उत्थाय आकाशे लक्ष्यं बद्ध्वा) एष दुरात्मनो भद्रभटप्रभृतीन् आहरामि। (आत्मगतम्) दुरात्मन् राक्षस क्वेदानीं गमिष्यसि। एषोऽहमचिरान्नवन्तम्—

स्वच्छन्दमेकचरमुज्ज्वलदानशक्ति-
मुत्सेकिना मदबलेन विगाहमानम्।
बुद्ध्या निगृह्य वृषलस्य कृते क्रियाया-
मारण्यकं मृगमिव प्रगुणीकरोमि ॥ २६ ॥

(इति निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः।

(*Rising and fixing his gaze in the sky*) :Here I bring back vile Bhadrabhata and others. (*To himself*) Wicked Rakshasa, where will you escape now? Here, having, erelong, secured

by wit thee that, with brilliant powers of gift, art like a wild elephant willfully keeping aloof and wandering in boastful strength of pride, I will render (thee) ready to work for Vrishala.

अन्वयः ॥ एषः अहम् उज्ज्वलदानशक्तिम् एकचरम् उत्सेकिना मदबलेन स्वच्छन्दं विगाहमानं भवन्तम् आरण्यकं गजमिव बुद्ध्या निगृह्य वृषलस्य कृते अचिरात् क्रियायां प्रगुणीकरोमि। व्याख्या—'एषः अहम् उज्ज्वला' प्रशस्या 'दानशक्तिः' वदान्यता मदकारिता च यस्य तादृशम् 'एकचरं' परित्यक्तनिजवर्गम् 'उत्सेकिना' गर्वहेतुना 'मदबलेन' दर्पप्रभावेण दानवारिप्रभावेण च 'स्वच्छन्दं' यथेच्छं निरङ्कुशं च यथा तथा 'विगाहमानं' भ्रमन्तं 'भवन्तम् आरण्यकं' वनचरं 'गजमिव बुद्ध्या' बुद्धिबलेन 'निगृह्य नियहं गमयित्वा कलयित्वा 'वृषलस्य कृते' चन्द्रगुप्तार्थं 'अचिरात्' झटिति 'क्रियायाम्' अमात्यकर्मणि भारवहनकर्मणि च 'प्रगुणीकरोमि' व्यापारयामि उद्योगवन्तं कारयामि।

CHARCHA

1. एष आहरामि—I am going to take steps, to bring them back under arrest. This is meant to misled the pupil.

2. स्वच्छन्दम्—स्व own निज। छन्द purpose आशय। स्वः छन्दः यस्मिन् कर्मणि तत् यथा तथा। Qual. the क्रिया in विगाहमानम्। ढुण्ढि says निरङ्कुशम्—"स्वपेक्षमनाश्रित्य विजानीयं परपत्यं कथम् आश्रितोऽसि इति तव कोऽपि नियन्ता नास्ति इत्यर्थः।" In other words; he makes it qualify भवन्तम् with the derivation स्व छन्दः अस्य। A rogue elephant is also स्वच्छन्दम्, because he leaves the herd and roams alone.

3. एकचरम्—एकश्चरतीति एक + चर + अच् कर्तरि। "वयमत्र नन्दवंशसम्बन्धिनः सर्वे स्वजनाः वर्त्तामहे। तान् विहाय तव एकश्चरसि इति भावः"—ढुण्ढि। The case is the same with the rogue elephent also.

4. उज्ज्वल etc.—दान gift, also the temporal juice of an elephant. "दानं गजमदे त्यागे पालनच्छेदयोर्द्वयोः" इति विश्वमेदिन्यौ। दानस्य शक्तिः power of gift, power of showing the temporal juice. Nom see व्याख्या। "परलक्ष्मीपजापार्थं महता कोषसम्पदा स्थापितः शकटदास इति वक्ष्यमाणवधूव्यवहारिषम्"—ढुण्ढि। The reference is to Act II,

5. उत्सेकिना—उद्+सिच् घञ् भावे उत्सेकः pride. उत्सेकं गमयति इति उत्सेक+णिच्+णिनि कर्त्तरि साधुकारिणि that which causes pride. "उत्सेकी दुरभिमानः। 'अरातिहस्तगतो विनश्येत् न तु चन्द्रगुप्तेन सन्दधीत' इति षष्ठाङ्के वक्ष्यमाणदुरभिमानवता"—ढुण्ढि। His derivation is therefore उत्सेकः अस्ति अस्य। Cp "भोगेष्वनुत्सेकिनी" etc—Sak. But how can मदवत् be उत्सेकिन् in this sense?

6. विगाहमानम्—वि+गाह्+शानच् कर्त्तरि wandering. "अस्मदपकाराय चेष्टमानम्"—ढुण्ढि।

7. आरण्यकम्—अरण्ये भव इति अरण्य+वुञ् by "पथ्यध्यायन्यायविहारननुष्यहस्तिषु"। यथा "आरण्यकोदुष्टगजः शनैः गर्त्तपादद्दढ़रज्ज्वबन्धनादिना उपायेन संवाहनादिक्रियायां प्रगुणीक्रियते वशीक्रियते एवं त्वाम् अतिशङ्कटे पातयित्वा अगतिकतया यथा स्वयमेव प्रगुणी भवसि तथा क्रियायां इषलसाचिव्यक्रियायां वशीकरोमि इत्यर्थः"—ढुण्ढि।

8. प्रथमोऽङ्कः—अङ्क is thus defined—"प्रत्यक्षनेतृचरितो बीजव्यक्तिपुरस्कृतः। अङ्को नानाप्रकारार्थः संविधानरसाश्रयः"।

द्वितीयोऽङ्कः ।

I. (ततः प्रविशति आहितुण्डिकः) आहितुण्डिकः—

जानन्ति तन्त्रजुत्तिं जहट्ठिअं मण्डलं अहिलिहन्ति ।
जे मन्तरक्खणपरा ते सप्पणराहिवे उवअरन्ति ॥ १ ॥

[जानन्ति तन्त्रयुक्तिं यथास्थितं मण्डलमभिलिखन्ति ।
ये मन्त्ररक्षणपरास्ते सर्पनराधिप उप चरन्ति ॥]

(*Now enters a Snake-charmer*) *Snake-chermer*—They alone do go about keeping kingly snakes in check, who know the application of herbs, can correctly (just as they are) draw magic circles and depend for safety mainly on *Mantras*.

अन्वयः ॥ ये तन्त्रयुक्तिं जानन्ति यथास्थितं मण्डलम् अभिलिखन्ति (च) मन्त्ररक्षणपराः ते सर्पनराधिपे उप चरन्ति । व्याख्या—'ये' जनाः 'तन्त्रस्य' सर्पौषधस्य 'युक्तिं' योजनां प्रयोगमित्यर्थः 'जानन्ति' विदन्ति 'यथा' यद्वत् 'स्थितं' शास्त्रेषु उक्तं' तथा स्थितमनतिक्रम्य वा 'मण्डलं' रेखां महेन्द्रादिदेवतायन्त्रम् इत्यर्थः 'अभिलिखन्ति' भूमौ आलेखयन्ति च 'मन्त्रैः' यत् 'रक्षणं' रक्षा तदेव 'परं' प्रधानं येषां तादृशाः ते जनाः 'नराधिपे' राजनि इव 'सर्पे' राजतुल्ये सर्पे इत्यर्थः 'उप' तस्मात् सर्पात् अधिका भूत्वा ["उपोऽधिके च" इति अधिकार्थकर्मप्रवचनीययोगे ७मी] 'चरन्ति' विहरन्ति । अत्र सर्पौ नराधिप इव इत्युपमितसमासः । सर्पतुल्ये नराधिपे इति श्राकपार्थिवादिपक्षे तु 'तन्त्रयुक्तिं' स्वराष्ट्रचिन्ताबीजम् ; 'मण्डलं' द्वादशराजमण्डलम् ; 'अभिलिखन्ति' लिपिबीजेन पत्रस्थं कुर्वन्ति ; 'मन्त्ररक्षणपराः' 'मन्त्रगुप्तिनिरताः ; इत्यादि द्रष्टव्यम् । तत्र च तन्त्रयुक्त्यादिना सर्पतुल्यं राजानं चन्द्रगुप्तमभिभूय चाणक्य एव पृथिवीं प्रशास्ति इति

गूढम्। गीतिर्वृत्तम्। "आद्याप्रथमदलीक्तं कथमपि लक्षणं भवेदुभयोः दलयोः क्रमयतिश्लोभां तां गीतिं गीतवान् भुजङ्गेनाः इति लक्षणात्।

CHARCHA

Remark—In the first act we have seen what measures चाणक्य is going to adopt to secure राक्षस। The second act describes the counter-moves of Rakshasa, and incidentally foreshadows Rakshasa's defeat in the coming struggle. The opening scene of the Secend Act is a street in मलयकेतु's capital, near Rakshasa's house.

1. आहितुण्डिकः—अहिंस्तुण्डम्। तेन दीव्यति इति अहितुण्ड + ठक् आहितुण्डिकः a snake-charmer. This man is an emissary of Rakshasa.

2. तन्त्रयुक्तिम्—तन्त्र is स्वराष्ट्रचिन्ता also औषध। "तन्त्रः स्वराष्ट्रचिन्तायां ... ...शास्त्रौषधाल्लमुख्येषु तन्त्रम्" इति वैजयन्ती quoted by Malli under माघ II 88. It is masc. in the first sense and neuter in the second. युज + क्तिन् भावे युक्ति application. Now see व्याख्या।

3. यथास्थितम्—सुपसुपा or अव्ययीभाव see व्याख्या।

4. मण्डलम्—Magic circle, also circle of kinds. For the latter see Malli under Magha II 81, and Kirat I. and—Manu VII.

5. अभिलिखन्ति—Draw, report, record.

6. मन्त्ररक्षण etc.—मन्त्रस्य यत् रक्षणं गुप्तिः तदेव परं प्रधानं येषां—also see व्याख्या।

7. सर्पनराधिपे उप—This gives सर्पनराधिप उप also सर्पनराधिपयुप। सर्पोऽयं नराधिप इव refers to the snake he had in his basket. If we say सर्पतुल्य नराधिपः the reference is to kings in general and particularly to चन्द्रगुप्त। उप indicates आधिक्य aud is a कर्मप्रवचनीय by "उपोऽधिके च"। It gives ओ in सर्पनराधिपे by "यस्यादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"। सर्पनराधिपे उप=सर्पनराधिपात् अधिकाः। उभयत्र जातावेकवचनम्। In the latter case translate thus—They alone can move about keeping shake-like kings in check who are versed in state management, report or record the circle of kings correctly and are intent upon guarding counsels.

N. B.—The current explation of this verse is widely different from what is given above. It proceeds by taking उप as an उपसर्ग and not a कर्मप्रवचनीय। उपचरन्ति = सेवन्ते। सपणराहिवे = सपेनराधिप' in the द्वितीया विभक्ति।

2. (आकाशे) अज्ज किं तुमं भणासि 'को तुमं' त्ति। अज्ज, अहं खु आहितुण्डओ जिष्णविसो णाम। किं भणासि 'अहं वि अहिणा खेलिदुं इच्छामि' त्ति। अह कदरं उण अज्जो वित्तिं उवजीवदि ? किं भणासि 'राअउलसेवकोह्मि' त्ति ? णं खेलदि एव्व अज्जो अहिना। कहं विअ ? अमन्तोसहिकुसलो बालग्गाहो अग्गाहिदङ्कुसो मत्तमतङ्गआरोहो लङ्घाहिआरो जिदकाशी राअसेवओ त्ति एदे तिण्णि वि अवस्सं विणासमनुहोन्ति। कहं दिट्ठमेत्तो अदिक्कन्तो एसो। (पुनराकाशे) अज्ज किं तुमं भणासि 'किं एदेसु पेडालसमुग्गएसु'त्ति। अज्ज, जीविआए संपदआ सप्पा। किं भणासि पेक्खिदुमिच्छामि त्ति ? पसीददु अज्जो अट्ठाणं खु एदम्। ता जइ कोदुहलं एहि एदस्सिं आवासे दंसेमि। किं भणासि 'एदं खु भट्टिणो अमच्चरक्खसस्स गेहम्। णत्थि अम्हारिसाणं इह पवेसो' त्ति। तेण हि गच्छदु अज्जो। मम उण जीविआए पसादेन अत्थि एत्थ पवेसो। कधं एसो वि अतिक्कन्तो। [आर्य किं त्वं भणसि—'कस्यमिति। आर्य अहं खलु आहितुण्डिकः जीर्णविषो नाम। किं भणसि अहमपि अहिना खेलितुमिच्छामि इति। अथ कतरां पुनः आर्यः वृत्तिमुपजीवति ? किं भणसि राजकुलसेवकोऽस्मि इति ? ननु खेलति

एव आर्य्यः अहिना। कथमिव ? अमन्त्रौषधिकुशलः व्यालग्राहो अगृहीताङ्कुशः मत्तमतङ्गजारोही लब्धाधिकारो जितकाशी राजसेवक इत्येते त्रयोऽपि अवश्यं विनाशमनुभवन्ति। कथं दृष्टमात्रः अतिक्रान्त एषः। आर्य्य किं त्वं भणसि किं एतेषु पेटकसमुद्गकेषु इति ? आर्य्य जीविकायाः सम्पादका सर्पाः। किं भणसि प्रेक्षितुमिच्छामि इति ? प्रसीदतु आर्य्य अस्थानं खलु एतत्। तत् यदि कौतूहलं, एहि एतस्मिन् आवासे दर्शयामि। किं भणसि—इदं खलु भर्त्तुः अमात्यराक्षसस्य गृहम्। नास्ति अस्मादृशानाम् इह प्रवेश इति ? तेन हि गच्छत्वार्य्यः। मम पुनः जीविकायाः प्रसादेन अस्तीह प्रवेशः। कथमेषोऽपि अतिक्रान्तः]।

(In the sky) Noble Sir, do you ask who I am ? Noble Sir, I am a snake-charmer Jirnavisha by name. Do you say, you too wish to play with snakes ? Well, what profession does Noble Sir follow ? Do you say you are an attendant at the royal household ? Well, Noble Sir is indeed playing with a snake already. Do you ask 'how' ? The snake-charmer not versed in Mantras and herbs, the rider of a *must* elephant without his curbed hook, the king's servant who brags of success on getting into office—these three surely suffer death. How ! He has passed as soon as seen ! *(Again in the sky)* Do you ask Noble Sir, 'what are in these in covered baskets' ? Snakes that give me a living, Noble Sir. Do you say you wish to see them ? Excuse me noble Sir, this is really an unsuitable place. So if you have the curiosity, come, I will show them in this house. Do you say "this is indeed the house of his Lordship Minister Rakshasa ; there is no

admission for people like us here". Then let Noble Sir pass. By virtue (*lit*—through the grace) of my profession there is admission for me here. How now ! this one too has disappeared !

CHARCHA

1. आकाशे—This is a speech with some one outside the stage. "अप्रविष्टस्य संलापो भवेदाकाशभाषणम्" ।

2. वृत्तिमुपजीवयति—वर्त्तते अनया इति वृत + क्तिन् करणे वृत्तिः profession. उपजीवति lives by, follows etc. उपसर्गवशात् सकर्मकत्वम् ।

3. राजकुलसेवकः—कुल household. राज्ञः कुलं राजकुलम् । तत्र सेवकः सुप्सुपा ।

4. अमन्त्रौषधि etc.—'मन्त्रेषु औषधिषु' च यः 'कुशलो' न भवति तादृशो 'व्यालग्राही' सर्पग्रहणनिरतो जनः 'न गृहीतः अङ्कुशः' येन तादृशो 'मत्तमतङ्गजस्य' मत्तहस्तिनः 'आरोही', 'जितेन' जयेन 'काङ्क्षते' दीप्यते कथ्यते वा यस्तादृशो 'खड्गाधिकारः' प्राप्तनियोगः 'राजसेवकः' इति एते त्रयः अवश्यं विनाशम् अनुभवन्ति' खलु भजन्ते । The three are thus in the same category. So coming under one of the three, you have a taste of the others also. Hence खेलत्येव आर्य्यः अहिना ।

5. व्यालग्राही—व्याल snake. "व्यालो दुष्टगजे सर्पे" इति हैमः । गृह्णाति इति ग्रह + णिनि कर्त्तरि ग्राही catcher व्यालस्य ग्राही—। व्यालं गृह्णाति gives व्यालग्राह because व्याल being जातिवाचक "सुप्यजातौ—" noes not apply and "कर्मण्यण्" comes in.

6. मत्त etc.—मत्तमतङ्गज a *must* elephant is not a class. So here we may have णिनि by "सुप्यजातौ—" । But it is doubtful if any habit (ताच्छील्य) is implied. साधुकारिणि णिनि, however is always available.

7. जितकाङ्क्षी—जि + क्त भावे जितम् success, The success lies in getting into office. See व्याख्या । "सुप्यजातौ—" इति णिनिः साधुकारिणि कर्त्तरि ।

8. दुष्टभाव etc.—दुष्ट इति भावो अस्य दुष्टभावः । दुष्ट एव gives दुष्ट-

मात्रम्। "मात्र' कार्त्स्न्येऽवधारणे" requires मात्र to be neuter in this sense. Or—We may also attach मात्र'च् in the sense of प्रमाण in defence of such cases. Thus प्रविष्ट इत्येतत् प्रमाणमस्य इति प्रविष्ट+मात्रच्=प्रविष्टमात्रः। Practically this amounts to अवधारण। Cp "प्रविष्टमात्रे एवायमं तत्रभवति" &c.—Sak., and "विद्धमात्रः किलतपक्षी"—Rag. V. Here the snake-charmer regretsthat a customer is lost.

9. पेटक etc.—पेटक is मञ्जूषा box. "पिटकः पेटकः पेटा मञ्जूषा" इत्यमरः। समुद्गच्छति इति सम्+उद्+गम+ड कर्त्तरि+कन् स्वार्थे समुद्गकः a small holder that can be easily carried. A पेटक may be too big to be a समुद्गक, and a समुद्गक may also be a mere bundle, so as not to become a मञ्जूषा which being a box has a lid attached. But the baskets the man was carrying were *boxes* and therefore पेटक, also *light* hence समुद्गक। Thus पेटकाश्च ते समुद्गकाश्च पेटकसमुद्गकाः etc.

3. (स्वगतम्—संस्कृतमाश्रित्य) अहो आश्चर्यम्। चाणक्यमतिपरिग्रहीतं चन्द्रगुप्तमवलोक्य विफलमिव राक्षसप्रयत्नम् अवगच्छामि। राक्षसमतिपरिग्रहीतं मलयकेतुमवलोक्य चलितमिव आधिराज्यात् चन्द्रगुप्तमवगच्छामि। कुतः—

कौटिल्यधीरज्जुनिबद्धमूर्त्तिं
मन्ये स्थिरां मौर्य्यनृपस्य लक्ष्मीम्।
उपायहस्तैरपि राक्षसेन
निकृष्यमाणामिव लक्षयामि ॥ २ ॥

To himself—(*speaking in Sanskrit*) Oh wonder! On seeing Chandragupta led by the counsels of Chanakya, I deem Rakshasa's attempt as futile; while, seeing Malayaketu led by the counsels of Rakshasa, I deem Chandragupta as if shaken from his paramount position (empire). Whence (do you ask)?—King Maurya's Fortune, I deem secure with her person firmly fettered by the bands of Kautilya's wit; I also notice her as if being dragged along by Rakshasa with hands in the shape of expedients.

CHARCHA

1. संस्कृतमाश्रित्य—Prakrita is his tongue to suit his disguise ; he takes up Sanskrit which is natural to him, he being an उत्कृष्ट पात्र—A high officer of Nanda's household.

2. चाणक्यमति etc.—See *ante.* राक्षसमतिपरिगृहीतम् ।

3. आधिराज्यात्—अधिष्ठितो राजा अधिराजः । "राजाहः—" इति टच् समासान्तः । तस्य भावः कर्म वा इति अधिराज + ष्यञ् आधिराज्यम् empire etc. The two ministers are evenly matched and either is menace to the other. The same thing is said differently in the verse following.

4. अन्वयः ॥ मौर्य्यनृपस्य लक्ष्मीं कौटिल्यधीरज्जुनिबद्धमूर्त्तिं स्थिरां मन्ये, राक्षसेन उपायहस्तैः निकृष्यमाणामिव लक्षयामि अपि । व्याख्या—'मौर्य्यनृपस्य' राज्ञः चन्द्रगुप्तस्य 'लक्ष्मीं' श्रियं कौटिलस्य' चाणक्यस्य 'धीरूपा' या 'रज्जुः' तया 'निबद्धा' संयता 'मूर्त्तिः' देहः यस्याः तथाविधाम् अतएव 'स्थिरां' अचलां 'मन्ये' तर्कयामि । पक्षान्तरे 'राक्षसेन उपायरूपैः हस्तैः' सामादिभिश्चतुर्भिः भुजैः 'निकृष्यमाणां' नितरां कृष्यमाणाम् 'इव लक्षयामि अपि' पश्यामि च । दृढ एव बन्धो दत्तः कौटिल्येन किन्तु राक्षसेन चतुर्भिर्हस्तैर्बाकृष्टः लक्ष्यते वा इति भावः । वृत्तसुपजातिः ।

5. कौटिल्यधी etc.—Analysis in व्याख्या । The woman is fickle, hence कौटिल्य has fettered her to stop from runing away. But he has used but a single rope, viz. his धी only. नि is intensive · निबद्ध = firmly fettered.

6. मौर्य्यनृपस्य—Some read मौर्य्यकुलस्य । But as even Maurya's rule is not yet firmly established, it is premature to speak of the लक्ष्मी of his कुल । Indeed कुल does not exist without a succession.

7. उपायहस्तैः—The उपाय्s are four—"भेदो दण्डः सामदानमित्युपाय-चतुष्टयम्" । The plural is deliberate. Only *one* rope, धी, and *four* hands to tug at it. करणे ३या ।

8. निकृष्यमाणाम्—Here again the नि is intensive. The pull is very *hard* (नि) because given with *four* hands. Hence the result is uncertain the rope may or may not break.

4. तदेवम् अनयोर्बुद्धिशालिनोः सुसचिवयोः विरोधे संशयितेव नन्दकुललक्ष्मीः।

विरुद्धयोर्भृशमिह मन्त्रिमुख्ययोर्
महावने वनगजयोरिवान्तरे।
अनिश्चयाद्गजवशयेव भीतया
गतागतैर्ध्रुवमिव खिद्यते श्रिया ॥३॥

तत् यावदमात्यराक्षसं पश्यामि (इति परिक्रम्य स्थितः)।

So at the conflict of these two resourceful worthy ministers the Fortune of the race of Nanda looks undecided. Here, as in a deep forest, Fortune like a female elephant frightened through uncertainty, seems to tire herself out by crossing over and recrossing between these two leading ministers who are fully opposed to each other like two wild tuskers. Now let me see minister Rakshasa (*Stops after going round the stage*).

CHARCHA

1. बुद्धिशालिनोः—बुद्ध्या शालेते शोभेते स्मश्च ते इति बुद्धि + शाल + णिनि' साधुकारिणि कर्त्तरि etc. Qual. मन्त्रिमुख्ययोः।

2. संशयिता—सम् + शी + अच् भावे doubt. संशयः जातः अस्याः इति संशय + इतच् तारकादि। She does not know if to stay with चाणक्य or to go back to Rakshasa.

3. अन्वयः॥ इह महावने वनगजयोः इव भृशं विरुद्धयोः मन्त्रिमुख्ययोः अन्तरे गजवशया इव श्रिया अनिश्चयात् भीतया गतागतैः ध्रुवं खिद्यते इव। व्याख्या —'इह' अस्मिन् राज्ये 'महावने वनगजयोरिव भृशम्' अत्यर्थं 'विरुद्धयोः' प्रारब्ध-विरोधयोः 'मन्त्रिमुख्ययोः' अमात्यवर्य्ययोः चाणक्यराक्षसयोः 'अन्तरे' मध्ये अन्तराले इत्यर्थः 'गजवशया इव' कारिण्या इव 'श्रिया' राजलक्ष्म्या 'अनिश्चयात्' अस्थिरत्वात् जयपराजययोः, जितस्यापि पुनर्जयदर्शनात् अतएव 'भीतया' त्रस्तया सत्याश्रितस्य पराभवात् शङ्कितया इत्यर्थः 'गतागतैः' यातायातैः सुहृज्जनं परित्यज्य अपरिसमाश्रयणैः इत्यर्थः 'ध्रुवं' निश्चितं खिद्यते इव' खेदमनुभवति इव। "जभी सजी गिति रुचिरा चतुर्भिः" इत्य क्षरलक्षणं रुचिराछन्दः।

4. इह—The counterpart of this is महावने।

5. मन्त्रिमुख्ययोः—मन्त्रिणां मुख्यौ or मन्त्रिषु मुख्यौ, तयोः।

6. अन्तरे—Construe.—अन्तरे गतागतैः—By crossing and re-crossing the interval of space between them.

7. अनिश्चयात्—निर् or निस् + चि + अच् भावे निश्चय certainty, finality. न निश्चयः etc.—through absence of finality. The victor becomes the next moment vanquished, hence the absence of finality.

8. गजवश्यया—वश्या a female. "वश्या नार्यां वन्ध्यगव्यां हस्तिन्यां दुहितर्यपि" इति हैमः। वश्या गजी गजवश्या a female elephant. कर्मधा—with पूर्वनिपात of the जातिवाचक word गजी by the rule "पोटायुवतिस्तोक..... धेनवो जातिः"।

9. भीतया गतागतैः etc.—Frightened by uncertainty. Whenever the worsted antagonist comes-out the victor at last, she finds herself on the wrong side which frightens her and she hastens to cross over. This she has to do over and over again. Hence the fatigue.

10. इव—Some read इह which also occurs in the first line and therefore seems to be tautologous.

11. खिद्यते—खिद + खट् ते भावे। Nom. स्त्रिया and गजवश्यया।

5. (ततः प्रविशति आसनस्थः पुरुषेण अनुगम्यमानः सचिन्तो राक्षसः)। राक्षसः (सबाष्पम्)—कष्टं भोः कष्टम्।

वृष्णीनामिव नीतिविक्रमगुणव्यापारशान्तद्विषां
नन्दानां विपुले कुलेऽकरुणया नीते नियत्या क्षयम्।
चिन्तावेशसमाकुलेन मनसा रात्रिन्दिवं जाग्रतः
सैवेयं मम चित्रकर्मरचना भित्तिं विना वर्त्तते ॥४॥

(*Now enters Rakshasa seated meditating and attended by a man-servant*). *Rakshasa*—(*In tears*) How hard! Oh how

hard !! The vast family of the Nandas with enemies weeded out by the application of the virtues of Polity and Valour having been driven to extinction by relentless Fate as was that of the Vrishnis, that wonderful invention of moves by me, keeping wakeful day and night, with a mind troubled by a touch of care, goes without an object.

अन्वय ॥ वृष्णीनामिव नीतिविक्रमगुणव्यापारशान्तद्विषां नन्दानां विपुले कुले अकरुणया नियत्या चयं नीते चिन्ताविश्रमसमाकुलेन मनसा रात्रिन्दिवं जाग्रतः मम इयं सा चित्रकर्मरचना भित्तिं विना वर्त्तते। व्याख्या—वृष्णीनामिव' यदूनामिव 'नीति-गुणस्य' नयगुणस्य 'विक्रमगुणस्य' च शौर्य्यगुणस्यापि 'व्यापारेण' प्रयोगेणहेतुना 'शान्ताः' अपहृताः 'द्विषः' शत्रवो येषां तादृशानां 'नन्दानां विपुले कुले' विशाले वंशे 'अकरुणया' दयाहीनया 'नियत्या' दैवेन 'चयं नीते' नाशं गमिते सति 'चिन्ताया: आवेशेन' आविर्भावेन 'समाकुलं' सम्भ्रान्तं सन्तप्तमित्यर्थः यत् 'मनः' तेन रात्रिन्दिवं अहर्निशं 'जाग्रतः' जागरूकस्य 'मम इयं सा' एषा प्रथिता 'चित्रा' विस्मयकरी 'कर्म-रचना उपायोद्भावना। अथ च चित्रकर्मणः आलेखनक्रियायाः 'रचना योजना। 'भित्तिं विना एव' अवलम्बनभूत्या निरालम्बा एव। अथ च 'भित्तिं' कुड्यं 'विना एव' 'वर्त्तते' तिष्ठति। निरालम्बा सती तथा एव भवति इत्यर्थः। कस्य कृते अयं प्रयासः तत्र जाने इति भावः। प्रागुक्तलक्षणं शार्दूलविक्रीडितं वृत्तम्।

CHARCHA

1. वृष्णीनाम्—वृष्णि was a Kshatriya king of the race of यदु। By transference of epithets (लक्षणा) it stands here for the descendants of वृष्णि। Hence it can take the plural number तेषाम्। Cp "रघूनामन्वयं वक्ष्ये"—Rag I. The race of यदु was extirpated in a drunken brawl brought on by the imprecation of अष्टावक्र। The necessity for the लक्षणा here is that वृष्णि, though क्षत्रियवाचक, is not जनपदवाचक at the same time; consequently it does not take a तद्राज affix by "जनपदशब्दात् क्षत्रियादञ्" which disappears by "तद्राजस्य बहुषु—"।

2. नीतिविक्रम etc.—नीतिश्च विक्रमश्च। तावेव गुणौ etc., see व्याख्या।

टुण्ढि wants to have शान्त as अन्तर्भावितण्यर्थ, *i. e.* equivalent to शमित। This is not necessary, though no harm.

3. नन्दानाम्—The father and the eight sons were all styled Nanda (See *Intro.*) Hence the plural is available.

4. रात्रिन्दिवम्—रात्रौ च दिवा च, द्वन्द्व by निपातन in the rule "अचतुर-विचतुर—"। The निपातन changes रात्रि into रात्रिम्। "विप्रतिषिद्धं चानधिकरणवाचि" इति एकवद्भावः "स नपुंसकम्" makes it neuter. Hence दिवा becomes दिव by "ङसो नपुंसके प्रातिपदिकस्य"। Thus derived the सप्तम्यर्थ is included in the प्रातिपदिक and becomes a प्रातिपदिकार्थ, hence प्रातिपदिकार्थे प्रथमा। The compound may also be derived with the constituents in the प्रथमा as in "स्वकालपरिमाणेन व्यस्तरात्रि-न्दिवस्य ते"—Kumara। Also comp "विभज्य नक्तन्दिवमस्ततन्द्रिना"—Kirat. I.

5. जायतः—जागृ+शतृ कर्त्तरि जायत् vigilant etc. "नाभ्यस्ताच्छतुः" इति न नुम्।

6. सैवेयम्—जायतो मे इयं सा चित्रकर्मरचना इति प्रक्रान्तार्थत्वात् न यत्तद्-व्यपेक्षा। टुण्ढि says "नन्दे जीवत्सु यादृशी तादृशी एव"। इयम् supposes the whole thing present before the mind's eye.

7. चित्र etc.—चित्र wondrous. कर्मन् work. रचना invention. Now see व्याख्या। टुण्ढि has विचित्रपौरुषव्यापारः। Note the double sense (See व्याख्या)।

8. भित्तिम्—भित्ति is आश्रय support, also wall (See व्याख्या)। "स्वामिनी विनैव मुधा व्याप्रिये"—टुण्ढिराज। The verse shows that Rakshasas efforts were half-hearted and lacked determination which presages failure.

6. **अथवा—**

नेदं विस्मृतभक्तिना न विषयव्यासङ्गमूढ़ात्मना
प्राणप्रच्युतिभीरुणा न च मया नात्मप्रतिष्ठार्थिना।
अत्यर्थं परदास्यमेत्य निपुणं नीतौ मनो दीयते
देवः स्वर्गगतोऽपि शात्रवबधेनाराधितः स्यादिति ॥५॥

Or—It is not with devotion ignored, that, accepting the slavery of another, attention is being turned by me very carefully to polity ; nor with mind dazed by attachment to the world ; nor with a dread of the loss of life ; nor again with a hankering after personal glory ; but that Sire even though gone to heaven might be served by the destrnction of his enemies.

अन्वयः ॥ मया परदास्यमेत्य अत्यर्थं निपुणं नीतौ मनौ दीयते (इति) इदं विस्मृतभक्तिना न, विषयव्यासङ्गमूढात्मना न, प्राणप्रच्युतिभीरुणा न आत्मप्रतिष्ठार्थिना न (किन्तु) स्वर्गगतः अपि देवः भ्रातृवधेन आराधितः स्यात् इति । व्याख्या— मया परस्य' नन्दं तरस्य मलयकेतोरित्यर्थः 'दास्यमेत्य, सेवामङ्गीकृत्य 'अत्यर्थं निपुणं' परमप्रयत्नेन 'नीतौ' नयव्यवहारे उपायप्रयोगे इत्यर्थः 'मनौ दीयते' व्याप्रियते इति 'इदं विस्मृतं भक्तिः' स्वामिभक्तिः नन्दानुराग इत्यर्थः येन तादृशेन सता 'न' मलयकेतुः श्रितः सत्यं किन्तु दृढा एव मे नन्दे भक्तिः इत्यर्थः । मन्ये बलवती ते विषयवासना, तत् मृते भर्त्तरि सानुरागोऽपि अन्यं स्वामिनं श्रितोऽसि । 'विषयेषु' भोगेषु यो 'व्यासङ्गः' आसक्तिः तेन 'मूढः' विवेकाविकलः 'आत्मा' यस्य तादृशेन सता 'न' अचला मे स्वामिभक्तिः भोगाभिलाषश्च नास्ति तथापि अन्यं श्रितोऽसि इत्यर्थः । यदि भक्तोऽसि निःसङ्गश्चासि तर्हि मृते भर्त्तरि अनुमरणमेव ते ज्यायः आसीत् तत् किं प्राणनाशात् बिभेषि ? 'प्राणप्रच्युतेः' आत्मत्यागात् यो 'भीरुः' भीतः तादृशेन सता 'न' मया नन्दे तरः संश्रितः । यद्येवं नूनं भवान् नीतिविभवेन चाणक्यं जित्वा जगति यशः कामयते ततः एव अन्यसंश्रयः । 'आत्मनः' निजस्य या 'प्रतिष्ठा' ख्यातिः तां यः 'अर्थयते' कामयते तादृशेन सता 'न' मया मलयकेतुराश्रितः । अत्र पराशये किं तर्हि भवतः आशयः ?—'स्वर्गगतः अपि' लोकान्तरितश्च 'देवः' स्वामी नन्दः 'भ्रातृवधेन' अरिविनाशेन' आराधितः स्यात् सेवितो भवेत् 'इति' हेतोरहं मलयकेतुं श्रितः । देवमनु मरणे महान्तो हि मे लोकाः स्युः सत्यं, किन्तु दृष्टस्यैव देवस्य सेवनमहं वरं मन्ये । तच्च सेवनं तस्य भ्रातृवधेन सम्भवति नान्यथा, अतोऽयं मे मलयकेतुसंश्रयव्यापारः इति भावः । शार्दूलविक्रीडितं वृत्तम् !

CHARCHA

1. विस्मृतभक्तिना—See व्याख्या। Avoid विस्मृता भक्तिः अनेन ; this will give विस्मृताभक्तिना। The पूर्वपद should be in the neuter—"सामान्ये नपुंसकम्" see *ante*. Also cp "मां विदितभक्तिं कथयिष्यति" &c.—Sak.

2. विषय etc.—See व्याख्या। Some read रूढ़ for मूढ़। Explain —'विषयेषु यौ 'व्यासङ्गः' तत्र 'रूढ़' निश्चलग्नः 'आत्मा' यस्य—with mind intent upon attachment to the world.

3. आत्मप्रतिष्ठा etc.—प्रतितिष्ठत्यनया इति प्रति + स्था + अङ् करणे प्रतिष्ठ that by which one exists, *i. e.*, prestige, fame etc. गौरव। 'प्रतिष्ठा गौरवे स्थितौ" इति हैमः। Now see व्याख्या।

4. शाववधेन—शव एव इति शव + अण् स्वार्थे प्रज्ञादि शाववः। तस्य वधः। Living, I can serve master, even though he is dead, by killing his enemies.

5. स्यात्—शकि लिङ्। Service is practicoble (शक्य) though service of a dead man sounds bueer.

6. *Remark*—Note the significant succession of the epithets विस्मृतभक्तिना, विषयव्यासङ्गमूढ़ात्मना etc. (See व्याख्या)।

7. (आकाशमवलोकयन् सास्रम्) भगवति कमलालये क्षमगुणज्ञासि। कुतः—

आनन्दहेतुसपि देवमपास्य नन्दं
सज्ञासि किं कथय वैरिणि मौर्य्यपुत्रे।
दानाम्बुराजिरिव गन्धगजस्य नाशे
तत्रैव किं न चपले प्रलयं गतासि ॥ ६ ॥

(Gazing at the sky—With tears) Mighty Resider-in-a-lotus you are extremely unappreciative of merit. (Do you ask) How ?—Say O fickle one, why, forsaking Sire Nanda who was the source of your delight, you have become attached to the son begotten of Mura who is an enemy ? Why did you not perish even then (with him) like the line of temporal fluid at the death of the scent-elephant (गन्धगज) ?

CHARCHA

1. कमलालये—कमलानि आलयः अस्याः कमलालया, *i. e.*, पद्मालया which is a name of लक्ष्मी। "लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया" इत्यमरः।

2. अगुणज्ञा—गुणान् जानाति इति गुण + ज्ञा + क कर्त्तरि गुणज्ञा an appreciator of merit. न तथा। Or जानातीति ज्ञा ; गुणस्य ज्ञा, शैषषष्ठीतत्।

3. अन्वयः॥ हे चपले, कथय आनन्दहेतुमपि देवं नन्दम् अपास्य वैरिणि मौर्य्यपुत्रे किं सक्ता असि, यन्मदजलस्य नाशे दानाम्बु राजिरिव तवैव किं न प्रलयं गतासि। व्याख्या—हे 'चपले' चञ्चले 'कथय ब्रूहि एतत् 'आनन्दहेतुमपि सुखकारणमपि प्रीतिपात्रमपि इत्यर्थः 'देवं नन्दम् अपास्य त्यक्त्वा 'वैरिणि' रिपौ 'मौर्य्यपुत्रे' सुरागर्भसम्भवे तनये सपत्नीपुत्रे इति यावत् 'किं सक्ता' अनुरक्ता 'असि'? किं कार्य्यमासीन्मे इति चेत् 'गन्धाढ्यस्य गजस्य नाशे' सत्युकाले 'दानाम्बुनः' मदजलस्य 'राजिः' रेखा 'इव' तोयप्रवाहो मदधारा इव 'तवैव' तस्मिन्नेव काले नन्दनाशकाले इत्यर्थः 'किं न प्रलयम्' अदर्शनं 'गतासि'? गन्धगजस्य हि असत्ती मदगन्धः, ततः एव असौ गन्धगज इति कथ्यते। स गन्धः तेनैव गजेन सह लुप्यते नतु तत्करभेषु संक्रामति। त्वमपि नन्देनैव सह कथं न विलुप्ता। साध्वी सा मदरेखा असती खलु त्वमिति भावः। वसन्ततिलका वृत्तं लक्षणमुक्तं प्राक्।

4. आनन्दहेतुम्—आनन्दस्य हेतुः। Even thus he was forsaken, hence भग्नगुणज्ञा।

5. सक्ता वैरिणि—Hence again भग्नगुणज्ञा।

6. मौर्य्यपुत्रे—सुरा + आ अपत्ये मौर्य्यः। स चासौ पुत्रश्च। तस्मिन्। Refers to चन्द्रगुप्त who was Nanda's son by Mura—a Sudra woman (See Intro.). The emphasis is on मौर्य्य, *i. e.*, to the low birth of चन्द्रगुप्त। Hence too लक्ष्मी is भग्नगुणज्ञा।

7. दानाम्बु etc.—This is here represented as a devoted wife of the गन्धगज following him at death. It is the peculiar odour of the temporal fluid that makes a tusker a गन्धगज।

8. गन्धगजस्य—गन्धगज is a very rare kind of elephant. The ordour belongs to the मदधारा and no other animal can stand it. Cf.—"सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयम्। विवृद्धिमाधीरचतोयधाराः सेनागजेन्द्रा विमुखा बभूवुः॥"—*Raghu.*

9. तव—तस्मिन् काले, *i. e.*, when Nandá died. Why did you not perish with Nanda.

10. चपले—Fickleness is emphasised to contrast it with the devotion of दानाम्बुराजि।

8. अपिच, अनभिजाते,

पृथिव्यां किं दग्धाः प्रथितकुलजा भूमिपतयः
पतिं पापे मौर्ख्यं यदसि कुलहीनं वृतवती।
प्रकृत्या वा काशप्रभवकुसुमप्रान्तचपला
पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी ॥ ७ ॥

Moreover—Oh! ill-born and wicked girl, are all kings born of illustrions races ou earth reduced to ashes that you have chosen the stockless (outcast, base-born) son of Mura for your spouse? Or, the mind of woman which is fickle like the tip of flowers that grow on *Kasa*, is averse to appreciate the merits of men.

अन्वयः ॥ हे पापे, पृथिव्यां प्रथितकुलजाः भूमिपतयः दग्धाः किं, यत् त्वं कुलहीनं मौर्ख्यं पतिं वृतवती असि। वा काशप्रभवकुसुमप्रान्तचपला पुरन्ध्रीणां प्रज्ञा प्रकृत्या पुरुषगुणविज्ञानविमुखी (भवति)। व्याख्या—'अपिच' किञ्च यदि तवैव प्रलयं न गता तथापि हे 'अनभिजाते' अकुलीने हे 'पापे' 'पृथिव्यां' जगति 'प्रथिते' प्रख्याते 'कुले' वंशे 'जाताः भूमिपतयः' राजानो 'दग्धाः किं' चाणक्यकोपाग्नौ सर्वे एव सञ्जीभूताः किं 'यत्त्वं कुलहीनं' कुलशून्यं जारजमित्यर्थः 'मौर्ख्यं' सुरागर्भसमुद्भवं वृषलं 'पतिं वृतवती असि अवधीः। अथ 'वा' वृद्धैव त्वामुपालभे 'काशप्रभवं' काशतृणजातं यत् 'कुसुमं' तस्य 'प्रान्तः' इव 'चपला' चञ्चला 'पुरन्ध्रीणां' कामिनीनां 'प्रज्ञा' मतिः 'प्रकृत्या' स्वभावतः एव 'पुरुषाणाम्' आश्रयभूतानां जनानां ये 'गुणाः' तेषां 'विज्ञाने' परिचये 'विमुखी' वामा आग्रहशून्या भवति। स्त्रियो हि यं त्यजन्ति यं वा भजन्ते तयोर्द्वयोरेकतरस्यापि गुणान् न पर्यालोचयन्ति। गुणवन्तमपि त्यजति गुणहीनमपि भजन्ति इति भावः। प्रागुक्तालङ्कारः श्लिष्टविशेषणम्।

CHARCHA

1. अनभिजाते—अभिजात high-born. न तथा low-born. Addressed to लक्ष्मी। This is mere abuse not a truth. लक्ष्मी came out of the sea at the churning of the ocean.

2. मौर्य्यं कुलहीनम्—मौर्य is Mura's son see (*ante.*). कुत्सितं हीनं कुलहीनम्। It is significant that the poet no-where calls चन्द्रगुप्त by a name derived from his father. In classical works युधिष्ठिर etc, are indifferently called पार्थ, कौन्तेय, or पाण्डव। So it may be suspected that चन्द्रगुप्त was an illegitimate child of मुरा। The suspicion is strengthened by the addition of कुलहीनम् here. There is a distinction between कुलहीन and अकुलीन। कुलहीन =stockless. अकुलीन=coming of an indifferent stock. Now if Mura were a married wife of Nanda, the issue would not be stockless altogether, only it would not get the stock of its father.

3. काशप्रभव etc.—काश is a grass allied to *Kusa.* प्रभवत्यस्मात् इति प्र+भू+अप अपादाने प्रभवः source. काशः प्रभवः अस्य etc. see व्याख्या। प्रभव here is superfluous. Or, is it intended to imply by it that the flower is still on the grass and not plucked ? It shakes less in hand.

4. पुरन्ध्रीणाम्—पुरं धारयतीति पुर + धृ+णिच् + खच् कर्त्तरि+ङीष् स्त्रियाम्[गौरादि] पुरन्ध्री a matron, पृषोदरादि। Another deriv. is पुरं धरति इति पुर+धृ+ड औणादिक कर्त्तरि पुरन्धिः (पृषोदरादि)। This admits of ङीष् optionally by "क्रादिकारादक्तिनः"। Hence पुरन्धिः and पुरन्ध्री in the feminine. For the first cf. "पुरन्धिभिश्च क्रमशः प्रयुक्तम्"—*Raghu.* Usually पुरन्ध्री is an elderly female. Here it is used for a *woman in general.* "स्यात्तु कुटुम्बिनी पुरन्ध्री" इत्यमरः।

5. पुरुषगुण etc.—विहस्तं मुखमस्याः विमुखी। विमुखा is an optional form ; for analysis see व्याख्या। लक्ष्मी is perverse ; not that she cannot see merit or demerit, but she *will not.*

9. अपि च, अविनीते, तदहम् आश्रयोन्मूलनेनैव त्वाम् अकामां करोमि। (विचिन्त्य) मया तावत् इदमस्य चन्द्रगुप्तस्य कृते गूढपुरुषाणां विचित्रं भगवतश्चित्रगुप्तस्य स्वाख्यमनुष्ठितम्। कुतः ? कुसुमपुरनिवासिनां प्रति अनुदासीनो

राक्षस इति तत्रस्थानाम् अस्मामिः सह एककार्य्याणां देवपादोपजीविनां न उद्यमः शिथिलोभविष्यतीति। चन्द्रगुप्तशरीरम् अभिद्रोग्धुम् अस्मत्प्रयुक्तानां तीक्ष्णरसदायिनाम् उपसंग्रहार्थं परकृत्योपजापार्थञ्च महता कोषसञ्चयेन स्थापितः शकटदासः। प्रतिक्षणम् अरातिवृत्तान्तोपलब्धये तत्संहतिभेदनाय च व्यापारिताः सुहृदो जीवसिद्धिप्रभृतयः।

Let me add, O ill-bred girl, that I will disappoint you by the demolition of your shelter itself. (*Reflecting*) The right thing indeed has been done by me by leaving my wife and child in the house of Chandanadasa, the best of friends, while marching out of the town. Why ? Because (knowing that) Rakshasa is not indifferent to an attack on Kusumapura, the efforts of the dependents of revered Sire, staying there with a common object with us, will not slacken. Wtth the object of buying over those who, employed by me, would administer poison to injure the person of Chandrapupta and with a view to counteract (*Or*—thwart) the enemies' measures, Sakatadasa has been stationed with a vast supply of funds. To get full news of the enemies every moment, and to cause a rupture in their relations, friends such as Jivasiddhi and others. have been employed.

अपीति। 'अपि च' अन्यच्च हे 'अविनीते' अशिक्षिते विनयविहीने' यतस्त्वमेवमन्धा मूर्खा प्रति 'तत्' तस्मात् 'अहम् आत्मवस्य' त्वदवलम्बनस्य चन्द्रगुप्तस्य 'उन्मूलनेनैव' नाशेनैव 'त्वामकामाम्' असिद्धिकामां 'करोमि'। 'विचिन्त्य' आत्मयोन्मूलनोपायं ध्यात्वा आह —'मया तावत् सुहृज्जनस्य चन्दनदासस्य गृहे गृहजनं" दारापत्यं 'निक्षिप्य नगरात् निर्गच्छता न्याय्यम् अनुष्ठितं युक्तमेव कृतम्। 'कुतो' न्याय्यमित्याह—'तत्रस्थानां' कुसुमपुरे स्थितानाम् 'अस्माभिः सह एककार्य्याणां' तुल्यप्रयोजनानां चन्द्रगुप्तोन्मूलना-

धिनामित्यर्थः; 'देवपादानां' राज्ञो नन्दस्य ये 'उपजीविनः' सेवकाः तेषां 'उद्यमः' प्रयत्नः; 'कुसुमपुरस्य अभियोगं' निरोधं 'प्रति राक्षसः न उदासीनः' न यत्नहीनः; यतः तस्य गृहजनः; अत्रैवास्ते 'इति' एवं न शिथिलीभविष्यति मन्दीभविष्यति। मां यत्नपरं मत्वा तेऽपि यतिष्यन्ते। के ते विविधाश्च तेषां यत्न इत्याह—'चन्द्रगुप्तस्य शरीरम् अभिद्रोग्धुम्' तं हन्तुमित्यर्थः; 'अस्माभि प्रयुक्तानां' व्यापारितानां 'तीक्ष्णरसदायिनां' विषदायिनां 'उपसंग्रहार्थं सम्यग्ग्रहणार्थं 'परस्य' शत्रोः 'कृत्यानां' कार्य्याणाम् 'उपजापार्थंश्च' भेदार्थमपि विफलतापादनाय इत्यर्थः, 'महता' विपुलेन' कोषसञ्चयेन' वित्तसम्भारेण सञ्चितेन विपुलेन कोषेण इत्यर्थः 'अकटदासः स्थापितः' नियोजितः। 'प्रतिक्षणं' सर्वदा 'अरातेः' शत्रोः 'इत्तान्तस्य' वार्त्तायाः 'उपलब्धये' प्राप्तये 'तेषां' शत्रूणां संहतेः' संघातस्य 'भेदनाय' संहताः शत्रवो भियन्ताम् इत्युद्दिश्य 'जीवसिद्धिप्रभृतयः सुहृदः व्यापारिताः' नियोजिताः।

CHARCHA

1. आश्रयोन्मूलनेन—आश्रीयते इति आ + श्रि + अच् कर्मणि आश्रयः resort. Now see व्याख्या।

2. अकामाम्—अनाप्तः कामः अनया, or असिद्धः कामः अस्याः etc.

3. देवपाद etc—पूज्यो देवः देवपादाः नित्यसमासः। गौरवे बहुवचनम्। देवपादान् उपजीवन्ति आश्रित्य वर्त्तयन्ति इति देवपाद + उप + जीव + णिनि कर्त्तरि ताच्छील्ये। तेषाम्। उप + जीव is सकर्मक—"उपसर्गवशात् सकर्मकत्वम्"। पाद in the above implies पूजा। This is only when पाद is an उत्तरपद। It ceases to have that meaning in a वाक्य। Hence नित्यसमास by "प्रशंसावचनैश्च"। "मतल्लिकोग्रमिश्राः स्युः प्रकाण्डस्थलभित्तयः। इत्तपाशटताः पादपालिमत्तर्षिकादयः॥"—is an incomplete list of प्रशंसावचन words.

4. अभिद्रोग्धुम् तीक्ष्णरसदायिनाम् etc.—See *ante*. तीक्ष्णरस is poison.

5. परकृत्य etc.—उपजाप is भेद। "सामो भेदोपजापौ" इत्यमरः। The object was to employ counter-moves to enemy—measures. This was to be done by intrigue.

6. कोषसञ्चयेन—This means सञ्चितेन श्रीमता। Cf.—"भावानयने द्रव्यानयनम्"। सङ्घार्थे श्या।

7. अकटदास:—This is a miscalculation. We have seen in Act I how Rakshasa's hopes have been shattered in this respect. Further news follows below.

8. प्रतिक्षणम्—क्षणे क्षणे इति यथार्थे (वीप्सार्थे) अव्ययीभाव:। "योग्यता-वीप्सा-पदार्थानतिवृत्ति साहश्यञ्च यथार्था:"।

9. अराति etc.—See व्याख्या। तादर्थ्ये ४थी।

10. तत्संहृति etc.—See व्याख्या। सम्+हृ (गतौ)+क्तिन् भावे संहृति union ; here सम् means *together*. To disunite the united. तादर्थ्ये ४थी।

11. जीवसिद्धि etc.—राक्षस has been grievously deceived in जीवसिद्ध। (See Act I—"जीवसिद्धिस्तावत् अमात्यप्रणिधि:" etc.). "भद्र-भटादयो जीवसिद्धिना भेदिता: इत्यस्य भ्रम:"—दृष्टिराज:। But the fact is Rakshasa is not yet aware of the so-called defection of Bhadra-bhata etc. ; for these were Chanakya's men. Chanakya employed them and told them means (See Act I) whereby Rakshasa will take them as his own friends.

01. तत् किमत्र बहुना,

दृष्टात्मज: सपदि सान्वय एव देव:
शार्दूलपोतमिव यं परिपोष्य नष्ट:।
तस्यैव बुद्धिविशिखेन भिनद्मि मर्म
वर्मीभवेत् यदि न दैवमदृश्यरूपम् ॥ ८ ॥

So what is the use of saying much in this matter ? (Unless Fate, with his form invisible, acts as a shield, I will rend with the arrow of my wit, the vitals of that very one rearing whom like a tiger-cub, Sire, to whom the son was dear, instantly perished even with the whole family.

तदिति ॥ 'तत् अत्र' अस्मिन् विषये 'बहुना' उक्तेन 'किम्' ? संक्षेपतो [illegible]—अन्वय: ॥ दृष्टात्मज: देव: शार्दूलपोतमिव यं परिपोष्य सान्वय एव सपदि नष्ट तस्य एव मर्म बुद्धिविशिखेन भिनद्मि यदि अदृश्यरूपं दैवं न वर्मीभवेत्। व्याख्या

—'दृष्टः' प्रिय 'आत्मजः' पुत्रो यस्य तादृशः सुतप्रियः चन्द्रगुप्तः सं॰हवान् 'देवः' स्वामी नन्दः 'शार्दूलपोतम् इव व्याघ्रशावकमिव 'यं चाणक्यं परिपोष्य संवर्द्ध्य 'सान्वय एवं सवंश एव अष्टाभिरपरै सगोत्रैः पुत्रैः सहैव 'सपदि' अविलम्बित 'नष्टः' हतः 'तस्य चाणक्यस्यैव मर्म हृदयग्रन्थिं 'बुद्धिरूपेण' विग्रिखं॰न वार्णेन 'भिनद्मि' क्षिप्रं भेत्स्यामि विदारयिष्यामि 'यदि अदृश्यरूप' गूढदेहं दैवं' नियतिः 'न वर्मो भवेत्' वर्मरूपतामापद्य तं न रक्षेत्। यत् यत् मया कृतं तेन तेन मन्ये मौर्यस्य पतनमवश्यभावि इति भावः।

CHARCHA

1. भिनद्मि—भविष्यत्सामीप्ये वर्त्तमानम्।

2. वर्मीभवेत् यदि न—'Not shielding' is not the cause of भेदन। भिनद्मि because of his misdeeds दैव might foil me. Thus there is no हेतुहेतुमद्भाव consequently we do not get लिङ् or लृट् in *both* भेदन and वर्मीभवन।

3. अदृश्यरूपम्—अदृश्यं unseen. अदृश्यं रूपमस्य, बहु। Hence I cannot stop him. "दैवं दृश्यं चेत् तदपि प्रतिकर्तुं शक्यताम्"—टुण्ढि।

11. (ततः प्रविशति कञ्चुकी) कञ्चुकी—

कामं नन्दमिव प्रमथ्य जरया चाणक्यनीत्या यथा
धर्मो मौर्यं इव क्रमेण नगरे नीतः प्रतिष्ठां मयि।
तं सम्प्रत्युपचीयमानमनु मे लब्धान्तरः सेवया
लोभो राक्षसवज्जयाय यतते जेतुं न शक्नोति च ॥८॥

(*Now enters Chamberlain*) Chamberlain—Piety has been gradually led to permanency in me by Age extinguishing Desire as was Maurya in the city by Chanakya's Polity killing Nanda. Now with a foot-hold secured through service, Avarice like Rakshasa aiming at it (Piety) which is growing, strives for victory but does not succeed in conquering.

CHARCHA

1. कञ्चुकी—A Brahmana advanced in years appointed to guard the royal harem. "अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। सर्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते॥"—Also see Sak. Act V. This is the कञ्चुकी of मलयकेतु।

2. अन्वयः॥ यथा चाणक्यनीत्या (तथा) जरया नन्दमिव कामं प्रमथ्य नगरे मौर्य्यं इव मयि धर्मः क्रमेण प्रतिष्ठां नीतः। सम्प्रति सेवया लब्धान्तरो मे लोभः राक्षसवत् उपचीयमानं तम् अनु जयाय यतते जेतुं न शक्नोति। व्याख्या—'यथा' यद्वत् 'चाणक्यनीत्या' कौटिल्यस्य नयेन तद्वत् 'जरया' वार्द्धकेन 'नन्दमिव कामं' भोगलिप्सां 'प्रमथ्य' उत्साद्य 'नगरे' कुसुमपुरे 'मौर्य्य इव' चन्द्रगुप्त इव 'मयि धर्मः क्रमेण' आनुपूर्व्या 'प्रतिष्ठां नीतः' स्थितिमापादितः। यथा कुसुमपुरे चाणक्यनीत्या नन्दसुन्मूल्य मौर्य्यः प्रतिष्ठापितः तथा मयि जरया कामं विधूय धर्मः प्रतिष्ठापित इत्यर्थः। तथापि कुलधर्मेण नाहं राजसेवां त्यजामि, तत् दूरं प्रस्तेऽपि वार्द्धके संप्रति अधुना 'सेवया' चिरपरिचरणेन 'लब्धान्तरः' प्राप्तावसरः अङ्कुरित इत्यर्थः 'मे लोभः' गृध्नुता 'राक्षसवत्' अमात्यराक्षस इव 'उपचीयमानं' वर्द्धमानं 'तं' धर्मम् 'अनु' धर्ममभिलक्ष्य 'जयाय यतते' विजयाय उद्योगं तनोति 'जेतुं' किन्तु विजेतुं 'न शक्नोति'। चिरसेवया लोभो जातः किन्तु धर्मं न त्यजामि इत्यर्थः। एतेन मलयकेतुमाश्रित्य तथा यतते राक्षसश्चन्द्रगुप्तमभिभवितुम् इत्यपि कथितम्।

3. प्रमथ्य—प्र + मथ (विलोडन) + ल्यप्।

4. जरया—जरसा is an optional form. जरस् is ordered in place of जरा by "जराया जरसन्यतरस्याम्"।

5. चाणक्यनीत्या—नीति is added to secure similarity of gender with the feminine जरा। The real agent is Chanakya.

6. क्रमेण—क्रम is परिपाटी। तेन। In due stages.

7. प्रतिष्ठाम्—प्र + स्था + अङ् भावे प्रतिष्ठा stability. This is different from प्रतिष्ठा in Sl. 5, *ante*.

8. तम्—द्वितीया owing to अनु which is a कर्मप्रवचनीय।

9. उपचीयमानम्—नीत is also उपचीयमान। There is no contradiction in having नीत in the past and उपचीयमान in the present. Attainment of stability is a past event. That does not imply growth. It is *now* growing.

10. अनु—"लक्षणेत्थम्भूत—"इति कर्मप्रवचनीयत्वम्। दुण्डि notices the

reading अपि for अनु and rejects it, because the construction becomes a complex one. Thus—तं जेतुं यतते जयाय न शक्नोति। शक्नोति = प्रभवति।

11. जेतुं न शक्नोति च—This implies despondency which बुद्धि thinks forebodes Rakshasa's failure. "अनेन कञ्चुकिनिर्वेदेन राक्षसी-यमस्य चाणक्यानीत्या भावी उपसर्दः सूचितः'।

12. (परिक्रम्य उपसृत्य च) इदममात्यराक्षसस्य गृहम्। प्रविशामि। (प्रविश्य अवलोक्य च) स्वस्ति भवते।

(*Going round and advancing*) This is minister Rakshasa's house. I enter. (*Entering and noticing*) Blessings unto you,

राक्षसः। आर्य्य अभिवादये। प्रियंवदक, आसनमानीयताम्।

Rakshasa—Noble Sir, I bow. Priyamvadaka bring a seat.

पुरुषः—एदं आसणम्। उपविसदु अज्जो [इदमासनम्। उपविशतु आर्य्यः]।

Servant—Here is a seat. Let Noble Sir sit down.

कञ्चुकी—(उपविश्य) कुमारो मलयकेतुः अमात्यं विज्ञापयति—"चिरात् प्रभृति आर्य्यः परित्यक्तोचितसंस्कार इति पीडयते मे हृदयम्। यद्यपि सहसा स्वामिगुणाः न शक्यन्ते विस्मर्त्तुं तथापि महिम्नापनां मानयितुमर्हत्यार्य्यः"। (इत्याभरणानि प्रदर्श्य) इमानि आभरणानि कुमारेण स्वशरीरादवतार्य्य प्रेरितानि धारयितुमर्हत्यार्य्यः।

Chamberlain—(*Sitting down*) Prince Malayaketu speaks to minister thus—"My heart aches that Noble Sir has for long gone with proper decoration of his person renounced. Though master's virtues cannot be forgotten soon, still it behoves Noble Sir to entertain my request." (***Showing the jewellery***).

These decorations have been taken off by the prince from his own person and forwarded ; it behoves Noble Sir to wear them.

CHARCHA

1. भवते—"नमःस्वस्ति—" इति ४थी। Elliptical for स्वस्ति भवते भूयात्।

2. परित्यक्त etc.—उचित is अभ्यस्त। सम्+कृ+घञ् करणे भावे वा संस्कार decoration, here सुट् comes by "सम्पर्युपेभ्यः—"। परित्यक्त उचितः संस्कारः अनेन।

3. इति पीड्यते—This may mean इति हेतोः पीड्यते with कर्मकर्तरि लट् in पीड्यते। Or the meaning may be इति अनेन पीड्यते giving लट कर्मणि।

4. स्वामिगुणाः—स्वामिन् here is नन्द।

13. राक्षसः—आर्य जाजले, विज्ञाप्यताम् अस्मद्वचनात् कुमारः—"विस्मृता एव भवद्गुणपक्षपातेन स्वामिगुणाः। किन्तु।

न तावन्निर्वीर्यैः परपरिभवाक्रान्तिकृपणैर्-
वहामाङ्गैरेभिः प्रतनुमपि संस्काररचनाम्।
न यावन्निःशेषत्रपितरिपुचक्रस्य निहितं
सुगाङ्गे हेमाङ्कं नृवर तव सिंहासनमिदम्" ॥१०॥

Rakshasa—Noble Jajali, let the prince be told in my words—"From an appreciation of your virtues master's virtues are indeed forgotten. But—I will surely not show the slightest attempt at toilet on these limbs miserable through the heaping of indignities by the enemy and therefore pluckless, until, O best of men, with the circle of enemies utterly demolished, your throne, wrought in gold, is placed in the Suganga-Hall.

विस्मृतेति॥ 'भवती' ये 'गुणाः' तेषु 'पक्षपातेन' आदरातिशयेन 'स्वामिनी' नन्दस्य 'गुणाः' विस्मृता एव'। अन्वयः॥ हे नृवर, यावत् निःशेषत्रपितरिपुचक्रस्य

तव हैमाङ्कम् इदं सिंहासनं सुगाङ्गे न निहितं तावत् परपरिभवाक्रान्तिक्रपणैः निर्वीर्यैः एभिः अङ्गैः प्रतनुमपि संस्काररचनां न वहामि। व्याख्या—हे 'नृवर' नरश्रेष्ठ मलय-केतो 'यावत्' यदवधि 'निःशेषं यथा यथा 'क्षपितं' नाशितं रिपुचक्रं' अरिमण्डलं यस्य तस्य 'तव' शत्रूंस्ते निःशेषमुत्साद्य इत्यर्थः; 'हैमाङ्कं' सुवर्णलाञ्छितम् 'इदं सिंहासनं सुगाङ्गे' तदाख्ये कुसुमपुरप्रासादे 'न निहितम् मया 'तावत्' तदवधि 'परेभ्यः' शत्रुभ्यः यः 'परिभवः' अवमानना तस्य 'आक्रान्त्या' आरोपणेन हेतुना 'क्रपणैः' दीनैः अतएव 'निर्वीर्यैः' असमर्थैः 'एभिः' मदीयैः 'अङ्गैः प्रतनुमपि' स्वल्पाम् 'संस्काररचनां' भूषणविन्यासं 'न वहामि' न धारयामि। न हि स्वामिगुणस्मरणात् मया परित्यक्ताः शरीरसंस्कारः किन्तु अरयो हत्यन्ति नाहं तेभ्यः प्रभवामि इति निर्वेदात् इति भावः।

CHARCHA

1 जाजलि—जाजलिन् is a sage. जाजलिनः अपत्यं पुमान् इति जाजलिन्+अण जाजलः the इन् disappearing by "नस्तद्धिते"। जाजलस्य गोत्रापत्यं पुमान् इति जाजल+इञ् or फिञ् जाजलिः or जाजलायनिः by "उदीचां वृद्धात् अगोत्रात्।" Cf.—"जाजलिनोऽपत्यं जाजलायनिः"—वर्द्धमान। उदीचाम् in the rule shows that फिञ् is optional. This is an address to कञ्चुकी।

2. निर्वीर्यैः—निर्गतं वीर्यम् एभ्यः etc This is an inference, for otherwise how could enemies offer insult? Qual. अङ्गैः।

3. निःशेषं etc.—निर्गतः शेषो यस्मिन् तत् यथा तथा। Qual. क्षपणक्रियां। क्षप is treated as a root of the चुरादि class though not enunciated by Panini. "वर्द्धते हि धातुगणः"। Cf.—"ममापि च क्षपयतु नीललोहितः"—Sak. Act VII. See व्याख्या also. Qual. तव।

4. सुगाङ्गे—For सुगाङ्गप्रासाद see Act II.

11. कञ्चुकी—अमात्ये नेतरि सुलभमेतत् कुमारस्य। प्रतिमान्यताम् कुमारस्य प्रथमः प्रणयः।

Chamberlain—Minister guiding, this is easily accomplished unto prince; so let the first request of prince be respected.

राक्षसः—आर्य्य,कुमार इव अनतिक्रमणीयवचनो भवानपि। तदनुष्ठीयते कुमारस्य आज्ञा।

Rakshasa—Noble Sir, as of the prince, your words too cannot be disregarded , so prince's command is being carried out

कञ्चुकी (नाट्येन भूषणानि परिधाय)—स्वस्ति भवते ; साधयाम्यहम्।

Chamberlain—*(Acting the putting on of jewellery)* Blessings unto three, I retire.

राक्षसः—आर्य्य अभिवादये। (कञ्चुकी निष्क्रान्तः)। प्रियंवदक, ज्ञायतां कः अस्मद्दर्शनार्थी द्वारि तिष्ठतीति।

Rakshasa—Noble Sir, I bow. (*Chamberlain departs*). Priyamvadaka, see who is waiting at the door desiring an interview with me.

पुरुषः—जं अमच्चो आणवेदि [यदमात्य आज्ञापयति] (इति परिक्रम्य आहितुण्डिकं दृष्ट्वा) अज्ज को तुमं [आर्य्य कस्त्वम्]।

Servant—As minister commands. *(Going round and noticing the Snake-charmer)* Noble Sir. who are you ?

आहिं—भद्द, अहं खु आहितुण्डिओ जिण्णविसो नाम। इच्छामि अमच्चस्स पुरदो सप्पेहिं खेलिदुम् [भद्र, अहं खलु आहितुण्डिको जीर्णविषो नाम। इच्छामि अमात्यस्य पुरतः सर्पैः खेलितुम्]।

Snake-charmer—Good man, I am a Snake-charmer Jirnavisha by name , I wish to play with snakes in presence of the Minister.

पुरुषः—चिट्ठ जाव अमच्चस्स णिवेदेमि [तिष्ठ यावत् अमात्यस्य निवेदयामि]। (राक्षसमुपसृत्य) अमच्च, एसो खु सप्पजीवी दुच्छदि सप्पं दंसेदुम् [अमात्य, एष खलु सर्प-जीवो दुच्छति सर्पं दर्शयितुम्]।

Servant—Wait till I inform the Minister. (*Approaching Rakshasa)* Minister, here is a Snake-charmer, wishes to show his snakes.

CHARCHA

1. प्रतिमान्यताम्—प्रति + मान + णिच् + लोट् ताम् कर्मणि let it be respected.

2. प्रणयः—प्रकर्षेण नीयते अनेन इति प्र + नी + अच् करणे प्रणयः request. उक्तकर्म of प्रतिमान्यताम।

3. अनतिक्रमणीय etc.—Your request too, I cannot disregard. अवानपि, *i. e.*, ममसम्बन्धे अवानपि अनतिक्रमणीयवचनः (अनतिक्रमणीयं वचनं यस्य तादृश एव)। etc.

4. परिधाप्य—परि + धा + णिच् + ल्यप् etc.

5 साधयामि—साध + णिच् + लट् मिप I go. "प्रायेण खल्वनकः साधिगमैः स्थाने प्रयुज्यते"। This not restricted to dramas only—cf. "साधयामाहवविघ्नमस्य ते दैवकार्यं सुपपादयिष्यतः"—*Raghu.*

15. राक्षसः—(वामाक्षिस्पन्दनं सूचयित्वा आत्मगतम्) कथं प्रथममेव सर्पदर्शनम्! (प्रकाशम्) प्रियंवदक, न नः कौतूहलं सर्पेषु। तत् परितोष्य विसर्जयैनम्।

Rakshasa—(*Acting the quivering of the left eye—to himself*) How so ! The very first thing is the sight of snake !! (*Aloud*) Priyamvadaka, we feel no interest in snakes, so satisfy him and dismiss.

प्रियंवदकः—तथा। (इति भाण्डतुण्डकमुपसृत्य) अज्ज, एसो खु दे दंसणकज्जेण अमच्चो पसादं करेदि। ण उण सप्प-

दंसणेन [आर्य्य एष खलु ते दर्शनकार्य्येण अमात्यः प्रसादं करोति, न पुनः सर्पदर्शनेन]।

Priyamvadaka—So be it (*Approaching the Suake-charmer*) Noble Sir, here, the Minister favours you (with a gift) for your work of exhibition, but not with a look at the snakes

आहितुण्डिकः—भद्दमुह, विण्णवेहि अमच्चं, ण केवलं अहं सप्पजीवी पाउडकवी क्खु अहम्। ता जइ मे दंसणेण अमच्चो पसादं ण करेदि ता एदं पत्तअं वाचेदुत्ति [भद्रमुख, विज्ञापय अमात्यं न केवलमहं सर्पजीवी प्राकृतकविः खल्वहम्। तस्माद् यदि मे दर्शनेन अमात्यः प्रसादं न करोति तत् एतत् पत्रकं वाचयत्विति]।

Snake-charmer—Gentle Sir, inform Minister that I am not a mere exhibiter of snakes. I am really a Prakrita poet, so if minister will not favour me with a sight, then let him read this sheet.

प्रियंवदकः—(पत्रं गृहीत्वा राक्षसमुपसृत्य) अज्ज, एसो खु अमच्चं विण्णवेदि "ण केवलं अहं सप्पजीवी पाउडकवी क्खु अहम्। ता जइ मे अमच्चो दंसणेण पसादं ण करेदि तदो एदं वि दाव पत्तअं वाचे"दुत्ति [आर्य्य, एष खलु अमात्यं विज्ञापयति "न केवलमहं सर्पजीवी प्राकृतकविः खल्वहम्। तस्माद् यदि मे अमात्यो दर्शनेन प्रसादं न करोति तदा एतदपि तावत् पत्रकं वाचयतु" इति]।

Priyamvadaka—(*Taking the sheet and approaching Rakshasa*) This man tells Minister this—"I am not a mere exhibiter of snakes ; I am really a Prakrita poet ; so if Minister will not favour me with a sight, let him at least read this sheet."

CHARCHA

1. प्रथममेव—This shows that the time was morning. The day opens in-auspiciously for Rakshasa with a sight of snakes.

2. परितोष्य—परि + तुष + णिच् + ल्यप् having sstisfied him with gifts.

3. दर्शनकार्य्येण etc.—दृश् + णिच् + ल्युट भावे दर्शन showing, exhibiting. 'दर्शनरूपं' सर्पप्रदर्शनरूप यत्ते 'कार्य्यं' सर्पं दर्शयसि इति यत्ते संप्रयद्दृश्यं कार्य्यं तेनैव तुष्टः 'अमात्यः प्रसादं करोति' पारितोषिकं ददाति 'न पुनः सर्पं दर्शनेन' सर्पांस्तु स नैव द्रक्ष्यति।

4. भद्रमुख—भद्रं सुखमस्य having a pleasing countenance etc. Case of address.

5. प्राकृतकविः—प्राकृत is the general name of languages derived from Sanskrit. प्राकृतेषु कविः, सुप् सुपा।

16. राक्षसः (पत्रं गृहीत्वा वाचयति)—

पाऊण णिरवसेसं कुसुमरसं अत्तणो कुसलदाए
जं उग्गिरइ भमरो अण्णाणं कुणइ तं कज्जम् ॥ १६ ॥

[पीत्वा निरवशेषं कुसुमरसमात्मनः कुशलतया।
यदुद्गिरति भ्रमरः अन्येषां करोति तत् कार्य्यम् ॥]

(विचिन्त्य स्वगतम्) अये, कुसुमपुरवृत्तान्तज्ञो भवत्प्रणिधिरिति गाथार्थः। कार्य्यव्यग्रत्वान्मनसः प्रभूतत्वाच्च प्रणिधीनां विस्मृतम्, इदानीं स्मृतिरुपलब्धा। व्यक्तम् आहितुण्डिकच्छद्मना विराधगुप्तेन अत्रैव भवितव्यम्। (प्रकाशम्) प्रियंवदक, प्रवेशयैनम्। सुकविरेषः श्रोतव्यमस्मात् सुभाषितम्।

Rakshasa—(*Taking up the sheet reads*) That serves the purpose of others what the black-bee disgorges after having drunk through his skill the honey of flowers (Kusuma) till nothing is left. (*Reflecting to himself*) Ha! the drift of the verse is—"Your emissary that knows the news of Kusuma-

pura". Through distraction of mind from work and because of the largeness of the number of spies, I have forgotten all, only now is memory recovered. This must be Viradhagupta in the guise of a Snake-charmer. (*Aloud*) Priyamvadaka show him in : he is a good poet : we must listen to some fine sayings from him.

प्रियंवदकः—तह्मा [तथा]। (इति आहितुण्डिकमुपसृत्य) उपसप्पदु अज्जो [उपसर्पतु आर्यः]।

Priyamvadaka—So be it. (*Approaching the Snake-charmer*) Let Noble Sir advance.

CHRCHA

अन्वयः॥ भ्रमरः आत्मनः कुशलतया (नेपुण्येन) निरवशेषं (सम्पूर्णं यथा तथा) कुसुमरसं पीत्वा यत् उद्गिरति तत अन्येषां कार्यं करोति। व्याख्या—स्पष्टम्।

1. कार्यव्यय etc.—विशिष्टमयमस्य व्ययम् keen. कार्येषु व्ययम्, सप्तसुपा। तस्य भावः etc. इतौ प्रत्ययः।

2. व्यक्तम् etc —For आहितुण्डिक see *ante*. आहितुण्डिकरूपं छद्म, तेन, or आहितुण्डिक इति छद्म अस्य आहितुण्डिकछद्मा ; तेन। Qual. विराधगुप्तेन।

Remark—The भ्रमर drinks कुसुमरस and gives it out for the formation of honey useful to others : so I a spy, have pumped out news from कुसुमपुर (here कुसुम also refers to कुसुमपुर) and shall narrate them for the purpose (कार्य) of राक्षस।

17. **आहितुण्डिकः—(नाट्येन उपसृत्य विलोक्य च स्वगतम्—संस्कृतमाश्रित्य) अयममात्यराक्षसः। स एषः—**

वामां बाहुलतां निवेश्य शिथिलं कण्ठे निषण्णाननां
स्कन्धे दक्षिणया बलाच्च हृतयाप्यङ्के पतन्त्या मुहुः।
गाढालिङ्गनसङ्गपौड़ितमुखं यस्योद्यमाशङ्किनो
मौर्य्यस्योरसि नाधुनापि कुरुते वामेतरं श्रीः स्तनम्॥१२॥

(प्रकाशम्) जेदु अमच्चो [जयतु अमात्यः]।

Snake-charmer—(*Acting advance and observing—to himself in Sanskrit*) Here is Minister Rakshasa. He it is in fear of

whose rush, Sri even now does not lie close to Maurya's ehest*. (*Aloud*) Let Minister prosper.

राक्षसः (विलोक्य)—अये विराध—(इत्यर्द्धोक्ते) ननु प्ररूढश्मश्रुः। प्रियंवदक भुजङ्गैरिदानीं विनोदयितव्यम्, तत् विश्रम्यताम् इतः परिजनेन। त्वमपि स्वाधिकारमशून्यं कुरु।

Rakshasa—(*Observing*) Ha! Viradha—(*when half uttered*) with beards grown indeed! Priyamvadaka, we have to enjoy it with snakes, so let attendants go hence and rest; you too do not vacate your post.

प्रियंवदकः—तथा [तथा]। (इति सपरिवारो निष्क्रान्तः)।

Priyamvadaka—So be it. (*Departs with attendants*).

राक्षसः—सखे विराधगुप्त, इदमासनमास्यताम् (विराधगुप्तः नाट्येन उपविष्टः)।

Rakshasa—Friend Viradhagupta, sit down, here is a seat. (*Viradhagupta acts sitting down*).

CHARCHA

1. अये विराध etc.—विराधगुप्त is the name of the spy. See विराधगुप्तेन भवितव्यम् above. 'अर्द्धम् उक्तम् 'अर्द्धोक्तम्' तस्मिन् सति प्रवृद्धानि श्मश्रूणि दृष्ट्वा प्राह 'प्ररूढानि' प्रजातानि 'श्मश्रूणि' यस्य तथाविधो 'ननु' साहश्य एव। स्वाम्यर्थं क्लिश्यता परिचलतमनेन चौरकर्म, अहो दैवम्! ततः आवेगात् कार्य्यवाहुल्याच्च सुभाषितश्रवणं विस्मृत्य आह—'भुजङ्गैरिदानीं विनोदयितव्यं कार्य्याभियोगात् खिन्नस्य मनसो विनोदः कर्त्तव्यः। तत् तस्मात् 'परिजनेन इतः' गत्वा 'विश्रम्यताम्'; त्वमपि स्वस्य 'अधिकारं' द्वारदेशं 'अशून्यं कुरु' आत्मोपस्थित्या पूरय; सर्वे यूयमपसरत इत्यर्थः।

2. भुजङ्गैः—भुजेन कुटिलगत्या गच्छन्ति इति भुज+गम+खच् कर्मणि भुजङ्गाः or भुजङ्गमाः by "खच डिद्वा वक्तव्यः" etc.

N. B.—Obscene; the translation is not literal.

3. ननु प्रस्कन्दमस्तु etc.—ननु is अवधारणे। "नत्वाक्षेपे परिप्रश्ने प्रत्युक्तावधारणे वाक्यारम्भेप्यनुनयामन्त्रणानुज्ञयोरपि" इति हैमः। दृष्टि thinks that by uttering विराध the Minister apprehends that he has betrayed the spy to the attendant. So to allay suspicion he exclaims. 'ननु' किन्तु असत्यमेतत् [आक्षेपे ननु] यतः अयं 'प्रस्कन्दमस्तु' विराधगुप्तस्तु अपप्रस्रः। तत् तत्त्वत एव कश्चित् आहितुण्डिकोऽयम्। "परिजवं प्रति रक्षसगोपनार्थम् अन्योक्तिः"—दृष्टि। But such was not the case : Rakshasa had no hesitation to tell his attendant who the Snake-charmer was. A few lines below in presence of Priyamvadaka Rakshasa says to his friend "सखे विराधगुप्त कथमेतत्"। See Note I above.

4. स्वाधिकारम्—अधिक्रियते व्याप्रियते अस्मिन् इति अधि + कृ + घञ् अधिकरणे अधिकारः post, place of work, *i. e.*, the door.

18. राक्षसः (निर्वर्ण्य)—अये देवपादपद्मोपजीविनः अवस्थेयम्। (इति रोदिति)।

Rakshasa—(*Eyeing close*) Alas ! Such is the plight of a dependant of the lotus-feet of Sire (*weeps*).

विराध—अलममात्य, शोकेन। नातिचिरात् अमात्यः अस्मान् पुरातनीमवस्थाम् आरोपयिष्यति।

Viradha—Away with sorrow, Minister. Ere long Minister will raise us to our old staus.

राक्षसः—सखे, वर्णय कुसुमपुरवृत्तान्तम्।

Rakshasa—Away with sorrow, Minister. Ere long Minister will raise us to our old status.

विराध—अमात्य, विस्तीर्णः कुसुमपुरवृत्तान्तः। तत् कुतः प्रभृति वर्णयामि।

Viradha—Minister, the story of Kusumapura is long, so from where shall I detail ?

राक्षसः—सखे चन्द्रगुप्तस्यैव तावत् नगरप्रवेशात् प्रभृति अस्मत्प्रयुक्तैः तीक्ष्णरसदायिभिः किमनुष्ठितम् इति आदितः श्रोतुमिच्छामि ।

Rakshasa—Friend, I wish to know from the very beginning what has been done by the administerers of poison employed by us, commencing with the entry of Chandragupta into the city.

विराध—एष कथयामि । अस्ति तावत् शकयवनकिरातकाम्बोजपारसीकवाह्लीकप्रभृतिभिः चाणक्यमतिपरिगृहीतैः चन्द्रगुप्तपर्वतेश्वरबलैः उदधिभिरिव प्रलयोच्छलितसलिलैः समन्तात् उपरुद्धं कुसुमपुरम् ।

Viradha—Here I detail. The fact is—Kusumapura was besieged on all sides by the forces of Chandragupta and Parvatesvara led by the counsells of chanakya—by Sakas, Yavanas, Kiratas, Kambojas, Parasikas, Vahlikas and others as by the seas with their waters overflown at the time of universal destruction.

CHARCHA

1. निर्वर्ण्य etc.—निर् + वर्ण + णिच् + ल्यप् निर्वर्ण्य = निपुणं निरूप्य । For देवपाद etc. see para 9. अवस्था refers to absence of decoration etc. Viradhagupta too like Rakshasa, had renounced decorations (परित्यक्तोचितसंस्कारः para 12, प्रकृतमसुः para 17). His unkempt appearance excited pity and the Minister wept.

2. नातिचिरात्—If compounded, say नञर्थेन नञ्समेन सुप सुपा ।

3. पुरातनीम्—पुरा भवा इति पुरा + ट्यु + ङीप् स्त्रियाम् पुरातनी old. तुट comes in by "शाश्वच्चिर—ट्यु ट्युल् तुट् च" ।

4. विस्तीर्णः etc.—वि + स्तृ + क्त कर्मणि of vast expanse. कृतः has

पञ्चम्याङ्सिः, the पञ्चमी being due to प्रभृति। Examples are numerous in the book. Cf. पूर्वधारात् प्रभृति, para 23 below etc. From outside, cf,—"कार्त्तिक्याः प्रभृति" "शैशवात् प्रभृति पोषितां"।

5. अस्ति तावत्—अस्ति is an अव्यय in such cases. Cf. "अस्ति तावत् अङ्कमाश्रेण—", *ante.*, "अस्ति तावत् अङ्कममाश्रेण—", *supra.* ढुण्डि takes it as अस + लट् तिप् the nom. being the sense of the वाक्य (वाक्यार्थ) from शकयवन etc. to कुसुमपुरम् (उपरुद्धमस्ति)।

6. शकयवन etc.—शक is believed to be the Scythians who had established themselves to the North Western Frontier of India. Our शकाब्द, which commenced in 78 A. D., is derived from the शक kings. यवन is vague. Some take them as the Greeks. Kalidasa in Raghu, describes the damsels of Persia as यवनी। Their place also is at the North Western Frontier. किरातs were certain dwellers of the Himalayas. These "are stated by Mr. A. Barooah to have been inhabitants of the hilly tracts, just below the Himalaya near Kumaon and Nepal"—*Telang.* कम्बोज is to the west of the किरातs. कम्बोजाः अभिजनः एषाम् इति कम्बोज + अण् काम्बोजाः by "सिन्धुतक्षशिलादिभ्यः अञ्जनौ"—कम्बोज is of the सिन्ध्वादि class. पारसीकs are inhabitants of Persia. वाह्लीकs are inhabitants of North Punjab, not of Bactria as Prof. Wilson suggests. (See our Intro. to Sakuntala). The list here is not of *kings*, but of races or tribes. This is inferred from किरात and काम्बोज। शक, यवन, पारसीक and वाह्लीक are ambiguous. Thus शकानां निवासो जनपदः शकाः। शकानां (जनपदस्य) राजा इति शक + अण् शकः the अण् disappearing by "कम्बोजादिभ्यो लुग्वचनं चौलाद्यर्थम्"। यवनानां निवासो जनपदः यवनाः। यवनानां (जनपदस्य) राजा इति यवन + अञ् यवनः, the अञ् disappearing as above. पारसीकानां निवासो जनपदः पारसीकाः। पारसीकानां राजा इति पारसीक + अञ्, पारसीकः। वाह्लीकानां निवासो जनपदः वाह्लीकाः। तेषां राजा इति वाह्लीक + अञ्, वाह्लीकः। Hence शक, यवन पारसीक and वाह्लीक may stand either for the king or for the tribe ; but (supposing किरात to be the name of a country also

like अक यवन etc.) किरातानां राजा इति किरात + अञ्, कैरातः not किरातस्य काम्बोजानां राजा इति काम्बोज + अण्, काम्बोजः not काम्बोजाः by "काम्बोजाद् वा"। Hence किरात and काम्बोज in the list are *tribes* not *kings*. The rest too therefore refer to *tribes* not *kings*.

7. प्रलयोच्छलित etc.—प्रलय deluge, universal destruction. प्रलये उच्छलितम् सुप्-सुपा। ताडयं ताडितम् एषाम् etc. Qual. उदधिम्।

19. राक्षसः—(शस्त्रमाकृष्य ससम्भ्रमम्) अयि मयि स्थिते कः कुसुमपुरम् उपरोत्स्यति ? प्रवीरक, प्रवीरक, क्षिप्रमिदानीम्—

प्राकारं परितः शरासनधरैः क्षिप्रं परिक्रम्यतां
द्वारेषु द्विरदैः प्रतिद्विपघटाभेदक्षमैः स्थीयताम्।
त्यक्त्वा मृत्युभयं प्रहर्षसुभगः शत्रोर्बले दुर्बले
ते निर्यान्तु मया सहैकमनसो येषामभीष्टं यशः ॥ १३ ॥

Rakshasa (*Drawing his sword in haste*)—Well, I living, who will besiege Kusumapura ? Praviraka, Praviraka, now then quick—Let archers rapidly patrol round the wall ; let tuskers capable of dispersing the array of enemy-elephants take their stand at the gates ; let those to whom fame is precious, giving up the fear of death, sally on with me with a view to strike with one mind at the enfeebled forces of the enemy.

CHAROHA

1. उपरोत्स्यति—उप + रुध् + लृट् स्यति will besiege.

2. प्रवीरक—This is the name of some attendant who was serving Rakshasa during the siege.

3. अन्वयः॥ शरासनधरैः प्राकारं परितः क्षिप्रं परिक्रम्यताम्। प्रतिद्विपघटाभेदक्षमैः द्विरदैः द्वारेषु स्थीयताम्। येषां यशः अभीष्टं ते सर्वमृत्युभयं त्यक्त्वा दुर्बले शत्रोर्बले एकमनसः प्रहर्षसुभगाः (सन्तः) मया सह निर्यान्तु। व्याख्या—'शरासन-

धनुर्धरैः' धनुर्धरैः योद्धृभिः 'प्राकारं परितः' प्राचीरस्य समन्तात् 'क्षिप्रं' द्रुतपदं परिक्रम्यतां' परिभ्रम्यताम्। तथा परिक्रममाणास्ते शत्रुं दूरस्थमेव बाणविद्धं कृत्वा वारयन्तु इत्याशयः। 'प्रतिपक्षाः' ये 'द्विपाः' गजाः 'तेषां' घटायाः' संघातस्य भेदे' विघटने 'क्षमैः' समर्थैः 'शिरदैः' अत्यादीर्यैर्गजैः 'द्वारेषु' तोरणेषु 'स्थीयताम्'। तत्र स्थित्वा बाणैर्निवारितस्य रिपोः गजानां द्वारं प्रति सम्पातं कुर्वन्तु इति भावः। 'येषां' वीराणां 'यशः अभीष्टं' प्रियं 'ये मृत्युभयं त्यक्त्वा दुर्बलैं' बाणप्रहारैः गजसंसर्दैश्च क्षीणे 'अनीकबले' सैन्ये 'एकमनसः' एकचित्ताः भूत्वा 'प्रहर्तुमनसः' जिघांसवः सन्तः युगपत्प्रहारोद्यताः सन्त इत्यर्थः 'मया सह निर्यान्तु' बहिरागच्छन्तु। अरैर्निचिताङ्गाः गजैर्विदलिताः स्वल्पावशिष्टप्राणाः शत्रवः मया निर्व्याय खड्गेन हन्यन्ते कृतो निरोध इति भावः। शार्दूलविक्रीडितं वृत्तम्।

4. प्राकारम्—प्रक्रियते इति प्र + कृ + घञ् कर्मणि प्राकारः wall, or प्रकारः manner, by "सादकारयोः कृञिमे"। द्वितीया owing to परितः।

5. शरासनधरैः—शराः अस्यन्ते एभिः इति शर + अस + ल्युट् करणे शरासनानि। तेषां धराः etc. "कर्मण्यण्" would give शरासनधाराः।

6. क्षिप्रम्—This is not a tautology, though another क्षिप्रम् precedes and is connected with the verse. The first क्षिप्रम् refers to quickness in the execution of the command given to Praviraka, and the second to the rapidity of परिक्रमणक्रिया। Go rapidly round, and that instatnly. उभयो क्रियाविशेषणत्वेऽपि भिन्नविषयत्वात् न पुनरुक्तिः।

7. प्रतिद्विप etc.—घटनम् इति घट + अङ् भावे घटा array. Now see व्याख्या। We take the derivative meaning of घटा here, because with the technical meaning, namely, a *body of elephants*, द्विपघटा becomes tautologous. "घटा घटनगोष्ठीभघटनासु च योषिति" इति मेदिनी।

8. प्रहर्तुमनसः—प्रहर्तुम् मनः एषाम्। "तुङ्काममनसोरपि" इति मकारलोपः।

9. दुर्बलैः—दुःखितानि बलानि अस्य etc. The army was not originally दुर्बल but became दुर्बल through the onslaught of archers and elephants, and hence afforded the right moment for a sally. दुण्ढि thinks this was merely to encourage the men that were to go out, the enemy were really strong.

10. एकमनसः—Striking with *one* mind means *simultaneous* striking which offers the best chance to disperse the besiegers.

11. येषामभीष्टम्—अभि + इष् + क्त + कर्मणि वर्त्तमाने desired. Being गत्यर्थ the root takes क्त वर्त्तमाने by "मतिबुद्धिपूजार्थेभ्यश्च" and then "क्तस्य च वर्त्तमाने" gives षष्ठी in येषाम्।

20. विराध—अमात्य, अलमावेगेन। वृत्तमिदं वर्ण्यते।

Viradha—Minister, away with agitation ; it is the past being described.

राक्षसः (निःश्वस्य)—कष्टं वृत्तमिदम्। मया पुनर्ज्ञातं स एवायं काल इति। (शस्त्रसुत्सृज्य) हा देव नन्द, स्मरामि ते राक्षसं प्रति प्रसादातिशयम्। त्वमत्र संग्रामकाले—

यत्रैषा मेघनीला चरति गजघटा राक्षसस्तत्र यायाद्
एतत् पारिप्लवाभ्यः प्लुति तुरगबलं वार्ष्यतां राक्षसेन।
पत्तीनां राक्षसोऽन्तं नयतु बलमिति प्रेषयन् सङ्गमाग्रा-
मङ्गासौः प्रीतियोगात् स्थितमिव नगरे राक्षसानां सहस्रम् ॥१४

ततस्ततः

Rakshasa—(*Sighing*) How hard ! This is past !! I thought, however, this was that very time. (*Laying down the weapon*) Alas ! Sire Nanda, Rakshasa remembers your favours. At the time of this fight sending out orders to me, such as "Rakshasa should rush where this body of elephants blue like cloud is marching", "let this force of cavalry bounding like rushing waters be checked by Rakshasa", "let Rakshasa drive this force of infantry to destruction", you, through affection, thought as if a thousand of Rakshasas were stationed in this city. Next, what next ?

CHARCHA

1. त्वमव संग्रामकाले—This shows that Nanda was alive during the siege (See *Intro*).

2. अन्वयः ॥ अव संग्रामकाले त्वं "यत्रैषा मेघनीला गजघटा चरति तत्र राक्षसो यायात्", "पारिप्लवाश्वः प्लुति एतत् तुरगबलं राक्षसेन वार्य्यताम्", "पत्तीनां बलं राक्षसः अन्तं नयतु" इति मन्त्रम् आज्ञां प्रेषयन् प्रीतियोगात् नगरे राक्षसानां सहस्रं स्थितम् अज्ञासीः इव। व्याख्या—'अव संग्रामकाले' अस्मिन् युद्धसमये 'त्वं यत्र एषा' दृश्यमाना 'मेघनीला' अभ्रश्यामा 'गजघटा' करिसंहतिः 'चरति' धावति 'तत्र राक्षसो यायात्' नान्यः कश्चिदपि एतार्थे। 'पारिप्लवं' चञ्चलं वन्यादिभङ्गात् द्रुतं प्रसरत् यत् 'अश्वः' जलं तस्य 'प्लुतिः' उत्प्लवनमिव प्लुतिर्यस्य तादृशम् 'एतत्' दृश्यमानं 'तुरगबलम्' अश्वसैन्यं 'राक्षसेन वार्य्यताम्' रुध्यताम्। स एव अस्मिन् चमू नान्यः। 'पत्तीनां' पदातीनां 'बलं' दृश्यमानं सैन्यं राक्षसः अन्तं नयतु चयं गमयतु 'इति' अनेन प्रकारेण 'मन्त्रम् आज्ञां प्रेषयन्' प्रेरयन् 'प्रीतियोगात्' स्नेहवशात् [हेतौ ५मी] 'नगरे' कुसुमपुरे 'राक्षसानां सहस्रं स्थितं' युद्धाय सन्नद्धं 'अज्ञासीरिव' अनुज्ञा इव। खण्डधरा वृत्तम्।

3. गजघटा—For घटा see प्रतिहिंसघटा para 19.

4. पारिप्लव etc.—See व्याख्या। टुप्लुङ् takes the चाञ्चल्य as due to the breeze at the time.

5. पत्तीनाम्—पद्यते इति पद + क्तिच् or औणादिकक्तिन् कर्तरि पत्तिः (masculine) infantry. "पदाति पत्ति पदग पादातिक पदातयः" इत्यमरः। Three divisions of the army are here mentioned—हस्तिन्, अश्व पदाति। The fourth, रथ, is ommited, because it had come into disuse in those days. The division of हस्तिन् again has become absolute at the present time. The drift of the sloka is that Rakshasa who was an expert leader in all the divisions of the army and Nanda was not at ease unless these were personally led by Rakshasa. The technical meaning of पत्ति, namely "एकैकरथवत्प्राप्ताः पत्तिः पञ्चपदातयः", does not suit the sense here, because it omits the separate mention of the infantry and introduces elephants and cavalry twice.

6. अज्ञासीः etc.—It was not possible for one man to lead all at the same time, yet Nanda required Rakshasa to do it. This

was due to his great esteem for Rakshasa (प्रीतियोगात्) which led them to think as if there were many Rakshasas in the city.

7. ततस्तत:—This is omitted by ढुण्ढि। But seems necessary to take off the interruptlon of the narrative.

21. विराध—तत: समन्तादुपरुद्धं कुसुमपुरम् अवलोक्य, बहुदिवसप्रवृत्तम् अतिमहत् उपरोधवैशसम् उपरि पौराणां परिवर्त्तमानम् असहमाने, तस्यामप्यवस्थायां पौरजनापेक्षया सुरङ्गामेत्य अपक्रान्ते तपोवनाय देवे सर्वार्थसिद्धौ, स्वामिविरहात् प्रशिथिलोद्यतप्रयत्नेषु युष्मद्बलेषु, जयघोषणाव्याघातादिसाहसानुमितेषु अन्तर्नगरवासिषु पुनरपि नन्दराज्यप्रत्यानयनाय सुरङ्गया बहिरपगतेषु युष्मासु, चन्द्रगुप्तनिधनाय युष्मत्प्रयुक्तया विषकन्यया घातिते तपस्विनि पर्वतेश्वरे—

Viradha—Next, Sire Sarvarthasiddhi seeing Kusumapura besieged all round, even in those circumstances having left for the hermitage by reaching a tunnel, out of regard for the citizens, unable as he was to stand the further continuance over them of the very great hardships of the siege which had already continued for many days ; your forces standing with efforts greatly relaxed owing to the absence of their master ; you, with the (minds of the) residents within the city guessed from such darings as obstruction to the proclamation of (Chandragupta's) victory, having gone out by the tunnel for the recovery of the kingdom of Nanda ; poor Parvatesvara having been killed with the poison-girl employed by you for the destruction of Chandragupta ;

तत: इसि। मते नन्दे सर्वार्थसिद्धिं राजानं कृत्वा अयुध्यत भवान् 'तत: कुसुमपुरं समन्तात्' सर्वत: 'उपरुद्धम् अवलोक्य, पौराणामुपरि बहुदिवसप्रवृत्तं' दीर्घकालव्यापी

'अतिमहत्' महाघोरम् 'उपरोधस्य' निरोधस्य 'वैशसम्' क्रूरताम् 'असहमाने' अमृष्यमाणे अनिच्छति 'देवे सर्वार्थसिद्धौ तस्यामपि अवस्थायां' रक्षके राजान्तरे असति अपि 'पौरजनेषु' या 'अपेक्षा' आदरः, क्लेशस्तेषां मा भूत् इत्येवंरूपः तया, [करणे तृतीया] 'सुरङ्गां' कञ्चित् विलमार्गम् 'एत्य तपोवनाय अपक्रान्ते' अपसृते सति। मयि गते राक्षसश्चन्द्रगुप्तेन सन्दधाति पौराणाञ्च उपरोधयातना शाम्यति इति मत्वा राजनि गते सति, राजा नो नास्ति इति वार्त्ता सूच्यताभूत् सैन्येषु, ततो 'युष्मद्भक्तिषु स्वामिविरहात् प्रशिथिलीकृतप्रयत्नेषु' सत्सु नगरं भवान् शत्रुवशमकार्षीत्। ततश्चाणक्यो नगरे मौर्य्यस्य जयमघोषयत्, किन्तु पौरैः तव बाधा दत्ता, अन्यच्च तत्तत् राज्ञः अप्रियमनुष्ठितम्। एवम् 'अन्तर्नगरवासिषु' पुराभ्यन्तरवासिषु 'जयघोषणाश्राघातादिभिः' साहसैः दृढकर्मभिः 'अनुमितेषु' ज्ञातेषु नन्दानुरक्ता एते इति विदितेषु सत्सु प्रीत्याहितोऽभूत् भवान्। ततः एभिः पौरैः सहायैः चन्द्रगुप्तं निहत्य 'पुनरपि नन्दराज्यप्रत्यानयनाय सुरङ्गया बहिः अपगतेषु युष्मासु' प्रागुपदिष्टो जीवसिद्धिः चन्द्रगुप्ताय विषकन्यां प्राहिणोत् किन्तु चाणक्यस्य नीत्या 'चन्द्रगुप्तनिधनाय युष्मत्प्रयुक्तया विषकन्यया तपस्विनि पर्वतेश्वरे घातिते' सति—

CHARCHA

1. बहुदिवस &c.—बहुदिवसान् व्याप्य प्रवृत्तम्। अत्यन्तसंयोगे द्वितीया। २तत्।—See व्याख्या।

2. उपरोध etc.—उप + रुध + घञ् भावे उपरोधः siege. विशस is क्रूर। तस्य भाव इति विशस + अण् वैशसम् cruelty, hardship. उपरोधस्य वैशसम् etc.

3. तस्यामपि—सर्वार्थसिद्धि knew that there was no other living member of Nanda's race and the empire would go without a king if he left. Even in such circumstances he left (for reasons see next).

4. पौरजनापेक्षया—पौरजनेषु अपेक्षा। हेतौ तृतीया। Out of regard for the citizens. He could not bear to see them suffer. He thought if he left Rakshasa would capitulate and the citizens would be relieved of their sufferings.

5. तपोवनाय—तपोवनं गन्तुम् इति कर्मणि ४थी by "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"।

6. सर्वार्थसिद्धौ—सर्वार्थसिद्धि was a ज्ञाति of Nanda, an old man at the time. When Nanda died, Rakshasa set him up as king and continued the defence of the city (See *Intro*).

7. जयघोषणा etc.—सहस् is बल, हठ etc. सहसा कृतम् इति सहस्+अण् साहसम् daring. Or it may be derived from सहसा which is an अव्यय meaning the same. Cf.—"व्याघातो जयघोषणादिषु बलादत्यद्बलानां कृतः" —Act. III, Sl. 26.

22. राक्षसः—सखे पश्य आश्चर्यम्—

कर्णेनेव विषाङ्गनैकपुरुषव्यापादिनी रचिता
हन्तुं शक्तिरिवार्जुनं बलवतो या चन्द्रगुप्तं मया।
सा विष्णोरिव विष्णुगुप्तहतकस्यात्यन्तिकश्रेयसे
हैडिम्बेयमिवेत्य पर्वतनृपं तद्ध्यमेवावधीत् ॥ १५ ॥

Rakshasa—Friend, note the marvel—The potent poison-girl, the killer of a single individual, that by me was reserved to kill Chandragupta, like the javelin by Karna to kill Arjuna, did, for the lasting benefit of cursed Vishnugupta, as of Vishnu, reach and kill king Parvataka like Hidimba's son that was but his own victim.

विराध—अमात्य, दैवस्यात्र कामचारः, किं क्रियताम् ?

Viradha—Minister, it is Fate's freak in the matter. What could be done ?

राक्षसः—ततस्ततः।

Rakshasa—Next, what next ?

अन्वयः ॥ या बलवती एकपुरुषव्यापादिनी विषाङ्गना शक्तिरिव कर्णेन अर्जुनमिव चन्द्रगुप्तं हन्तुं मयारचिता, सा विष्णोरिव विष्णुगुप्तहतकस्य आत्यन्तिकश्रेयसे तद्ध्यमेव हैडिम्बेयमिव पर्वतनृपम् एत्य अवधीत्। व्याख्या—'या बलवती' प्रबला अमोघाङ्गत्यर्थः

'एकम्' एकमेव 'पुरुषं व्यापादयति' हन्ति या तादृशी 'विषाङ्गना' विषतुल्या कन्या 'शक्तिरिव' इन्द्रदत्ता एकघ्नी इव 'कर्णेन' पृथायाः कानीनेन पुत्रेण अर्जुनमिव चन्द्रगुप्तं हन्तुं मया रचिता' स्थापिता 'सा विष्णोरिव विष्णुगुप्तहतकस्य' चाणक्यहतकस्य 'आत्यन्तिकं' सार्वत्रिकं सार्वकालिकञ्च यत् 'श्रेयः' मङ्गलं' तस्मै रक्ष्यं रचित्वा वध्यञ्च हत्वा सार्वत्रिकं मङ्गलं कर्तुं 'तस्य वध्यमेव' यस्य वधस्य इष्टः तमेव 'हैडिम्बेयमिव' हिडिम्बासुतं घटोत्कचमिव पर्वतनृपं' पर्वतकम् 'एत्य' प्राप्य 'अवधीत्' जघान। न केवलं चन्द्रगुप्तमहत्वा चाणक्यस्य नापकृतं तथा, अपि च चाणक्यस्य वध्यं पर्वतकं हत्वा तस्यैव कार्यं कृतम् इत्यात्यन्तिकं श्रेयश्चाणक्यस्य। हन्तव्यौ मच्छत्रु चाणक्यस्य प्रीतिपात्रं चन्द्रगुप्तः, हतस्तु मन्मित्रं चाणक्यस्य शत्रुः पर्वतक इति 'पश्य आश्चर्यम्'। आर्द्धलक्रीडितं वृत्तम्।

CHARCHA

1. पश्य—दर्शन here means ज्ञानमात्र। There is nothing before the eyes to see. Refers to story given in the verse.

2. एकपुरुष etc.—एकः पुरुषः। तं व्यापादयति इति एकपुरुष + वि + आ + पद + णिच् + णिनि कर्त्तरि साधुकारिणि आवश्यके वा। Qual. विषाङ्गना and शक्तिः।

3. शक्तिः बलवती—The बल was in एकपुरुषव्यापादन। It was powerless after killing its first victim.

4. विष्णोरिव—विष्णु is कृष्ण who was the चाणक्य in the matter of the भारतयुद्ध of which the fall of घटोत्कच is an incident.

5. विष्णुगुप्त etc.—विष्णुगुप्त was a name of चाणक्य। हत एव हतकः, स्वार्थे कः। विष्णुगुप्तश्चासौ हतकश्च etc कुत्सितानि कुत्सनैः इति समासः।

6. आत्यन्तिक etc.—अत्यन्त is नित्य permanent ; or परम supreme. अत्यन्ते भवम् इति ठञ् अध्यात्मादि। तादृशं श्रेयः। तस्मै ; तत्कर्तुमित्यर्थः। "क्रियार्थोपपदस्य—" इति कर्मणि ४थी।

7. हैडिम्बेयम्—हिडिम्बा was a राक्षसी whom भीम married, the issue being घटोत्कच। हिडिम्बायाः अपत्यं पुमान् इति हिडिम्बा + ढक्।

8. तदध्यम्—तेन वध्यः or तस्य वध्यः etc. पर्वतक was a claimant to half of चन्द्रगुप्त's kingdom as price of help rendered during the siege. चाणक्य was therefore anxious to get rid of him by strata-

gem. Thus पर्वतनृप was विष्णुगुप्त's वध्य। हैडिम्बेय was a Rakshasa not very favourably disposed towards the आर्य्यs ; he was therefore वध्य of विष्णु।

9. *Remark*—The simile is a happy one. The points are —(1) कर्ण and राक्षस ; (2) अर्जुन and चन्द्रगुप्त (कर्ण's enemy is अर्जुन, राक्षस's enemy being चन्द्रगुप्त) ; (3) विषाङ्गना and शक्ति (both बलवती ; both एकपुरुषव्यापादिनी, both set apart for a special purpose, *viz.*, to kill the enemy) ; (4) विष्णु and विष्णुगुप्त (both profound politicians and directing the struggle) ; (5) हैडिम्बेय and पर्वतनृप (both called in for help by the politicians at a crisis, but both marked out as victims of the very politician whom they were helping)·

10. कामचार:—चर + घञ् भावे चार: movement, action. कामेन चार:, सुपसुपा।

23. विराध—ततः पितृवधव्यासात् अपक्रान्ते कुमारे मलयकेतौ, विश्वासिते पर्वतकभ्रातरि वैरोचके, प्रकाशिते च चन्द्रगुप्तस्य नन्दभवनप्रवेशे, चाणक्यहृतकेन आहूय अभिहिताः सर्व एव कुसुमपुरनिवासिनः सूत्रधाराः यथा—"सांवत्सरिकादेशात् अर्द्धरात्रसमये चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यति, ततः पूर्वद्वारात् प्रभृति संस्क्रियतां राजभवनम्" इति। ततः सूत्रधारैरभिहितम्—"आर्य्य, प्रथममेव देवस्य चन्द्रगुप्तस्य नन्दभवनप्रवेशम् उपलभ्य सूत्रधारेण दारुवर्मणा कनकतोरणन्यासादिभिः संस्कारविशेषैः संस्कृतं प्रथमराजभवनद्वारम् अस्माभिरिदानीम् अभ्यन्तरे संस्कारः आधेयः इति। ततश्चाणक्यघटनानादिष्टैव सूत्रधारेण दारुवर्मणा संस्कृतं राजभवनद्वारम् इति परितुष्टेनेव सुचिरं दारुवर्मणो दाक्ष्यं प्रशस्य अभि-

हितम्—"अचिरादस्य दार्व्यस्य अनुरूपं फलम् अधिगमिष्यसि दारुवर्मन्" ।

Viradha—Next, Prince Malayaketu having seceded through fright from the murder of his father ; Vairochaka the brother of Parvataka, having been lured into confidence . and Chandragupta's intended entry into the palace of Nanda having been made known , all carpenters living at Kusumapura were summoned by cursed Chanakya and informed thus—"As under instruction from the astrologers Chandragupta's entry into the palace of Nanda comes off at mid-night, so let the palace be decorated commencing with the eastern gate." It was then remarked by the carpenters—"Noble Sir, the first gate of the palace is already decorated by the carpenter Daruvarman by placing golden gateways and the like, he having previously known of Sire Ceandragupta's entry into the palace of Nanda. Decorations have now to be put up by us in the interior". Then the brat Chanakya, as if pleased that the palace-gate had been decorated by the carpenter Daruvarman even before ordered, long belauding the alacrity of Daruvarman, said this "Daruvarman, you will ere long get the reward suiting this keenness."

CHARCHA

1. पिटबध etc.—See वासयित्वा अपवाहितो भानुरायणेन etc. Act I.

2. विश्वासिते etc.—Parvataka's brother Vairochaka also was in the camp. His suspicions were allayed by Chanakya who represented to him that it was Rakshasa who had killed Parvataka, and that the promised half-share would be made over to him, now that Malayaketu had seceded.

3. सांवत्सरिक etc.—संवत्सरं कथयन्ति बोधयन्ति वा इति संवत्सर + ठञ् शेषे सांवत्सरिकाः astrologers by "कालात् ठञ्" । सवित्सरिक is an ordinary attributive for an astrologer, the पारिभाषिक (technical)

word being सांवत्सर। Thus "सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि। स्युः मौहूर्त्तिक मौहूर्त्तज्ञानि कात्तौल्लिका अपि" इत्यमरः।

4. अर्द्धरात्र etc.—अर्द्धं रात्रे: इति अर्द्धरात्रि + अच् समासान्त अर्द्धरात्रः midnight. एकदेशिप्रतत्—। स एव समयः etc. अच् is by "अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः" ; masc. by "रात्राह्नाहाः पुंसि"। कालाधिकरणे ७मी।

5. पूर्वद्वारात्—It is considered auspicious to enter by the eastern gate. प्रभृतियोगे ५मी। See नगरप्रवेशात् प्रभृति, para 18 above.

6. कनकतोरण etc.—तोरण is बहिर्द्वार। कनकस्य तोरणम्। तस्य न्यासः। स आदिर्येषाम् etc.

7. प्रथम etc.—प्रथम is पूर्व ; hence प्रथमद्वार is the same as पूर्वद्वार the eastern gate.

8. संस्कार etc.—संस्काराणां (deriv. *ante.*) विशेषाः special decorations. Cf. Act III. Sl. 2.

9. आधेयः etc.—आ + धा + यत् कर्मणि has to be applied.

10. चाणक्य etc.—वटु is a ब्राह्मण boy, as in "वटुपरिषदं पुण्यश्रीकः श्रियेव सभाजयन्",—utlar ; "वटुभिरुपहृतानां बर्हिषांकूटमेतत्" etc. Here it is a term of reproach, because applied to an adult. चाणक्यश्चासौ वटुश्च। "कुत्सितानि कुत्सनैः" इति समासः। For a deprecatory sense of वटु, cf.—पश्यत वटोः चविद्यावष्टब्धस्य गर्जितानि" spoken by Parasurama of प्रतानन्द।

11. परितुष्टेनैव—As if pleased, really not pleased. This extra zeal of Daruvarman roused चाणक्य's suspicions, but he dissimulated.

12. फलमधिगमिष्यसि—चाणक्य felt sure that there was treachery in it, and he uttered the apparently plain words "You will reap the reward", but really he meant "You will feel the consequences", of your treachery. The consequences will appear below.

24. **राक्षसः (सोद्वेगम्)—सखे कुतश्चाणक्यवटोः परितोषः ? अफलम् अनिष्टफलं वा दारुवर्मणः प्रयत्नमवगच्छामि,**

यद्वेन बुद्धिमोहात् अथवा राजभक्तिप्रकर्षात् नियोगकालम् अप्रतीक्षमाणेन जनितः चाणक्यवटोश्वेतमि बलवान् विकल्पः। ततस्ततः ?

Rakshasa—(*With anxiety*) Friend, whence could satisfaction come to the brat Chanakya. Methinks Daruvarman's efforts were fruitless or bore bitter (lit, unwelcome) fruits, as, through delusion or excess of loyalty, strong suspicion had been raised by him in the mind of the brat Chanakya by not biding the time for the appointment. Next, what next ?

विराधः—ततश्चाणक्यहतकेन अनुकूललग्नवशात् अर्द्धरात्रसमये चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यति इति शिल्पिनः पौरांश्च गृहीतार्थान् कृत्वा तस्मिन्नेव क्षणे पर्वतेश्वरभ्रातरं वैरोचकम् एकासने चन्द्रगुप्तेन सह उपवेश्य कृतः पृथ्वीराज्यविभागः।

Viradha—Now, by the accursed Chanakya, who made the artisans and citizens understand that, in subservience to the auspicious moment, Chandragupta's entry into the palace of Nanda will come off at the time of mid-night, that very moment (mid-night) a division of the world-empire was made by making Parvataka's brother Vairochaka sit on the same seat with Chandragupta.

CHARCHA

1. अफलम्—अविद्यमानं फलमस्मिन्। Qual. प्रयत्नम्।

2. अनिष्ट etc.—न इष्टम् undesired, dire. अनिष्टं फलमस्य of dire consequences. Why अफलम् अनिष्टफलम् वा ? The answer follows —'यत्' यस्मात् 'बुद्धिमोहात्' मतिभ्रंशात् 'अथवा राजभक्ति' नन्दे यो 'भक्तिप्रकर्षः' अनुरागातिशयः तस्मात् 'नियोगस्य' आदेशस्य 'कालम्' अप्रतीक्षमाणेन अलाभयता 'चाणक्य'

दाक्षवर्मणा 'चाणक्यचटोऽयेतसि बलवान् विकल्पः' सन्देहः 'जनितः'। So Chanakya will take measures.

3. अनुकूल etc.—खग + ड कर्तरि खग that which has touched (the horizon), *i. e.*, the constellation rising. अनुकूलं खगम्। तस्य बलम् आयत्तता through the influence of, *i. e.*, in deference to the favourable mement.

4. गृहीतार्थान्—गृहीतः अर्थः विषयः यैः etc. informed of the matter, who have understood the matter.

25. राक्षसः—किं वा अतिसृष्टः पर्वतकभ्रात्रे वैरोचकाय पूर्वप्रतिश्रुतः राज्यार्द्ध विभागः।

Rakshasa—Did he really relinquish unto Parvataka's brother Vairochaka the previously promised half share of the kingdom ?

विराधः—अथ किम्।

Viradha—What else (yes) ?

राक्षसः (स्वगतम्)—नियतम् अतिघृणेन चाणक्यचटुना तस्यापि तपस्विनः कमपि उपांशुवधमाकलय्य पर्वतेश्वरविनाशेन जनितमयशः प्रमार्ष्टुम् एषा लोकप्रसिद्धिरुपचिता। (प्रकाशम्) ततस्ततः ?

Rakshasa—(*To himself*) Surely after having planned some sort of secret murder for that poor fellow too this publicity in the world has been secured by that very wily brat Chanakya to wipe out the infamy caused by the murder of Parvataka. (*Aloud*) Next, what next.

CHARCHA

1. अतिसृष्टः—अति + सृज + क्त कर्मणि अतिसृष्टः meaning. दत्तः।

2. राज्यार्द्ध etc.—अर्द्ध is half. विभज्यते इति विभागः share ; कर्मणि

षष्ठ । राज्यस्य अर्द्धम्, ६तत् । तदेव विभागः—। Here एकदेशिसमास would give अर्द्धराज्यम् by "अर्द्धं नपुंसकम्", because एकदेशिसमास bars षष्ठी-तत्पुरुष । This is after the सूत्रकार (पाणिनि)। But the भाष्यकार rejects the whole of the एकदेशिप्रकरण, hence ६तत्—is available. "यथोत्तरं मुनीनां प्रामाण्यम्" । अर्द्धराज्य presents no difficulty to him because it may be treated as a कर्मधारय ।

3. नियतम्—निश्चितम्, refers to the whole वाक्यार्थ following.

4. उपांशुवधम्—उपांशु, is an अव्यय meaning विजने secretly or secret. उपांशु वधः सुप सुपा । Obj. of आकलय्य । Also cp "अपीदं दुर्योधनेन उपांशुविहितं कृतं स्यात्" and "अस्य लेकं उपांशुव्रतम्—Mah.

5. आकलय्य—आ + कल + णिच् स्वार्थे + ल्यप्, having devised.

6. लोकप्रसिद्धिः—प्र + सिध् + क्तिन् भावे प्रसिद्धिः publicity. लोके प्रसिद्धिः publicity in the world ; सुप् सुपा ।

7. उपचिता—उप + चि + क्त + कर्मणि collected, secured. The idea is that the partition was thus publicly made to let people understand that चाणक्य had no motive to kill Parvataka, because the thought of cheating him out of his share of the kingdom had never occured to him ; or, he would not have so readily parted with it now. Rakshasa does not know yet that rumour makes Rakshasa himself the murderer.

26. विराधः—ततः प्रथममेव प्रकाशिते रात्रौ चन्द्रगुप्तस्य नन्दभवनप्रवेशे, कृताभिषेके किल वैरोचके विमलमुक्तामणिपरिक्षेपविरचितचित्रपटमयवारवाणप्रच्छादितशरीरे, मणिमयमुकुटनिविड़नियमितरुचिरतरमौलौ, सुरभिकुसुमदामवैकक्षकावभासितविपुलवक्षःस्थले, परिचिततमैरपि अनभिज्ञायमानाकृतौ, चाणक्यहृतकादेशात् चन्द्रगुप्तोपवाह्यां चन्द्रलेखां नाम गजवशाम् आरुह्य चन्द्रगुप्तानुयायिना राजलोकेन अनुगम्यमाने, देवस्य नन्दस्य भवनं प्रविशति वैरोचके, युष्मत्-

प्रयुक्तेन दारुवर्मणा सूत्रधारेण चन्द्रगुप्तोऽयमिति मत्वा तस्योपरि पातनाय सज्जीकृतं यन्त्रतोरणम्। अत्रान्तरे वहिर्निगृहीतवाहनेषु स्थितेषु चन्द्रगुप्तानुयायिषु नृपेषु, युष्मत्प्रयुक्तेनैव चन्द्रगुप्तनिषादिना ववरकेण कनकदण्डकान्तर्निहिताम् असिपुत्रिकाम् आकृष्टुकामेन अवलम्बिता करेण कनकशृङ्खलावलम्बिनी कनकदण्डका।

Viradha—Now, Chandragupta's entry into the palace of Nanda at night having been previously anounced, Vairochaka—with coronation performed, with his person covered by an armour of speckled plates formed of pure pearls and gems set in circles, with his knotted (braided ?) locks rendered very attractive on being tightly restrained by a crown of jewels, with his broad chest lighted up by two garlands of strings of fragrant flowers laid across, and with his features unrecognisable (lit. not being recognised) by even the most intimate—going to enter the palace of Sire Nanda, having, under instructions from cursed Chanakya, mounted the female elephant Chandralekha which is Chandragupta's mount and being followed by the body of princes that usually follow Chandragupta, the gate-way with the mechanism (of a catch) was held ready by Daruvarman the carpenter employed by you to let down on him, thinking that this was Chandragupta. At this stage the princes that follow Chandragupta having stopped outside with their mounts checked, the golden staff hanging by the golden chain (from the neck of the elephant) was taken np in his hand by Varvaraka the driver of Chandragupta who was really employed by you, with a desire to draw the knife that was secreted within the golden staff.

राक्षसः—उभयोरपि अस्थाने यत्नः ।

Rakshasa—The attempts of both were is the wrong place.

CHARCHA

1. Analytical Expl.—'ततः किल वैरोचके कृताभिषेके, सति 'युष्मत्प्रयुक्तेन खलधारेण दारुवर्मणा' प्रागुक्तपूर्वद्वारे विहितं 'यन्त्रतोरणं' यन्त्रयुक्तं कनकतोरणं 'तस्य' वैरोचकस्य 'उपरि पातनाय सज्जीकृतम्' [The तोरण was worked by machinery and had a bolt or catch which if withdrawn the entire structure would come down add crush the people below. Daruvarman got ready to let it down on Vairochaka]. Wey ?—'चन्द्रगुप्तोऽयमिति मत्वा'। Whence the mistake ?—'प्रथममेव रात्रौ चन्द्रगुप्तस्य नन्दभवनप्रवेशे प्रकाशिते' प्रचारिते सति ततः 'वैरोचके देवस्य नन्दस्य भवनं' प्रविशति' सति [He knew the Chandragupta would enter the palace at that time, so, as he saw Vairochaka enter, he took him for Chandragupta]. It was a bad mistake—'चाणक्यकृतकस्य आदेशात् चन्द्रगुप्तः उपवाह्यः वहनीय यस्या तां चन्द्रगुप्तस्य वाहनमित्यर्थः 'चन्द्रलेखां नाम गजवशाम् आरुह्य चन्द्रगुप्तस्य अनुयायिना राजलोकेन अनुगम्यमाने' सति वैरोचके [It was all Chanakya's doing. He placed vairochaka on Chandragupta's mount and gave him a retinue of princes who usually follow Chandragupta. This misled Daruvarman]. But both Chandragupta and Vairochaka were known to him—'परिचितत्वैरपि अनभिज्ञायमाना' अपरिगृह्यमाणा 'अकृतिः' यस्य तादृशे सति वैरोचके [Even Vairochaka's best friends could not make him out at the time]. Why ?—'सुरभीणां कुसुमानां यानि 'दामानि' मालिकाः तेषां ये 'वैकक्षके' उभाभ्यां स्कन्धाभ्यां विपरीतकक्षान्तरलम्बिनी सजौ ताभ्याम् 'अवभासितं विपुलं वक्षःस्थलं' यस्य तादृशे सति वैरोचके [Two weathers of flowers ran across his chest from shoulder to below the opposite arm-pit covering up the chest completely]. A man is not known by his chest—'मणिमयेन मुकुटेन निविड" दृढं यथा तथा 'निबन्धितः' अत एव 'रुचिरतरः मौलिः' चूडा यस्य तादृशे सति वैरोचके [The diadem was a very close fit and his features were then unrecognisable]. Still he could be known

otherwise—'विमला:' या 'मुक्ता: मणयश्च' तेषां य: 'परिक्षेप:' मण्डलाकारेण विन्यास: तेन 'रचित:' य: 'चित्र:' नानावर्ण: 'पट:' तन्मयो यो 'वारवाण:' वर्म तेन 'प्रच्छादितं शरीरं' यस्य तादृशे सति वैरोचके [He was encased in a coat of mail made of plates inlaid with pearls and gems and could not be recognised]. Well, what followed ?—'अथान्तरे चन्द्रगुप्तस्य निषादिना' क्षत्रियकेन 'वर्वरकेण कनकयष्टिस्थेन' सुवर्णसूचेण 'अतलम्बिनी' गजस्कन्धात् लम्बमाना 'कनकदण्डिका' सुवर्णदण्ड: 'करेण अवलम्बिता' गृहीता। What for ?—'कनकदण्डिकाया: अन्त:' मध्ये 'निहितां' गुप्ताम् 'असिपुत्रिकां' छुरिकाम् 'आकृष्टुकामेन' वर्वरकेण अवलम्बिता [He wanted to draw out a dagger from inside the staff]. Why ?—युष्मत्प्रयुक्तेन एव वर्वरकेण' [He was *your* man and wanted to kill Chandragupta with it. He too thought that the rider was Chandragupta and not Vairochaka]. Where were the retainers ?—'निगृहीतानि' नियन्त्रितानि 'वाहनानि' येषां तथाविधेषु 'चन्द्रगुप्तानुयायिषु नृपेषु बहि:' द्वारात् बहि: 'स्थितेषु' सत्सु [Their mounts were checked and they were all halting outside].

2. विमलमुक्ता etc.—Analysis above. परि + क्षिप + घञ् भावे परिक्षेप placing round, circumvention. Cf. "महार्णवपरिक्षेपं लङ्कायाः परिखालघुम्"। वार्यन्ते एभि: इति वारि + घञ् करणे वारा: shielders ; वाणानां वारा: वारवाणा: armours ; राजदन्तादित्वात् वाणशब्दस्य परनिपात:।

3. मुरभि etc.—विशिष्ट: कक्ष: अक्षात् विकक्षम् that above which the arm-pits lie, *i. e*, the chest. विकक्षे भवम् इति विकक्ष + अण् + कन् स्वार्थे वैकक्षकम् a garland placed cross-wise on the chest from shoulder to the opposite arm-pit. "वैकक्षकन्तु तत्। यत् तिर्यक् चित्तमुरसि" इत्यमर:। Some read वैकक्ष्य which is of doubtful derivation and opposed to अमर।

4. चन्द्रगुप्तोपगाह्याम्—उप + गह + ण्यत् कर्मणि उपगाह्य that which is to be carried. Now see Analysis. Qual. गजवपाम्।

5. गजवशाम्—See गजवशया, Sl. 3.

6. यन्त्रतोरणम्—यन्त्र machinery. यन्त्रकलितं यन्त्रमुक्तं यन्त्रयुक्तं वा तोरणम् etc.

7. कनकदण्ड etc.—दण्ड एव इति दण्ड + कन् स्वार्थे + टाप् स्त्रियाम् दण्डिका

a small staff as is used by *Mahouts*. कनकस्य दण्डिका। तस्याः अन्तः, तस्मिन् निहिता। Or अन्तः मध्ये निहिता इति अन्तर् + नि + धा + क्त कर्मणि अन्तर्धिहिता। कनकदण्डिकायाम् अन्तर्धिहिता। In the latter case नि becomes णि by "नेर्गदनद—" and "अन्तःशब्दस्य अङ्किविधिणत्वेषु उपसंख्यानम्"।

8. अस्थाने—Not in the proper place. The proper place was of course Chandragupta.

27. विराध—अथ घनाभिघातम् उत्प्रेक्षमाणा गजबधूः अतिजवनतया गत्यन्तरमारूढवती। प्रथमगत्यनुरोधप्रत्याकलितमुक्तेन प्रभ्रष्टलक्ष्यं पतता यन्त्रतोरणेन आकृष्टकृपाणीव्यग्रपाणिः अनासादयन्नेव चन्द्रगुप्तार्गया वैरोचकं हतस्तपस्वी वर्वरकः। ततो दारुवर्मणा यन्त्रतोरणनिपातनात् आत्मवधमाकलय्य पूर्वमेव उत्तुङ्गतोरणस्थलम् आरूढेन यन्त्रघट्टनबीजं लोहकीलकम् आदाय हस्तिनीगत एव हतस्तपस्वी वैरोचकः।

Viradha—Thereat the female elephant, anticipating a heavy blow because of going too fast, adopted a different pace. Poor Varvaraka by whom the knife was drawn and whose hand was busy, was, by the gate-way that was worked by mechanism and was loosened and released with reference to the previous speed and hence fell wide of the mark, was killed even before he reached Vairochaka in expectation of Chandragupta. Now Daruvarman, who stood already mounted on the site of the lofty gate-way and expected his own death for letting the gate-way down, killed poor Vairochaka even as he was seated on the very elephant, having taken up the iron bolt which was the key to start the mechanism.

Anal.—'अथ' अनन्तरं कनकदण्डिकायाम् अवलम्बितायां, 'गजबधूः अतिजवनतया' अतिद्रुतधावनार्द्रीतः स्थितेष्वपि इतरेषु द्रुतमेव धावति इति हेतोः इत्यर्थः धावनवारणाय

'घनं' गुरुकम् 'अभिघातं' दण्डिकाप्रहारम् 'उत्प्रेक्षमाणा' शङ्कमाना सती, द्रुतं धावामि इति प्रहर्तुमुद्यतोऽयं शनैश्चेत् नैव प्रहरेत् इति मन्यमाना 'गत्यन्तरं' भिन्नगतिं मन्दगमनमित्यर्थः 'आरूढवती' अवलम्बितवती। ततश्च 'प्रभ्रष्टं' च्युतं लक्ष्यम् उद्दिष्टं वैरोचकं इत्यर्थः यस्मिन् कर्मणि तत् यथा तथा वैरोचकमनासाद्य इत्यर्थः 'पतता यन्त्रतोरणेन तपस्वी वर्वरको हतः'। How was that?—'प्रथमा' पूर्वा या 'गतिः' द्रुतगतिरित्यर्थः तस्याः 'अनुरोधेन' अपेक्षया 'प्रत्याकलितं' विघट्टितं मुक्तं च यत् यन्त्रतोरणं तेन हतः [The gate, way was dropped infront with allowance for the speed. But the speed was slackened, hence the allowance proved too much, and instead of falling on the rider, it fell on the driver who was in advance of the rider]. Then Varvaraka was killed?—'आकृष्टा' कनकदण्डिकायाः मध्यात् निष्काशिता या 'कृपाणी' कुरिका तस्यां तया वा 'व्यग्रः' व्यापृतः 'पाणिः' यस्य तथाविधो वर्वरकः 'चन्द्रगुप्ताश्रया वैरोचकम् अनासादयन्नेव हतः। Glad Vairochaka is spared—'ततः' पूर्वमेव 'उत्तुङ्गम्' अत्युच्चं 'तोरणस्थलम्' आरूढेन दारुवर्मणा 'यन्त्रतोरणनिपातनात्' अपराधात् चाणक्याज्ञया 'आत्मनो वधम् आकलय्य' तर्कयित्वा 'यन्त्रस्य' यत् 'घट्टनं' चालनं तस्य 'बीजं' हेतुभूतं 'लोहकीलकम्' अयःशङ्कुम् 'आदाय' गृहीत्वा 'तपस्वी वैरोचकः हस्तिनीगत एव चन्द्रगुप्तभ्रान्त्या 'हतः'।

CHAROHA

1. घनाभिघातम्—Justice Telang reads जघनाभिघातम्—a blow on the buttocks. But the driver sits on the neck, he cannot reach the buttocks of the beast, specially when there is a passenger behind him. We prefer घनाभिघातम्।

2. उत्प्रेक्षमाणा—उद्+प्र+ईक्ष+मानच कर्त्तरि expecting, anticipating. She saw the staff taken up and thought it was to give her a blow.

3. अतिजवनतया—जु+ल्युट् भावे जवनम् speed. अतिशयितं जवनमस्य अतिजवनम् moving with a great speed? सामान्ये नपुंसकम्। तस्य भावः। तया। हेतौ इया। हेतु of अभिघात—a blow will be struck because

she is moving very fast. The reason for सामान्ये सुप्'सकम् above is that पु'वद्भाव is not available here when तल् follows.

4. गत्यन्तरम्—अन्या गतिः etc. मयूरव्यंसकादि। It is usual here to to say that she *quickened* her pace. But then the gate-way will fall *behind* and will not hit the driver at all. See our Expl. above. Also see next.

5. प्रथमगति etc.—प्रति + आ + कल + णिच् + क्त + कर्मणि प्रत्याकलित undone, unhinged. आकलन is to arrange, cf.—"उपांशुवधमाकलय्य", para 25, *ante.* ; in the case of the तोरण it is to set it on its bearings ; hence प्रत्याकलन is to take it off the bearings. आदौ प्रत्याकलितं पश्चात् मुक्तं प्रत्याकलितमुक्तम्। प्रथमगत्यनुरोधेन प्रत्याकलितमुक्तम् etc., *i.e.*, let down i*n advance* just as in shooting at an object in motion. प्रथमगति was *fast*, hence the gate fell *too much* in advance, *i. e.* on the driver वर्वरक। See above.

6. आक्रष्ट etc.—क्रपाणी is a small sword, a dagger. विशिष्टमयमस्य व्ययः busy. Now see व्याख्या।

7. चन्द्रगुप्ताश्रया—चन्द्रगुप्तस्य चन्द्रगुप्तसम्बन्धिनी इत्यर्थः आशा, तथा। हतैव इया। The hope referred to Chandragupta, *i. e.*, the hope was to kill him.

8. आकलय्य—आ + कल + णिच् + ल्यप् having concluded.

9. पूर्वमेव—Long before the procession marched up to the gate. He was there to work the mechanism of the gate, of course unnoticed by others.

10. तोरणस्थलम्—तोरणस्य स्थलम् the site of the gate, *i. e.*, the place where the gate was.

28. **राक्षसः—कष्टम्। अनर्थद्वयमापतितम्। न हतश्चन्द्रगुप्तः हतौ वैरोचकवर्वरकौ दैवेन। अथ सूत्रधारो दारुवर्मा कथम्?**

Rakshasa—How hard ! A double misfortune has befallen. Chandragupta is not killed, Vairochaka and Varvaraka are killed by Fate. How did the carpenter Daruvarman fare.

विराध—वैरोचकपुरःसरेण पदातिलोकेनैव लोष्टघातं हतः॥

Viradha—Hit with brick-bats and killed by the very foot-men who preceded Vairochaka.

राक्षसः—(सास्रम्) कष्टम्। अहो वत्सलेन सुहृदा दारु-वर्मणा वियुक्ताः स्मः। अथ तत्रत्येन भिषजा अभयदत्तेन किमनुष्ठितम्?

Rakshasa—(*With tears*) How hard! Alas! we are bereft of the loving friend Daruvaman. Well, what was done by the physician Abhayadatta of that place?

विराध—सर्वमनुष्ठितम्।

Viradha—All was done.

राक्षसः—(सहर्षम्) किं हतो दुरात्मा चन्द्रगुप्तः?

Rakshasa—(*With joy*) Is the vile-hearted Chandragupta killed?

विराध—अमात्य दैवात् न हतः।

Viradha—Minister, through luck he was not killed.

राक्षसः—(सविषादम्) तत् किमिदानीं कथयसि सर्व-मनुष्ठितमिति?

Rakshasa—(*Sorrowfully*)—Then why do you say now "all was done"?

CHARCHA

1. कथम्—How did he fare? कथम्भूतः।

2. वैरोचक etc.—पुरः अग्रे सरति गच्छति इति पुरस्+स+ड कर्तरि van-guard. वैरोचकः पुरःसरः यस्य etc.—बहु। Qual. पदातिलोकेन।

3. पदातिलोकेन—लोक here means समूह multitude. Cf. "स राजलोकः कृतपूर्वसंविद्"—*Raghu*. पदातीनां लोकः etc. अनुक्ते कर्तरि ३या।

4. लोष्टघातम्—लोष्ट clod, brick-bat. लोष्टैः हत्वा इति लोष्ट + हन + घञ्मुल् भावे ।

5. भिषजा—भिषज्यति रोगान् जयति इति भिषज् + यक् स्वार्थे (कण्ड्वादि) + क्विप् कर्त्तरि भिषक् healer etc. तेन । अनुक्ते कर्त्तरि ३या ।

29. विराध—अमात्य, कल्पितमनेन योगचूर्णमिश्रितम् औषधं चन्द्रगुप्ताय । तत् प्रत्यक्षीकुर्वता चाणक्यहतकेन कनकभाजने वर्णान्तरमुपलभ्य अभिहितश्चन्द्रगुप्तः—"वृषल, सविषमिदम् औषधं न पातव्यम्" इति ।

Viradha—Minister, a draught mixed with a treacherous powder was offered by him to Chandragupta, But Chanakya inspecting it, having noticed change of colour in a golden cup, said this to Chandragupta—'Vrishala, this medicine is poisoned, it must not be taken.'

राक्षसः—शठः खल्वसौ वटुः । अथ स वैद्यः कथम् ?

Rakshasa—The fellow is cunning indeed ! Well, how did the physician fare ?

विराध—तदेव औषधं पायितो मृतश्च ।

Viradha—He was forced to swallow that very draught and died.

राक्षसः—(सविषादम्) अहो महान् विज्ञानराशिः उपरतः । अथ तस्य शयनाधिकृतस्य प्रमोदकस्य किं वृत्तम् ?

Rakshasa—(*sorrowfully*) Alas ! A vast mass of expert knowledge has disappeared. Well, what became of Pramodaka who was employed in his bed-room ?

विराध—यत् इतरेषाम् ।

Viradha—The same as of others.

राक्षसः—(सोद्वेगम्) कथमिव ?

Rakshasa—(*Anxiously*) How is that ?

CHARCHA

1. योगचूर्ण etc.—योग is विश्रम्भघातिन that which kills the unsuspecting. "योगो विश्रम्भघातिनि" इत्यादि हैमः। योगश्चासौ चूर्णश्च a powder that looks harmless but kills. तेन मिश्रितम्। Qual. औषधम्।

2. पायितः—पा + णिच् + क्त कर्मणि। पा रक्षणे gives पालित।

3. उपरतः—उप + रम + क्त कर्त्तरि has ceased, *i. e.*, is dead.

4. शयनाधिकृतस्य—शी + ल्युट अधिकरणे शयनम् bed-room, शयने अधिकृतः employed in the bed-room, etc.

30. विराध—स खलु मूर्खः युष्माभिरतिसृष्टं महान्तम् अर्थराशिमवाप्य महता व्ययेन उपभोक्तुमारब्धवान्। ततः 'कुतोऽयं धनागमः' इति पृच्छ्यमानो यदा वाक्यभेदान् बहूनगमत् तदा चाणक्यहतकेन विचित्रवधेन व्यापादितः।

Viradha—Fool as he was, he having come by the vast amount of money given by you, commenced enjoying at great expense. Then, on being asked 'Whence is this accession of immense wealth' when he made several divergent statements, he was killed by cursed Chanaka by an indescribably cruel death.

राक्षसः—(सोद्वेगम्) कथमत्रापि दैवेन उपहता वयम् ? अथ शयितस्य चन्द्रगुप्तस्य शरीरे प्रहर्त्तुम् अस्मत्प्रयुक्तानां राजगृहस्य अन्तर्भित्तिसुरङ्गाम् एत्य प्रथममेव निवसतां वीभत्सकादीनां को वृत्तान्तः ?

Rakshasa—(*With agitation*) How ! here too we are hit by fate ? Well, what news of Bibhatsaka and others who were

employed by us to strike at the person of Chandragupta when asleep and, having previously got in, were living in a hole within the walls of the palace ?

विराधः—अमात्य, दारुणो वृत्तान्तः ।

Viradha—Terrible news, Minister.

CHARCHA

1. पृच्छ्यमानः—कर्मणि लट्: स्थाने शानच्; he was questioned by चाणक्य ।

2. वाक्यभेदान्—वाक्यस्य भेदाः भिन्नानि वाक्यानि इत्यर्थः । "भावानवने द्रव्यालयनम्" इति न्यायात् ।

3. अगमत्—गम + लुङ् तिप् reached, adopted. He gave different versions at different times.

4. विचित्रवधेन—विशेषेण चित्रः very startling. विचित्रो वधः death of a specially striking character, i. e.,a particularly cruel death as a deterrent measure.

5. उपहताः—उप + हन् + क्त कर्मणि baffled, foiled.

6. अन्तर्भित्ति etc.—भित्तौ इति अन्तर्भित्ति in the wall ; विभक्ति अव्ययीभावः । अन्तर्भित्ति सुरङ्गा, सुपसुपा ।

7. प्रथममेव—Even before the procession came out.

31. **राक्षसः—(सावेगम्) कथं दारुणो वृत्तान्तः । न खलु विदितास्ते तत्र निवसन्तः चाणक्यहतकेन ।**

Rakshasa—(*With agitation*) How terrible news ? Really they were not found living there by cursed Chanakya.

विराध—अमात्य, अथ किम् ? प्राक् चन्द्रगुप्तप्रवेशात् शयनगृहं प्रविष्टमात्रेणैव निपुणमवलोकयता दुरात्मना चाणक्यहतकेन कस्मात्चित् भित्तिच्छिद्रात् गृहोतभल्लावयवां निष्कामन्तीं पिपीलिकापङ्क्तिम् अवलोक्य 'पुरुषगर्भमेतत् गृहम्'

इति गृहीतार्थेन दाक्षिणात्येन शयनगृहम्। तस्मिंश्च दह्यमाने धूमावरुद्धदृष्टयः प्रथमविहितनिर्गमनमार्गम् अनधिगम्य द्वारं सर्व एव बीभत्सकादयः ज्वलनमुपगम्य तत्रैव नष्टाः।

Viradha—What else, Minister? Before Chandragupta's entry, the bed room was caused to be burnt down by the vile-hearted and accursed Chanakya with the truth guessed, that the house had people within, on noticing a row of ants issuing through a certain hole in a wall with fragments of boiled rice held (in the mouth), immediately on entering the room and watching closely. While it was being burnt, Bibhatsaka and others, with eyes closed (*Or*—sight obstructed) by smoke and not having reached the previously constructed door which was the way out, but having got into the fire, all perished there.

CHARCHA

1. विदिताः—विद + क्त कर्मणि भूते। The rule "मतिबुद्धिपूजार्थेभ्यश्च" does not bar भूते क्त। अप्राप्तस्य वर्त्तमाने क्तस्य विधिः न तु प्राप्तस्य निषेधः।

2. चाणक्यदुष्टकेन—The rule "क्तस्य च वर्त्तमाने" does not apply, hence अनुक्ते कर्त्तरि तृतीया। Samasa *ante*.

3. प्राक् चन्द्रगुप्त etc.—'पुरुषाः गर्भे' यस्य तादृशम् 'एतदगृहम् इति' अनेन प्रकारेण 'गृहीतः' विज्ञातः 'अर्थः' तत्त्वं येन तादृशेन 'दुरात्मना चाणक्यदुष्टकेन तत् शयनगृहं दाक्षिणात्येन'। How could he know ?—'चन्द्रगुप्तस्य प्रवेशात् प्राक्' असन्दिग्धार्थं 'शयनगृहं प्रविष्टमात्रेणैव निपुणं' यथा तथा 'अवलोकयता' चाणक्येन 'कस्माच्चित् भित्तिच्छिद्रात् गृहीताः' मुखे धृताः 'भक्तस्य' अन्नस्य 'अवयवाः' खण्डाः यया तादृशीं 'निष्क्रामन्तीं' तस्माच्छिद्रात् बहिरागच्छन्तीं 'पिपीलिकापङ्क्तिम् अवलोक्य' दाक्षिणात्येन। What happened to the men ?—'दह्यमाने च तस्मिन् गृहे 'बीभत्सकादयः धूमेन अवरुद्धा दृष्टिः' येषां तथाविधाः सन्तः 'प्रथमं' पूर्वमेव 'विहितः' कृतः यः निर्गमनमार्गः निष्क्रमणपथः स एव यत् 'द्वारं' तत् 'अनधिगम्य' अप्राप्य 'ज्वलनम्' अग्निम् 'उपगम्य' द्वारं विचिन्वन्तः अग्नावेव निपत्य 'सर्वे एव' तत्र एव नष्टाः'।

4. प्रविष्टभावेन—प्रविष्ट एव प्रविष्टभावम्, मयूरव्यंसकादि। तेन। Also see इटभावः' *ante.*

5. पुरुषगर्भम्—पुरुषा गर्भे यस्य, गड्वादि which is an आकृतिगण list.

6. प्रथमविहित etc.—निर्गमन does not become निर्गमण owing to the prohibition "न भाभू—"। Telang reads अभिहित for विहित। अभिहित is कथित, but this does not suit the context. The reading 'प्रथमविहितमनधिगम्य द्वारं तत्रैव नष्टाः' is also noticed by Telang and should be preferred.

32. **राक्षसः—(सास्रम्) कष्टं भोः कष्टम्। सखे, पश्य दैवसम्पदं दुरात्मनश्चन्द्रगुप्तहतकस्य। कुतः—**

कन्या तस्य वधाय या विषमयी गूढं प्रयुक्ता मया
दैवात् पर्व्वतकस्तया स निहतो यस्तस्य राज्यार्द्धहृत्।
ये शस्त्रेषु रसेषु च प्रणिहितास्तैरेव ते घातिता
मौर्य्यस्यैव फलन्ति पश्य विविधश्रेयांसि मन्त्रीतयः॥ १६॥

Rakshasa—(*With tears*) Terrible, O terrible! Friend, mark the profusion of luck of the vile-hearted and accursed Chandragupta. Whence (do you ask)? Through Fate, Parvataka, claimant to half his kingdom, was killed by the girl of poison whom I secretly employed for his (Chandragupta's) destruction; those who were employed in the matter of weapons and poisons, were themselves killed by those very things. You see my measures mature blessings of sorts unto Maurya himself.

CHARCHA

1. दैवसम्पदम्—दैव fate, luck. सम्+पद+क्विप् भावे सम्पद् profusion सम्पत्तिः। दैवस्य सम्पत् etc. ताम्। Obj. of पश्य।

2. अन्वयः॥ मया तस्य वधाय या विषमयी कन्या गूढं प्रयुक्ता दैवात् यस्तस्य राज्यार्द्धहृत् स पर्वतकः तया निहतः; ये शस्त्रेषु रसेषु न प्रणिहिताः (दैवात्) ते एव

तैः घातिताः। पश्य मन्त्रीतयः मौर्य्यस्यैव विविधश्रेयांसि फलन्ति। व्याख्या—'मया तस्य' चन्द्रगुप्तस्य 'वधाय या विषमयी कन्या गूढम्' अन्यैरनुपलक्षितं 'प्रयुक्ता' प्रेरिता 'दैवात्' हेतोः दैवस्य अनुकूलतया इत्यर्थः 'यः तस्य' चन्द्रगुप्तस्य 'राज्यार्द्धस्य हर्त्ता' अर्द्धराज्यभाक् 'स पर्वतकः' तया निहतः' न तु सः। 'ये' जनाः मया 'शस्त्रेषु' अस्त्रप्रयोगविषयेषु 'रसेषु च' विषेष्वपि विषयेषु चन्द्रगुप्तं प्रति शस्त्रप्रयोगे विषयप्रयोगे च 'प्रणिहिताः' व्यापारिताः 'दैवात्' दैवप्रेरणया 'ते एव' मत्प्रेरिता जना न तु सः 'तैः' शस्त्रैश्च विषैश्च [करणे तृतीया] 'घातिताः' हिंसिताः। एवं पदेपदे स्वयमत्तः शत्रुश्च हतः, किमतः परं भाग्यबलम्? 'पश्य' विभावय 'मन्त्रीतयः' मदीयाः प्रयोगाः मौर्य्यस्यैव' न तु मम 'विविधानि श्रेयांसि बहूनि इष्टानि 'फलन्ति' प्रतिपादयन्ति। पश्य शत्रोरदृष्टं मम च दृष्टम्। बीजमुप्यते मया, फलं पुनः शत्रुणा भुज्यते। शार्दूलविक्रीडितं वृत्तम्।

3. विषमयी—विषं प्रकृतं प्रचुरमित्यर्थः अस्याम् इति विष + मयट् poisonous.

4. गूढम्—गुह + क्त कर्मणि मूढ़ secreted. तत् यथा यथा secretly.

5. राज्यार्द्ध etc.—राज्यस्य अर्द्धम्, ६तत्—। एकदेशिसमास gives अर्द्ध-राज्यम् (see *ante*), तत् हरति इति क्विप कर्त्तरि।

6 प्रणिहिताः—प्र + नि + धा + क्त कर्मणि। Nom. is मया। नि becomes णि by "नेर्गदनद—"।

7. तैरेव—एव goes with तै, see व्याख्या। तैः refers to शस्त्र and रस।

8. घातिताः—हन + णिच + क्त कर्मणि। Nom. मया। तानि (*i. e*, शस्त्र and रस) तान् हतवन्ति = अहम् तैः; तान् घातितवान् = मया तैः; ते घातिताः।

33. **विराध—अमात्य, तथापि खलु प्रारब्धमपरित्याज्यमेव। पश्य—**

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहताः विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणास्त्व मिवोद्वहन्ति ॥१७॥

Viradha.—Still, Minister, what is begun is not surely to be abandoned. Observe—By people of inferior merit, nothing indeed is undertaken through fear of obstruction. Average

people desist after commencing if hindered by obstructions. People of superior merit like thyself carry to completion what is undertaken even when being hindered often and often by obstructions.

CHRCHA

1. अपरित्याज्यम्—परि + त्यज + ण्यत् कर्मणि परित्याज्य to be abandoned. न तथा। त्याज्य does not become त्याग्य owing to the prohibition "ण्यत्प्रकरणे त्यजेरुपसंख्यानम्"। Agrees with उत्तकर्म—प्रारब्धम्।

2. अन्वयः। नीचैः विघ्नभयेन न खलु प्रारभ्यते। मध्याः प्रारभ्य विघ्नविहताः (सन्तः) विरमन्ति। त्वमिव उत्तमगुणाः विघ्नैः पुनः पुनः प्रतिहन्यमाना अपि प्रारब्धम् उद्वहन्ति। व्याख्या—'नीचैः' अधमैः पार्वैः 'विघ्नभयेन' विपत्तिशङ्कया 'न खलु प्रारभन्ते' नैव कर्म प्रस्तूयते। 'मध्यमाः प्रारभन्ते सत्यं किन्तु प्रारभ्य' कर्म प्रस्तुत्य 'विघ्नैः विहताः' बाधिताः सन्तः 'विरमन्ति' निवर्त्तन्ते। 'त्वमिव उत्तमाः, गुणाः येषां ते महापुरुषाः 'विघ्नैः' प्रत्यूहैः 'पुनः पुनः' वारं वारं 'प्रतिहन्यमाना अपि' बाध्यमाना अपि प्रारब्धं' प्रक्रान्तं कर्म 'उद्वहन्ति' धारयन्ति' निष्पत्तिं नयन्ति इत्यर्थः। अतो ब्रवीमि महापुरुषेण त्वया प्रारब्धमेतत् कार्य्यम् अपरित्याज्यमेव। वसन्ततिलका वृत्तम्।

3. विघ्नभयेन—वि + हन् + क करणे घञर्थे विघ्नः obstacle अन्तरायः। तस्मात् भयम् etc. हेतौ तृया।

4. विरमन्ति—The परस्मै पद is due to "व्याङ् परिभ्यो रमः"।

5. त्वमिव उद्वहन्ति—उद् + वह + लट् अन्ति carry to completion, Telang reads न परित्यजन्ति (= do not abandon), but also notices त्वमिवोद्वहन्ति। Our reading is got from the Dasarupa. Both readings suit the context.

34. अपि च—

किं शेषस्य भरव्यथा न वपुषि क्षमां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः।
किन्त्वेतत्तु कृतमुत्सृजन् कृपणवच्छ्लाघ्यो जनो लभ्यते
निर्व्यूढं प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम्॥ १८॥

Moreover—Is there no pain of burden in the body of Sesha that he does not throw down the earth ? Or, is there no fatigue for the Sun that he does not stand motionless ? But (the fact is) a worthy man blushes by throwing up like a pluckless person what is once undertaken. Achievement in matters taken up is the family-vow of the worthy.

अन्वयः ॥ शेषस्य वपुषि किं भरव्यथा न, यदेष क्ष्मां न क्षिपति ? किं वा दिनपतेः परिश्रमो नास्ति यत् निश्चलो न आस्ते ? किन्तु श्लाघ्यो जनः अङ्गीकृतं कृपणवत् उत्सृजन् लज्जते । प्रतिपन्नवस्तुषु निर्व्यूढम् एतद्धि सतां गोत्रव्रतम् । व्याख्या—'शेषस्य' नागराजस्य वासुकेः 'वपुषि' देहे 'किं भरव्यथा' पृथ्वीभारवहनपीड़ा 'न' न भवति 'यत्' यस्मात् 'एषः' शेषः 'क्ष्मां' पृथ्वीं 'न क्षिपति' शिरसो नावतारयति ? अस्ति एव भरव्यथा इत्याशयः । 'किं वा दिनपतेः' सूर्यस्य अविरतगमनात् 'परिश्रमो न' न भवति 'यत्' एषः 'निश्चलः' अचलः त्यक्तागमनः सन् 'न आस्ते' एकतो न तिष्ठति ? अस्त्येव परिश्रम इत्यर्थः । 'किन्तु' वस्तुतस्तु 'श्लाघ्यो जनः' शेष इव सूर्य इव वा स्तुत्यो महापुरुषः 'अङ्गीकृतं' स्वीकृतं कर्म 'कृपणवत्' कापुरुष इव 'उत्सृजन्' परित्यजन् 'लज्जते' जिह्रेति । 'प्रतिपन्नेषु' अङ्गीकृतेषु 'वस्तुषु' विषयेषु 'निर्व्यूढं' निर्वाहः [भावे क्तः] 'एतद्धि' एतदेव 'सतां' साधूनां 'गोत्रव्रतम्' कुलधर्मः । सन्तः प्रारब्धं समापयन्ति एव इत्यर्थः । तत् यततां भवान् मा भूत्ते विघ्ननिर्वेदः ।

CHARCHA

1. शेषस्य—Sesha is the king of snakes in पाताल on whose head the earth rests.

2. परिश्रमो दिनपतेः etc.—Here actual motion is attributed to the Sun, though we now know that the Sun only *appears* to move. The Earth's diurnal rotation is the cause of the *appearent* daily motion of the Sun. The line refers to this motion.

3. उत्सृजन्—उद् + सृज + शतृ हेतौ by लक्षणहेत्वोः "क्रियायाः" । उत्सर्ग is the हेतु of लज्जा ।

4. श्लाघ्य—श्लाघ + ण्यत् कर्मणि one to be proud of. *i. e.*, a worthy person.

5. निर्व्यूढम्—निर् + वि + वह + क्त भावे completion. निर्वाहः is a better reading. It is nom. to भवति understood—गीवव्रतम् being विधेयविशेषण of निर्व्यूढम्।

35. **राक्षसः—सखे प्रारब्धमपरित्याज्यम् इति प्रत्यक्षमेव एतत् भवताम्। ततस्ततः ?**

Raksahas—Friend, that "what is undertaken is not to be abandoned" is indeed before your eyes. Next, what next.

विराध—ततः प्रभृति चन्द्रगुप्तशरीरे सहस्रगुणम् अप्रमत्त-श्चाणक्यः 'एभ्यः एतद् ईदृशं भवति' इति अन्विष्य निगृहीत-वान् पुरवासिनो युष्मदीयान् आप्तपुरुषान्।

Viradha—Cursed Chanakya, a thousand-fold more vigilant regarding the person of Chandragupta since then, has punished your trusted agents residing in the city, ferreting them out, thinking that such things are happening through them alone.

राक्षसः—(सोद्वेगम्) कथय कथय के के निगृहीताः।

Rakshasa—(*With concern*) Tell me, Oh tell me, who are punished.

विराध—प्रथमं तावत् क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वासितः।

Viradha—First of all the mendicant Jivasiddhi was expelled from the city with indignities.

राक्षसः—(स्वगतम्) एतावत् सहगम्। न निष्परिग्रहं स्थानभ्रंशः पीडयिष्यति। (प्रकाशम्) वयस्य, कमपराधमुद्दिश्य निर्वासितः ?

Rakshasa—(*To himself*) This much is bearable. Expulsion from residence will not pain one who owns nothing. (*Aloud*) Friend, with reference to what offence is he banished.

विराधः—"एष राक्षसप्रयुक्तया विषकन्यया पर्वतेश्वरं व्यापादितवान्" इति ।

Viradha—That he killed Parvatesvara with the poison-girl employed by Rakshasa.

राक्षसः—(स्वगतम्) साधु कौटिल्य साधु !

परितृप्तमयशः पातितमस्मासु च घातितोऽर्धराज्यहरः ।

एकमपि नीतिबीजं बहुफलतामेति यस्य तव ॥ १८ ॥

Rakshasa—(*To himself*) Bravo ! you Kautilya, Bravo !—You of whom even a single germ of Polity attains the capacity to bear many fruits—the sharer of half the kingdom despatched, the infamy dodged and cast upon me too.

CHARCHA

1. प्रत्यक्षम्—अक्ष is इन्द्रिय । अक्षाणि प्रतिगतं प्रत्यक्षम् perceived by the senses, प्रादि तत्—। Or, taking अक्षि as the word, प्रतिमुखत्वमक्ष्णाम् इति प्रत्यक्षि + अच् प्रत्यक्षम् (अव्ययीभाव) by "प्रतिपरसमनुभ्योऽक्ष्णः" ।

2. सहस्रगुणम्—सहस्रं गुणाः यस्मिन् कर्मणि तत् यथा तथा । सहस्र is not necessarily exactly a thousand here.

3. एभ्यः etc.—'एभ्यः' जनेभ्यः 'एतत् ईदृशं' एवम्प्रकारं कर्म राजद्रोह इत्यर्थः 'भवति इति' मत्वा 'पुरवासिनो युष्मदीयान् आप्तपुरुषान्' विश्वस्तजनान् 'अन्विष्य निगृह्णीतवान् दण्डितवान् ।

4. युष्मदीयान्—युष्माकम् इमे इति युष्मद् + छ । तव इमे gives त्वदीयाः ।

5. निष्परिग्रहम्—परिगृह्यते इति परि + ग्रह + अप् कर्मणि परिग्रहः belongings. निरस्तः परिग्रहः अनेन etc., one having nothing. बहु—। "बहुदृढपथस्य—" इति बत्वम् ।

6. अन्वयः ॥ अर्धराज्यहरः घातितः, अयशः परितृप्तम्, अस्मासु पातितञ्च ! साधु कौटिल्य साधु ! यस्य तव एकमपि नीतिबीजं बहुफलतामेति । व्याख्या—'अर्ध

राज्य" यः 'हरति' तादृशः पर्वतेश्वरः 'घातितः' व्यापादितः। तस्य फलं राज्यार्द्धरक्षा। ततश्च तेन जातं विश्रब्धघाती इति 'अयशः' निन्दा कलङ्कः जीवसिद्धेर्निगृहीत 'परिहृतं' व्यंसितम् अपाकृतम्। अस्य फलम् आत्मशुद्धिः। ततः पुनः तत् अयशः 'अस्मासु' मयि 'पातितम्' आरोपितम्। फलमस्य शत्रोर्जनानुरागविलोपः। तत् 'साधु' भोः 'कौटिल्य साधु यस्य तव एकमपि नीतिरूपं बीजं' चन्द्रगुप्तात् विषकन्याम् शनम् इत्यर्थः 'बहूनि फलानि' यस्य तथाविधत्वम् 'एति' गच्छति लभते। एकेन प्रयोगेण त्वया बीणि फलानि साधितानि, वयन्तु बहूनि अपि प्रयुज्य चन्द्रगुप्तवधरूपम् एकमपि न साधयामः। तत् श्राघ्योऽसि त्वं कृताश्च वयम् इति निर्वेदः।

7. *Remark*—ढुण्डि reads स्वस्मिन् परिहृतम् etc., which spoils the metre.

8. अर्द्धराज्यहरः—As already remarked पतञ्जलि rejects the एक दिग्प्रकरण of पाणिनि। So अर्द्धं च तत् राज्यञ्चेति अर्द्धराज्यम् half the kingdom. हरतीति हरः etc. अर्द्धराज्यस्य हरः। Cf. "राज्यार्द्धहृत्", Sl. 16. *ante.*, where after पतञ्जलि we have a इतत्—with अर्द्ध meaning exactly a half.

9. बहुफलताम्—The बहुत्व is established by enumerating *three* results—(१) अर्द्धराज्यहरः घातितः, (२) अयशः परिहृतम्, (३) अयशः अस्मासु पातितम्। These results are in logical order of sequence (see व्याख्या)।

10. यस्य तव—The Grammatical difficulty, viz., यस्य is not connected, is avoided in our construction (see अन्वय)।

36. (प्रकाशम्) ततस्ततः।

(*Aloud*) Next, what next.

विराध—ततः चन्द्रगुप्तशरीरमभिद्रोग्धुम् अनेन व्यापारिता दारुवर्मादयः इति नगरे प्रख्याप्य शकटदासः शूलमारोपितः।

Viradha—Next, Sakatadasa was put to the stake (by Chanakya) proclaiming in the city that Daruvarman and others had been employed by him to injure the person of Chandragupta.

अयमीदृशो मृत्युः। अथवा स्वाम्यर्थमुपरतो न शोच्यस्त्वम्, वयमेवात्र शोच्या ये नन्दकुलविनाशेऽपि जीवितुमिच्छामः।

Rakshasa—(*With tears*) Alas! friend Sakatadasa, such a death is extremely unfit for you. Or, dead in master's cause, you are not to be pitied. We, who long to live even at the extinction of the Nanda family are alone to be pitied.

विराध—अमात्य, स्वाम्यर्थ एव साधयितव्य इति प्रयतसे।

Viradha—Minister, you are exerting solely because master's cause has to be served.

राक्षसः—सखे—

अस्माभिरमुमेवार्थमालम्ब्य न जिजीविषाम्।
परलोकगतो देवः कृतघ्नैर्नानुगम्यते ॥ २० ॥

Rakshasa—Friend—Sire, gone to the other world, is not being followed by us, ungrateful as we are, clinging not to a desire to live, but to this very object.

CHARCHA

1. मूलमारोपितः—Viradhagupta is not aware of the sham rescue of Sakatadasa. He had left Kusumapura then. Hence he knew not also of the pretended defection of Bhagurayana and others. Consequently दुष्टि's remark, as noted in Para 9, is out of place.

2. अयुक्तरूपः—अतिशयेन अयुक्तः इति अयुक्त + रूपप् प्रशंसायाम्। प्रशंसा in such cases implies excess, cf. "अनुकारिणि पूर्वेषां पुत्ररूपमिदं तव"—Sak. Act. II.

3. शोच्यः—अवश्यम् शोचनीय इति शुच + ण्यत् कर्मणि।

4. स्वाम्यर्थ एव etc.—Construe स्वाम्यर्थः साधयितव्य इति एव प्रयतसे। That is say, otherwise you would have renounced life and

followed master long before this. Cf. नेदं विप्रियभक्तिना—" etc. Sl. 5, *ante*.

5. अन्वयः॥ असुमेव अर्थं न जिजीविषाम् आलम्ब्य कृतघ्नैः अस्माभिः परलोकगतो देवो न अनुगम्यते। व्याख्या—'असुमेव' भवदुक्तं स्वाम्यर्थसाधनरूपमेव 'अर्थं' प्रयोजनं 'न जिजीविषाम्' जीवनेच्छाम् 'आलम्ब्य' आश्रित्य पुरस्कृत्य इत्यर्थः 'कृतघ्नैः' अकृतज्ञैः 'अस्माभिः परलोकं' लोकान्तरं 'गतः देवः' स्वामी नन्दः 'न अनुगम्यते' न अनुस्रियते। जीवित्वा स्वाम्यर्थं साधयेयम् इत्येव जीवामः न तु जीवितं प्रियमिति।

6. जिजीविषाम्—जीवितुमिच्छा इति जीव+सन्+अ भावे जिजीविषा love of life, etc. ताम्। Obj. of आलम्ब्य।

7. कृतघ्नैः—कृ+क्त कर्मणि कृतम् service rendered, *i. e.* benefits received· तत् हन्ति विस्मरणेन इति कृत+हन+क कर्तरि (मूलविभुजादि) कृतघ्ना traitors, etc.

37. कथ्यताम् अपरस्यापि सुहृद्व्यसनस्य श्रवणे सज्जोऽस्मि।

Speak, I am prepared to listen to other disasters also to friends.

विराध—एतदुपलभ्य चन्दनदासेन अपवाहितममात्यकलत्रम्।

Viradha—Hearing of this, Minister's wife was sent away by Chandanadasa.

राक्षसः—क्रूरस्य चाणक्यवटोः विरुद्धम् अयुक्तमनुष्ठितं तेन।

Rakshasa—What is done by him is improper, being adverse to the cruel brat Chanakya.

विराध—अमात्य, ननु अयुक्ततरः सुहृद्द्रोहः।

Viradha—But Minister, injury to a friend is still more improper.

राक्षसः—ततस्ततः?

Rakshasa—Next, what next,

विराध—ततो याच्यमानेन अनेन न समर्पितम् अमात्य-कलत्रं यदा, तदा अतिकुपितेन चाणक्यवटुना—

Viradha—Next, when he did not give up Minister's wife even on being requested, then by the enraged brat Chanakya, he was—

राक्षसः—(सोद्वेगम्) न खलु व्यापादितः !

Rakshasa—(*In alarm*) Not surely killed !

विराध—न हि ।—गृहीतगृहसारः सपुत्रकलत्रो बन्धनागारे निक्षिप्तः ।

Viradha—Indeed not—cast into prison with son and wife and with all valuables in the house seized.

राक्षसः—तत् किं परितुष्टः कथयसि "अपवाहितं राक्षस-कलत्रम्" इति ? ननु वक्तव्यं "संयमितः सपुत्रकलत्रो राक्षसः" इति ।

Rakshasa—Then why do you say with satisfaction that Rakshasa's wife was sent away ? Really you should say Rakshasa is restrained with wife and children.

(प्रविश्य) पुरुषः—जेदु अमच्चो एसो खु सअडदासो पडिहारभूमिमुवट्ठिदो [जयतु अमात्यः । एष खलु शकटदासः प्रतिहारभूमिमुपस्थितः] ।

Servant—(*Entering*) Let Minister prosper. Here is Sakatadasa come at the site of the gate.

राक्षसः—भद्र, अपि सत्यम् ?

Rakshasa—Is that true, my good man ?

पुरुषः—किं अलिअं अमच्चपादेसु विण्णिवेदेमि [किमलीकम् अमात्यपादेषु विनिवेदयामि]।

Servant—Should I report an untruth unto revered Minister?

राक्षसः—सखे विराधगुप्त, कथमेतत्?

Rakshasa—Friend Viradhagupta, how is this?

विराध—अमात्य, स्यादेतदेवं, यतो भव्यं रक्षति भवितव्यता।

Viradha—Minister, it might be so, for Fate guards the blessed.

CHARCHA

1. एतदुपलभ्य—एतत् refers to not शूलारोपणम्, but शूलारोपणार्थं ग्रहणम्। Sakatadasa was led to execution when Chandanadasa was parleying with Chanakya (See Act I, *ante*).

2. अपवाहितम्—अप + वह + णिच् + क्त कर्मणि removed.

3. सुहृदद्रोहः—शोभनं हृदयमस्य सुहृत friend, by "सुहृद्दुर्हृदौ मित्रामित्रयोः"। सुहृदय is also available, but means 'one with a good heart'. तस्मै द्रोहः, सुप् सुपा। Of course not a wilful द्रोह, but द्रोह in effect by handing over his wife to be punished.

4. गृहीत etc.—गृहस्य सारः श्रेष्ठवस्तु गृहसारम्। गृहीतं गृहसारमस्य etc.

5. बन्धनागारे—बन्ध + ल्युट् अधिकरणे। बन्धनञ्च तदगारञ्च etc.

6. ननु वक्तव्यम् etc.—I make no distinction between Chandanadasa and myself. If he is restrained, I am restrained too. So it is useless sending away my family for safety.

7. शकटदासः—Priyamvadaka was an old servant that knew Sakatadasa very well; hence he speaks of him by name.

8. प्रतीहारभूमिम्—प्रतिक्रियते अस्मिन् इति + हृ + घञ् अधिकरणे प्रतिहारः or प्रतीहारः gate। तस्य भूमिः स्थलम् etc.

9. स्यात्—सम्भावनायां लिङ्।

10. भव्यम्—भवति इति भू+यत् कर्त्तरि by निपातन in the rule "भव्यगेय—"। भव्य=auspicious, blessed. cf. "भव्यं यत् विपुरेश्वनं वपुः—" and "भव्यीमुक्तवृत्तिष्ठते जनः"—Kirat.

11. भवितव्यता—भू+तव्यत् कर्त्तरि बाहुलकात् inevitable भवितव्यम् Desting. तस्यभावः।

38. राक्षसः—प्रियंवदक, किमद्यापि चिरयसि? क्षिप्रं प्रवेशयैनम्।

Rakshasa—Priamvadaka, why tarry even now? Show him in quick.

पुरुषः—तथा (इति निष्क्रान्तः)।

Servant—So be it (*exit*).

(ततः प्रविशति सिद्धार्थकेन अनुगम्यमानः शकटदासः।)

(*Now enter Sakatadasa followed by Siddharthaka*).

शकटदासः—(स्वगतम्)

दृष्ट्वा मौर्य्यमिव प्रतिष्ठितपदं शूलं धरित्र्यास्तले
तल्लक्ष्मीमिव चेतनाप्रमथनीं मूर्द्ध्नि बध्य स्रजम्।
श्रुत्वा स्वाम्युपरोधरौद्रविषमानाघाततूर्यस्वनान्
न ध्वस्तं प्रथमाभिघातकठिनं मन्ये मदीयं मनः॥ २१॥

Sakatadasa—(*To himself*) Methinks my mind, hardened by the previous blows, was not unnerved on seeing the stake like Maurya with its foot firmly planted on the surface of the Earth, suspending from the head the garland that takes away sense like the Fortune of the same (Maurya), and hearing the beating of the drums of execution grim and discordant like the news of Master's death.

अन्वयः॥ मन्ये प्रथमाभिघातकठिनं मदीयं मनः मौर्य्यमिव धरित्र्यास्तले प्रतिष्ठितपदं मूलं दृष्ट्वा, तच्चक्रीमिव चेतनाप्रमथिनीं स्रजं मूर्ध्ना अवबध्य, स्वाम्युपरोधरौद्रविषमान् आघाततूर्य्यस्वनान् श्रुत्वा, न ध्वस्तम्। व्याख्या—'मन्ये' अहं 'प्रथमाः' पूर्वप्राप्ताः ये 'अभिघाताः' प्रहाराः अभिषङ्गाः प्रभुनाशरिपुप्रतिष्ठादयः इत्यर्थः तैः 'कठिनं' घनं 'मदीयं मनः मौर्य्यमिव धरित्र्याः' धरायाः 'तले' पृष्ठे 'प्रतिष्ठितपदं' बद्धमूलं 'मूलं दृष्ट्वा'। 'तस्य' मौर्य्यस्य 'चक्रीमिव' श्रियमिव 'चेतनायाः' संज्ञायाः 'प्रमथनीं' [प्रमथिनीमिति लिपिकरप्रमादः] विलोपिनीं 'स्रजं' वधमालां 'मूर्ध्ना' शिरसा 'अवबध्य' लम्बयित्वा शिरसि वधमालिकां धारयित्वा इत्यर्थः। 'स्वामिनः' प्रभोः नन्दस्य यः 'उपरोधः' हिंसा 'तत्तुल्यं' रौद्रान् घोरान् 'विषमान्' कर्कशानपि 'आघातस्य' सम्यग्विनाशस्य ये 'तूर्य्यस्वनाः' पटहध्वनयः तान् 'श्रुत्वा न ध्वस्तं' न उपहतम्। लोहं यथा मुद्गरादिभिरभिहतं दृढं भवति तथा मनो मे स्वामिनाशादिभिः पूर्वप्राप्तैः अभिघातैः घनं मूल्वा घोरमपि वधशूलं दृष्ट्वा न विव्यथे इत्यर्थः।

CHARCHA

1. चिरयसि—चिर is a long time. Hence *delay*. चिरं करोषि इति चिर + णिच् (नाम धातु) + लट् सिप्। Also cf. "चिरायते खलु आवृत्तः" —Sak Act VI.

2. प्रतिष्ठित etc.—पद is चरण (मूल) also अधिकार (मौर्य्य)। See व्याख्या। This applies both to Maurya and मूल।

3. तले—स्थले is Telang's reading, meaning the same. मौर्य्य is my eye-sore, yet I see him every day and stand unmoved. So the stake had no terrors for me.

4. चेतना etc.—प्रमथ्यते अनया इति प्र + मथ + ल्युट् करणे प्रमथनी। चेतनायाः प्रमथनी इतत्। प्रमथिनी is a copyist's slip. प्रमथितुं शीलमस्याः इति प्र + मथ + घिनुण् कर्त्तरि प्रमाथिनी is correct, but it does not preserve the metre. My head reels, I lose my senses at the sight of Maurya's fortune. I have to stand it daily, so I stood unmoved wearing the wreath of death.

5. स्वनम्—The victim has to be garlanded before execu-

tion. Cf.—"बद्धसगावध्यताम् Act. VII, Sl. 4. ढ्ढि reads मूर्द्धावबद्ध-खजम्—मूर्द्धि अवबद्धा या खक् ताम्। The sense has to be completed by adding दृष्टा। Hence we prefer our own reading.

6. खाम्युपरोध etc.—उप + रुध + घञ् भावे उपरोधः lit. *obstruction*, siege etc. Here *molestation* हिंसा, *i. e.*, death. विभिन्नाः समेभ्यः विषमाः uneven, discordant. "सुविनिर्दुर्भ्यः सुपिसुतिसमाः" इति षत्वम्। रौद्र to the *sight*, and विषम to the *hearing*, ढ्ढि reads खाम्यपरोप where अपरोप means राज्यभ्रंश। रौद्राश्च ते विषमाश्च, कर्मधा—। खाम्युपरोधेन रौद्रविषमाः etc.

7. आघात etc.—आ सन्यक् हननम् इति आ + हन् + घञ् भावे आघातः। तस्य तूर्य्यः। तेषां खनाः। Obj. of श्रुत्वा।

8 ध्वस्तम्—ध्वंस + क्त कर्त्तरि ध्वस्त perished. The nom. is मनः। But मनस् does not see or tie or hear, how then दृष्टा ध्वस्तम्, अवबध्य ध्वस्तम्, श्रुत्वा ध्वस्तम्? The answer is, seeing etc. are attributed to मनस्। कर्मेन्द्रिय is subservient to मनस्, hence as ढ्ढि *remarks* "दर्शन-श्रवणबन्धनक्रियाणां मन एव कर्त्तृ, अतो ध्वंसनक्रियया एककर्त्तृकत्वात् क्त्राप्रत्ययः"।

9A. प्रथमाभिघात &c.—The previous blows are—मौर्य्यप्रतिष्ठा, मौर्य्यलक्ष्मीस्थिरता, खामिनाश।

9. मन्ये—ढ्ढि reads यत्तत्। Construe—यत् न ध्वस्तं तत् प्रथमाभि-घातकठिनम्—as it was not shattered, so it must have been hardened by previous blows.

39. **(उपसृत्य अवलोक्य च सहर्षम्) अयममात्यराक्षस-स्तिष्ठति य एषः—**

अक्षीणभक्तिः क्षीणेऽपि नन्दे खाम्यर्थमुद्वहन्।
पृथिव्यां खामिभक्तानां प्रमाणे परमे स्थितः॥ २२॥

(उपसृत्य) जयत्वमात्यः।

(*Advancing and noticing with joy*) Here is Minister Rakshasa who, even at the demise of Nanda, upholding the Master's cause with unabated devotion, stands in the world at the supreme measure of those who are devoted to their masters. (*Approaching*) Let Minister prosper.

राक्षसः (विलोक्य सहर्षम्)—सखे शकटदास, दिष्ट्या कौटिल्यगोचरगतोऽपि त्वं दृष्टोऽसि। तत् परिष्वजस्व नाम। (शकटदासस्तथा करोति)।

Rakshasa—(*Noting with joy*) Friend Sakatadasa, luckily you are seen again, though you fell into the clutches of Kautilya ; so embrace me. (*Sakatadasa does as bid*).

राक्षसः—(चिरं परिष्वज्य) इदमासनमास्यताम्। (शकटदासः नाट्येन उपविष्टः)। सखे शकटदास अथ कोऽयं मे ईदृशस्य हृदयानन्दस्य हेतुः ?

Rakshasa—(*Embracing long*) Here is a seat ; sit down. (*Sakatadasa acts sitting*), Well, friend Sakatadasa, who is the author of such delight to my heart ?

शकटदासः—(सिद्धार्थकं निर्दिश्य) अनेन प्रियसुहृदा सिद्धार्थकेन घातकान् विद्राव्य वध्यस्थानात् अपहृतोऽस्मि।

Sakatadasa—(*Pointing to Siddharthaka*) I have been led away from the place of execution by this dear friend Siddharthaka who put the executioners to flight.

राक्षसः—(सहर्षम्) भद्र सिद्धार्थक किं पर्याप्तमिदम् अस्य प्रियस्य। तथापि गृह्यताम्। (स्वगात्रादवतार्य्य भूषणानि प्रयच्छति)।

Rakshasa—(*With joy*) Good Siddharthaka, is this enough for such pleasure ? Still be it accepted (*offers jewellery taking them off from his own person*).

अन्वयः॥ य एष नन्दे चौर्येऽपि अचीकथत्तिः स्वाम्यर्थम् उद्वहन् पृथिव्यां स्वामिभक्तानां परमे प्रमाणे स्थितः। व्याख्या—'य एष नन्दे चौर्ये अपि' नृते अपि स्वयम्

'अक्षीणम्' अपरिहीनं 'भक्तिः' यस्य तादृशः सन् 'स्वामिनी' नन्दस्य 'अर्थं' कार्यम् 'उद्वहन्' धारयन् 'पृथिव्यां' जगति 'स्वामिनि' प्रभौ ये 'भक्ताः' अनुरक्ताः तेषां 'परमे' सर्वाधिके 'प्रमाणे' मात्रायां 'स्थितः' वर्त्तमानो दृश्यते। आत्मदृष्टान्तेन इयं हि स्वामिभक्तेः परमा मात्रा इत्युपदिशति इव इत्यर्थः।

CHARCHA

1 अक्षीण etc.—क्षि + क्त कर्त्तरि क्षीणः diminished (see next). न क्षीणम् अक्षीणम्। सामान्ये नपुंसकम्। तादृशं भक्तिरस्य (see *ante*).

3. क्षीणे—क्षि + क्त कर्त्तरि क्षीणः or क्षितः dead etc. Here दैन्य (pity) is implied, hence क्षि becomes क्षी optionally by "वा क्रोशदैन्ययोः"। With क्षी the त of क्त becomes न by "क्षियो दीर्घात्"। In note **1**, we have स्वरूप कथन only ; hence, no आक्रोश or दैन्य being implied, क्षी is compulsory by "निष्ठायामण्यदर्थे" ; hence न is compulsory.

3. प्रमाणे etc.—प्रमीयते अनेन इति प्र + मा + ल्युट् करणे प्रमाणम् measure. परम highest. Rakshasa was स्वामिभक्त in the highest possible measure.

5 कौटिल्य etc.—Cf. "धरणीगोचर" Act I, Para 6.

5. परिष्वजस्व—परि + स्वञ्ज + लोट् स्व do you embrace. "उपसर्गात् सुनोति—"इति षत्वम्।

6. कीदृशं मे etc.—हेतु is कर्त्तृ agent. To whom do I owe this pleasure of seeing you back ?

7. घातकान्—घ्नन्ति इति हन + ण्वुल् कर्त्तरि घातकाः executioners.

8. विद्राव्य—वि + द्रु + णिच् + ल्यप having chased away.

9. अपहृतः—अप implies दूरत्व। हृ is प्रापणे। अप + हृ + क्त कर्मणि अपहृत led away. Here we have the primary sense ; stealing is a secondary meaning.

10. किं पर्याप्तम् etc.—'इदं भूषणदानम् 'अस्य प्रियस्य' शकटदासविमोचनरूपस्य इष्टस्य 'पर्याप्तं' समुचितं 'किं' नैव समुचितम्। Here पर्याप्त implies औचित्य not प्रभुता। Hence it is not अलमर्थं। Consequently we get षष्ठी instead of सप्तमी। If it be contended that औचित्य does not differ much from प्रभुता, then say "स एषां ग्रामणीः" इति ज्ञापकात् षष्ठीविकल्पः। Cf. "प्रभुर्वं भूपुर्भुवनत्रयस्य यः"—Magha I 46.

40. सिद्धार्थकः—(गृहीत्वा पादयोर्निपत्य स्वगतम्) अयं खु अज्जोवदेसो। होदु, तह करिस्सम्। (प्रकाशम्) अमच्च एत्थ पढमपविट्ठस्स णत्थि कोवि परिचिदो जत्थ एदं अमच्चस्स पसादं णिक्खिविअ निव्वुदो भविस्सम्। ता इच्छामि अहं इमाए मुद्दाए मुद्दिदं अमच्चस्स एव्व भाण्डागारे ठाविदुम्। जदा मे पओअणं तदा गेण्हिस्सम् [अयं खलु आर्य्योपदेशः। भवतु, तथा करिष्यामि। अमात्य अत्र प्रथमप्रविष्टस्य नास्ति कोऽपि परिचितः यत्रेममामात्यस्य प्रसादं निक्षिप्य निर्वृतो भविष्यामि। तस्मात् इच्छामि अहमेतया मुद्रया मुद्रितमामात्यस्यैव भाण्डागारे स्थापयितुम्। यदा मे प्रयोजनं तदा ग्रहीष्यामि]।

Siddharthaka—(*Accepting and falling down at his feet—to himself*) Such are noble master's instructions. Well, I will act accordingly. (*Aloud*) Minister, a new comer here, I have no acquaintance with whom having deposited this gift of minister's I may feel relieved. So I wish to have it placed in Minister's treasury stamped with this seal. I shall take back when I need it.

राक्षसः—भद्र, को दोषः। शकटदास, एवं क्रियताम्।

Rakshasa—Good man, what is the harm. Sakatadasa, be it so arranged.

शकटदासः—यदाज्ञापयत्यमात्यः (मुद्रां विलोक्य जनान्तिकम्) अमात्य भवन्नामाङ्कितेयं मुद्रा।

Sakatadasa—As Minister commands. (*Seeing the seal aside*) Minister, this seal is engraved with your name.

राक्षसः—(विलोक्य आत्मगतम्) सत्यं नगरात् निष्क्रामतो मम हस्तात् ब्राह्मण्या उत्कण्ठाविनोदार्थं गृहीता। तत् कथम् अस्य हस्तम् उपागता ? (प्रकाशम्) भद्र सिद्धार्थक, कुतस्तया इयमधिगता ?

Rakshasa—(*Looking at it—to himself*) In truth, as I was coming out of the town, my wife took it from my hand to soothe her pining. How then could it reach this man's hand ? (*Aloud*) Good Siddharthaka, whence did you get it ?

CHARCHA

1. आर्य्योपदेशः—आर्य्यस्य चाणक्यस्य उपदेशः। The instruction was given in whispers (See Act I, *ante*). He does not give out what the instructions are, but what follows is in accordance with them (See Act V.).

2. प्रसादम्—प्र + सद + घञ् भावे प्रसाद favour. By transference of epithets प्रसादप्रदत्तवस्तु is also प्रसाद।

3. निर्वृत्तः—निर् + वृत + क्त कर्त्तरि happy, relieved. Cf.—"सा तपस्विनी निर्वृत्ता भवतु—Sak. Act IV.

4. एतया मुद्रया मुद्रितम्—This is in accordance with Chanakya's instructions.

5. भाण्डागारे—भाण्ड stores. भाण्डस्य अगारम् etc.

6. जनान्तिकम्—अन्तिक near समीप। जनानाम् अन्तिकम्। तत् यथा तथा। In a manner so that others present may not hear. "उक्तास्यावर्णं कार्य्यात् पार्श्वस्थैः स्याज्जनान्तिकम्"।

7. उत्कण्ठाविनोदार्थम् etc.—उद् + कण्ठ to pine + घ भावे उत्कण्ठा etc. तस्याः विनोदः (allaying) ; तस्मै इदम्, a नित्यतत्—of the ४र्थी तत् class by "अर्थेन नित्यसमासो विशेष्यलिङ्गता च वक्तव्या" Cf. "एकैकक्रमस दिवसे दिवसे मदीयम् etc."—Sak. Act VI.

8. तत् कथमस्य etc.—Rakshasa has just now got from Viradhagupta the report of the search of Chandanadasa's house

by Chanakya's men. Yet it is strange he suspects nothing or seeing the signet-ring in possession of Siddharthaka.

41. **सिद्धार्थकः**—अत्थि कुसुमपुरे मणिआरसेट्ठी चन्दनदासो णाम। तस्स गेहदुआरपरिसरे पडिदा मए आसादिदा [अस्ति कुसुमपुरे मणिकारश्रेष्टी चन्दनदासो नाम। तस्य गृहद्वारपरिसरे पतिता मया आसादिता]।

Siddharthaka—There is a jeweller-banker at Kusumapura, Chandanadasa by name. It was found by me dropped at the precincts of the door of his house.

राक्षसः—युज्यते।

Rakshasa—Quite likely.

सिद्धार्थकः—अमच्च, एत्थ किं जुज्जइ [अमात्य, अत्र किं युज्यते]।

Siddharthaka—Minister, what is likely in it.

राक्षसः—भद्र, यत् महाधनानां गृहे पतितस्य एवंविधस्य उपलब्धिरिति।

Rakshasa—Good man, the coming by of such a thing dropped at the door of the excessively rich.

शकटदासः—सखे सिद्धार्थक, अमात्यनामाङ्कितेयं मुद्रा। तत् द्रुतो बहुतरेण अर्थेन भवन्तम् अमात्यस्तोषयिष्यति, दीयतामेषा।

Sakatadasa—Friend Siddharthaka, this seal is stamped with Minister's name ; so let this be given up, Minister will satisfy you with money much exceeding (the price of) it.

सिद्धार्थकः—अज्ज, णं प्रसादो एसो जं इमाए मुद्दाए

अमच्चो परिग्गहं करेदि [आर्य्य ननु प्रसाद एष यत् अस्या मुद्राया अमात्यः परिग्रहं करोति । (इति मुद्रामर्पयति) ।

Siddharthaka—Well Noble Sir, it is a favour that Minister accepts this seal. (*Delivers the Seal*).

CHARCHA

1. गृहद्वार etc.—परिसरन्ति गच्छन्ति अस्मिन् अनेन वा इति परि + सृ + घ कर्मणि अधिकरणे वा परिसरः out-skirt प्रान्तभूमिः । गृहद्वारस्य परिसरः ।

2. किं युज्यते—Siddharthaka suspects that Rakshasa has got the news of the raid in Chandanadasa's house and takes him for a spy. By युज्यते Rakshasa means—It is quite likely that his wife dropped it there.

3. महाधनानाम् etc.—महान्ति धनानि एषाम् etc. immensely rich. उप + लभ + क्तिन् भावे उपलब्धिः acquisition. This is no explanation. The ring is stamped with Rakshasa's name, how then could it go to Chandanadasa, be he ever rich ? Does Rakshasa want Siddharthaka to understand that being in difficulties, he had pawned it with Chandanadas ? It could well be taken as a taunt if Rakshasa really suspected Siddharthaka. Rakshasa did not want to say that till Siddharthaka knew the facts.

4. इतः—अस्मात् अङ्गुरीयकात् । "पञ्चमी विभक्ते" इति ५मी ।

42. **राक्षसः—सखे शकटदास, अनयैव मुद्रया स्वाधिकारे व्यवहर्त्तव्यं भवता ।**

Rakshasa—Friend Sakatadasa, with this very seal, business will have to be conducted by you in your own office.

शकटदासः—यदाज्ञापयत्यमात्यः ।

Sakatadasa—As Minister commands.

सिद्धार्थकः—अमच्च, विण्णवेमि [अमात्य, विज्ञापयामि] ।

Siddharthaka—Minister, may I speak (*i. e.* make a request) ?

राक्षसः—ब्रूहि विश्रब्धम् ।

Rakshasa—Speak unreservedly.

सिद्धार्थकः—जाणादि एव्व अमच्चो जह चाणक्कवड्ढइअस्स विप्पिअं कदुअ णत्थि पुणो पाडलिउत्ते पवेसो । त्ति इच्छामि अहं अमच्चचलणे एव सुस्सूसिदुम् [जानात्येव अमात्यः यथा चाणक्यवटूकस्य विप्रियं कृत्वा नास्ति पुनः पाटलिपुत्रे प्रवेशः । इति इच्छामि अहम् अमात्यस्य चरणे एव शुश्रूषितुम्] ।

Siddharthaka—Minister indeed knows that serving an unpleasant turn to the brat Chanakya, one has no entrance into Pataliputra again ; so I wish to serve at Minister's feet.

राक्षसः—भद्र प्रियं नः । किन्तु त्वदभिप्रायापरिज्ञानान्नरितः अयमस्मदनुनयः । तदेवं क्रियताम् ।

Rakshasa—Good man, this is a pleasure to us. But this is *our* request suppressed through ignorance of your wishes. So do so.

सिद्धार्थकः—(सहर्षम्) अनुगिहीदोम्हि [अनुगृहीतोऽस्मि] ।

Siddharthaka—(*With joy*) I am favoured.

राक्षसः—शकटदास, विश्रामय सिद्धार्थकम् ।

Rakshasa—Sakatadasa, let Siddharthaka rest.

शकटदासः—तथा (इति सिद्धार्थकेन सह निष्क्रान्तः) ।

Sakatadasa—Be it so (*departs with Siddharthaka*).

CHAROHA

1. स्वाधिकारे etc.—अधिक्रियते अस्मिन् इति अधि + कृ + घञ्, अधिकरण अधिकारः office. The office is that of general manager to Rakshasa. This appears from "शकटदास, एवं क्रियताम्" in para 40 which as-

sumes free access of Sakatadasa to Rakshasa's treasury. वि+अव+हृ+तव्य मावे व्यवहर्त्तव्य। व्यवहृ is here to transact business. This will work Rakshasa's ruin as will be seen in Act V.

2. चाणक्यबटुकस्य—See चाणक्यबटोः *ante.*

3. विप्रियम्—विभिन्नं प्रियेभ्यः or विरुद्धं प्रियैः विप्रियम् unpleasant etc.

4. कृत्वा नास्ति etc.—कृत्वा स्थितस्य जनस्य प्रवेशो नास्ति। Without स्थितस्य we shall have different nominative to कृत्वा and अस्ति which is irregular by the rule "समानकर्त्तृकयोः पूर्वकाले"।

5. पाटलिपुत्रे—Pataliputra was the old name of Kusumapura.

6. किन्तु त्वदभिप्राय etc.—The entreaty is to be taken as *our* entreaty to you (अस्मदनुनयः)। If you say, I do not ask you, my reply is—'तव' यः 'अभिप्रायः' आशयः तस्य 'अपरिज्ञानात्' अनवगतेः 'अन्तरितः' आवृतः अप्रकटितः अनुनयः—I did not make the request because I was not aware how you intended to dispose yourself in the city. Cf —"तद्बाल्कान्तरितानि सम्प्रति विभो—" Act IV, Sl. 15.

7. विश्रामय—वि+श्रम+णिच्+लोट हि give rest. विश्रमय is expected because श्रम is मित and we have "मिवां ह्रस्वः"। The वृत्तिकार speaks of grammarians who connect वा with this rule from "वा चित्तविरागे" which precedes, and suppose the optionality thus introduced to be restricted to particular cases only (व्यवस्थित-विभाषा)। श्रम is one of those cases, क्रम is another etc. Hence विश्रामय or विश्रमय। See Malli, on "धुर्य्यान् विश्रामयेति सः"—*Raghu*, Canto I. Sl 56.

43. **राक्षसः—सखे विराधगुप्त, वर्णय वृत्तशेषम्। अपि क्षमन्ते अस्मदुपजापं चन्द्रगुप्तप्रकृतयः।**

Rakshasa—Friend Viradhagupta, tell the remainder of the story. Do the officers of Chandragupta tolerate our overtures (lit, whispering) ?

विराध—अमात्य वाढं क्षमन्ते, यथा प्रकाशम् अनुगच्छन्त्येव।

Viradha—Minister, they tolerate undoubtedly ; as is current, they even accept them.

राक्षसः—सखे, किं तत्र प्रकाशम् ।

Rakshasa—Friend, what is current there ?

विराध—अमात्य, इदंतत्र प्रकाशम्—मलयकेतोरपक्रमणात् प्रभृति कुपितश्चन्द्रगुप्तश्चाणक्यस्योपरि इति । चाणक्योऽपि अतिजितकाङ्क्षितया असहमानश्चन्द्रगुप्तं तैस्तैराज्ञाभङ्गैः चन्द्रगुप्तस्य चेतःपीड़ाम् उपचिनोति । इत्थमपि ममानुभवः ।

Viradha—Minister, this is current there. Since the desertion of Malayaketu, Chandragupta has been angry with Chanakya ; Chanakya too, elated by success, intolerant of Chandragupta, by frequent supercession of oders aggravates the mortification of his soul (the wound of his feelings). Such is my impression too.

CHARCHA

1. अपि क्षमन्ते etc.—'अस्माकम् उपजापं' अस्मदुपजापम् इत्यर्थः अस्माकं भेदमन्त्रम् 'अपि क्षमन्ते' सहन्ते किम् ? भेदवचनं गृह्णन्ति उत न गृह्णन्ति ।

2. बाढम् etc.—"बाढम्" अस्यश्यम् उपजापं 'क्षमन्ते' । न केवलं क्षमन्ते 'यथाप्रकाशं' याद्दशं तत्र प्रचारं गतं, ताः प्रकृतयः उपजापम् ताद्दशम् 'अनुगच्छन्ति एव' भेदमेव आद्रियन्ते । यथा and प्रकाशम् are taken as uncompouuded and एव is in the sense of अपि ।

3. किं तत्र—तत्र refers to Kusumapura.

4. अतिजित etc.—See "जितकाशी राजसेवकः"—*ante*. अतिशयेन जितकामौ, प्रादितत् । तस्य भावः । क्तेौ क्तीया ।

5. इत्थमपि etc.—अपि here is misplaced ; it is connected with मम । अनुभूयते इति अनु + भू + अप् कर्मणि अनुभवः impression. He means to say that he can add his own testimony to what is rumoured there.

44. राक्षसः—(सहर्षम्) सखे विराधगुप्त, गच्छत्वम्

अनेनैव आहितुण्डिकवेषेण पुनः कुसुमपुरम्। तत्र मे प्रिय-सुहृद् वैतालिकव्यञ्जनः स्तनकलसो नाम प्रतिवसति। स त्वया मद्वचनात् वाच्यः यथा—"चाणक्येन क्रियामाणेषु आज्ञा भङ्गेषु चन्द्रगुप्तः समुत्तेजनसमर्थैः श्लोकैः उपश्लोकयितव्यः, कार्य्यस्य अतिनिभृतं करभकहस्तेन सन्देष्टव्यम्" इति।

Rakshasa— (*With joy*) Friend Viradhagupta, you go back to Kusumapura in this very guise of a snake-charmer. There my dear friend Stanakalasa lives in the garb of a bard. He has to be told by you this in my words—"whenever supercession of orders is being made by Chanakya, Chandragupta has to be lauded in verses capable of rousing him thoroughly and (the progress of) the work has to be reported very secretly through the hand of Karabhaka.

विराध—यदाज्ञापयत्यमात्यः (इति निष्क्रान्तः)

Viradha.—As Minister commands (*exit*).

(प्रविश्य) पुरुषः—अमच्च, एसोक्खु सअडदासो विस्सवेदि एदे तिण्णि अलंकारसंजोआ विक्कोअन्दि। ता पच्चक्खीकरेटु अमच्चो [अमात्य एष खलु शकटदासो विज्ञापयति एते त्रयः अलङ्कारसंयोगाः विक्रीयन्ते। तत् प्रत्यक्षीकरोतु अमात्यः]

Servant—(*Entering*) Minister, here Sakatadasa reports that these three well-made ornaments are going to be sold (for sale); let Minister inspect.

राक्षसः—(विलोक्य) अहो महार्हाणि आभरणानि! भद्र, उच्यताम् अस्मद्वचनात् शकटदासः परितोष्य विक्रेतारं गच्छन्ताम् इति।

Rakshasa—(*Seeing them*) Ha ! these are ornaments of great value. Good man, let Sakatadasa be informed in my name that these be secured after satisying the seller.

पुरुषः—तथा (इति निष्क्रान्तः)।

Servant—So be it (*exit*).

CHARCHA

1. आहितुण्डिक etc.—See ततः प्रविशति etc. *ante.*

2. वैतालिकव्यञ्जनः—See *ante*, नानाव्यञ्जनाः प्रणिधयः।

3. समुत्तेजन etc.—सम+उद्+तिज+णिच्+ल्युट् भावे समुत्तेजन thoroughly rousing. तव समर्थाः। तैः। Qual. श्लोकैः।

4. उपश्लोकयितव्यः—श्लोकैरुपस्तोतव्य इति उप+श्लोक+णिच् (गामधातु) +तव्य कर्मणि।

5. अलङ्कारसंयोगाः—अलङ्क्रियते एभिः इति अलम्+कृ+घञ् करणे अलङ्काराः। सम्यक् योजनम् इति सम+युज् भावे संयोगः proper setting, correct making. अलङ्काराणां संयोगाः=संयुक्ताः अलङ्काराः well-made ornaments—"भावानयने द्रव्यानयनम्"।

6. महार्घाणि—अर्घ्यते पूज्यते इति अर्घ+घञ् कर्मणि अर्घः worth, price. महान् अर्घः एषाम् of great value. These are Chandragupta's gift to Visvavasu etc. See Act 1, *ante.*

7. दृष्टान्तम्—Rakshasa's nature was unsuspecting ; Chanakya knew this and took full advantage of it. But what is difficult to see is that, intimate as Rakshasa was with Parvataka he did not recognise the jewellery, or that it did not strike him as strange that such precious sets are being hawked about in this manner. For further development, see Act V.

45. राक्षसः—यावदहमपि कुसुमपुराय करभकं प्रेषयामि। (उत्थाय) अपि नाम दुरात्मनश्चाणक्यात् चन्द्रगुप्तो भिद्येत। अथवा सिद्धमेव नः समीहितं पश्यामि। कुतः—

मौर्य्यस्तेजसि सर्वभूतलभुजामाज्ञापको वर्त्तते
चाणक्योऽपि मदाश्रयादयमभूद्राजेति जातस्मयः।
राज्यप्राप्तिकृतार्थमेकमपरं तीर्णप्रतिज्ञार्णवं
सौहार्दात् कृतकृत्यतैव नियतं लब्धान्तरा भेत्स्यति ॥२२॥

(इति निष्क्रान्ताः सर्वे)।

इति द्वितीयोऽङ्कः।

Rakshasa—(*To himself*) I too will send Karabhaka to Kusumapura. (*Rising*) Would Chandragupta be really estranged from the vile-hearted Chanakya ? Or I see our wish already accomplished. (*Do you ask*) Whence ?—Maurya rests on majesty being the commander of all the guardians of the earth ; Chanakya again cherishes the pride—"This man has become king through my protection". The very consciousness of having gained the end will, with a loop-hole found, surely divert from friendship the one that has gained his object on the acquisition of the kingdom, and the other that has crossed the ocean of his vow. (*Exeunt all*).

End of the Second Act,

CHARCHA

1. कुसुमपुराय—कुसुमपुरमभिलक्ष्य। कर्मणि ४थी by "क्रियार्थोपपदस्य—"।

2. भिद्येत—भिद् + लिङ् ईत कर्मणि। सम्भावनायां लिङ्। There is no such rule for लिङ्, but this is ज्ञापित by the भाष्य। Comp.—"ततः प्रभृति चन्द्रगुप्तशरीरे सहस्रगुणम् अप्रमत्तस्याचाणक्य इति श्रुत्वा तद्बोधाय निराशः सन् राक्षसः 'आशा बलवती राजन् श्रेयो जेष्यति पण्डवान्' इति न्यायेन अतःपरं स्वनकलसद्वारा मौर्य्यचाणक्ययोः मिथो विरोधेन स्वेष्टसिद्धिं समाशंसते अपि नाम इति"—*Dhundhi*.

3. समीहितम्—सम् + ईह् + क्त भावे wish, *i. e.*, rupture between चाणक्य and चन्द्रगुप्त। Obj. of पश्यामि।

4. अन्वयः—मौर्य्यः सर्वभूतलभुजां आज्ञापकः (सन्) तेजसि वर्त्तते :

चाणक्योऽपि 'मदाश्रयादयं राजा अभूत्' इति जातमयः। राज्यप्राप्तिकृतार्थम् एकं तीर्णप्रतिज्ञार्णवम् अपरं (च) कृतकृत्यता एव लब्धान्तरा सती नियतं सौहार्दात् भेत्स्यति। व्याख्या—'मौर्य्यः' चन्द्रगुप्तः 'सर्वेषां भूतलभुजां' भूपालानाम् 'आज्ञापकः' प्रशास्ता सन् 'तेजसि वर्त्तते' प्रतापे तिष्ठति आत्मप्रतापं जानाति इत्यर्थः। 'चाणक्योऽपि मदाश्रयात्' ममैव आश्रयेण मामाश्रित्य इत्यर्थः 'अयम्' एषः चन्द्रगुप्तः 'राजा अभूत् इति' एवं मत्वा 'जातः मयी' गर्वो यस्य तादृशः सन्नास्ते। 'राज्यस्य प्राप्त्या' लाभेन 'कृतार्थं' सफलम् 'एकं' मौर्य्यं 'तीर्णः प्रतिज्ञारूपः अर्णवः' सागरो येन तादृशम् अतएव सफलम् 'अपरं' चाणक्यञ्च 'कृतकृत्यता एव' इयं कृतकार्य्यता एव 'लब्धः अन्तरः' अवकाशः यया तादृशी सती कृतकार्य्योऽहम् इति बुद्धिरेव सञ्जाता सती 'नियतं' निश्चितं 'सौहार्दात्' मित्रभावात् 'भेत्स्यति' अपसारयिष्यति। "उभौ कृतकृत्यतया परस्परं निरपेक्षौ सन्तौ केनचित् निमित्तेन विरोधे सति पुनर्न सन्धास्यतो इति भावः" इति ढुण्ढिः।

5. तेजसि वर्त्तते—He is aware of his power because even kings obey him. Hence he will not tolerate disobedience of order even though it be on the part of Chanakya himself.

6. सर्वभूतल etc.—भूतलं भुञ्जन्ति रक्षन्ति इति भूतल + भुज + क्विप् कर्त्तरि the guardians of the world. तेषाम्; कृद्योगे कर्म्मणि षष्ठी। Even such people serve him, hence the sense of power. आ + ज्ञा + णिच् + ण्वुल् कर्त्तरि commander.

7. सौहार्दात्—शोभनं हृदयमस्य इति सुहृत् friend. by "सुहृदुर्हृदौ मित्रामित्रयोः"। सुहृदो भावः इति सुहृत् + अण् by "हृदयस्यान्तयुवादिभ्यः अण्" सुहृत् belong to the युवादि class. Next we have उभयपदवृद्धि by 'हृदयस्य हृल्लेखयदण्लासेषु च" yielding सौहार्द friendship. The युवादि list includes सुहृदय also, and this gives सौहृद—cf. "भावस्थिराणि जननान्तरसौहृदानि"—Sak. Act. V. अपादाने ५मी because भेत्स्यति (भिद् + लृटस्यति) implies motion.

8. लब्धान्तरा—Cf. "लब्धान्तरः सेवया"—*ante.*

तृतीयोऽङ्कः ।

1. (ततः प्रविशति कञ्चुकी)। कञ्चुकी (सनिर्वेदम्)—

रूपादीन् विषयान् निरूप्य करणैर्यैरात्मलाभस्त्वया
लब्धस्तेष्वपि चक्षुरादिषु हृताः स्वार्थावबोधक्रियाः ।
अङ्गानि प्रसभं त्यजन्ति पटुतामाज्ञाविधेयानि ते
न्यस्तं मूर्ध्नि पदं तवैव जरया तृष्णे मुधा ताम्यसि ॥ १ ॥

(*Then enters the Chamberlain*). *Chamberlain* (*With despondency*)—Oh Desire, foot has been placed by Age on your head itself ; you struggle in vain—the limbs that were obedient to your commands are rapidly losing their power : even the function of perceiving their own objects is lost unto the eyes and the other senses with which forms and other objects were discriminated and the manifestation of your own self attained by you.

अन्वयः ॥ हे तृष्णे मुधा ताम्यसि । आज्ञाविधेयानि ते अङ्गानि प्रसभं पटुतां त्यजन्ति । यैः करणैः रूपादीन् विषयान् निरूप्य त्वया आत्मलाभो लब्धः तेषु चक्षुरादिषु अपि स्वार्थावबोधक्रियाः हृताः । जरया तव मूर्ध्नि एव पदं न्यस्तम् । व्याख्या—हे 'तृष्णे' भोगाभिलाष, त्वं 'मुधा ताम्यसि' वृथा परिस्पन्दसे । कुतः इत्याह—'आज्ञाविधेयानि' निर्देशवर्तीनि 'ते अङ्गानि' हस्तपादादीनि कर्मेन्द्रियाणि 'प्रसभं' हठात् द्रुतमित्यर्थः 'पटुतां त्यजन्ति' शक्तिं जहति,तत् कुतो भोगः, मुधा ताम्यसि । ननु ज्ञानेन्द्रियाणि मे भूयोऽपि कर्मेन्द्रियेषु पाटवमाधास्यन्ति इति चेत्, न, 'यैः करणैः' ज्ञानेन्द्रियैः 'रूपादीन्' रूपरसगन्धस्पर्शशब्दान् 'विषयान्' अर्थान् 'निरूप्य' अवधार्य 'त्वया आत्मलाभः' आत्मोत्पत्तिः 'लब्धः' अधिगतः स्वयं समुत्पन्ना असि 'तेषु चक्षुरादिषु अपि

स्वार्थस्य' निजविषयस्य रूपादेः यः 'अवबोधः' ज्ञानं तद्रूपाः 'क्रियाः' व्यापाराः 'हताः' लुप्ताः। ज्ञानेन्द्रियाणि ते ज्ञानं नैव जनयन्ति तत् कुतः कर्मेन्द्रियाणां पाटवाधानं, कुतो वा भोगः, सुधा ताम्यसि। न केवलं ते कर्मकरा नष्टा अचिरात् त्वमपि न भविष्यसि। 'जरया' वार्द्धकेन 'तव मूर्ध्नि एव पदं न्यस्त' तया पाददलिता त्वं स्वयमेव म्रियसे सुधा ताम्यसि। वयःप्रकर्षात् हस्तपादादीनि मे अवशानि दर्शनश्रवणप्रभृतिन्यपि लुप्तानि विषयासक्तिस्त्वं क्षीणा ज्ञाता इति कञ्चुकिनिवेदः।

CHARCHA

N. B.—Scene Chandragupta's Palace at Kusumapura.

1. सनिर्वेदम्—निर् + विद + घञ् भावे निर्वेदः despondency· तेन सह।

2. करणैः—क्रियते एभिः इति कृ + ल्युट करणे करणानि senses. These are the senses of perception (ज्ञानेन्द्रिय)। करणैरिव

3. आत्मलाभः—आत्मनः निजरूपस्य लाभः। Desire arises after the object of desire is perceived, hence the self (आत्मा) of desire is got from the करणs—करणैः आत्मलाभी लब्धः।

4. अङ्गानि—This refers to the कर्मेन्द्रिय।

5. प्रसभम्—प्रगता सभा विचारः अस्मात् प्रसभम् thoughtless, unhesitating etc. ; hence *rapid*. तत् यथा तथा। प्रसभं त्यजन्ति पटुताम् are rapidly losing activity, *i. e.*, failing.

6. आज्ञाविधेयानि—वि + धा + यत् कर्मणि विधेय one who is to be led, *i. e*,, obedient. आज्ञायाः विधेयानि। Cf.—"निद्राविधेयं नरदेवसैन्यम्"।

7. न्यस्त मूर्ध्नि पदम्—A colloqualism for bronght fully under control.

8. जरया—जरसा is an optional form by "जराया जरसन्यतरस्याम्"।

9. सुधा—An अव्यय meaning *uselessly, for nothing.*

2. (परिक्रम्य आकाशे) भो भोः सुगाङ्गप्रासादाधिकृताः पुरुषाः, सुगृहीतनामा देवश्चन्द्रगुप्तो वः समाज्ञापयति—"प्रवृत्त-कौमुदीमहोत्सवरमणीयतरं कुसुमपुरमवलोकयितुमिच्छामि,

तत् संस्क्रियन्ताम् अस्मद्दर्शनयोग्याः सुगाङ्गप्रासादोपरिभूमयः" इति। (पुनराकाशे) किं ब्रूथ—'आर्य, किमविदित एवायं देवस्य कौमुदीमहोत्सवप्रतिषेधः' इति। आः दैवोपहताः किमनेन वः सद्यःप्राणहरेण कथोपोद्घातेन ?

(*Going round the stage—gazing at the sky*) Ho ! Ho ! Ye men employed at the Suganga Palace, Sire Chandragupta of auspicious name commands you thus—"I wish to see Kusumapura still more charming with the Kaumudi-festival commenced. So let the upper floors of the Suganga Palace that are suited for our observation, be decorated." (*Again in the sky*) Do you say this—"Noble Sir, is this prohibition of the Kaumudi festival really unknown to Sire," Ah ! you Fate-stricken (or illfated) fellows, what is gained by you by this reference to a subject that entails instant loss to life.

CHRCHA

1. सुगाङ्ग etc.—सुगाङ्गाख्यः प्रासादः, तत्र अधिकृताः नियुक्ताः। Qual. पुरुषाः।

2. सुगृहीत etc.—Cf. *ante* "सुगृहीतनामः आर्यचाणक्यस्य" Act I.

3. प्रहृत्तः etc.—कु is पृथिवी। कौ पृथिव्यां मोदते इति कु+मुद्+क कर्त्तरि कुमुदम्। तस्य इयम् इति कुमुद+अण् स्त्रियां कौमुदी the full-moon of Aswina and also of Kartika. The वाचस्पत्य quotes—आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि। कौमुदी सा समाख्याता कार्त्या लोकविभूतये॥" for the आश्विनपूर्णिमा, and—"कुशब्देन महौ ज्ञेया मुद हर्षे ततो इयम्। धातुज्ञैर्त्रियमैश्चैव तेन सा कौमुदी स्मृता॥" for the कार्त्तिकपूर्णिमा। Our time is शरत्। Cf.—"अद्यो शरत्समयसम्भृतशोभानां दिशामतिरमणीयता" etc. below. But शरत् includes both आश्विन and कार्त्तिक। Cf. "शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्विषम्। माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादिमे"॥ It is difficult to decide between the two, but the poet's indications are more in favour of कार्तिक than of आश्विन। Thus in Sl. 7 and 8 below he says the rivers dried have up; this may be

said of कार्त्तिक not of आश्विन। Again in Sl. 21 he says Hari is awake. But Hari sleeps the four months of आषाढ़, श्रावण, भाद्र, आश्विन and awakes in शुक्ला एकादशी of कार्त्तिक, *i. e*, late in कार्त्तिक। "शेते विष्णुःसदाषाढ़े भाद्रे च परिवर्त्तते। कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने"।

4. सुगाङ्ग etc.—भूमि floor. उपरिस्थिता: भूमय उपरिभूमय: top-floors ; प्राकपार्थिवादि etc.

5. अविदित एवायं दैवस्य—अविदित has वर्त्तमाने क्त by "मतिबुद्धि"—and दैवस्य takes अनुक्त कर्त्तरि षष्ठी by "क्तस्य च वर्त्तमाने"।

6. दैवोपहता:—उप + हन + क्त कर्मणि उपहत struck. दैवेन उपहता:।

7. सद्य: etc.—प्राणान् हरतीति प्राण + ह + अच कर्त्तरि प्राणहर:। सद्य: प्राणहर: सुप सुपा। तेन।

8. कथीपोद्घातेन—उप + उद् + हन् + घञ् भावे Introduction, reference etc. कथाया: उपोद्घात: etc. तेन। करणे ३या।

3. शीघ्रमिदानीम्—

आलिङ्गन्तु गृहीतधूपसुरभीन् स्तम्भान् पिनद्धस्रज:
सम्पूर्णेन्दुमयूखसंहतिरुचां सच्चामराणां श्रिय:।
सिंहाङ्कासनधारणाच्च सुचिरं सञ्जातमूर्च्छामिव
क्षिप्रं चन्दनवारिणा सकुसुम: सेकोऽनुगृह्णातु गाम् ॥ २ ॥

Now—Let the glow of fine *chowries* having the lustre of enmassed beams of the full-moon quickly embrace the pillars that are scented because fumigated with myrrh and have garlands attached to them ; let sprinkling with sandal water and supply of flowers forthwith soothe the floor that is in a swoon as it were by the long upholding of the seat marked with lions.

अन्वय: ॥ इदानीं सम्पूर्णेन्दुमयूखसंहतिरुचां सच्चामराणां श्रिय: गृहीतधूपसुरभीन् पिनद्धस्रज: स्तम्भान् शीघ्रम् आलिङ्गन्तु, सकुसुम: चन्दनवारिणा सेक: सुचिरं सिंहाङ्कासनधारणात् सञ्जातमूर्च्छामिव गां क्षिप्रम् अनुगृह्णातु च। व्याख्या—'इदानीं'

सम्प्रति 'सम्पूर्ण:' कलासमग्र: य: 'इन्दु:' चन्द्र:' पूर्णचन्द्र इत्यर्थ: तस्य ये 'मयूखा:' किरणा: तेषां या 'संहति:' राशि: तस्या: 'रुक्' कान्तिरिव 'रुक्' येषां ताडङ्कानां 'सञ्चामराणां' चमरीपुच्छरत्नानां श्रेष्ठचमरीपुच्छानाम् इत्यर्थ: 'श्रिय:' भास: 'गृहीता:' सेविता: ये 'धूपा:' तै: 'सुरभीन्' आमोदपूर्णान् अपिच 'पिनद्धा:' बद्धा: लम्बिता इत्यर्थ: स्रज:' मालिका: येषु तान् 'स्तम्भान शीघ्रम् आलिङ्गन्तु' उपस्थिषन्तु। स्तम्भान् धूपैर्वासयत ततस्तेभ्य: पुष्पमालिका: चामराणि च लम्बयत इत्यर्थ:। अतिविलम्बित एष संस्कार: तत् त्वरमाधीयताम्। 'कुसुमै: सह' य: 'चन्दनवारिणा' मलयजजलेन 'सेक:' सेचनं स: 'सुचिर' सिंहाङ्कस्य' सिंहचिह्नितस्य 'आसनस्य' सिंहासनस्य इत्यर्थ: 'धारणात्' वहनात् 'सञ्जाता मूर्च्छा' यस्या: ताडङ्गीम् 'इव गां' 'क्षिप्रं' झटिति 'अनुरुन्धातु' सम्भावयतु समाश्वासयतु। सिंहस्य अङ्करूपे आसने सुचिरं धारिता इयं गौ: भयात् मूर्च्छिता, सलिलसेकादिना समाश्वासयतैनाम् इति च गम्यते। चन्दनवासितेन जलेन भूमे: प्रोक्षणं कृत्वा तदुपरि कुसुमास्तरणं कल्पयत इति विशदार्थ:।

CHARCHA

1. गृहीत etc.—See व्याख्या। Qual. स्तम्भान्। The fumigation with myrrh lends an odour that lasts for a considerable time. Hence the pillars have become सुरभि।

2. पिनद्ध etc.—अपि + नह + क्त कर्मणि अपिनद्ध or पिनद्ध। Cf. "यष्टि-भागुरिरल्लीपमवाप्योरुपसर्गयो:। आपद्यापि हलन्तानां यथा वाचा निशा दिशा" ॥ Also see "अतिपिनद्धेन वल्कलेन" etc.—Sak. Act I.

3. सम्पूर्णेन्दु etc.—See व्याख्या। If the moon is full, the rays are brightest. सम् + हन + क्तिन् भावे संहति: massing together. सम्पूर्णेन्दुमयूखानां संहति: = संहता: सम्पूर्णेन्दुमयूखा: marsed or solidified moon-light—"भावानयने द्रव्यानयनम्"। See व्याख्या। Qual. सञ्चामराणाम्।

4. सिंहाङ्कासन etc.—Here अङ्क is apparently. superfluous. सिंहासन would express the meaning as well. It is however introduced for the sake of the other meaning suggested by the form in गाम् (See next).

5. सञ्जातमूर्च्छां गाम्—गो means भूमि and also cow. "भूमौ पशौ

गोशब्दः" इति हलायुधः। The cow is in a swoon becaune a lion had held her in his lap (अङ्क) ; also the Earth is in a swoon because the heavy throne lay on her for a long time. गाम is obj. of अनुगच्छातु।

4. किं ब्रूथ—"आर्य्य, इदमनुष्ठीयते देवस्य शासनम्" इति ? भद्रास्त्वरध्वम्, अयमागत एव देवश्चन्द्रगुप्तः, य एषः—

सुविश्रब्धैरङ्कैः पथिषु विषमेष्वप्यचलता
चिरं धुर्य्येणोढा गुरुरपि भुवो यास्य गुरुणा।
धुरं तामेवोच्चैनववयसि वोढुं व्यवसितो
मनस्वी दम्यत्वात् स्खलति च न दुखं वहति च ॥ ३॥

Do you say this—'Here, Noble Sir, Sire's command is being obeyed.' Hasten, Good fellows, here Sire Chandragupta has indeed arrived. He it is who—Attempting to bear in young age the very same mighty burden of the Earth which, though heavy, was borne long by his father, the veteran, with well-trusted ministers not swerving even on uneven courses, bears it with difficulty because he is still to be trained, yet does not falter strong-mined as he is.

अन्वयः॥ विषमेषु अपि पथिषु अचलता धुर्य्येण अस्य गुरुणा सुविश्रब्धैः अङ्कैः गुरुः अपि या चिरं ऊढा तामेव उच्चैः भुवो धुरं नववयसि वोढुं व्यवसितः य एष मनस्वी दम्यत्वात् दुःखं वहति च न स्खलति च। व्याख्या—'विषमेषु' गहनेषु नतोन्नतेषु च 'अपि' किं पुनः समेषु 'पथिषु, कार्य्यविधिषु मार्गेषु च 'अचलता' स्थिरेण 'धुर्य्येण' धुरन्धरेण हयभेण च 'अस्य गुरुणा' पित्रा नन्देन 'सुविश्रब्धैः अङ्कैः' 'प्रत्ययितैः सप्तभिः प्रकृतिभिः दृढैर्देहावयवैश्च 'गुरुः' दुर्वहा 'अपि या' सूः 'चिरम् ऊढा' धृता 'तामेव उच्चैः' गुर्वीं 'भुवो धुरं' पृथिव्याः भारं 'नववयसि' तारुण्ये अपरिणते वयसि 'वोढुं' धारयितुं 'व्यवसितः' प्रवृत्तः 'य एष मनस्वी' महामनाः महोत्साह इत्यर्थः चन्द्रगुप्तः 'दम्यत्वात्' असमाप्तशिक्षत्वात् 'दुखं वहति च' क्लेशेन धारयति च 'न स्खलति च' न

भग्नति च। द्वौ चकारौ यौगपद्यं द्योतयतः। बालत्वादयं राज्यरक्षाकर्मणि क्लिश्यते सत्यं किन्तु महोत्साहतया किञ्चिदपि नास्य हीयते इति भावः। शिखरिणीवृत्तम्।

CHARCHA

1. सुविश्रब्धैः—वि + श्रम्भ or स्रम्भ + क्त कर्त्तरि विश्रब्धः or विस्रब्धः confiding; hence trustworthy (अङ्ग being प्रकृति); also strong (when अङ्ग means देह) अतिशयेन विश्रब्धाः etc. Qual. अङ्गैः।

2. अङ्गैः—The अङ्गs are "स्वामिन् अमात्य, सुहृत्, कोष, राष्ट्र, दुर्ग, बल" also देह body. करणे त्रया। Nanda could bear the burden well and long because besides being a veteaan he bore it along with his strong body of officers (अङ्ग)। The idea of a beast of burden carrying a weight runs right through the stanza. सुविश्रब्ध अङ्ग = strong body (for an ox).

3. पथिषु - पथिन् course of action (for the king); also track (for the ox).

4. विषमेषु—सम smooth, even. विभिन्नाः समेभ्यः विषमाः (See *ante.*); hard to negotiate (for a king); cp. "विषमोपि विगाह्यतेनयः"—Kirat II. uneven (for an ox).

5. अचलता—चल + शत्र चलन् faltering. न चलन् steady. Applies to both.

6. धुर्य्येण—धुर् responsibility (for a king); weight (for an ox). धुरि साधु इति धुर् + यत् धुर्यः equal to the work (for the king); trained carrier (for an ox) etc.

7. गुरुणा—गुरु father. The reference is to Nanda. This refutes ढुण्ढि's statement that सर्वार्थसिद्धि's son was Maurya who again was the father of Chandragupta (See *Intro.*).

8. नवव्यसि—The implication is that he was inexperienced; hence likely to commit mistakes. (See under मनस्वी)। नव requires emphasis, hence ought not to have been compounded.

9. व्यवसितः—वि + अव + सो + क्त कर्त्तरि is ready.

10. मनस्वी—प्रशस्तं मनः अस्य इति मनस् + विनि मत्वर्थे। This is the reason why न स्खलति—commits no mistakes though नवव्यसि व्यवसितः। It is curious that the Chamberlain gives all the

credit to the मनस्विता of चन्द्रगुप्त for the successful management of state affairs and ignores Chanakya altogether, though he is not slow to recognise the help which Nanda got from his ministers. It will not perhaps do to say that this is what is expected in a स्तुतिवाद of चन्द्रगुप्त। Possibly spite plays its part here, for we find below चाणक्य exclaiming "अहो राजपरिजनस्य चाणक्योपरि विद्वेषपक्षपातः" and at the end of the Act when the king discards चाणक्य the कञ्चुकिन् is heard saying "दिष्ट्या देव इदानीं देवः संवृत्तः"।

11. दम्यत्वात्—दम+यत् दम्यः one requiring training (for a a king) ; atso a young bull. ईतौ भूमौ। This explains why दुःखं वहति। Experience alone procures ease at work. Chandragupta feels uncomfortable through want of experience ; but commits no mistakes because he is मनस्वी।

12. स्खलति—Makes mistakes (for a king) ; also slips, stumbles (for a beast of burden).

5. (नेपथ्ये) इत इतो देवः।

(ततः प्रविशति राजा प्रतीहारी च)

(*In the dreessing room*) This way Sire this way. (*Then enter the king and the Warder*).

राजा—(स्वगतम्) राज्यं हि नाम राजधर्मानुवृत्तिपरस्य नृपतेर्महदप्रीतिस्थानम्। कुतः—

परार्थानुष्ठाने रहयति नृपं स्वार्थपरता
परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः।
परार्थस्वे तु स्वार्थादभिमततरो ह्यन्त परवान्
परायत्तः प्रीतिं कथमिव रसं वेत्ति पुरुषः ॥ ४ ॥

King—(To himself) A kingdom is indeed a source of

great trouble to the king intent upon observing the duties of a king. (Do you ask) Whence ?—In serving others' end self-interest forsakes the king. Verily with self-interest abandoned the name "Lord of the Earth" is not true to its sense• If others' interest is preferable to self-interest, then alas ! the king has a master to serve. How can a man controlled by a master know the taste of pleasure ?

CHARCHA

1. नाम—अव्यय here implying कुत्सा। "नाम प्रकाश्यसंभाव्यक्रोधागमकुत्सने" इत्यमरः। Chandragupta here disparages the duties of a king.

2. राजधर्म etc.—राज्ञो धर्मः duties of a king. तस्य अनुवृत्तिः अनुसरणम् observance of etc. सा परस्य etc. Qual. नृपतेः।

3. अन्वयः॥ परार्थानुष्ठाने स्वार्थपरता नृपं रुणद्धि। परित्यक्तस्वार्थः चितिपतिः नियतम् अयथार्थः। परार्थः स्वार्थात् अभिमततरश्चेत् हन्त परवान्। परायत्तः पुरुषः प्रीतेः रसं कथमिव वेत्ति। व्याख्या—'परस्य' आत्मेतरस्य पुरुषस्य यः 'अर्थः' प्रयोजनं तस्य 'अनुष्ठाने' साधनत्वमेति 'स्वार्थपरता' आत्मप्रयोजनन्यूनता 'नृपं' रुणद्धि' त्यजति। परकार्य्यकरणेन राज्ञः स्वकार्य्यनाशः इत्यर्थः। यातु स्वकार्य्यं परकार्य्यमेव अनुष्ठेयमिति चेत्—'परित्यक्तः' उत्सृष्टः 'स्वार्थः' येन तादृशः 'चितिपतिः' भूभर्त्ता 'नियतं' ननूनम् 'अयथा' मिथ्या 'अर्थः' अभिधेयः यस्य तादृशो भवति : स हि स्वनाम्नः अर्थं व्यभिचरति चितिपतित्वमेव जहाति इत्यर्थः। नैवं, स्वकार्य्यात् परकार्य्यं न्याय्यः। तत्र यः परकार्य्यं करोति स एव तत्त्वतः चितेः पतिः इति चेत्—'परस्य अर्थः स्वार्थात् अभिमततरश्चेत्' यदि प्रियतरः 'हन्त' कष्टं ! 'परवान्' परस्य विधेयोऽयं चितिपतिः। भवतु किं तेन इति चेत्—'परायत्तः' पराधीनः 'पुरुषः प्रीतेः' सुखस्य 'रसं' स्वादं 'कथमिव' केन वा प्रकारेण 'वेत्ति' जानाति ? न केनापि। अखरिरयोद्धतम्।

4. अयथार्थः etc.—यथा implies पदार्थानतिवृत्ति agreement with facts. न यथा disagreement with facts, hence untrue. चितिपति is the master of the whole world. The whole world has to serve him ; if then calling himself चितिपति he serves another, he is not true of his name चितिपति—he is अयथार्थः चितिपतिः।

5. परवान्—परः अस्ति प्रयत्नेन अस्य etc. a dependant ; cf. "परवती खलु तवभवती"—Sak. Act II.

6. अपि च दुराराध्या हि राजलक्ष्मीः आत्मवद्भिरपि राजभिः। कुतः—

तीक्ष्णादुद्विजते मृदौ परिभवत्रासान्न सन्तिष्ठते
मूर्खं द्वेष्टि न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि।
शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकान्तभीरूनहो
श्रीर्लब्धप्रसरेव वेश्यवनिता दुःखोपचर्या भृशम् ॥ ५ ॥

Moreover, Royal Fortune is hard to serve even by kings with a command over self. How (do you ask) ?—From the stern she suffers anxiety ; in the mild she does not abide through apprehension of insults. Fools she hates , with the highly erudite again she cultivates no friendship. The ever-timid she ridicules ; and the valourous she dreads mightily. Fortune, Ho ! like a public woman that has gained sway (over one) is extremely hard to please.

CHARCHA

1. दुराराध्या—आ + राध + णिच् (स्वार्थे) + ण्यत् कर्मणि आराध्या। दुःखेन आराध्या। With दुर् as an उपपद we get दुराराधा attaching खल्।

2. आत्मवद्भिः—Mallinatha in Raghu has "उदयादिष्वविक्लवितः मनसः सत्वमुच्यते ; आत्मवान् सत्ववान् प्रोक्तः—इत्युत्पलमालायाम्"। Hence आत्मवद्भिः = सत्ववद्भिः by those possessing strength of character. Qual. राजभिः which has अनुक्त कर्त्तरि इया।

3. अन्वयः ॥ अहो ! लब्धप्रसरा वेश्यवनिता इव श्रीः भृशं दुरुपचर्या। तीक्ष्णात् उद्विजते, परिभवत्रासात् मृदौ न सन्तिष्ठते। मूर्खं द्वेष्टि, अत्यन्तविद्वत्स्वपि प्रणयितां न गच्छति ; एकान्तभीरून् उपहसति, शूरेभ्योऽपि अधिकं बिभेति। व्याख्या—'अहो' आश्चर्यम् 'लब्धः' प्राप्तः 'प्रसरः' आधिपत्यं यया ताडृशी 'वेश्यवनिता इव' वारवधूरिव 'श्रीः' राजलक्ष्मीः 'भृशं' सुतरां 'दुःखोपचर्या' आयाससेव्या भवति। कथमित्याह—इयं 'तीक्ष्णात्' गुरुदण्डात् पौरुषैकपरायणात् भूपात् 'उद्विजते' भयते, प्रजाविप्लवेन

आश्रयो मे नश्येदिति। 'परिभवात्' अवमाननात् यः 'त्रासः' भयं तस्मात् 'मृदौ' लघुदण्डे क्षमामात्रपरे भूपे 'न सन्तिष्ठते' न स्थैर्यमापद्यते। 'मूर्खम्' अपण्डितं भूपं 'द्वेष्टि' दूरत एव त्यजति। 'अत्यन्तम्' अतिशयेन ये 'विद्वांसः' पण्डिताः भूपाः तेषु 'अपि प्रणयिता' प्रीतिः 'न गच्छति' न लभते। राजा चेत् विद्वान् स हि सर्वानवज्ञाय शत्रुतां गमयेत् इति। 'एकान्ते' सदैव ये 'भीरवः' भीताः तान् 'उपहसति' अवमन्यते। 'शूरेभ्यः अपि' वीरेभ्यश्च 'अधिकं बिभेति' कदा वा म्रियते समरे इति।

4. परिभव etc.—परिभव insult see *ante.* The mild court insult. Insult to the king is an insult to his Sri. Cf.—"मृदुर्भवत्यवज्ञातस्त्रीच्छादुद्विजते जनः"। The object is to show the difficulty of the situation—one can be neither तीक्ष्ण nor मृदु, what then is he to be? But there is a way out—the happy mean. Cf.—"काले काले च सम्प्राप्ते मृदुस्तीक्ष्णोऽथवा भवेत्" also "तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः."—*Magha* II-83. "मृदुव्यवहितं तेजो भोक्तुरर्थान् प्रकल्पते" —*Magha.* II-85. and "समरुचिरूपैति मार्दवं समये यश्चतनोति तिग्मताम्। अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः."—Kirat II.

5. सन्तिष्ठते—सम् + स्था takes आत्मनेपद by "समवप्रविभ्य स्थः"।

6. अत्यन्त etc.—अत्यन्तं विद्वान्, सुप् सुपा etc.

7. एकान्त etc.—एकः अन्तः स्वरूपं यस्मिन्, , तद् यथा तथा भीरुः always timid, सुप्सुपा।

8. लब्धप्रसरा—प्र + सृ + अप् भावे बाहुलकात् प्रसरः advauce. लब्धः प्रसरो यया etc. One with ascendancy established.

9. दुःखोपचर्या—चर + यत् भावे चर्या service. उपनता चर्या उपचर्या service rendered. दुःखा उपचर्या अस्याः। The necessity for this round about derivation of उपचर्या arises from the fact that if उप be taken as an उपसर्ग the affix here should be ण्यत् and not यत्। Cf.—"गदमदचरयमवाप्युपसर्गे। उपसर्गे तु उपचार्या इति ण्यति"।

7. अन्यच्च, कृतककलहं कृत्वा स्वतन्त्रेण किञ्चित् कालान्तरं व्यवहर्तव्यम् इत्यार्य्यादेशः। स च कथमपि मया पातकमिव अभ्युपगतः। अथवा यच्चत् आर्य्योपदेशसंस्क्रियमाणमतयः सदैव स्वतन्त्रा वयम्। कुतः—

इह विरचयन् साध्वीं शिक्षः क्रियां न निवार्यते
त्यजति तु यदा मार्गं मोहात् तदा गुरुरङ्कुशः ।
विनयरचयस्तस्मात् सन्तः सदैव निरङ्कुशाः
परतरमतः स्वातन्त्र्यभ्यो वयं हि पराङ्मुखाः ॥ ६ ॥

Here is another matter—Preceptor's command is that affairs have to be managed (by me) independently for a short while after getting up a mock quarrel with him. This, like a sin has been accepted by me with great reluctance. Or, we are always independent with our views being constantly corrected and improved by Preceptor's instructions. (Do you ask) How ?—In the world, the pupil is not checked doing a good work ; the Preceptor is a curb when he quits the right track through delusion. Hence, the good, with a liking for discipline are always curbless. We are indeed supremely averse to (lit. stand with face averted from) an independence other than this.

CHARCHA

1. कृतक etc.—कृत एव कृतकः artificial, got up. तादृशः कलहः । Cf.—"पुनःकृतकः पदवीं भगवत्यां"—Sak. Act IV.

2. स्वतन्त्रेण—स्वः आत्मा तन्त्रं प्रधानमस्य etc. Qual. मया understood.

3. कालान्तरम्—कालस्य अन्तरम् अवकाशः etc.

4. व्यवहर्तव्यम्—वि + अव + हृ + तव्य भावे has to managed ; business has to be conducted.

5. आर्य्योपदेश etc.—आर्य्यस्य उपदेशेन संक्लिश्यमानाः मतयः येषाम् । The सुट् in संक्लिश्यमान is by "संपर्युपेभ्यः करोतौ भूषणे" ।

6. वयम्—Construe वयम् आर्य्योपदेशेन संक्लिश्यमानमतयः सन्तः स्वतन्त्राः भवामः । Do not say आर्य्योपदेशसंक्लिश्यमानमतयो वयं स्वतन्त्रा भवामः, for then आर्य्योपदेश etc. becomes an ordinary विशेषण and "अजादी द्वयोश्च" does not apply owing to the prohibition "न विशेषणानां प्रतिषेधः"

the plural is therefore not availoble. Cf. "अस्मान् साधु विचिन्त्य संयमधनान्"—Sak. IV.

7. अन्वयः ॥ इह शिष्यः साध्वीं क्रियां विरचयन् न निवार्य्यते, यदा तु मोहात् मार्गं त्यजति तदा गुरुः अङ्कुशः (भवति)। तस्मात् विनयरुचयः सन्तः सदैव निरङ्कुशाः (भवन्ति)। अतः स्वातन्त्र्येभ्यः वयं परतरं हि पराङ्मुखाः। व्याख्या—'इह' अस्मिन् जगति 'शिष्यः' छात्रः 'साध्वीं क्रियां विरचयन्' अनिन्द्यं कर्म कुर्वन् 'न निवार्य्यते' न निषिध्यते, तत्र स्वतन्त्र एव शिष्यः इत्यर्थः। 'यदा तु' यदा पुनः 'मोहात्' मूढ़तया "मार्गं त्यजति' सदाचारमतिक्रामति तदा 'गुरुः' तस्य सत्पथे 'अङ्कुशः' नियामकः भवति तं निवारयति इत्यर्थः 'तस्मात्' हेतोः 'विनये' सुशिक्षायां 'रुचिः' स्पृहा येषां तादृशाः शिक्षापक्षपातिनः 'सन्तः' साधवः 'सदा एव निरङ्कुशाः' अबाधाः, सदाचारमनतिक्रान्ताः कदापि न निवार्य्यन्ते इत्यर्थः। 'अतः' अस्मात् इदमतीत्य इति यावत् [ल्यब्लोपे कर्मणि ५मी] यानि 'स्वातन्त्र्याणि' स्वेच्छाचाराः तेभ्यः 'वयं परतरं हि' नितान्तमेव पराङ्मुखाः' विरक्ताः। यादृश स्वातन्त्र्यं सदाचाररताः सन्तो नित्यं हि लभन्ते तादृशमेव प्रार्थयामहे नाधिकं कञ्चित् कालमपि इति भावः। दृष्टिराजस्तु "वयन्तु 'अतः' एभ्यः [पञ्चम्यास्तसिल] उक्तविधेभ्यः कञ्चित्कालं स्वातन्त्र्येण व्यवहर्त्तव्यम् इत्यादिष्टेभ्यः स्वातन्त्र्येभ्यः 'परतरम्' अत्यन्तं 'पराङ्मुखाः' सर्वथा ईदृशं स्वातन्त्र्यं नेच्छामः। किञ्चित् कार्य्यानुरोधात्तु आर्य्यादेशेन इदं स्वातन्त्र्यम् आत्मनि अध्यस्य स्वतन्त्रवत् व्यवहरामः इति भावः। यद्वा आर्य्यानुरोधात् इदं स्वातन्त्र्यं कथञ्चित् अभ्युपगतम्। 'अतः परतरं' अतः उत्तरे काले [कालाध्वनोरत्यन्तसंयोगे द्वितीया] 'स्वातन्त्र्येभ्यो वयं पराङ्मुखाः'। अतः परं कदापि स्वातन्त्र्यं नेच्छामः आर्य्याधीना एव सर्वदा वर्त्तामहे इति इति भावः'। इत्थं व्याचष्टे।

8. सन्तः सदैव निरङ्कुशाः—The good are always unrestrained. I believe, I am among the good. So, with a taste for discipline, I am *always* स्वतन्त्र; what then does Preceptor mean by asking me to be स्वतन्त्र for a short while? Is the स्वातन्त्र्य to be of a different character altogether?

9. अतः—ल्यब्लोपे ५मी। इदमतीत्य etc. see व्याख्या। Other than the स्वातन्त्र्य that is allowed to those good souls that have a रुचि for विनय। दृष्टि wants—(i) अतः एभ्यः *i. e.* इदम् + थम् (५मी) + तसिल् स्वार्थे; qual. स्वातन्त्र्येभ्यः—we are greatly averse to such स्वातन्त्र्य। (ii) अतः अस्मात् परतरम्—परशब्दयोगे ५मी—subsequent to this. परतरम् taking अत्यन्तसंयोगे २या।

10. स्वातन्त्र्येभ्यः—स्वतन्त्रस्य भावाः इति स्वतन्त्र + ष्यञ् स्वातन्त्र्याणि independence. तेभ्यः। "भ्रुवमपाये—" इति ध्रुवी, because पराङ्मुख implies motion (See below). Here सौवतन्त्र्य was expected, स्व being of the द्वारादि class, just as we get दौवारिक instead of द्वारिक। The defence is स्वतन्त्र should be included in the स्वागतादि list and then like स्वागतिक, स्वाभाविक, स्वार्थिक etc. स्वातन्त्र्य may be allowed by the rule "स्वागतादीनाञ्च"। Professor Chakravarti rightly observes that हरदत्त takes स्वागतादि as a closed list.—But वर्द्धमान is opposed to this view, he says on स्वागतादि list—"येषां टच्प्रत्ययो न दृश्यते ते अत्र द्रष्टव्याः," implying thereby that the list is an open once (आकृतिगण)। वर्द्धमान's view seems to be preferable.

11. पराङ्मुखाः—परा अञ्चति इति परा + अञ्च + क्विन् कर्तरि पराक् averted. पराक् मुखमेषाम् etc.

8. (प्रकाशम्) आर्य्य वैहीनरे, सुगाङ्गमार्गमादेशय।

(*Aloud*) Noble Vaihinari, show me the way to the Suganga Palace.

कञ्चुकी—इत इतो देवः। (नाट्येन परिक्रम्य) अयं सुगाङ्गप्रासादः। शनैरारोहतु देवः।

Chamberlain—This way, Sire, this way. (*Acting going round*) This is the Suganga Palace. Let Sire ascend slowly (cautiously).

राजा—(नाट्येन आरुह्य—दिशः अवलोक्य) अहो शरत्समयसञ्जृतशोभानां दिशामतिरमणीयता! कुतः?—

शनैः श्यानीभूताः सितजलधरच्छेदपुलिनाः
समन्तादाकीर्णाः कलविरुतिभिः सारसकुलैः
चिताश्चित्राकारैर्निशि विकचनक्षत्रकुसुमैः
नभस्तः स्यन्दन्ते सरित इव दीर्घा दश दिशः॥ ७॥

King—(Acting ascent and observing the quarters) Oh, the beauty of the quarters with grace added by the autumnal season! Whence (do you ask)—Having gradually become dry, having become crowded all round with flocks of herons with a sweet cackle, having become strewn at night with fine-looking lily-like stars unveiled, the ten quarters, with masses of white clouds like sand-banks, extentd from the summit of the sky like so many streams of great length.

CHARCHA

1. वैहीनरे—वहीनरस्य गोत्रापत्यं पुमान् इति वहीनर + इञ् = विहीनर + इञ = वैहीनरिः। The word becomes विहीनर by "वहीनरस्य इत्वं वक्तव्यम्"। This is after Katyayana. Patanjaali refers to the view of another grammarian कुणरवाडव who says "नैष वहीनरः। कस्तर्हि ? विहीनर एषः। विहीनो नरः कामभोगाभ्याम् विहीनरः। विहीनरस्य अपत्यं वैहीनरिः"। "पृषोदरादित्वात् नलोपः" इति कैयटः।

2. शनैः—Gentle. Perhaps the time was *night*, and it was necessary to step with caution.

3. शतत्समय etc.—शरदेव समयः। तेन सम्भृता। तादृशी शोभा यासाम् etc.

4. अन्वयः॥ शनैः श्यानीभूताः सितजलधरच्छेदपुलिनाः कलविरुतिभिः सारसकुलैः समन्तात् आकीर्णाः दश दिशः चित्राकारैः विकचनक्षत्रकुमुदैः चिताः (सत्यः) दीर्घाः सरित इव नभसः स्यन्दन्ते। व्याख्या—'शनैः' क्रमेण 'श्यानीभूताः' वर्षणमुक्ताः 'सिताः' धवलाः 'जलधरच्छेदाः' मेघखण्डाः 'पुलिनानि' इव सन्ति यासां ताः [उपमितसमासः। ततः अच् मत्वर्थीयः] 'कलविरुतिभिः' अव्यक्तमधुरध्वनिभिः 'सारसकुलैः' क्रौञ्चपङ्क्तिभिः 'समन्तात्' सर्वासु दिक्षु 'आकीर्णाः' व्याप्ताः 'दश दिशः' निशि' रात्रौ 'चित्राकारैः' अद्भुतदर्शनैः 'कुमुदैः' इव 'विकचैः' अपाटलैः प्रकटितैः इत्यर्थः प्रफुल्लैश्च 'नक्षत्रैः' तारकाभिः 'चिताः' आकुलाः समाकीर्णाः सत्यः 'दीर्घाः' आयताः 'सरित इव' नद्य इव 'नभसः' गगनमार्गात् 'स्यन्दन्ते' प्रसरन्ति।

5. श्यानीभूताः—श्यै + क्त कर्तरि श्यान dry. अश्यानाः श्यानाः भूताः इति श्यान + च्वि + भू + क्त कर्तरि become dry. श्यै + क्त = श्या + क्त = श्या + न by "संयोगादेरातो धातोर्यण्वतः"। If however the reference is to solidifica-

tion or sense of touch, then श्ना + क्त = शी + क्त by "द्रवमूर्त्तिस्पर्शयो,—"। The gives a further change into शी + न in the case of solidification only. Thus शीनं घृतम्—The *ghee* has solidified ; शीतं जलम्—The water is cool. Hence we have three forms—श्यान, शीन, शीत। ("श्यः अस्पर्शे")।

6. सित etc.—जलानां धराः जलधराः। तेषां छेदाः (खण्डाः)। सिताः जलधरच्छेदाः। ते पुलिनानि इव सितजलधरच्छेदपुलिनानि। तानि सन्ति आसाम् इति सितजलधरच्छेदपुलिन + अच् मत्वर्थे। Qual. टिप्पः।

7. निशि—It seems चन्द्रगुप्त visited the place at night.

8. विकच etc—विगताः कचाः एषां विकचानि with the hairr e-moved, *i. e.*, with the shroud of cloud (also sun-light) off तादृशानि नक्षत्राणि। तानि कुमुदानीव etc.

9. नभस्तः—ढुण्ढि sees double sense here. "नभस्तः वियत्तः श्रावणमासाच्च"। 'नभाः श्रावणिकश्च स' इत्यमरः"। It is not quite clear what is gained by this reference to श्रावण।

10. स्यन्दने—स्यन्दृ 'drops ऊ ; hence इड विकल्पः। Also see "दुद्रवो लुङि" ; "द्रवाः स्रवनीः" ; "न द्रवाश्चतुर्थ्यः"। अस्यदत, अस्यन्दिष्ट—अस्यन्त। स्यन्त्स्यति—सन्दिष्यते—स्यन्त्स्यते।

9. अपि च—

अपामुद्वृत्तानां निजसुपदिशन्त्या स्थितिपदं
दधत्या शालीनामवनतिमुदारे सति फले।
मयूराणामुग्रं विषमिव हरन्त्या मदमहो
कृतः कृत्स्नस्यायं विनय इव लोकस्य शरदा ॥८॥

O! it seems moreover, the whole world has been taught manners (lit. the teaching of manners has been done unto the whole world) by autumn, pointing out their natural place and location to waters that had overflown (also—broken their bond), imparting a stoop to paddies the crop becoming matnre, removing the turbulence of pea-fowls unbearable like poison.

अन्वयः॥ अहो उद्वृत्तानाम् अपां निजं स्थितपदम् उपदिशन्त्या, शालीनां फले उदारे सति अवनतिं दधत्या, मयूराणां विषमिव उग्रं हरन्त्या शरदा कृतस्नस्य लोकस्य अयं विनयः कृत इव। व्याख्या—,अहो' आश्चर्यम्! किमित्याह—'उद्वृत्तानां' लङ्घिततीराणाम् 'अपां' जलानां नदीस्थानां कासारस्थानाञ्च 'निजं' स्वाभाविकं 'स्थितिपदम्' वासस्थानम् 'उपदिशन्त्या' दर्शयन्त्या 'शालीनां' धान्यविशेषाणां 'फले' प्रसवे 'उदारे' परिणते 'सति अवनतिं' नम्रतां दधत्या कुर्वत्या 'मयूराणां' शिखिनां 'विषमिव उग्रम्' असह्यं 'मदं' गर्वं 'हरन्त्या' अपनयन्त्या' 'शरदा कृतस्नस्य' समग्रस्य 'लोकस्य' जगतः 'अयम्' एषः साक्षात् दृश्यमानः 'विनयः' शिक्षा 'कृत इव'। शरत्-प्रभावात् औद्धत्यं विहाय शमे तिष्ठति जगत् इति भावः।

CHARCHA

1. उद्वृत्तानाम्—उद् + वृत + क्त कर्त्तरि उद्वृत्ताः overflown. Also उत्क्रान्ताः वृत्तम् उद्वृत्ताः those that have overstepped bounds. During the rains there is an overflow of waters and surrounding lands are flooded. This is turbulence and has to be checked by autumn.

2. उपदिशन्त्या—उप + दिश + शतृ advising, pointing out.

3. स्थितिपदम्—स्थितेः पदम् the site of location, *i. e.*, the natural bed. Autumn brings the waters back and thus teaches them manners.

4. उदारे सति—Paddy points upwards even when in crop. This is insolence. Autumn matures the crop and then the paddy bends down under the weight—it is thus taught manners.

5. मयूराणां मदम्—During the rains pea-fowls dance about in great hilarity. This too is insolence. Autumn cools them down and teaches them manners.

6. *Remark*—टुण्ढि observes—"अनेन पद्येन उद्वृत्तस्य मलयकेतोः भाविनिग्रहः, राक्षसस्य विषवदत्यु द्विक्रमनीतिविषयकमदापहरणं साम्राज्यफलशालिनी मङ्गलतेः चन्द्रगुप्तस्य विनयसम्पच्च समासोक्त्या सूचिता"—a far-fetched suggestion undoubtedly.

10. इमामपि—

भर्त्तुस्तथा कलुषितां बहुवल्लभस्य
मार्गे कथञ्चिदवतार्य्य तनूभवन्तीम्।
सर्वात्मना रतिकथाचतुरैव दूती
गङ्गां शरन्नयति सिन्धुपतिं प्रसन्नाम् ॥९॥

Having somehow brought down this highly turbid, but now thinning Ganga to the way to her many-wived husband, Autumn, like a female messenger clever at talking of love, leads her, clear (or—disabused) all over, to the lord of streams.

अन्वयः ॥ नदीपक्षे—तथा कलुषितां तनूभवन्तीं सर्वात्मना प्रसन्नाम् इमां गङ्गामपि रतिकथाचतुरा दूती इव शरत् बहुवल्लभस्य भर्त्तुर्मार्गे कथञ्चित् अवतार्य्य सिन्धुपतिं नयति। व्याख्या—'तथा' तेन प्रकारेण 'कलुषिता' प्रावृषि कर्दमसम्पर्कात् आविलां सम्प्रति शरदि 'तनूभवन्ती' क्रशीभवन्ती' ततश्च 'सर्वात्मना' उत्तानेषु च गभीरेषु च सर्वत्र 'प्रसन्नां' विमलाम् 'इमां' दृश्यमाना 'गङ्गामपि रतेः' भर्त्तरि भावप्रकर्षस्य या 'कथा' तत्र 'चतुरा' दक्षा 'दूती इव शरत् बहवः' पत्न्याः 'वल्लभाः' प्रिया यस्य तथाविधस्य अतएव अनुपसर्पणीयस्य 'भर्तुः मार्गे' ततप्रापणपथे आत्मस्थितिपदे इत्यर्थः 'कथञ्चित्' बहुवल्लभत्वादेव क्रच्छ्रेण 'अवतार्य्य' नीत्वा 'सिन्धुपतिं' सागरं 'नयति' प्रापयति। प्रावृषि सर्वतः प्रधाविता गङ्गा अधुना शरदि निजप्रवाहाणाम् उचितेन मार्गेण वहति इति भावः। नायिकापक्षे—बहुवल्लभस्य भर्त्तुः तथा कलुषितां तनूभवन्तीं गङ्गामपि कथञ्चित् मार्गे अवतार्य्य रतिकथाचतुरा दूती इव शरत् सर्वात्मना प्रसन्नामिमां सिन्धुपतिं नयति। व्याख्या—'बहुवल्लभस्य भर्त्तुः' सम्बन्धे बहुवल्लभत्वादेव 'तथा कलुषितां' मनोमालिन्यवतीम् अतएव 'तनूभवन्तीम्' अल्पीभवन्तीम् अनुपसर्पणात् दृष्टिविषयीभवन्तीम् इत्यर्थः 'गङ्गामपि' नायिकां 'कथञ्चित् मार्गे' 'अवतार्य्य' उन्मार्गगमनात् रक्षित्वा 'रतिकथाचतुरा दूतीव शरत् सर्वात्मना' साकल्येन 'प्रसन्नाम्' अकलुषाम् 'इमां सिन्धुनामकं पतिं नयति'।

CHARCHA

1. भर्तुः—Construe भर्तुः मार्गं also कलुषिताम् ।

2. मार्गं—मार्ग is the old bed. There was उन्मार्गगमन through the rains ; also मार्गं, means सन्मार्गं कुलमार्गं see व्याख्या ।

3. कथञ्चित्—The rush of waters towards surrounding lands was very great and was not easily stopped by शरत् । In other words—The rush did not cease immediately at the advent of शरत् but after the seoson had advanced.

4. अवतार्य्य—अव + तृ + णिच् + ल्यप having brought *down*. The waters had gone *up* the adjoining lands.

5. तनूभवन्तीम्—अतनुः तनुः भवन्ती इति तनु + च्वि + भू + शतृ स्त्रियांम् etc. 'च्वौ च' इति दीर्घः । तनूभवन precedes the प्रसन्नता, of the waters. Hence, with क्त in प्रसन्नाम्, it is better to have तनूभूताम् instead of तनूभवन्तीम् ।

6. रति etc.—रति is love. She is estranged from her lord, but the messenger artfully leads the conversation so as to create in Ganga a fresh interest in her lord and thus restores her love for him.

7. सिन्धुपतिम्—सिन्धु river (fem). सिन्धूनां पतिः *i. e.*, the sea. Also सिन्ध sea (masc.) सिन्धुनामा पतिः etc. "देशे नदविशेषेऽब्धौ सिन्धूनां सरिति स्त्रियाम्" इत्यमरः ।

8. *Remark*—Here again दृष्टि observes—"चतुरदूतीव अतिगभीरा चाणक्यनीतिः सागरवत् अलिगभीराशयं चन्द्रगुप्तं सर्वात्मना सर्वप्रकारेण प्रापयति" on which the same remark applies as in Sl. 8. above.

11. (समन्तात् नाट्येन अवलोक्य) अये, कथम् अप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरम् ? आर्य्य वैहीनरे, अथ अस्मद्वचनात् आघोषितः कुसुमपुरे कौमुदीमहोत्सवः ?

(*Acting observation all round*) Ha ! how is it that Kusumapura goes with the Kaumudi festival uncommenced ? Noble

Vaihinari, was the celebration of the Kaumudi festival at Kusumapur proclaimed in my name ?

कञ्चुकी—अथ किम् ?

Chamberlain—What else (yes) ?

राजा—तत् किं न गृहीतमस्मद्वचनं पौरैः ?

King—Is it then that my command was not respected (heeded to) by the citizens ?

कञ्चुकी—(कर्णौ पिधाय) शान्तं पापम् ! शान्तं पापम् ! पृथिव्याम् अस्खलितपूर्वं देवस्य शासनं कथं पौरेषु स्खलिष्यति ?

Chamberlain—(*Blocking his ears*) Begone sin ! Begone sin ! Never yet ineffective in the whole world, how could Sire's command be ineffecting among the citizens ?

राजा—तत् कथम् अप्रवृत्तकौमुदीमहोत्सवम् अद्यापि कुसुमपुरम् ?—

धूर्तैरन्वीयमानाः स्फुटचतुरकथाकोविदैर्वेशनार्यो
नालंकुर्वन्ति रथ्याः पृथुजघनभराक्रान्तिमन्दैः प्रयातैः ।
अन्योऽन्यं स्पर्द्धमाना न च गृहविभवैः स्वामिनो मुक्तशङ्काः
साकं स्त्रीभिर्भजन्ते विधिमभिलषितं पार्वणं पौरमुख्याः ॥ १०

King—Then how is it that even now Kusumapura has not commenced the Kaumudi festival ? Public women, followed by pimps versed in free clever conversation, do not adorn the streets with steps slow through the imposition of the weight of their vast hips. Nor again do the leading citizens, relieved of apprehension from the king, vie with each other in the richness of their house and adopt along with their women the desired measures enjoined at conjunction.

CHARCHA

1. अप्रवृत्त etc.—A बहुव्रीहि। Cf.—"प्रवृत्तकौमुदीमहोत्सवरमणीयतरम्" Para **2**, *ante*.

2. वैद्दीनरि—See Para 8 *ante*.

3. ज्ञात्वं पापम्—See Act I *ante*.

4. अस्खलितपूर्वम्—स्खल + क्त कर्त्तरि स्खलित miscarried. पूर्वं स्खलितम्। "भूतपूर्वे चरट्" इति ज्ञापकात् पूर्वशब्दस्य परनिपातः। न स्खलितपूर्वम्।

5. अन्वयः॥ वेश्यनार्य्यः स्फुटचतुरकथाकोविदैः धूर्त्तैः अन्वीयमानाः (सत्यः) पृथुजघनभराक्रान्तिमन्दैः प्रयातैः रथ्याः न अलंकुर्वन्ति। स्वामिनो मुक्तशङ्काः पौरमुख्याश्च गृहविभवैः अन्योन्यं स्पर्द्धमानाः (सन्तः) स्त्रीभिः साकम् अभिलषितं पार्वणं विधिं न भजन्ते। व्याख्या—'वेश्यनार्य्यः' वारवनिताः 'स्फुटाः' स्पष्टाः अगूढा इत्यर्थः; 'चतुराः' कुशलाः याः 'कथाः' वाचः तासु 'कोविदैः' विचक्षणैः धूर्त्तैः' विटैः' 'अन्वीयमानाः' अनुगम्यमानाः सत्यः 'पृथोः' स्थूलस्य 'जघनस्य' यो 'भरः' गुरुता तस्य 'आक्रान्त्या' आरोपणेन 'मन्दैः' धीरैः 'प्रयातैः' पादचारैः 'रथ्याः' राजमार्गान् 'न अलङ्कुर्वन्ति' न मण्डयन्ति। 'स्वामिनः' भूपात् 'मुक्तशङ्काः' निर्भयाः अर्थकृत्यो नन्दे गते वित्तापहरणशङ्का नास्ति इति निःशङ्काः 'पौरमुख्याश्च' नागरिकवर्य्या अपि 'गृहस्य' स्वभवनस्य 'विभवैः' सम्पद्भिः 'अन्योन्यं परस्परं 'स्पर्द्धमानाः' आह्वयमाना इव परस्परस्पर्द्धया भवनवैभवं प्रदर्शयन्तः सन्त इत्यर्थः 'स्त्रीभिः साकं' निजवधूभिः सह 'अभिलषितं' काङ्क्षितं 'पार्वणं विधिं' पूर्णिमाचारं कौमुदीकृत्यमित्यर्थः 'न भजन्ते' न प्रतिपद्यन्ते नानुतिष्ठन्ति इत्यर्थः। तत् नूनं लङ्घितं मच्छासनम् अप्रवृत्त एव कौमुदीमहोत्सवः इत्याशयः कञ्चुकिनः।

6. धूर्त्तैः—धूर्त्त pimp विट। "धूर्त्तेतु खण्डलवणे धुस्तूरे ना विटे-त्रिषु" इति मेदिनी।

7. स्फुट etc.—कौति इति कुशब्दे + विच् कर्त्तरि कौः the Vedas (the प्रातिपदिक is कौ)। वेत्ति इति विद + क कर्त्तरि विदः knower. कोः वेदस्य विदः कोविदः a Vedic scholar बुधः। "सन् सुधीः कोविदो बुधः" इति त्रिषु। Hence an expert, an adept. Now see व्याख्या॥ अनु + इ + शानच् कर्मणि = अन्वीयमानाः followed.

8. वेश्यनार्य्यः—वेश्य brothel. "वेश्यो वेश्यागृहेऽपि च"। तस्य नार्य्यः।

9. पृथु etc.—आ + क्रम + क्तिन् भावे आक्रान्ति application, imposition. This seems superfluous (अधिकपद)। Now see व्याख्या।

10. अन्वीन्यम्—अन्यम् अन्यम् स्पर्द्धमानाः implies reciprocity व्यतिहार

hence the duplication. "कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्"। The double form is usually treated as a Samasa, but अन्य and पर are exceptions by "अन्यपरयोर्न समासवत्"। Thus the विभक्ति is retained. Next by the Vartika "असमासवद्भावे पूर्वपदस्यस्य सुपः सुर्वक्तव्य" we get अन्यः अन्यं स्पर्द्धमानाः = अन्योन्यं स्पर्द्धमानाः।

11. स्वामिनः—स्वं धनमस्यास्तीति स्व + आमिच मत्वर्थे स्वामिन् master. In this book it generally means King. Cf.—"अमात्य स्वाम्यर्थ एव साधयितव्यः" Act II, Para 36 ; "स्वाम्यर्थसुद्दहन्.....स्वामिभक्तानाम्....." Act II, Para 39 etc. तस्मात्। "भौवार्थानाम्—" इति भूमौ। The point is, नन्द's rapacity was well-known , the rich were often subjected to extortion during his rule and people took good care to hide their wealth from royal view. Chandragupta was of a different type altogether : hence there was no risk in a display of wealth before his eyes. दृष्टि takes "स्वामिनः as 1st case plural, qual. पौरमुख्याः। स्वामिनो गृहस्वामिनो वसनभूषणादिसमृद्धिं स्पर्द्धया अन्योन्यम् आधिक्येन दर्शयन्तः पौरमुख्याः" etc. स्वामिनः पौरमुख्या = rich leaders of citizens.

12. पार्वणम्—पर्वन् a joint : hence conjunction *i. e.*, अमावस्या and पौर्णमासी। Here the latter. तत्र भव इति पर्वन् + अण् पार्वणः that which appears at that time of full-moon. The अण् here is irregular, because "तत्र भवः", "तत्र जातः", "तस्य इदम्", "तेन प्रोक्तम्" etc. are technically called शैषिक senses (शेषे)। But in the case of a कालवाचक word the शैषिक affix usually allowed is ठञ् by "कालात् ठञ्"। It is true पर्वन् is not primarily a काल, but if there is reference to काल even in the remotest degree, the affix is none other than ठञ्। "यथा कथञ्चित् गुणवृत्त्यापि काले वर्त्तमानात् प्रत्यय इष्यते"—*Vrittikara.* Hence पार्वण has to be condemned (अपभ्रंश)। The correct form being पार्विक with ठञ्, "कथं तर्हि 'शार्वरस्य तमसो निषिद्धये' इति कालिदासः, 'अनुदितौषसरागा' इति भारविः, समानकालीनं, प्राक्कालीनम् इत्यादि च? अपभ्रंशा एवैते इति ग्रामाधिकाः—*Bhattoji.* Note that पार्विकम् preserves the metre also.

12. कञ्चुकी—एवमेवैतत्

Chamberlain—It is indeed so.

राजा—किमेतत् ?

King—What is it ?

कञ्चुकी—देव इदम् ।

Chamberlain—Sire, it is this.

राजा—स्फुटं कथय ।

King—Speak out plainly.

कञ्चुकी—प्रतिषिद्धः कौमुदीमहोत्सवः ।

Chamberlain—The Kaumudi festival has been prohibited.

राजा—(सक्रोधम्) आः केन ?

King—(*With warmth*) Ha ! by whom ?

कञ्चुकी—देव नातःपरं विज्ञापयितुं शक्यम् ।

Chamberlain—Sire, beyond this cannot be reported.

राजा—न खलु आर्येण चाणक्येन अपहृतः प्रेक्षकाणाम् अतिशयरमणीयश्चक्षुषो विषयः ।

King—Really, by Noble Chanakya has not been removed this excessively delightful object of sight of on-lookers.

कञ्चुकी—देव कोऽन्यो जीवितुकामो देवस्य शासनम् अतिवर्त्तत ।

Chawberlain—Sire, who else with a desire to live would over-rule Sire's command ?

राजा—शोणोत्तरे, उपवेष्टुमिच्छामि ।

King—Sonottara, I wish to sit down.

प्रतीहारी—देव एदं सिंहासणम् [देव इदं सिंहासनम्] ।

Warder—Sire, here is your throne.

राजा—(नाट्येनोपविश्य) आर्ये वैहीनरे, आर्यचाणक्यं द्रष्टुमिच्छामि ।

King—(*Acting sitting down*) Noble Vaihinari, I wish to see Noble Chanakya.

कञ्चुकी—यदाज्ञापयति देवः (इति निष्क्रान्तः) ।

Chamberlain—As Sire commands (*exit*).

CHARCHA

1. विज्ञापयितुम्—वि + ज्ञा + णिच् + तुमुन् । Usually this is the antithesis of आज्ञापयितुम् । The former being used when a junior reports to senior and the latter refers to the command of a senior to a junior.

2. जीवितुकामः—जीवितुं कामः अस्य । The म of जीवितुम् disappears by the dictum "तुङ्काममनसोरपि" ।

3. अतिवर्त्तेत—अतीत्य वर्त्तेत इति अति + वृत + लिङ् । ईत । शकि लिङ । Or सम्भावनायां लिङ् ।

4. शोकोत्तरे etc.—Here the king pretends that he is so much affected by this unpleasant news that he can no longer keep standing.

13. (ततः प्रविशति आसनस्थः रूमक्नगतः कोपानुविद्धां चिन्तां नाटयंश्चाणक्यः) चाणक्यः—कथं स्पर्द्धते मया सह दुरात्मा राक्षसः !—

क्षतागाः कौटिल्यो भुजग इव निर्य्याय नगराद्-
यथा नन्दान् हत्वा नृपतिमकरोन्मौर्य्य वृषलम् ।
तथाहं मौर्य्येन्दोः श्रियमपहरामीति कृतधीः
प्रकर्षं मद्वैरव्यतिशयितुमेष व्यवसितः ॥११॥ ।

(*Then enter on a seat, in his own house, Chanakya acting meditation mixed with anger*) *Chanakya*—How so ! The vile-

hearted Rakshasa vies with me ! This fellow has ventured to surpass the grandeur of my wit (lit. supremacy) having made up his mind thus—"I will wrest the fortune of the moon-like Maurya just as Kautilya who, on being insulted, made Maurya, killed the Nandas."

अन्वयः ॥ "यथा कौटिल्यः कृतागाः (सन्) भुजग इव नगरात् निर्य्याय नन्दान् हत्वा मौर्य्यहषलं नृपतिम् अकरोत् तथा अहं मौर्य्येन्दोः श्रियम् अपहरामि" इति कृतधीः एष महद्धेः प्रकर्षम् अतिशयितुं व्यवसितः। व्याख्या—'यथा कौटिल्यः' चाणक्यः 'कृतम्' आचरितम् 'आगः' अपराधो यस्मिन् तादृशः सन् 'भुजग इव' सर्पवत् 'नगरात्' कुसुमपुरात् निर्य्याय' बहिर्गत्वा 'नन्दान् हत्वा मौर्य्यं' मुरागर्भजातं 'हषलं' शूद्रं चन्द्रगुप्तं 'नृपतिम् अकरोत्' राजानं व्यधात् राज्ये अभिषिक्तवान् तथा 'अहम् इन्दुतुल्यस्य' चन्द्रकल्पस्य 'मौर्य्यस्य' चन्द्रगुप्तस्य 'श्रियं' लक्ष्मीम् 'अपहरामि' अपनयामि 'इति' अनेन प्रकारेण 'कृता' कल्पिता 'धीः' मतिः येन तादृशः विहितसङ्कल्पः 'एषः' राक्षसः 'महद्धेः' महतोयायाः मतेः 'प्रकर्षं' सम्यदम् 'अतिशयितुम्' अतिवर्त्तितुं वृद्धा महद्धिं व्यतीत्य स्थातुम् इत्यर्थः। 'व्यवसितः' प्रकान्तः यतते इत्यर्थः। स हि मन्यते महद्धेरपि आत्मनो बुद्धिः प्रकृष्टा, अहो भ्रमः इति भावः।

CHARCHA

1. कोपानुविद्धाम्—अनु + व्यध + क्त कर्मणि अनुविद्धः tinged. कोपेन अनुविद्धा tinged with anger राषरञ्जिता etc.

2. दुरात्मा—See *ante*. Or say आत्मन् is बुद्धि। दुष्टः आत्मा अस्य fool दुर्बुद्धिः। "आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्त्म च" इत्यमरः।

3 भुजग—भुजेन कुटिलगत्वा गच्छतीति भुज + गम + ड कर्मणि। भुजङ्ग and भुजङ्गम् are got with खच्।

4. अपहरामि—I shall wrest. This implies death of चन्द्रगुप्त and installation of another king, Malayaketu, in his place. For the sake of the इष्टान्त these two facts should have been expressly stated. बुद्धि thinks that चाणक्य suppresses them on

purpose with a view to say that Rakshasa lacks constructive skill and is only trying to destroy. "ममेव नास्य बुद्धिबलं परन्तु मत्सरमात्रेण 'अशक्तोऽहं गृहारम्भे शक्तोऽहं गृहभञ्जने' इति न्यायेन मौर्य्यापकारमाचार्य प्रयतमानः"—*Dhundhi.*

5. प्रकर्षम्—प्र + कृष + घञ् भावे प्रकर्षः excellence, majesty.

6. अतिशयितुम्—अति + शी + तुमुन् to excell. उपसर्गवशात् सकर्मकत्वम्।

7. व्यवसितः—वि + अव + सी + क्त कर्तरि is bent upon. Nom. एषः which refers to राक्षस।

14. (आकाशे लक्ष्यं बद्ध्वा) राक्षस राक्षस, विरम्यताम् अस्मात् दुर्व्यसनात्—

उत्सिक्तः कुसचिवदृष्टराज्यतन्त्रो
नन्दोऽसौ न भवति चन्द्रगुप्त एषः।
चाणक्यस्त्वमपि च नैव केवलं ते
साधर्म्यं मदनुकृतेः प्रधानवैरम् ॥१२॥

(*Fixing his gaze in the air*) Rakshasa, O Rakshasa, stop from this mad pursuit. This one is Chandragupta, not that haughty Nanda with affairs of state supervised by bad ministers. You too are certainly not Chanakya. In the mattar of your imitation of me the common attribute is merely the enmity with the principal (king).

अन्वयः॥ एषः चन्द्रगुप्तः, उत्सिक्तः कुसचिवदृष्टराज्यतन्त्रः असौ नन्दः न भवति। त्वमपि च नैव चाणक्यः। केवलं प्रधानवैरं ते मदनुकृतेः साधर्म्यम्। व्याख्या—'एषः, अयं मया कृतो राजा नाम्ना 'चन्द्रगुप्तो' भवति, 'उत्सिक्तः' गर्वितः 'कुत्सितैः' अनभिज्ञैरित्यर्थः 'सचिवैः' अमात्यैः 'दृष्टं' निरूपितं 'राज्यस्य तन्त्रम्' इति कर्तव्यता यस्य तादृशः 'असौ नन्दः' अयं न भवति। नन्दात् विलक्षणः अयं चन्द्रगुप्तो-दुच्छेदस्त्वया दत्यर्थः। विना च वैलक्षण्यं 'त्वमपि च नैव चाणक्यः' असि। वस्तुतस्तु 'केवलम् एकं' 'प्रधानेन' मुख्येन राज्ञा सह इत्यर्थः यत् 'वैरं' प्रवृत्ता तदेव 'ते' तव

या 'मदीया अनुकृतिः' अनुकरणं तस्याः 'साधर्म्यं' तुल्यता। ममैव तवापि राज्ञा विरोधः, एतन्मात्रम् आवयोः समता। पचात्तरे नन्दात् व्यायान् चन्द्रगुप्तः त्वञ्च चाणक्याधीनः इति प्रसङ्ग एव नास्ति सादृश्यस्य, तद्विरम्यताम् अस्मादुर्व्यसनात्।

CHARCHA

1. दुर्व्यसनात्—व्यस्यते क्षिप्यते अनेन इति वि+अस+ल्युट् करणे for an engrossing pursuit. दुष्टं व्यसनम् etc. तस्मात्। "जुगुप्साविराम—" इत्यपादाने ५मी।

2. कुसचिव etc.—See व्याख्या। Telang reads राज्यभारः for राज्यतन्त्रः, but दृष्टdoes not seem to be suitable with respect to भार which is usually spoken of as ऊढ, धृत etc. तन्त्र is इतिकर्त्तव्यता decision, adoption of measures etc. राज्यस्य तन्त्रम्=the steps to be taken at emergencies of state. "इतिकर्त्तव्यता तन्त्रमुपायस्य क्रियासाधकः" इति विकाण्डशेषः। Cf.—"अस्मासु आरोपितराज्यतन्त्रभारः"—Act I, *ante*, also "प्रजाः प्रजाः स्वा इव तन्त्रयित्वा"—Sak. Act V.

3. साधर्म्यम्—समानो धर्मः सधर्मः with समान changed to स। स एव इति सधर्म+ष्यञ् स्वार्थे। Or समानो धर्मः अस्य इति सधर्म+अणिच् सधर्मा। सधर्मणः भावः इति सधर्मन्+ष्यञ् साधर्म्यम् resemblance.

4. मदनुकृतेः—मम अनुकृतिः अनुकरणम् etc, शेषे षष्ठी। दृष्टि notices the reading मदनुकृतौ विषये, अधि' ७मी।

5. प्रधानवैरम्—प्रधान principal मुख्य, *i. e.*, राजा। तेन वैरम्। The two cases have no similarity except in one point, namely, the attack is on the king. The kings however are dissimilar; the aggressors—myself and yourself—are dissimilar too. Similarity in results cannot be expected under these conditions, so desist before you are disgraced.

15. (विचिन्त्य) अथवा नातिमात्रम् अत्र वस्तुनि मया मनः खेदयितव्यम्। कुतः—

मदभ्यर्थैः किल सोऽपि पर्वतसुतो व्यालैः प्रविष्टान्तरैर्-
उद्युक्ताः स्वनियोगसाधनविधौ सिद्धार्थकाद्याः स्त्रियः।

K. R.—Mudra—15.

क्रत्वा सम्प्रति कैतवेन कलहं मौर्य्येन्दुना राक्षसं
भेत्स्यामि स्वमतेन भेदकुशलस्त्वेष प्रतीपं द्विषः ॥ १३ ॥

(*Reflecting*) Or, my mind need not be troubled too much by me in this matter. (Do you ask) Why ?—Indeed, he too, the son of Parvata, is surrounded by my afficers; that have gained his heart ; spies too such as Siddharthaka and others are engaged in the matter of carrying out their mission. Clever at alienation as I am, I will now having falsely picked up a row with the moon-like Maurya sever the antagonistic Rakshasa from our enemy at my will.

अन्वयः ॥ स पर्वतसुतः अपि प्रविष्टान्तरैः मदभृत्यैः व्याप्तः किल। सिद्धार्थकाद्याः स्पशाः स्वनियोगसाधनविधौ उद्युक्ताः। भेदकुशलस्तु (अहम्) सम्प्रति कैतवेन मौर्य्येन्दुना कलहं कृत्वा प्रतीपं राक्षसम् एष स्वमतेन द्विषः भेत्स्यामि। व्याख्या—'स पर्वतसुतोऽपि' पर्वतकपुत्रो मलयकेतुश्च 'प्रविष्ट' कृतपदम् 'अन्तर' हृदयं यैः तादृशैः वशीकृतमन चित्तैः इत्यर्थः 'मदभृत्यैः' मत्सेवकैः भागुरायणादिभिः 'व्याप्तः किल' परिवारित एव। 'सिद्धार्थकाद्याः' सिद्धार्थकप्रमुखाः 'स्पशाः' चराः 'स्वनियोगस्य' निजकर्मणः, राक्षसवञ्चनरूपस्य 'साधनविधौ' यथोपदेशानुष्ठाने 'उद्युक्ताः' व्यापृताश्च। भागुरायणादयो मलयकेतौ सिद्धार्थकादयः राक्षसे व्यापारिता भेदार्थं निपुणं यतमानास्तिष्ठन्ति। 'भेदे' गृहविच्छेदे 'कुशलस्तु' पटुः अहं पुनः 'सम्प्रति' अद्य 'कैतवेन' कृत्रिम 'इन्दुतुल्येन मौर्य्येण' सह 'कलहं कृत्वा' विवादं प्रस्तुत्य 'प्रतीपं' प्रतिकूलं 'राक्षसं एषः' अचिरात् 'स्वमतेन' आत्मच्छन्देन यथेच्छमित्यर्थः 'द्विषः' अतः मलयकेतोः 'भेत्स्यामि' अपसारयिष्यामि, अपरक्तं करिष्यामि।

CHARCHA

1. उद्युक्ताः—युज समाधौ दिवादिरकर्मकः। उद्+युज+क्त कर्त्तरि वर्त्तमाने। See next.

2. भेत्स्यामि स्वमतेन—स्वं मतम् own will. तेन। इच्छा करणे तृतीया वा। स्वमतेन भेत्स्यामि=यथारुचि भेत्स्यामि, *i. e.*, this भेदकर्म is easy to me.

The reason precedes—Malayaketu is being worked upon by my men ; Siddharthaka, etc., are busy with Rakshasa. Both of them are thus within my clutches. Hence स्वमतेन भेत्स्यामि with Rakshasa duped by the sham quarrel. See next.

3. भेदकुशलस्त्वेषः—एषः goes with भेत्स्यामि implying अविलम्ब in the भेदक्रिया। Cf.—"एष त्वामभिनवकण्ठशोणितार्थी"—Sak. Act VI. *Dhundhi* reads भेदकुशलोऽस्त्वेषः and explains—" 'एषः' राक्षसः 'स्वमतेन' स्वसम्मत्या 'भेदकुशलः अस्तु' चन्द्रगुप्तात् चाणक्यं भेत्स्यामि इति खलिन् कुशलमन्यः अस्तु। न तु अस्य तमेव सामर्थीपौष्कल्यं बुद्धिबलञ्च अस्ति इति भावः"।

4. प्रतीपम्—प्रतिगताः आपः अस्मिन् इति प्रति + अप् + अ (समासान्त) = प्रति + ईप = प्रतीपः। This is by "द्यान्तरूपसर्गेभ्यः अप ईत्" which clanges अप into ईप। The समासान्त is by "ऋक्पूः—"। प्रतीपः lit. means the place where the current turns. Hence *opposed.* तम्। Qual. राक्षसम्। The intervention of स्वमतेन भेदकुशलस्त्वेषः renders the construction obscure (दूरान्वय)।

16. (प्रविश्य) कञ्चुकी—कष्टं खलु सेवा—
भेतव्यं नृपतेस्ततः सचिवतो राज्ञस्ततो वल्लभाद्-
अन्येभ्यश्च वसन्ति येऽस्य भवने लब्धप्रसादा विटाः।
दैन्यादुन्मुखदर्शनापलपनैः पिण्डार्थमायस्वतः
सेवां लाघवकारिणीं कृतधियः स्वाने श्ववृत्तिं विदुः ॥१४॥

Chamberlain (*Entering*) Service is misery indeed—The king has to be dreaded, next the ministers, then the king's favourite, and also others—pimps who live in his house with favour gained. Rightly do the right-thinking deem as the dog's routine, the service of people toiling for bread with looks upturned and mis-representations through helplessness—service that imparts meanness.

अन्वयः॥ नृपतेः भेतव्यम् ; ततः सचिवतः ; ततो राज्ञो वल्लभात्, अन्येभ्यश्च ये लब्धप्रसादा विटा अस्य भवने वसन्ति। स्वाने कृतधियः दैन्यात् उन्मुखदर्शना-

पलपनैः पिण्डार्थम् आयस्यतः लाघवकारिणीं सेवां श्ववृत्तिं विदुः। व्याख्या—कष्टं खलु सेवा इति यदुक्तं तदेव प्रपञ्चयति। 'नृपतेः' राज्ञः 'भेतव्यं' भक्तितव्यं कदा वा कुप्येदिति। 'ततः' तदनन्तरं 'सचिवतः' अमात्यात् भेतव्यं सोऽपि राजैव नियोऽधिकारी इति। 'ततः' तदनन्तरं 'राज्ञो वल्लभात्' प्रीतिपात्रात् भेतव्यं स हि कुपितः राजानं विज्ञापयेत् इति। 'अन्येभ्यश्च' एतद्व्यतिरिक्तेभ्योऽपि भेतव्यम्। के ते इत्याह—'ये लब्धः प्रसादः' अनुग्रहः यैः तादृशाः 'विटाः' धूर्ताः 'अस्य' राज्ञः 'भवने' गृहे 'वसन्ति' तेभ्योऽपि भेतव्यम्। तैरपि राज्ञे निवेद्य अप्रियं कर्तुं शक्या इति 'स्थाने' सुष्ठु युक्तमेव यत् 'कृतधियः' विनीतमतयः पण्डिता इत्यर्थः, अतो 'दैन्यात्' दरिद्रतया हेतुना 'उन्मुखं' मुखमुन्नमय्य यानि 'दर्शनानि' वीक्षितानि यानि च 'अपलपनानि' मिथ्याभाषणानि तैः करणैः—पिण्डार्थं भोज्यार्थम् 'आयस्यतः' क्लिश्यमानस्य सेवकस्य 'लाघवकारिणीं' कृपणताजननीं 'सेवां' प्रभुपरिचर्यां 'श्ववृत्तिं' कुक्कुरवृत्तिं 'विदुः' मन्यन्ते।

CHARCHA

1. कष्टम्—सामान्ये नपुंसकम्। Misery. It is the general name of which सेवा is a class. Hence the difference of gender is of no consequence.

2. उन्मुख etc.—उद्गतं मुखं यस्मिन् तद् उन्मुखम्। उन्मुखं यथा तथा दर्शनम् उन्मुखदर्शनम् looking with face upturned. The look is directed at the face of the master. This is what the dog does the object is to divine the master's intentions by a study of his face and act accordingly to please him. The same is the lot of the needy server. अप + लप + ल्युट् भावे अपलपन false statement. The dog's अपलपन is his low whining. *Dhundhi* says "अविधेयं अपलपनं ताड़नभयेन गात्रसङ्कोचनम्"।

3. कृतधियः—कृता trained. कृता धीः एषाम् of trained intellect, *i. e.*, those who can rightly judge matters.

4. स्थाने—अव्यय meaning युक्तम्। Expresses the despondency of the Chamberlain. What a hard lot! I have to please the

master and also the minister, but just now the two are working at cross purposes. To please one I have to offend the other. O woe !

17. (परिक्रम्य अवलोक्य च) इदमार्यचाणक्यगृहम् । यावत् प्रविशामि । (प्रविश्य अवलोक्य च) अहो राजाधिराज-मन्त्रिणो विभूतिः । तथाहि—

उपलशकलमेतद्भेदकं गोमयानां
वटुभिरुपहृतानां वर्हिषां कूटमेतत् ।
शरणमपि समिद्भिः शुष्यमाणाभिराभिर्-
विनमितपटलान्तं दृश्यते जीर्णकुड्यम् ॥१५॥

(*Going round and observing*) This is Noble Chanakya's house. Let me enter. (*Entering and observing*) O the affluence of the minister of the king of kings ! Thus—Here is seen a piece of stone to pound cow-dung with ; there appears a heap of Kusa grass collected by young disciples ; the shed too is being seen with dilapidated walls and the corners of the roof borne down with yonder sacrificial fagots that are drying.

अन्वयः ॥ गोमयानां भेदकम् एतत् उपलशकलं (दृश्यते) ; वटुभिः उपहृतानां वर्हिषाम् एतत् कूटं (दृश्यते), शुष्यमाणाभिः आभिः समिद्भिः विनमितपटलान्तं जीर्णकुड्यं शरणमपि दृश्यते । व्याख्या—शुष्काणां 'गोमयानां' गोपुरीषपिण्डानां 'भेदकं' पेषकम् 'एतत्' इदम् 'उपलशकलं' प्रस्तरखण्डं दृश्यते । 'वटुभिः' शिष्यभूतैः ब्राह्मण-कुमारैः 'उपहृतानाम्' आहृत्य रचितानां 'बर्हिषां' कुशानाम् एतत् 'कूटम्' एष राशिः दृश्यते । 'शुष्यमाणाभिः' आतपे शोषं गच्छन्तीभिः 'आभिः' पुरोवर्त्तिनीभिः 'समिद्भिः' यज्ञकाष्ठैः 'विनमितः' अवपीडितः 'पटलान्तः' चालप्रान्तः यस्य तादृशं 'जीर्णं' काल-भ्रष्टं 'कुड्यं' भित्तिः यस्य तादृशं 'शरणमपि' गृहञ्च दृश्यते खल्वयते । अहो विभूतिः इति सीतप्रासीक्तिः । "अनेनास्य अप्रतिग्रहत्वकर्मठत्वादयः श्रीविषयगुणा उक्ता" इति ढुण्ढिः ।

CHARCHA

1. उपल etc.—उपल stone. शकल piece. उपलस्य शकलम्।

2, गोमयानाम्—गो: पुरीषम् इति गो + मयट् गोमयम् cow-dung; गोमय cakes are used as fuel. कृद्योगा कर्मणि षष्ठी।

3. कूटमेतत्—*Dhundhi* reads स्तूपम् for कूटम्। The meaning is the same. But स्तूप is masculine; "फेनस्तूपौ सयूपकौ" इत्यमर:। कूट is both masculine and neuter. "कूटोऽस्त्री निश्चले राशौ" इति मेदिनी। Prefer कूट।

4. शरणम्—उपलशकलम् and बर्हिषां कूटम् are on the yard and noticed first. Then he looks at the cottage (शरण) itself. "शरणं गृहरक्षिवो:" इत्यमर:।

5. समिद्भि:—समिध्यते आभि: इति सम् + इन्ध + क्विप् करणे समिध: sacrificial fagots, etc. अनुक्ते कर्त्तरि श्या।

6. विनमित etc.—वि + नम + णिच् + क्त + कर्मणि विनमित or विनामित (see Magha. 1, 13). पटल roof. "पटलं छदि:" इत्यमर:। छदिस् is the vernaculer छात। See व्याख्या। Adj. to शरणम्।

7. जीर्णकुड्यम्—कुड्य wall भित्ति। "भित्ति: स्त्री कुड्यम्" इत्यमर:।

18. तत् स्थाने खल्वस्य वृषलो देवश्चन्द्रगुप्त इति। कुत:—

स्तुवन्त्यश्रान्तास्या: क्षितिपतिमभूतैरपि गुणै:
प्रवाच: कार्पण्याद् यदवितथवाचोऽपि पुरुषा:।
प्रभावस्तृष्णाया: स खलु सकल: स्यादितरथा
निरीहाणामीशस्तृणमिव तिरस्कारविषय: ॥१६॥

So it is no wonder (lit.—it is proper) that to him Sire Chandragupta is only a Sudra. (Do you ask) How?—It is indeed the full (manifestation of the) power of desire that even men of truthful speech (becoming) garrulous from (a sense of) helplessness belaud the lord of the Earth with mouths untired even for virtues unpossessed. If it were

otherwise, the king would become like straw an object of contempt to people whose desire is gone completely.

CHARCHA

1 स्थाने etc.—देवश्चन्द्रगुप्तः अस्य' चाणक्यस्य सम्बन्धे 'वृषलः' शूद्रमात्रम् इति यत् तत् 'स्थाने' युक्तमेव। Chanakya treats Chandragupta as a mere Sudra ignoring his royalty. This he can for reasons below. Dhundhi reads वृषलीयश्चन्द्रगुप्तः ior वृषलो देवश्चन्द्रगुप्तः। वृषलशब्देन वदितुमर्हः इति वृषल + वद + क्यप् कर्मणि वृषलीयः one deserving to be called a वृषल। The rule is "वदः सुपि क्यप् च"। But the कञ्चुकी never speaks of the king by name without adding देव। Hence we prefer देवश्चन्द्रगुप्तः to bare चन्द्रगुप्तः। There is *apparently* another objection to Dundhi's reading, namely, the क्यप् here, according to some, is not available in the कर्मवाच्य। भावे has to be attached to this rule from the next rule "भुवो भावे"। It is true Bhattoji accepts this view. But Haradatta refers to it with disapproval—"उत्तरसूत्रादिह भावग्रहणमपेक्षणीयम् इत्याहुः"। इत्याहुः—So they say—implies disapproval. Nagesa agrees with Haradatta and openly discards भावे। Thus—"इदं चिन्त्यम्। 'भुवो भावे' इति सूत्रे उत्तरार्धे भावग्रहणस् इति भाष्योक्तेः।.....भावे 'ब्रह्मोद्यम्' इत्यादि तु कान्दसम् बाहुलकाद्वा इति बोध्यम्"। Cf. also—"लः कर्मणि च भावे चाकर्मकेभ्यः", "तयोरेव कृत्यक्तखलर्थाः" which donot allow भावे कृत्य after a सकर्मक root like वद। This is why we say the objection is only apparent.

2. अव्ययः॥ अवितथवाचः अपि पुरुषाः कार्पण्यात् प्रवाचः (सन्तः) अश्रान्तास्याः (भूत्वा) अभूतैरपि गुणैः क्षितिपतिं स्तवन्ति (इति) यत् स खलु तृष्णायाः सकलः प्रभावः। इतरथा निरीहाणाम् ईदृशः तृणमिव तिरस्कारविषयः स्यात्। व्याख्या—'न वितथा' मिथ्या 'वाक्' वाणी येषां तादृशाः यथार्थवचनाः 'अपि पुरुषाः' कार्पण्यात् लघुतया असमर्थतया इत्यर्थः 'प्रवाचः' वाचालाः सन्तः 'अश्रान्त' श्रमरहितम् 'आस्य' मुखं येषां तादृशाः बहुभाषणेऽपि श्रमरहिता भूत्वा 'अभूतैः' अवास्तवैः 'अपि गुणैः' असतीऽपि गुणान् आरोप्य इत्यर्थः 'क्षितिपतिं' भूपालमुपश्लोकयति इति 'यत् स खलु' निश्चितं 'तृष्णायाः' लोभस्य 'सकलः' सम्पूर्णः 'प्रभावः' महिमा। लोभादेव सत्यवागपि मिथ्यागुणानुल्लिख्य प्रभुं स्तौति इत्यर्थः। 'इतरथा' अन्यथा असति लोभे

इत्यर्थः सर्वे 'निरीहाः' निष्कामाः सम्पद्यन्ते। तादृशानां सम्बन्धे 'ईशः' प्रभुः राजा इत्यर्थः 'तृणमिव तिरस्कारस्य' अवज्ञायाः 'विषयः' पात्रं 'स्यात्' भवेत्, यथा चन्द्रगुप्तस्याणक्यस्य। अयं हि "निस्पृहत्वात् राजानमपि तृणीकृत्य भृत्यवदुपदिशति" इति ढुण्ढिः।

3. अश्रान्तास्याः—See व्याख्या। Qual. पुरुषाः। Telang reads श्रान्तास्याः। भविष्यदभिप्रायोऽयं निर्देशः। स्तुवन्ति till they are श्रान्तास्याः।

4. अभूतैः—भूत is सत्य truth "युक्तेष्वादाहृते भूतं प्राप्यतीते समे त्रिषु" इत्यमरः। अभूत means virtues the king does not possess. This is मिथ्याभाषण।

5 प्रवाचः—प्रभूता वाक् एषाम्। Hence श्रान्ति is expected yet they are अश्रान्तास्याः। Reasons below.

6. कार्पण्यात्—कृपण is असमर्थ। Cf.—"परपरिभावाक्रान्तिकृपणैः"—Act II. It also means लघु as in "न कृपणा प्रभवत्यपि वासवे"। कार्पण्य is the reason for मिथ्याभाषण etc.

7. अवितथवाचः—तथ or तथा is सत्य true. Cf.—"आर्योधनं ननु किमात्य सखे तथेति"। विगतं तथा अस्याः वितथा untrue, cf.—"न वितथा परिहास-कथास्वपि"। न वितथा अवितथा true. तादृशी वाणीषाम्। Even such people utter lies and any amount of them. This is true कार्पण्य। Qual. पुरुषाः।

8. प्रभावः—प्रकृष्टो भावः प्रभावः, प्रादितत्—। We cannot attach घञ् directly owing to the prohibition "श्रिणीभुवोऽनुपसर्गे"।

9. तृष्णायाः—Here all these are attributed to तृष्णा, while above we have कार्पण्य as the reason. This is not contradictory, because तृष्णा causes कार्पण्य which then works on the individual.

10. सः—यत् सः is quite regular. विधेयप्राधान्यात् पुंलिङ्गता।

11. सकलः—कला is अंश part. कलाभिः सह with all parts, *i.e.*, full.

12. तिरस्कार etc.—तिरस् + कृ + घञ् भावे तिरस्कार or तिरःकार by "तिरसोऽन्यतरस्याम्"। See व्याख्या।

19. (विलोक्य सभयम्) अये अयमार्यचाणक्यस्तिष्ठति—

यो नन्दमौर्यनृपयोः परिभूय लोकम्
अस्तोदयावदिशदप्रतिभिन्नकालम्।

पर्य्यायपातितहिमोष्णमसर्वगामि
धाम्नातिशाययति धाम सहस्रधाम्नः ॥ १७ ॥
(जानुभ्यां भूमौ निपत्य) जयत्वार्य्यः ।

(*Observing—with awe*) Ha ! Here is sitting Noble Chanakya—who, defying the *Loka* (world) directed the fall and rise of kings Nanda and Maurya, but not at different times, and thus causes his glory to surpass the glory of the thousand-rayed (sun) which does not reach all (simultaneously) and by whom (therefore) heat and cold are let down by turns.

(*Touching the ground with the knees*) Let Noble Sir prosper.

CHARCHA

1. अये अयम् etc.—The Chamberlain suddenly notices Chanakya, hence the exclamation of surprise. *Dhundhi* reads तदयम् and explains सः अयम् तदयम्, कर्मधा— । The two are better uncompounded.

2. अन्वयः ॥ यः लोकं परिभूय अप्रतिभिन्नकालं नन्दमौर्य्यनृपयोः अस्तोदयौ अदिशत् (अतएव) सहस्रधाम्नः असर्वगामि पर्य्यायपातितहिमोष्णं धाम धाम्ना अतिशाययति । व्याख्या—'यः' आर्य्यचाणक्यः 'लोकं' निखिलं भुवनं 'परिभूय' अवमत्य नन्दामात्यादीन् नीत्या मोहयित्वा इत्यर्थः 'प्रतिपुरुषं भिन्नः कालो' यस्मिन् कर्मणि तद् यथा 'न' भवति तथा समकालमेव इत्यर्थः 'नृपस्य नन्दस्य नृपस्य मौर्य्यस्य' च 'अस्तं' तिरोभावम् 'उदयम्' आविर्भावञ्च 'अदिशत्' आज्ञापयामास घटयामास इत्यर्थः अतएव 'सहस्रधाम्नः' सूर्य्यस्य 'सर्वं' निखिलं भुवनं न गच्छति न व्याप्नोति यत् तादृशं 'पर्य्यायेण' कालक्रमेण 'पातितम्' अवतारितं 'हिमं' शीतम् 'उष्णम्' आतपश्च येन तादृशं 'धाम' तेजः 'धाम्ना' स्वतेजसा 'अतिशाययति' अतिक्रामयति' । रवितेजः अर्द्धलोकव्यापि, सर्वलोकव्यापि तु चाणक्यतेजः । अपि च रवितेजः पर्य्यायेण उष्णं हिमञ्च जायते, चाणक्यतेजः पुनः युगपदेव नन्दस्य हिमं मौर्य्यस्य उष्णं जातम् । एवं रवेरपि परिभावी अयमार्य्यचाणक्यस्तिष्ठति इति पूर्वेण सम्बन्धः ।

3. लोकम्—लोक = world, *i. e.*, the people. In the case of the sun, *Dhundhi* thinks it stands for the लोकालोक mountain

about which the sun is supposed to revolve lighting only the half of the mountain turned towards it at the time.

4. पर्य्याय etc.—परि + इ or अय + घञ् भावे पर्य्यायः turn हिमञ्च उष्णञ्च हिमोष्णम् or हिमोष्णे by "विप्रतिषिद्धं चानधिकरणवाचि"। Qual. धाम (whic is obj. of अतिशाययति)। Now see व्याख्या।

5. असर्वगामि—This is because it is blocked by the लोकालोक mountain. Even without the mountain sun light is असर्वगामि because it illumines only half the globle at a time.

6. अतिशाययति—अति + शी + णिच् + लट् तिप्। धाम (निजधाम) सहस्रधाम्नो धाम अतिशेते = धाम्ना (निजधाम्ना, अनुक्ते कर्त्तरि तृतीया) सहस्रधाम्नो धाम अतिशाययति।

20. चाणक्यः—वैहीनरे, किमागमनप्रयोजनम् ?

Chanakya—Vaihinari, what is the object of your coming.

कञ्चुकी—आर्य्य प्रणतिसंभ्रमसमुच्चलितभूमिपालमौलिमालामाणिक्यशकलशिखापिशङ्गीकृतपादपद्मयुगलः सुगृहीतनामधेयो देवश्चन्द्रगुप्त आर्य्यं शिरसा प्रणम्य विज्ञापयति—"अकृतक्रियान्तरायम् आर्य्यं द्रष्टुमिच्छामि" इति।

Chamberlain—Noble Sir, Sire Chandragupta, of auspicious name, whose pair of lotus-feet is rendered brown by shoots of lustre of the pieces of gems that are shaken on the crest of kings through haste at obeisance, after having saluted Noble Sir with his head, says this—"I wish to see Noble Preceptor without interference to his daily rites."

चाणक्यः—वृषलो मां द्रष्टुमिच्छति ? वैहीनरे, न खलु वृषलस्य श्रवणपथं गतोऽयं मत्कृतः कौमुदीमहोत्सवप्रतिषेधः।

Chanakya—Vrishala wishes to see me ? Vaihinari, is it not that this prohibition of the Kaumudi festival by me has reached the ears of Vrishala ?

कञ्चुकी—आर्य्य, अथ किम् ?

Chamberlain—What else (yes) Noble Sir ?

चाणक्यः—(सक्रोधम्) आः केन कथितम् ?

Chanakya—(*In anger*) Ha, by whom told ?

कञ्चुकी—(सभयम्) प्रमीदत्वार्य्यः। स्वयमेव सुगाङ्गप्रासादगतेन देवेन अवलोकितम् अप्रवृत्तकौमुदीमहोत्सवं पुरम्।

Chamberlain—(*In fright*) May it please Noble Sir, the city with the Kaumudi festival uncommenced was noticed by Sire himself sitting on the Suganga Palace.

चाणक्यः—आ ज्ञातम्। ततो भवद्भिः अन्तरा प्रोत्साह्य कोपितो वृषलः। किमन्यत् ?

Chanakya—Ah ! I see. Then at this opportunity the Vrishala was incited and angered by you all ; what else could it be ?

कञ्चुकी—(भयं नाटयंस्तूष्णीमधोमुखं तिष्ठति)।

Chamberlain—(*stands mute with face downcast acting fright*).

CHARCHA

1. प्रणति etc.—'प्रणतौ' प्रणमाकरणे यः 'सम्भ्रमः' त्वरा तेन 'समुच्चलितानि' जातप्रकम्पानि यानि 'भूमिपालानां मौलिषु' चूडासु स्थितानां 'मालानां माणिक्यप्रकाशानि' रत्नखण्डानि तेषां 'शिखाभिः' किरणैः 'पिञ्जरीकृतं पिञ्जरीकृतं 'पादपद्मयुगलं' चरणारविन्दद्वन्द्वं यस्य तादृशः। Qual. चन्द्रगुप्तः।

2. अकृत etc.—अन्तर् मध्ये अयनम् इति अन्तर+अय+घञ् भावे अन्तरायः obstruction क्रियाया अन्तरायः। अकृतः क्रियान्तरायः यस्मिन् कर्मणि तद् यथा तथा ; qual. दर्शनक्रिया। Or अकृतः क्रियान्तरायो येन तम् ; qual. आर्य्यम्।

3. अन्तरा—अव्यय meaning अवकाश interval. Cf.—"न खलु अन्तरा दृष्टा त्वया देवी"—Sak. Act VI. Here it means opportunity.

4. प्रोत्साह्य—प्र + उद् + सह + णिच् + ल्यप् having urged on.

21. चाणक्यः—अहो राजपरिजनस्य चाणक्योपरि विद्वेषपक्षपातः। अथ क्व वृषलः ?

Chanakya—O the leaning of the attendants of the king to the side of hatred towards Chanakya ! Well, where is Vrishala ?

कञ्चुकी—(भयं नाटयन्) आर्य्य सुगाङ्गतेन देवेन अहमार्य्यपादमूलं प्रेषितः।

Chamberlain—(*Acting fright*) Noble Sir, I was ordered to Noble Sir's feet by Sire sitting on the Suganga.

चाणक्यः—(उत्थाय) सुगाङ्गमार्गमादेशय।

Chanakya—(*Rising*) Show me the way to the Suganga.

कञ्चुकी—इत इतः आर्य्यः। (उभौ परिक्रामतः)।

Chamberlain—This is the Suganga Palace. Let Noble Sir go up slowly.

कञ्चुकी—एष सुगाङ्गप्रासादः। शनैरारोहतु आर्य्यः।

चाणक्यः—(नाट्येन आरुह्य अवलोक्य च) अये सिंहासनमध्यास्ते वृषलः। साधु साधु—

नन्दैर्विमुक्तमनपेक्षितराजवृत्तैर्-
अध्यासितञ्च वृषलेन वृषेण राज्ञाम्।
सिंहासनं सदृशपार्थिवसङ्गतञ्च
प्रीतिं परां प्रगुणयन्ति गुणा ममैते ॥ १८ ॥

Chanakya—(*Acting ascent and noticing*) Ha ! Vrishala is seated on the throne ! Bravo ! This throne has been vacated by the Nandas who disregarded all kingly duties, is

occupied by Vrishala the best of kings, and is joined to a king worthy of it—these benefits (lit. virtues) promote great joy in me.

CHARCHA

1. विद्वेष etc.—पक्षे पातः leaning. विद्वेषे पक्षपातः। Nom. to भवति understood.

2. सिंहासनम्—"अधिशीङ् स्थासां कर्म" इत्याधारस्य कर्मत्वम्।

2A. अधि + आस + लटते = अध्यास्ते sits.

3. अन्वयः॥ सिंहासनम् अनपेक्षितराजवृत्तैः नन्दैः वियुक्तं, राज्ञा वृषेण वृषलेन अध्यासितञ्च, सदृशपार्थिवसङ्गतञ्च—एते गुणा मम परां प्रीतिं प्रगुणयन्ति। व्याख्या—इदं 'सिंहासन' सिंहाङ्कं राजासनम् 'अनपेक्षितम्' अनाहृतं 'राजवृत्त' राजधर्मः यैः तादृशैः 'नन्दैः वियुक्त' विच्छिन्नम् इत्येको गुणः। इदं 'राज्ञा वृषेण' पुङ्गवेन मुख्येन इत्यर्थः 'वृषलेन' शूद्रेण चन्द्रगुप्तेन 'अध्यासितञ्च' आक्रान्तमपि इति द्वितीयो गुणः। अनया च आक्रान्त्या इदं 'सदृशेन' आत्मानुरूपेण 'पार्थिवेन' राज्ञा अद्य 'सङ्गतञ्च' युक्तमपि इति गुणसप्तकीयः। 'एते गुणाः' अभ्युदयाः जगच्चङ्क्रमणानि इत्यर्थः 'मम परां प्रीतिम् आनन्दं 'प्रगुणयन्ति' समाहरन्ति जनयन्ति इत्यर्थः। यद्वा—'एते मम गुणाः' मदीयानि अवदानानि इत्यादि।

4. अनपेक्षित etc.—राज्ञां वृत्तम् royal duties. These are—(1) collection by fair means, (2) protection of the subjects. (3) maintenance of the subjects, (4) bounties to worthy objects. "न्यायेनार्जनमर्थानां रक्षणं पालनं तथा। सत्पात्रे विनियोगश्च राजवृत्तं चतुर्विधम्॥" *Dhundhi* reads राजराजैः and explains "अनपेक्षितराजराजैः तृणीकृतकुबेरैः" meaning thereby that the Nandas were immensely rich. This does not enter into the spirit of the verse at all. The point is—a bad king is gone and a good one has come in his place. तृणीकृतकुबेरैः cannot imply that the kings were unworthy ones.

5. वृषेण—वृष the best. "शुक्लेऽथ मूषिके श्रेष्ठे सुकृते वृषभे वृषः" इत्यमरः। But some think, perhaps justly, that this is the sense only when वृष is the उत्तरपद in an उपमितकर्मधा—, *e. g.*, रघुवृष, कपिवृष etc. Cf.—"श्रेष्ठे स्यादुत्तरस्थश्च" इति हैमभेदिन्यौ।

6. सदृश etc.—समान + दृश + क्विप् कर्तरि सदृशः। पृथिव्या ईश्वरः इति पृथिवी + अञ् पार्थिवः। Now see व्याख्या।

* 7. प्रगुणयन्ति—प्रदत्तो गुणः अस्मिन् प्रगुणः strung. The reference is to a bow. Hence ready for work as in "धारयकं गजमिव प्रगुणीकरोमि" Act I, Sl. 26. In the case of प्रीति this means—ready to show itself. प्रगुणान् कुर्वन्ति इति प्रगुण + णिच् (नामधातु) + लट् अन्ति। Nom. गुणाः।

22. (उपसृत्य) विजयतां वृषलः।

(*Advancing*) Let Vrishala prosper.

राजा—(आसनादुत्थाय) आर्य्य, चन्द्रगुप्तः प्रणमति। (इति पादयोः पतति)।

King—(*Rising from the throne*) Noble Preceptor, Chandragupta bows uuto you (*falls at his feet*).

चाणक्यः—(पाणौ गृहीत्वा) उत्तिष्ठोत्तिष्ठ वत्स—

आ शैलेन्द्राच्छिलान्तःस्खलितसुरनदीशीकरासारशीतात्
तीरान्ताच्चैकरागस्फुरितमणिरुचो दक्षिणस्यार्णवस्य।
आगत्यागत्य भीतिप्रणतनृपशतैः शश्वदेव क्रियन्तां
चूड़ारत्नांशुगर्भास्तव चरणयुगस्याङ्गुलीरन्ध्रभागाः॥ १९॥

Chanakya—(*Taking up by the hand*) Arise, arise my son—May the crevices between the toes of your feet be ever rendered impregnated with the lustre of the gems on their crest, by hundreds of kings prostrating themselves in awe coming, ever and anon, (from all parts)—from the lord of the hills cool with the shower of sprays from the divine stream that had alighted between his rocks down to the beach of the Southern ocean having lustres of gems shining in various shades.

CHRCHA

1. विजयताम्—"विपराभ्यां जेः" इत्यात्मनेपदम्।

2. अन्वयः॥ शिलान्तःस्खलितसुरनदीशीकरासारशीतात् शैलेन्द्रात् आ, चैकरागस्फुरितमणिरुचो दक्षिणस्य अर्णवस्य तीरात् आ, आगत्य आगत्य भीतिप्रणतनृपशतैः त्वं चरणयुगस्य अङ्गुलीरन्ध्रभागाः शश्वदेव चूड़ारत्नांशुगर्भाः क्रियन्ताम्। व्याख्या—

'शिलानां' प्रसरखण्डानां 'अन्तः' मध्ये 'स्खलिता' आकाशाच्युता या 'सुरनदी' देवसरित् गङ्गा तस्याः 'शीकराणां' जलकणानां यः 'आसारः' वर्षणं तेन 'शीतात्' शीतलात् 'शैलेन्द्रात्' गिरिराजात् हिमालयात् 'आ' तमेव गिरिराजम् उत्तरतः अवधिं कृत्वा 'नैकैः' बहुभिः 'रागैः' वर्णैः 'स्फुरिता' द्योतमाना 'मणिरुचः' रत्नभासः यस्मिन् तादृशस्य 'दक्षिणस्य अर्णवस्य' दक्षिणसागरस्य 'तीरात्' उत्तरकूलात् 'आ' तदेव कूलं 'दक्षिणतः' अवधिं कृत्वा 'आगत्य आगत्य' अविरतम् उपसृत्य 'भीत्या' भयेन 'प्रणतानि' यानि 'नृप-शतानि' राजमण्डलानि तैः 'तव चरणयुगस्य' पादद्वयस्य 'अङ्गुलीनां रन्ध्रभागाः' विवर-प्रदेशाः 'ग्रस्तदेव' सदैव 'चूडास्थितानां रत्नानाम् अंशवः' किरणाः 'गर्भे' मध्ये येषां तादृशाः मौलिमणिकिरणपूरिताः 'क्रियन्ताम्' आपाद्यन्ताम्।

3. शैलेन्द्रात्—शैलानाम् इन्द्रः लक्षणया राजा शैलेन्द्रः the Himalaya. तस्मात्। आङ् योगे 5मी by "पञ्चम्यपाङ्परिभिः"।

4. शिलान्तः etc.—शीत cool to touch (See स्नानीभूताः Sl. 7). Qual. शैलेन्द्रात्।

5. सुरनदी etc.—The Ganges. (See सुरसरितम्, Act I. Sl. 1). शीकर spray, "शीकरोऽम्बुकणाः स्मृताः" इत्यमरः। आसार shower; "धारा-सम्पात आसारः" इत्यमरः। The river came down from Heaven which is a great height; hence there was a regular and heavy shower of sprays. Now see व्याख्या।

6. नैकराग etc.—न एकाः नैकाः, नञर्थेन नञ्शब्देन सुप्सुपा इति समासः। नैकञ्च नैकस्च नैकास्च इत्येकशेषः। Now see व्याख्या।

7. क्रियन्ताम्—"आशिषि लिङ्लोटौ" इति आशीरर्थे लोट्।

8. चूडा etc.—See व्याख्या। गडवादीनामाकृतिगणत्वात् सप्तम्यन्तस्य गर्भ-शब्दस्य परनिपातः।

23. **राजा—आर्य्यप्रसादात् अनुभूयत एव सर्वम् तदुपविशत्वार्य्यः (उभौ यथोचितमुपविष्टौ)।**

King—Through Noble Preceptor's favour all this is being already enjoyed. Let Noble Preceptor sit down. (***Both are befittingly seated***).

चाणक्यः—वृषल, किमर्थं वयमाहूताः।

Chanakya—Vrishala, why have we been summoned?

राजा—आर्य्यस्य दर्शनेन आत्मानमनुग्राहयितुम् ।

King—To let the sight of Noble Sir favour us.

चाणक्यः—(सस्मितम्) अलमनेन प्रश्रयेण । न निष्प्रयोजनम् अधिकारवन्तः प्रभुभिराह्वयन्ते ।

Chanakya—(*Smiling*) Away with this humility (*Or*—familiarity). Those who hold commission are not summoned by their masters without purpose.

राजा—आर्य्य, कौमुदीमहोत्सवप्रतिषेधस्य किं फलम् आर्य्यः पश्यति ?

King—Noble Sir, what use does Noble Sir see in prohibiting the Kaumudi festival ?

चाणक्यः—(स्मितं कृत्वा) उपालब्धुं तर्हि वयमाहूताः ।

Chanakya—(*With a smile*) So we have been summoned for censure !

राजा—शान्तं पापं, शान्तं पापम् । न हि न हि । विज्ञापयितुम् ।

King—Begone sin ! Begone sin !! No, not at all. For a representation (*i. e.*, not for censure).

चाणक्यः—यद्येवं तर्हि विज्ञापनीयानाम् अवश्यं शिष्येण वचयोऽनुरोद्धव्याः ।

Chanakya—If so, then the wishes of those to whom the representation is to be made, ought to be respected by the disciple.

राजा—एवमेतत् कः सन्देहः । किन्तु न कदाचिदार्य्यस्य निष्प्रयोजना प्रवृत्तिरित्यस्ति नः प्रत्यवकाशः ।

King—So it is, no doubt ; Noble Preceptor's steps are never aimless, so there is room for my question.

चाणक्यः—वृषल, सम्यगूहितवानसि, न प्रयोजनमन्तरा चाणक्यः स्वप्नेऽपि चेष्टते इति ।

Chanakya—Vrishala, you have guessed right, that, without an aim, Chanakya does not stir even in a dream.

राजा—आर्य्य, अतएव शुश्रूषा मां मुखरयति ।

King—Noble Sir, hence indeed a desire to hear makes me garrulous.

चाणक्यः—वृषल श्रूयताम् । इह खलु अर्थशास्त्रकाराः त्रिविधां सिद्धिम् उपवर्णयन्ति—राजायत्तां सचिवायत्ताम् उभयायत्ताञ्चेति । ततः सचिवायत्तसिद्धेः तव किं प्रयोजनान्वेषणेन ? यतो वयमेवात्र नियुक्ता वेत्स्यामः ।

Chanakya—Listen Vrishala. Authors of works on Politics speak of three kinds of success in this world—resting with the king, resting with the ministers, resting with both. Of what use then is the search for aim to you whose success rests with the minister' ? For, we ourselves, employed in the matter, shall weigh (Or—shall know).

राजा—(सकोपं इव मुखं परावर्त्तयति) ।

King—(Averts his face as if in anger).

CHARCHA

1. अनुभूयते एव—All this is already accomplished unto us and is no longer something merely to hope for.

2. अनुग्राहयितुम्—अनु + ग्रह + णिच् + तुमुन् । दर्शनम् आत्मानमनुग्राहयति = अहं दर्शनेन (अनुक्ते कर्त्तरि तृतीया) आत्मानम् अनुग्राहयामि ।

3. प्रश्रयेन—प्र + श्रि + अच् भावे प्रश्रय modesty विनय। "—निभृत विनीतप्रश्रिताः समाः" इत्यमरः। करणे ३या। करण of साध्यते etc.—understood.

4. अधिकारवन्तः—अधिकार office (see *ante*). अधिकारः अस्ति एषाम्, servants.

5. उपालब्धुम्—उप + आ + लभ + तुमुन्। उपा + लभ means to censure. Cf.—"निपुणमुपालब्धाः"—Sak. Act V.

6. विज्ञापयितुम्—वि + ज्ञा + णिच् + तुमुन् to make a representation as to one's senior.

7. विज्ञापनीयानाम् etc.—'ग्रिथ्येण' विनयेन 'विज्ञापनीयानाम्' आचार्याणां गुरूणां 'रुचयः' प्रवृत्तयः 'अनुरोद्धव्याः' मानयितव्याः। *Dhundhi* reads 'स्वैररुचयो न निरोद्धव्याः and explains 'स्वैररुचय स्वतन्त्राः गुरवो न निर्बन्धनीयाः (?) भृत्यवत् नानुयोज्याः'। He evidently construes विज्ञापनीयानां गुरूणां यः ग्रिथः, तेन स्वैररुचयः गुरवः etc. with a बहुव्रीहि in स्वैररुचयः—not a happy construction. Why not say विज्ञापनीयानां स्वैराः रुचयः न निरोद्धव्याः with a कर्मधा—। For स्वैर see स्वैरपातैः Act I, Sl. 2.

8. न कदाचित् etc.—Your रुचि is स्वैर undoubtedly, but though self-determined it is never aimless. The question "why" or "how" may be out of place in the case of an *aimless* act, but is quite relevant in the case of a deliberate step as yours always is. अव + काश + घञ् भावे अवकाश room. Cf.—"अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ"।

9. अन्तरा—An अव्यय meaning मध्ये also विना। "अन्तरेति मध्यविनार्थयोः" इति वर्द्धमानः। Here it means विना; मध्य cf.—"भवद्विरन्तरा प्रोत्साह्य etc." *ante*.

10. शुश्रूषा—श्रोतुं, प्रयोजनं श्रोतुम्, इच्छा इति श्रु + सन् + अ भावे स्त्रियाम्।

11. मुखरयति—मुखमस्ति अस्य महत् इति मुख + र मत्वर्थे a babbler वाचाल। मुखरं करोति इति मुखर + णिच् (नामधातु) + लट् तिप्।

12. राजायत्ताम् etc.—आ + यत + क्त कर्मणि आयत्ता dependant. राजनि आयत्ता etc.

13. प्रयोजन etc.—प्रयोजनस्य अन्वेषणम् etc. search after motive

or aim. This is useless for you, hence there is no room for your question. See next. करणे तया (see note 3).

14. यतः etc,—No room, because—'यतः' यत्र' यस्मिन् सिद्धिविषये 'नियुक्ताः' व्यापृताः सन्तः 'वयमेव' अहमेव सचिवस्ते 'वेत्स्यामः' विचारयिष्यामः। I shall weigh the reason, that ought to satisfy you, ought to be enough for one who depends upon his minister alone for success. विद is अनिट् in the दिवादि and रुधादि class according to व्याघ्रभूति, वामन, etc. and in the तुदादि also according to the भाष्य। "विन्दतिश्चान्द्रदौर्गादिष्टो भाष्येऽपि दृश्यते। व्याघ्रभूत्यादयस्त्वेनं नेह पेठुरिति स्थितम्॥"—*Bhattoji.* Hence वेत्स्यामः is derived from the रुधादि root—विद विचारणे। "सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे। विन्दतेर्विन्दतौ लाभे श्यन्-लुक्-श्नम् शेषिदं क्रमात्"॥—*Bhattoji.* The परस्मैपद is irregular, वेत्स्यामहे being the correct form. Or say वेत्स्यामः = वेदिष्यामः from विद ज्ञाने अदादि, the absence of इट् being irregular Prof. Hillebrandt reads वर्त्तामहे (*Trans*—we ourselves continue employed in the matter).

24. (नेपथ्ये वैतालिकौ पठतः)।

(*Two bards sing in the dressing room*).

एकः—

आकाशं काशपुष्पच्छविमभिभवता भस्मना शुक्लयन्ती
शीतांशोरंशुजालैर्जलधरमलिनां क्लिश्नती क्लृप्तिमैभीम्।
कापालीमुद्वहन्ती स्रजमिव धवलां कौमुदीमित्यपूर्वा
हासश्रीराजहंसा हरतु तनुरिव क्लेशमैशी शरद्वः॥ २०॥

First—May the Lord's person (at his Tandava) remove your troubles—the person whitening the sky with ashes that dim the lustre of *Kasa* flowers ; with the mass of rays of the moon (on the head) transforming (lit. injuring) the elephant's hide which is dark as a pouring cloud ; bearing a string of

white skulls like moon-beam ; (giving out) laughs of which the lustre is like that of swans ; and which is thus like Autmun of a wonderous (lit. unnsual) type.

अन्वयः ॥ काशपुष्पच्छविमभिभवता भस्मना आकाशं शुक्लयन्ती, शीतांशोः अंशुजालैः जलधरमलिनां ऐभीं कृत्तिं क्लिश्नती, कौमुदीमिव धवलां कापालीं स्रजमुद्वहन्ती, हासश्रीराजहंसा अपूर्वा शरदिव ऐशी तनुः वः क्लेशं हरतु । व्याख्या—प्रारब्धं ताण्डवं 'काशपुष्पस्य' काशकुसुमस्य 'छविं' कान्तिम् 'अभिभवता' तिरस्कुर्वता ततोऽपि धवलेन इत्यर्थः 'भस्मना' अङ्गरागभूतया विभूत्या ताण्डववशात् समन्तात् विकीर्णया 'आकाशं' नीलं नभः 'शुक्लयन्ती, धवलयन्ती, 'शीतांशोः' हिमरश्मेश्चन्द्रस्य मौलिगतस्य इत्यर्थः 'अंशुजालैः' मयूखमालाभिः 'जलधरः' मेघ इव या 'मलिना' नीला ताम् 'ऐभीं कृत्तिं' गजचर्म आत्मन उत्तरीयभूतं गजासुरचर्म 'क्लिश्नती' पीड़यन्ती शुभतामाधाय मलिनतां त्यजयन्ती —इति यावत् 'कौमुदीमिव' ज्योत्स्नामिव 'धवलां' शुभ्रां 'कापालीं' नरकपालत्वकल्पिता 'स्रजं' मालाम् 'उद्वहन्ती' धारयन्ती 'राजहंसः' इव 'हासश्रीः' ताण्डवोचितस्य अट्टहासस्य शोभा अस्ति यस्यां तादृशी अतएव 'अपूर्वा' नूतना पूर्वविलक्षणा 'शरदिव' ऐशी तनुः शाम्भवं वपुः 'वः क्लेशं' अवकृतं तापं 'हरतु' अपनयतु । शरत् काशैराकाशं शुक्लयति, तनुरियं ततोऽधिकैःभस्मभिः इत्येका नूतनता ; निर्जलत्वात् प्रकृत्या शुभ्रैरभ्रैः शोभते शरत्, इयन्तु अभ्रतुल्यमायतं नीलं गजालिनं चन्द्रकान्त्या धवलीकृतं धारयन्ती शोभते इत्यपरा नूतनता ; कौमुदीशुभ्रा शरत् कपालधवला च तनुः, राजहंसशुभ्रा शरत् अट्टहासदर्शितदशनैः शुभ्रा तनुः । अतएव शरदिव तनुः, न च पुनः पूर्वदृष्टा इव शरत् ।

CHAROHA

1. वैतालिकौ—विविधस्ताल: वितालः । तेन चरति इति विताल + ठक् a bard.

2. शुक्लयन्ती—शुक्लं करोति इति शुक्ल + णिच् (नामधातु) + शतृ स्त्रियाम् ।

3. कृत्तिमैभीम्—इभ an elephant. तस्य इयम् (अण्) = ऐभी । This is the hide of the demon गजासुर whom Siva had killed and whose

skin he wears as his upper garment. Cf —"चर्म चर्मीत्विप्रजेन्द्र-क्लृप्तिना स्थूटीपमं भूतिसितेन शम्भुना"—Magha I, 4. This garment he especially prefers during his ताण्डव। Cf.—"नृत्यारम्भे हर पशुपतेरार्द्र-नागाजिनेच्छाम्"।

4. सजमिव etc —इव is misplaced ; construe कौसुदीमिव सजम् etc.

5. अपूर्वा—न पूर्वा not of the previous type, a new kind. See व्याख्या।

6. हासश्री etc.—हासस्य श्रीः। हासश्रीः राजहंस इव, उपमितकर्मधा—। सः अस्ति अस्याम् इति हासश्रीराजहंस + अच् मत्वर्थे। Telang reads हास्यश्री which means the same.

7. तनुरिव etc.—Here also इव is misplaced (see सजमिव above) , construe—शरदिव तनुः।

8. शरत्—Dhundhi construe शरत् क्लेशं हरतु which seems absurd. The second verse invokes the grace of Hari , it is then incongruous to say that the first is an appeal to Autumn. Fancy the invocation of Autumn in the same breath with that of हरि। Evidently Dhundhi was misled by the misplacement of इव in the last line. In his attempts to apply the epithets to शरत्, he disregards grammar and good sense as well. Chanakya himself takes these verses as विशिष्टदेवतास्तुति (See below) and not as शरत्स्तुति , but if we construe शरत् क्लेशं हरतु it becomes at once a स्तुति of शरत्।

10. *Remark*—शरत् is supposed to render the world white all over by removing the gloom of the lowering clouds. Cf.—"हंसश्रेणीषु तारासु कुसुदसु च वारिषु। विभूतयस्तदीयानां पर्य्यस्ता यशसामिव॥" ऐशी तनु also is described above as doing the same, hence the resemblance.

25. अपि च—

प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणां
आत्मव्यापारगुर्वी जनितजललवा जृम्भितैः साङ्गभङ्गैः

नागाङ्गं मोक्तुमिच्छोः शयनमुरु फणाचक्रवालोपधानं
निद्राच्छेदाभितामा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥२१॥

Moreover—May the half-closed red-at-the-break-of-sleep eyes of Hari, desirous of leaving the wide bed of the serpent's body with the round of hoods for the pillow, ever guard you—eyes that are dull from recent opening, that are for the moment averse to face the light of the lamps of gems, that are slow in the exercise of their functions because drops of tears have been brought up by yawns with stretchings of limbs.

अन्वयः ॥ फणाचक्रवालोपधानं उरु नागाङ्गं शयनं मोक्तुमिच्छोः हरेः प्रत्ययोन्मेषजिह्मा चणं रत्नदीपप्रभाणामनभिमुखी साङ्गभङ्गैः जृम्भितैर्जनितजललवा आत्मव्यापारगुर्वी आकेकरा निद्राच्छेदाभितामा दृष्टिः वः चिरमवतु। व्याख्या—'फणानां चक्रवालं' मण्डलमेव 'उपधानं' शिरोधानं यस्मिन् तादृशम् 'उरु' विशालं 'नागाङ्गं' सर्पराजशरीररूपं 'शयनं' शय्यां 'मोक्तुमिच्छोः' हातुकामस्य 'हरेः' श्रीविष्णोः 'प्रत्ययः' अचिरः यः 'उन्मेषः' उन्मीलनं तेन 'जिह्मा' मन्दा 'चणं' मुहूर्त्तमात्रं 'रत्नदीपानां' दीपरूपाणां शेषगिरीमणीनाम् 'अनभिमुखी' पराङ्मुखी तेभ्यो व्याहृत्ता इत्यर्थः 'अङ्गभङ्गैः' गात्रायमनैः सह यानि 'जृम्भितानि' जृम्भणानि तैः 'जनितं' उद्गमितः 'जललवः' वारिबिन्दुः यस्यां तादृशी अतएव 'आत्मव्यापारे' निजकर्मणि दर्शनकर्मणि इत्यर्थः 'गुर्वी' अलसा 'आकेकरा' अर्द्धनिमीलिता 'निद्राच्छेदे' स्वापावसाने 'अभितामा' आरक्ता 'दृष्टिः' नेत्रं 'वः चिरमवतु' रक्षतु।

CHARCHA

1. प्रत्यय etc.—जिह्म is मन्दाडle अलस। "जिह्मस्तु कुटिलेऽलसे" इत्यमरः। Now see व्याख्या। Qual दृष्टिः।

2. रत्न etc.—The whole body of Vishnu is illumined by the gems on the hood of the snake-king. Cf.—"तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम्"। Hence these gems do the work of light and are described as such here. क्षणं has व्याप्तार्थे रया by "कालाध्वनोरत्यन्तसंयोगे"।

3. आत्मव्यापार etc.—'आत्मव्यापार of eyes' is seeing. See व्याख्या। This is because the eyes had watered (जनितजललवा)।

4. जृम्भिते:—जृम्भ + क्त भावे। People yawn immediately after sleep. अनुक्ते कर्त्तरि ३या।

5. नागाङ्कम्—*Dhundhi* reads नागाङ्गम् the serpent's lap. This is the bed ; on the bed is the pillow of the hoods (फणाचक्रवालोपधानम्)। But the hoods cannot be on the अङ्क (lap.) Hence नागाङ्गम् is preferable.

6. फणा etc.—चक्रवाल is मण्डल। "चक्रवालं तु मण्डलम्" इत्यमर:। Both फणा and फण are seen. Cf.—"व्यज्यन्त एते मणिभि: फणस्थै:", "तथैव तस्थु: फणरत्नशोभा:", "तत् फणामण्डलोदर्चि:", "फणाभृतां क्रादनमेकमीक्षस:" —Magha I. 34. Quel. शयनम्।

7. आकैकरा—Half closed. A पारिभाषिक word defined as "दृष्टि-राकैकरा किञ्चित् स्फुटापाङ्गे प्रसारिता। मीलितार्द्धपुटा लीके तारान्यावर्त्तनोत्तरा।"

9. *Remark*—The verse treats Hari just like an ordinary human being. The failing of sight, body etc. as noticed here are out of place in a description of the Almighty. The awakening took place on the eleventh bright night of Karttika and the verse was recited four doys later on the Kaumudi-Purnima day (see *ante*).

26. द्वितीय:—

सत्वोत्कर्षस्य धात्रा निधय इव कृता: केऽपि कस्यापि हेतोर्-
जेतार: स्वेन धात्रा मदसलिलमुचां नागयूथेश्वराणाम्।
दंष्ट्राभङ्गं मृगाणामधिपतय इव व्यक्तमानावलेपा
नाज्ञाभङ्गं सहन्ते नृवर नृपतयस्त्वादृशा: सार्वभौमा: ॥२२॥

अपि च—

भूषणाद्युपभोगेन प्रभुर्भवति न प्रभु:।
परैरपरिभूयान्नस्त्वमिव प्रभुरुच्यते ॥ २१ ॥

Second—O best of men, paramount rulers of men made by the Ordainer as the repository of the exuberence of majesty with pride and self-respect manifest like thyself, whoever they are, do not, for any reason whatsoever, brook the supercession of orders just as kings of beasts who by their own might are conquerors of the leaders of herds of tuskers emitting the fluid of ichor, do not (brook) the drawing of their teeth. Moreover—The king is not the king by reason of the enjoyment of jewellery etc. Rightly is he called king who like yourself has his orders not superceded by others.

सत्वेति। अन्वयः॥ हे नृवर, धात्रा सत्वोत्कर्षस्य निधय इव कृताः व्यक्तमाना-वलेपाः त्वादृशाः सार्वभौमा नृपतयः स्वेन धात्रा मदसलिलसुचा नागयूथेश्वराणां जेतारः मृगाणामधिपतयः दंष्ट्राभङ्गमिव कस्यापि हेतोः आज्ञाभङ्गं कैऽपि न सहन्ते। व्याख्या—हे 'नृवर' नरसिंह चन्द्रगुप्त 'धात्रा' वेधसा 'सत्वस्य' बलस्य यः 'उत्कर्षः' आधिक्यं 'तस्य' बलसम्पदः 'निधय इव' आशयाः इव 'कृताः' सृष्टाः अतएव 'व्यक्तः' स्फुटः 'मानः' आत्मादरः 'अवलेपः' गर्वश्च येषां ते 'त्वादृशाः' भवद्विधाः 'सार्वभौमाः' सर्वलोकविदिताः 'नृपतयः' नरेश्वराः 'स्वेन' निजेन 'धात्रा' प्रजापतिना बलेन इत्यर्थः 'मदसलिलं' दानवारि 'सुचन्ति' ये तादृशानां 'नागयूथेश्वराणां' करिकुलमुख्यानां 'जेतारः' जयिनः 'मृगाणामधिपतयः' पशुराजाः सिंहाः 'दंष्ट्राभङ्गमिव' दशनव्यूटिमिव 'कस्यापि हेतोः' कुतोऽपि निमित्तात् 'आज्ञाभङ्गं' शासनलङ्घनं 'कैऽपि न सहन्ते' न मर्षयन्ति तत् कथं भवान् मर्षयिष्यति? एतत् राक्षसप्रयुक्तेन म्लेच्छबलेन कृतं चन्द्रगुप्तसमुत्तेजनम्।

भूषणेति। अन्वयः॥ प्रभुः भूषणाद्युपभोगेन न प्रभुर्भवति। त्वमिव परैरपरिभूताज्ञः प्रभुरुच्यते। व्याख्या—'प्रभुः' राजा 'भूषणादीनां' रत्नादीनाम् 'उपभोगेन' अनुभवेन हेतुना 'न प्रभुर्भवति' न राजा सम्पद्यते। भूषणाद्युपभोगः प्रभुत्वे सति घटते सत्यं, किन्तु नच्चासौ प्रभुत्वस्य हेतुः। 'त्वमिव' यथा भवान् तथा 'परैः' अन्यैः आत्मेतरैरित्यर्थः 'अपरिभूता' अतिरस्कृता 'आज्ञा' आदेशो यस्य तादृशः अनवज्ञातशासनो

राजा 'प्रभुः' राजेति 'उच्यते' कथ्यते लोकै। आज्ञाया अव्याघात एव राजत्वे कारणमित्यर्थः। एवम् आज्ञां लङ्घयन् यद्यपेक्ष्यश्चाणक्यः तर्हि स एव तत्त्वतो राजा न त्वम्। तन्नासौचन्तव्य इति भावः।

CHARCHA

1. सत्व etc.—सत्व is बल power. "सत्त्वं गुणे पिशाचादौ बले द्रव्य-स्वभावयोः—" इति मेदिनी। तस्य उत्कर्षः etc. शेषे ६ष्टी।

2. केऽपि—construe केऽपि न सहन्ते no one tolerates ; it is predicated of नृपतयः। नृपतयः केपि—whoever the rulers are ; see व्याख्या। Dhundhi construes केऽपि कृताः some are so created. "केऽपि लोकोत्तरमहिमानः"।

3. कस्यापि हेतोः—Construe कस्यापि हेतोः आज्ञाभङ्गम् etc. Super-cession of orders for any reason whatsoever , see व्याख्या। Also see "कस्य हेतोः" Act I, Sl. 1. Dhundhi's construction is कस्यापि हेतोः कृताः। "कस्यापि हेतोः विपक्षक्षपनाय"।—For some reason or other, *i. e.*, for the extirpation of enemies.

4. व्यक्त etc.—वि+अञ्ज+क्त कर्मणि exhibited, manifested. Dhundhi renders it as प्रसिद्ध। मन+घञ् भावे मानः self-respect. अव+लिप+घञ् भावे अवलेप pride. मानश्च अवलेपश्च। व्यक्तौ मानावलेपौ येषां whose pride and salf-respect are manifest or well known.

5. सार्वभौमाः—सर्वभूमेरीश्वराः or सर्वभूमौ विदिताः इति सर्वभूमि+अण्। "अनुशतिकादीनाञ्च" इत्युभयपदवृद्धिः।

6. *Remark*—The object of these two verses is to draw the attention of Chandragupta to the awkwardness of the situation. Hence the hints are broad. Everyone present must have taken the verses as admirably suiting the occasion.

27. **चाणक्यः—(स्वगतम्) प्रथमं तावत् विशिष्टदेवता-स्तुतिरूपेण प्रवृत्तशरद्वर्णप्रख्यापनम् आशीर्वचनम्। इदमपरं किम् इति नावधारयामि। (विचिन्त्य) आ ज्ञातम्। राक्षसस्यायं प्रयोगः। दुरात्मन् राक्षस दृश्यसे भोः। जागर्त्ति खलु कौटिल्यः।**

Chanakya—(*To himself*) The first in the form of an eulogy to high divinities is indeed a pronouncement of benediction descriptive of the attractions of Autumn that has set in. What this other is I do not understand. (*Reflecting*) Ah ! I see. This is a move by Rakshasa. Vile-hearted Rakshasa, you are found out. Ho ! Kautilya is wide awake.

राजा—आर्य्य वैहीनरे, आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं दापय ।

King—Noble Vaihinari, let a hundred thousand pieces of gold be given unto these two bards.

कञ्चुकी—यदाज्ञापयति देवः (इति परिक्रामति) ।

Chamberlain—As Sire commands (*goes round the stage*).

चाणक्यः (सक्रोधम्)—वैहीनरे तिष्ठ, न गन्तव्यम् । वृषल, किमयमस्थाने महान् अर्थोत्सर्गः ?

Chanakya—(*Angrily*) Vaihinari, stop, you need not go. Vrishala, why this large expenditure of money on an unworthy object ?

राजा—(सकोपम्) आर्य्येण एवं सर्वत्र निरुद्धचेष्टाप्रसरस्य मे बन्धनमिव राज्यं न राज्यमिव ।

King—(*With heat*) With the scope of my actions thus checked all round by Noble Preceptor, my kingdom is like a prison and not like a kingdom.

चाणक्यः—वृषल, स्वयमनभियुक्तानां राज्ञाम् एते दोषाः सम्भवन्ति । तद् यदि न सहसे ततः स्वयमभियुञ्ज्यस्व ।

Chanakya—Vrishala, these inconvenience attend kings who are personally inattentive to their work. So if you cannot stand them, then, attend personally to work.

राजा—एते स्वकर्मणि अभियुज्यामहे ।

King—Here we attened to our work.

चाणक्यः—प्रियं नः । वयमपि स्वकर्मणि अभियुज्यामहे ।

Chanakya—That is joy to us. We too attend to our work.

CHARCHA

1. प्रथमम्—प्रथम first. Not the first verse, for tben the second, *i. e.*, प्रत्यूषेष etc. is left out, bnt the first *recitation* consisting of the first two verses.

2. विशिष्ट etc.—विशिष्टा उत्तमा देवता । तस्य स्तुतिः । तस्याः रूपम् । तेन । करणे ३या ।

3. प्रवृत्त etc.—प्रख्याप्यते अनेन इति प्र + ख्या or चक्ष + णिच् + ल्युट् करणे प्रख्यापनम् । The means of anouncement. प्रवृत्ता श्रुत् । तस्याः गुणाः । तेषां प्रख्यापनम् । Qual. आशीर्वचनम् ।

4. सुवर्ण etc.—सुवर्ण gold piece. तेषां शतानि । तेषां सहस्रम् । Telang reads इति उत्थाय परिक्रामति । But it seems कञ्चुकी was standing all the while. cf.—Para 23. उभौ यथोचितमुपविष्टौ from which it is obvious that the king and Chanakya only were seated, so उत्थाय is out of place.

5. अर्थोत्सर्गः—उद् + सृज् + घञ् भावे उत्सर्गः दानम् । अर्थस्य उत्सर्गः ।

6. निरुद्ध etc.—प्र + सृ + अप् भावे बाहुलकात् प्रसरः course· चेष्टायाः प्रसरः । निरुद्धः चेष्टाप्रसरः अस्य । तस्य । Qual. मे ।

7. स्वयम् etc.—स्वयम् आत्मना ; not compounded. अनभियुक्तः अव्यापृतः (see *ante*).

8. दोषाः—दोष inconvenience, discomfort. See *Trans.*

9. स्वकर्मणि—The implication is—The work is my own, but so long *usurped* by you.

10. वयमपि etc.—This is a rerort. "I have been doing. *your* works so long through which *my* work has suffered. I shall henceforth attend to *my* work alone". The work is of course the spiritual duties of a Brahmana.

98. राजा—यद्येवं, तर्हि कौमुदीमहोत्सवप्रतिषेधस्य तावत् प्रयोजनं श्रोतुमिच्छामि ।

King—If so, then I wish to know utility of the prohibition of the Kaumudi-festival.

चाणक्यः—वृषल, कौमुदीमहोत्सवानुष्ठानस्य किं प्रयोजनम् इत्यहमपि श्रोतुमिच्छामि ।

Chanakya—Vrishala, I too wish to know the utility of observing the Kaumudi festival.

राजा—प्रथमं तावत् ममाज्ञाव्याघातः ।

King—First indeed is uninterruption of my orders.

चाणक्यः—वृषल, ममापि तव आज्ञाव्याघात एव कौमुदीमहोत्सवप्रतिषेधस्य प्रथमं प्रयोजनम् । कुतः—

अग्भोधीनां तमालप्रभवकिसलयश्यामवेलावनानाम्
आ पारेभ्यश्चतुर्णां चटुलतिमिकुलक्षोभितान्तर्जलानाम् ।
मालेवाज्ञा सपुष्पा तव नृपतिशतैरुह्यते या शिरोभिः
सा मय्येव स्खलन्ती प्रथयति विनयालङ्कृतं ते प्रभुत्वम् ॥२४॥

Chanakya—Mine too the first utility of the prohibition of the Kaumudi festival is the uninterruption of your orders. Whence (do you ask) ?—Stumbling against me alone, your command declares your power as graced by humility—the command which up to the shores of the four oceans the forests on the coasts of which are darkened by fresh leaves growing on Tamala trees and whose deep waters are disturbed by whales rushing about, is carried on their head by hundreds of kings like a wreath of flowers unfaded.

अन्वयः ॥ तमालप्रभवक्किसलयश्यामवेलावनानां चटुलतिमिकुलक्षोभितान्तर्जलाना चतुर्णामम्भोधीनां पारेभ्यः आ या तव आज्ञा सपुष्पा माला इव नृपतिशतैः शिरोभिः उह्यते, सा मय्येव स्खलन्ती (सती) ते प्रभुत्वं विनयालङ्कृतं प्रथयति। व्याख्या—'तमालप्रभवाणि' तमालजातानि यानि 'किसलयानि' नवपल्लवाः तैः 'श्यामानि' नीलानि 'वेलावनानि' तटकाननानि येषां तादृशानाम्, अपि च 'चटुलं' चपलं यत् 'तिमिकुलं' तेन 'क्षोभितम्' आन्दोलितम् 'अन्तर्जलं' सलिलगर्भः येषा तादृशानां 'चतुर्णाम् अम्भोधीनां' सागराणां 'पारेभ्यः आ' तीरपर्य्यन्तं यो भूभागः तत्र 'या तव आज्ञा सपुष्पा' पुष्पसमेता अम्लानपुष्पा इत्यर्थः। यद्वा 'सपुष्पा' सम्मृष्टपुष्पा [सम्मृष्टमिति सम्मृष्टार्थकम्] माला इव 'नृपतिशतैः' राजवर्गैः 'शिरोभिः उह्यते' धार्य्यते श्रुतभावं या आज्ञा शिरसि कृत्वा पूज्यते 'सा मय्येव' नान्यस्मिन् 'स्खलन्ती' मोघवृत्तिः सती 'ते प्रभुत्वं' स्वामिपदं 'विनयेन' शौलेन 'अलङ्कृतं' भूषितं 'प्रथयति' विनयालङ्कृतमिति कथयति। अद्य ये भयेन भवदाज्ञां शिरसि कुर्वन्ति, इतः परं ते एव तव विनयं ज्ञात्वा भक्त्या मानयिष्यन्ति कदापि नोल्लङ्घयिष्यन्ति इति ममापि तवाज्ञायाः अव्याघात एव प्रथमं प्रयोजनम् इत्याशयः।

CHARCHA

1. आज्ञाव्याघातः—वि + आ + हन घञ् भावे व्याघातः obstruction. न व्याघातः अव्याघातः। आज्ञायाः अव्याघातः। Dhundhi expounds आज्ञायाः व्याघातः, why, it is difficult to see.

2. तमाल etc —प्रभवत्यस्मात् इति प्र + भू + अप् अपादाने प्रभवः source. तमालः प्रभवः एषाम्। Now see व्याख्या। Here प्रभव seems superfluous (अधिकपद)। The existence of big forests of तमाल on the sea-beach to the south is noticed by Kalidasa thus—"दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला। आभाति वेला लवणाम्बुराशेर्धारानिबद्धेव कलङ्करेखा" ॥

3. चटुल etc.—चुभ + णिच् + क्त कर्मणि क्षोभित disturbed क्षुब्ध is also allowed, but in the sense मथ्य only. अन्तःस्थितं जलम् अन्तर्जलम् deep waters. Now see व्याख्या। Qual. अम्भोधीनाम्।

4. सपुष्पा—पुष्पैः सह। It has been contended that the mention of पुष्प is superfluous because माला is understood to be of

flowers. But it seems in that case separate mention of पुष्प implies that the flowers were of superior excellence either from being very fresh or because they were of a special kind. If having a full plate of mangoes, before him a man says "give me some mangoes" he means *mangoes of a superior quality.* Or सह implies समृद्धि। "सह सम्बन्धसाहश्ययौगपद्यसमृद्धिषु। साकल्ये विद्यमाने च" इति हैमः। पुष्पैः सह, *i. e.*, पुष्पैः समृद्धा सपुष्पा। Telang reads मालेवाम्रा सपुष्पा, though his commentator seems to have मालेवाम्रा सपुष्पा as in our text. In this reading there is nothing for या and सा in the verse to refer to. या is confined to the sentence in the verse by the सा following in it, so it cannot refer to आज्ञा in आज्ञाव्याघात in the second sentence preceding. The intervention of the sentence कृतः also bars such reference. The dictum "सर्वनाम्नामनुसन्धिर्वृत्तिच्छन्नस्य" has therefore no scope here.

5. उह्यते या शिरोभिः—वह + लटते कर्मणि = उह्यते। The idea of placing command on the head like a garland is a common one. Cf.—"तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे" and "शिरोभिरुह्यते नराधिपैर्मौल्यमिवास्य शासनम्"—Kirat.

6. विनयालङ्कृतम्—Predicative adjective to प्रभुत्वम्। Construe —प्रभुत्वं विनयालङ्कृतं प्रथयति not विनयालङ्कृतं प्रभुत्वं प्रथयति। As to how this leads to आज्ञायाः अव्याघातः see व्याख्या।

29. **राजा—अथ अपरमपि प्रयोजनं श्रोतुमिच्छामि।**

King—Now I wish to hear of the other utility also.

चाणक्यः—तदपि कथयामि।

Chanakya—I will tell you that too.

राजा—कथ्यताम्।

King—Let it be told then.

चाणक्यः—श्रोणोत्तरे मद्वचनात् कायस्थमचलं ब्रूहि—"यत्तत् भद्रभटप्रभृतीनां लेख्यपत्रं तत्तावद्दीयताम्" इति।

Chanakya—Sonattara, tell Kayastha Achala this in my words—"Give me the record-sheet of Bhadrabhata and others".

प्रतीहारी—जं अज्जो आणवेदि [यदार्य आज्ञापयति]। (इति निष्क्रम्य पुनः प्रविश्य) अज्ज एदं पत्तअम् [आर्य एतत् पत्रकम्]।

Warder—As Noble Sir commands. (*Going out and coming back*) Noble Sir, this is the sheet.

चाणक्यः—(गृहीत्वा) वृषल श्रूयताम्।

Chanakya—(*Taking it up*) Vrishala listen.

राजा—दत्तावधानोऽस्मि।

King—I am attentive.

चाणक्यः—(वाचयति) स्वस्ति। सुगृहीतनामधेयस्य देवस्य चन्द्रगुप्तस्य सहोत्थायिनां प्रधानपुरुषाणाम् इतोऽपक्रम्य मलयकेतुमाश्रितानां परिमाणलेख्यपत्रम्। तत्र प्रथमं तावत् गजाध्यक्षो भद्रभटः, अश्वाध्यक्षः पुरुषदत्तः, महाप्रतीहारस्य चन्द्रभानोर्भागिनेयो डिङ्गरातः, देवस्य स्वजनगन्धी महाराजो बलगुप्तः, देवस्यैव कुमारसेवको राजसेनः, सेनापतेः सिंहबलस्य कनीयान् भ्राता भागुरायणः, मालवराजपुत्रो रोहिताक्षः, क्षत्रगणमुख्यो विजयवर्मा इति। एतावदेतत् पत्रम्।

Chanakya—(*Reads*) May good come! Record-sheet of the status of the high officials who made common cause with Sire Chandragupta of auspicious name and having deserted from here have sided with Malayaketu. Of them the very first (batch) is this—Bhadrabhata, the master of the elephants; Purushadatta, the master of the horse; Dingarata, nephew to

Chandrabhanu the chief warder ; Maharaja Balagupta, a distant relation of Sire : Rajasena the old (lit. from childhood) attendant of Sire himself ; Bhagurayana, the younger brother of Sinhabala the commander-in-chief ; Rohitaksha the prince of Malava : Vijayavarman, the foremost of our host of warriors. This sheet has this much.

CHARCHA

1. अपरमपि—Chanakya has given him the first reason, *i. e.*, तवाज्ञाव्याघातः (Para 28) . अपरमपि refers to the second.

2. लेख्यपत्रम्—लिख + ण्यत् कर्मणि लेख्यम् that which is to be recorded. तस्य पत्रम् ।

3. सुगृहीत etc.—See Act I, *ante*.

4. परिमाण etc.—परिमीयते अनेन इति परि + मा + ल्युट् करणे परिमाणम् measure ; here *status*. तस्य लेख्यपत्रम् । Cf—"सद्यः परात्मपरिमाणविवेकमूढः", Act I, Sl. 10.

5. गजाध्यक्षः—अक्ष is व्यवहार transaction of business. "अक्षो ज्ञानात्मशकटव्यवहारेषु पाशके" इति मेदिनी । अधिगतः अक्षम् अध्यक्षः employed, प्रादितत्—। गजेषु अध्यक्षः, सुप्सुपा ।

6. महाप्रतीहारस्य—प्रतिक्रियते अत्र इति प्रति + हृ + घञ् अधिकरणे प्रतिहारः or प्रतीहारः warder. महान् प्रतीहारः etc.

7. स्वजनगन्धी—स्वः जनः स्वजनः relative. तस्य गन्धः लेशः स्वजनगन्धः trace of relationship. सः अस्ति अस्य etc.

8. कुमारसेवकः—कुमारस्य सेवकः attendant of the young prince. "बालकादिभिश्च" इति समासः (?) . This is a servant that has-been in attendance upon Chandragupta since the prince's childhood.

9. कनीयान्—अतिशयेन युवा इति युवन् + ईयसुन् कनीयान् or यवीयान् by "युवाल्पयोः कनन्यतरस्याम्" ।

10. चतगण etc.—चत्र is क्षत्रिय, here a warrior. चत्राणां गणः ! तस्मिन् मुख्यः etc. Dhundhi adds after this "एते वयं देवस्य कार्ये अवहिताः स्मः" । Who are the वयम् here ? वयम् cannot refer to Bhadrabhata

etc. because these are not the speakers. It is absurd to suppose that they executed a deed and deserted. No one else is referred to in the first person, hence the passage seems to be an interpolation.

11. एतावत् etc.—The whole scene is a farce, both Chanakya and Chandragupta know it as a farce, but to keep up the show, the contents of the record-sheet are to be treated as known to Chanakya, but unknown to the king. If the king is the reader of the sheet, as Dhundhi supposes, and Chanakya the listener, then the remark एतावत् etc. is meaningless, because Chanakya knows very well how far the document goes, and the remark adds nothing to his knowledge. If however, Chanakya reads and the king listens, the remark is a quite natural one. We therefore reject Dhundhi's reading and prefer to attribute the passage to Chanakya. "चाणक्यः वाचयति" etc., occurs in some of Telang's manuscripts. This requires change of speakers in the preceding speeches also and justifies the readings as adopted in our texts.

30. राजा—आर्य, एतेषामपरागहेतुं श्रोतुमिच्छामि ।

King—Noble Sir, I wish to know the reasons for the disaffection of these people.

चाणक्यः—वृषल शृयताम् । अत्र यावेतौ गजाध्यक्षाश्वाध्यक्षौ भद्रभटपुरुषदत्तनामानौ, तौ खलु स्तोमद्यमृगयाशीलौ हस्त्यश्वावेक्षणे अनभियुक्तौ मया अधिकाराभ्याम् अवरोप्य स्वजीवनमात्रेणैव स्थापितौ इति परपक्षे स्वेन स्वेन अधिकारेण गत्वा मलयकेतुमाश्रितौ । यावेतौ डिङ्गरातबलगुप्तौ तावपि अत्यन्तलोभाभिभूतौ त्वद्दत्तं जीवनम् अवहुमन्यमानौ तत्र बहु लभ्यते इति अपक्रम्य मलयकेतुमाश्रितौ । योऽप्यसौ भवतः कुमारसेवको

राजसेन इति, सोऽपि तव प्रसादात् अतिप्रभूतकोषहस्त्यश्वं सह-सैव तत् महदैश्वर्य्यम् अवाप्य पुनरुच्छेदशङ्कया अपक्रम्य मलय-केतुमाश्रितः। योऽयमपरः सेनापतेः सिंहबलस्य कणीयान् भ्राता भागुरायणः अमावपि तव काले पर्वतकेन सह समुत्पन्नसौहार्दः तत्प्रीत्या च "पिता ते चाणक्येन व्यापादितः" इति उत्पाद्य रहसि त्रासयित्वा मलयकेतुमपवाहितवान्। ततो भवदपथ्य-कारिषु चन्दनदासादिषु निगृह्यमाणेषु स्वदोषाशङ्कया अपक्रम्य मलयकेतुमाश्रितः। तेनाप्यसौ मम प्राणरक्षक इति कृतज्ञता-मनुवर्त्तमानेन आत्मनोऽनन्तरम् अमात्यपदं ग्राहितः। यौ तौ रोहिताक्षविजयवर्माणौ तावपि अतिमानित्वात् स्वदायादेभ्यः त्वया दीयमानम असहमानौ मलयकेतुमाश्रितौ। इत्येषाम-परागहेतवः।

Chanakya—Vrishala, listen. These two here, the master of elephants and the master of horse, Bhadrabhata and Purushadatta by name, are addicted to wine, women and the chase and are indeed inattentive to the inspection of the elephants and the horse ; so they were removed by me from their office and placed on but a subsistence allowance. Thus disaffected they left and have now attached themselves to Malayaketu, each in his respective capacity. As to Dingarata and Balagupta, these two, swayed too much by greed, deeming the salary allowed by you as not enough, have deserted, and attached themselves to Malayaketu, thinking they will get more there. Regarding your old attendant Rajasena, he too, through your favour, having suddenly come by great affluence with elephants, horse and immense wealth, has run away, dread-

ing resumption (*i. e.*, confiscation), and attached himself to Malayaketu. He too, Bhagurayana, the younger, brother of Simhabala the commander-in-chief, had contracted friendship in those trying times with Parvataka, and through love for him had told Malayaketu "Your father has been killed by Chanakya" and with this invention had scared him away: next when Chandanadasa and others that were working harm unto you were being punished, he, through apprehensions due to his own guilt, ran away and attached himself to Malayaketu. That prince too, in pursuance of gratitude that he had saved his life, caused him to accept the office of minister next to him in power (*Or*—in constant attendance upon him). As to Rohitaksha and Vijayavarman, these two again, through in-ordinate self-esteem not tolerating your gifts to your own kinsmen, have gone over to Malayaketu. These are the reasons for the disaffection of these men.

CHARCHA

1. एतेषामपराग etc.—As already remarked the show is a got up one. Chandragupta knows full well that there is no real अपराग anywhere but assumes the existence of अपराग for appearance's sake.

2. स्त्रीमद्य etc.—मृगयनम् इति मृग (अदन्त चुरादि) + णिच् स्वार्थे + श भावे मृगया: chase. स्त्री च मद्यञ्च मृगया च स्त्रीमद्यमृगया: । ता: शीलयत: इति स्त्रीमद्यमृगया + शील + णिच् स्वार्थे + ण कर्तरि । करणे ३या ।

3. स्वजीवन etc.—जीवति अनेन इति जीव + ल्युट् करणे जीवनम् subsistence-allowance. स्वस्य जीवनम् । तदेव, मयूरव्यंसकादि etc. तृतीया करणे ।

4. स्वेन स्वेन etc.—गजाध्यक्ष employed there as गजाध्यक्ष and अश्वाध्यक्ष also in the same capacity.

5. जीवनम्—Deriv. above. Here = salary, not mere subsistence-allowance.

6. अतिप्रभूत etc.—कोषाश्व हस्तिनश्च अश्वाश्च कोषहस्त्यश्वा: । एकवद्भाव is not

available because कीष is not a सेनाङ्ग। 'अतिप्रभूता: कीषहस्त्यश्वा:' अस्मिन् तादृशं 'महत् एश्वर्यमवाप्य पुन:' भूय: य: 'उच्छेद:' ऐश्वर्येण वियोजनं तस्य 'अद्धया' भयेन यदि वा राजा वहु एतदृदत्तम् इति पुन: आत्मसात् कुर्यात् इति उत्प्रेक्षमाण इत्यर्थ: 'अपक्रम्य मलयकेतुमाश्रित:'।

7. तव कालं—At the time of the siege. Parvataka was helping Chandragupta during the siege.

8. ससुत्पन्न etc.—सौहार्द friendship (See "सौहार्दात् कृतकृत्यतेव" etc. Act II, *ante*). ससुत्पन्नं सौहार्दमस्य।

9. इत्यत्पाद्य—इति एतत् उत्पाद्य कल्पयित्वा having invented this story Here चाणक्य treats चन्द्रगुप्त as ignorant of the facts of Parvataka's death, which really he is not, but pretends to be so.

10. रहसि etc —See Act I, *ante*.

11. भवदपथ्य etc.—See राजापथ्य etc. Act, I *ante*.

12. स्वदोषाशङ्क्या—स्वस्य दोष: his own guilt. The guilt is the उद्भावन of the story as alleged above, and the अपवाहन of मलयकेतु। तस्मादाशङ्का, सुप्सुपा। तया। हेतौ स्त्रिया।

13. प्राणरक्षक:—प्राणानां रक्षक:। "याजकादिभिश्च" इति समास: (?)। As the याजकादि list does not include रक्षक, we suggest शेषषष्ठीतत् here as in विभुवनविधातु: etc. Or—प्राणान् रक्षतीति + प्राण + रक्ष + अण् कर्तरि = प्राणरक्ष:। तत: स्वार्थेकन्।

14. अनुवर्त्तमानेन—अनु + वृत + शानच् कर्तरि pursuing, *i. e.*, following the dictates of.

15. ग्राहित:—See *ante*, संज्ञां ग्राहयितव्या: Act I.

16. आत्मनोऽनन्तरम्—अन्तर interval. अविद्यमानमन्तरमस्य अनन्तरम् next. 'आत्मन:' स्वस्य राजपदस्य 'अनन्तरम्' अदूरम् 'अमात्यपदम्'। Cf.—"नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितम्"। (a)

17. स्वदायादेभ्य:—दा + घञ् कर्मणि दाय: bequest. दायमदन्ति इति दाय + अद + अण् कर्तरि दायादा: kinsmen. "दायादौ सुतबान्धवौ" इत्यमर:। स्वस्य दायादा:। स्व refers to Chandragupta. स्वदायादा: the royal-kinsmen. They cannnot tolerate your gifts to your own kinsmen, just fancy !

31. **राजा—एवम् एतेषु परिज्ञातापराधहेतुषु क्षिप्रकेव कस्मान्न प्रतिविहितमार्य्येण ?**

King—The reasons for the dis-affection of these men being thus known, why were not these remedied forthwith by Noble Sir ?

चाणक्यः—वृषल, न पारितं प्रतिविधातुम् ।

Chanakya—Vrishala, these could not be remedied.

राजा—किमकौशलात् उतः प्रयोजनापेक्षया ?

King—Was that through tactlessness, or in view of some object ?

चाणक्यः—कथमकौशलं भविष्यति ? प्रयोजनापेक्षयैव ।

Chanakya—How could it be tactlessness ? In view of some object indeed.

राजा—प्रयोजनमिदानीं श्रोतुमिच्छामि ।

King—I wish now to know the object.

चाणक्यः—श्रूयतामवधार्यताञ्च । इह खलु विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानम्—अनुग्रहो निग्रहश्च । अनुग्रहस्तावत् आत्तिप्राधिकारयोः भद्रभटपुरुषदत्तयोः पुनरधिकारारोपणमेव । अधिकारश्च तादृश्येषु व्यसनयोगादनभियुक्तेषु पुनरारोप्यमाणः सकलमेव राज्यस्य मूलं हस्त्यश्वम् अवसादयेत् । डिङ्गरातबलगुप्तयोः सकलराज्यप्रदानेनापि अपरितुष्यतोः अनुग्रहः कथं शक्यः ? राजसेनभागुरायणयोस्तु धनप्राणनाशभीतयोः कुतोऽनुग्रहस्यावकाशः ? रोहिताक्षविजयवर्मणोरपि दायादमसहमानयोः अतिमानिनोः कीदृशोऽनुग्रहः प्रीतिं जनयिष्यति ? इति परिहृतः पूर्वः पक्षः । उत्तरोऽपि खलु वयम् अचिरादधिगतनन्दैश्वर्याः सहोत्थायिनं प्रधानपुरुषवर्गम् उग्रेण

दण्डेन पीड़यन्तो नन्दकुलानुरक्तानां प्रकृतीनाम् अविश्वास्या एव भवामः इत्यतः परिहृत एव। तदेवम् अनुगृहीतास्मत्-पक्षो राक्षसोपदेशप्रवणो महीयसा म्लेच्छबलेन परिवृतः पितृ-वधामर्षी पर्वतकपुत्रो मलयकेतुः अस्मानभियोक्तुमुद्यतः। सोऽयं व्यायामकालो नोत्सवकालः इति दुर्गसंस्कारे प्रारब्धव्ये किं कौमुदीमहोत्सवेन इति प्रतिषिद्धः।

Chanakya—Vrishala, listen and learn. Verily, for disaffected officers the remedy here is two-fold—reward and punishment (conciliation and repression). Of Bhadrabhata and Purushadatta, whose offices have been wrested from them, re-appointment alone is the conciliation. Office again re-entrusted to people so careless through questionable pursuits, would ruin the whole of our cavalry and elephant force, the very basis of the kingdom. Of Dingarata and Balagupta who are extremely greedy and would not be contented even by the gift of the whole kingdom, how could conciliation be possible? Where again is the room for conciliation with respect to Rajasena and Bhagurayana who apprehend loss of wealth and life? What kind of conciliation would give pleasure to Rohitaksha and Vijayavarman who are supremely sensitive and do not brook your rin. Thus the first alternative is dismissed. The last too is indeed dismissed from the consideration that with the fortune of the Nandas recently acquired, we, grinding with hard punishment the batch of high officials that made common cause with us, shall for ever become objects of distrust to such subjects as are attached to the family of Nanda. So, having favoured our late servants in this manner, Malayaketu the son of Parvataka, angered by the murder of his father, following the advice of Rakshasa, stands ready to attack us with a huge

force of Mlechchas. This now is a time for exertion, and not festivities, so, as repairs to the fort have to be commenced, away with the Kaumudi-festival. Hence it was prohibited.

CHRCHA

1. पारितम्—पार + णिच् स्वार्थे (चुरादि) + क्त भावे।

2. अकौशलात्—कुशल expert. तस्य भावः कौशलम् skill. न कौशलम् clumsiness. Do not say न कुशलः अकुशलः . तस्य भावः etc., because the rule "न नञ् पूर्वात्तत्पुरुषात्—"prohibits अण्भावे after अकुशल in this sense We may however say अकुशलस्य इदम् इति अकुशल + अण् by "तस्येदम्" and obtain अकौशल and आकौशल by "नञः सुचौश्वर—" which directs the optional वृद्धि of the पूर्वपद।

3 अवधार्यताम्—अव + धृ + णिच् + लोट् ताम् कर्मणि let it be knowu.

4. प्रतिविधानम्—प्रति + वि + धा + ल्युट् भावे remedy.

5 आक्षिप्त etc.—आ + क्षिप् + क्त कर्मणि wrested. अधिकार office. आक्षिप्तः अधिकारः अनयोः etc.

6. पुनरधि etc.—अधिकारे आरोपणम्। पुनः अधिकारारोपणम्, सुपसुपा।

7. व्यसन etc—'तादृशेषु' तथाविधेषु 'व्यसनस्य' दुष्क्रियायाः 'योगात्' सङ्गावात् 'अनभियुक्तेषु' असावधानेषु जनेषु 'पुनरारोप्यमाणः' भूयः संयोज्यमानः 'अधिकारः राज्यस्य मूलम्' आलम्बन हस्त्यश्व" कारितुरग 'सकलमेव' निःशेषमेव 'अवसादयेत्' उन्मूलयेत्।

8. धनप्राण etc.—धननाश of राजसेन and प्राणनाश of Bhagurayana. धनप्राणाश as read by Telang does ont apply to Bhagurayana.

9. दायादम् etc.—See para 30, *ante.*

10. परिहृत etc.—परि + हृ + क्त कर्मणि hit. avoided, hence met. The first alternative is met. The alternative is अनुग्रह।

11. उत्तरोऽपि etc.—The latter alternative, *i. e.*, निग्रह, दण्ड। Repression also is out of question—reason follows—'अचिरात्' अनतिपूर्वं सम्पत्येव 'अधिगतं' प्राप्तं 'नन्दैश्वर्यं' नन्दराज्यं यैः तादृशाः 'वयं सह' अस्माभिः सह एकात्मतया 'उत्थायिनं' कृतोदय नन्दराजस्य 'प्रधानपुरुषवर्गं' भद्रभटादिकम् उग्रेण' कठोरेण 'दण्डेन पीडयन्तः' सन्तः 'नन्दकुले अनुरक्तानाम्' अद्यापि भक्तियुक्तानां 'प्रकृतीनाम् अविश्वास्याः' अङ्गनीया 'एव भवामः। अस्मानपि

प्राप्ते काले दण्डयिष्यन्ति इहि ते नाम्नासु रक्षा भवेषु' तत कुतो राज्यप्रतिष्ठा। 'इति' हेतोः 'उत्तरोऽपि' पक्षः 'खलु परिहृत एव'। 'तत्' तस्मात 'एवम्' अनेन प्रकारेण 'अनुगृहीतः अस्मत्पक्षः' भागुरायणप्रभृतिः येन तादृशः अतएव अस्मच्छिद्राभिज्ञः 'राक्षसस्य उपदेश प्रवणः श्रद्दधानः तेन च तस्मिंश्छिद्रे प्रहरणक्षम 'पितृवधेन अमर्षी' जातक्रोधः 'पर्वतकपुत्रो मलयकेतुः महौयसा क्लेशक्षयेन परिवृतः सन् अस्मान् अभिलक्ष्य उद्यत'। 'सः' तादृशो घोरः अयं कालः 'व्यायामस्य' प्रयत्नस्य 'कालः, उत्सवस्य' प्रमोदस्य 'कालो न इति' हेतोः 'दर्पस्य सत्कारे प्रारम्भस्थैर्ये तदुपेक्षया 'कौमुदीमहोत्सवेन किं' स्यात्? नूनं पराजय एव स्यात। 'इति' हेतोरुत-सवः 'प्रतिषिद्धः'।

32. राजा—आर्य्य, बहु प्रष्टव्यमत्र।

King.—Noble Preceptor, there is much to enquire in this matter.

चाणक्यः—वृषल, विश्रब्धं पृच्छ, ममापि बहूक्तव्येयमत्र।

Chanakya—Vrishala, ask freely, I have much to say in this matter.

राजा—सोऽप्यस्य सर्वस्यानर्थस्य हेतुः मलयकेतुः कस्मादपक्रामन् उपेक्षितः?

King—Why again was Malayaketu, the root of all this evil overlooked while escaping (*i. e* suffered to escape)?

चाणक्यः—वृषल, अनुपेक्षणे द्वयो गतिः—निगृह्येत वा प्रतिश्रुतं राज्यार्द्धं प्रतिपाद्येत वा। निगृहे तावत् पर्वतकः अस्माभिरेव व्यापादितः इति कृतघ्नतायाः खड्गस्तो दत्तः स्यात्। प्रतिश्रुतराज्यार्द्धप्रतिपादनेऽपि पर्वतकविनाशः केवलं कृतघ्नतामात्रफलं स्यात्, इति मलयकेतुरपक्रामन्नुपेक्षितः।

Chanaka—Vrishala, there would have been two courses if not overlooked—either he should have been seized or half

the kingdom promised should have been made over. In seizing, we should have lent our own hand to the trenachery and ingratude that Parvatak was killed by ourselves. In making over half the kingdom promised, again, the murder of Parvataka would have had treachery and ingratitude for its only reward. Hence Malayaketu was overlooked, while escaping.

राजा—अत्र तावदेवम्। राक्षसः पुनरिहैव वर्त्तमानः आर्य्येण उपेक्षितः इत्यत्र किमुत्तरमार्य्यस्य ?

King—It is indeed so in this matter, but what is Noble Preceptor's explanation of the fact that Rakshas staying in this very city was overlooked bs Noble Preceptor ?

चाणक्यः—राक्षसोऽपि स्वामिनि स्थिरानुरागत्वात् सुचिरमेकत्रवासाच्च शीलज्ञानां नन्दानुरक्तानां प्रकृतीनाम् अत्यन्तविश्वास्यः प्रज्ञापुरुषकाराभ्यामुपेतः सहायसम्पदा अभियुक्तः कोषवान् इहैव अन्तर्नगरे वर्त्तमानः खलु महान्तम् अन्तःकोपमुत्पादयेत्। दूरीकृतस्तु वाह्यकोपमुत्पादयन्नपि कथमपि उपायैर्वशयितुं शक्यः इत्ययम् अत्रस्थ एव हृदयेशयः शङ्कुरिव उद्धृत्य दूरीकृतः।

Chanakya—Again, Rakshasa, endowed with wisdom and enterprise, possessing men and money, backed by a large number of helpers, and by steady devotion to his king and long residence together, an object of great confidence to subjects that are still loyal to Nanda and appreciate character would create serious internal disaffection staying within this very city : but sent away, he is capable of being forced to subjection, some how, by expedients though causing dis-affection

outside. So, like a plug rankling in the heart only when he is here, he was extracted and cast off.

CHARCHA

1. सोऽप्यस्य etc.—'अस्य सर्वस्य' अनर्थस्य हेतुः मलयकेतुः कस्मात् 'अपक्रामन्' अपसरन् 'उपेक्षितः अपि' अनुपलक्षितश्च। The अपि appears almost superfluous. The reading सोऽस्य seems better.

2. अनुपेक्षणे etc.—मलयकेतो 'अनुपेक्षणे' कर्त्तव्ये 'इयौ गति.' द्वौ पक्षौ स्याताम्—निग्रहपक्षः अनुग्रदपक्षश्च 'निग्रहोत वा' (etc.). अनुग्रहपक्षे 'प्रतिश्रुतं राज्यार्द्ध प्रतिपादयत वा'। 'नियहं तावत् पर्वतकः अस्माभिः व्यापादितः न तु राक्षसेन 'इति' एवंरूपायाः 'कृतघ्नतायाः' विश्वम्भघातितायाः 'स्वस्य' आत्मनः 'हन्तः' अबलम्बः 'दत्तः स्यात्' वयमेव निजकृतघ्नता ख्यापयेम। पुत्रहन्ता पितरमपि हतवान् नास्ति सन्देहः इति लोको मन्येत। अनुग्रहपक्षे 'प्रतिश्रुतस्य राज्यार्द्धस्य प्रतिपादनेऽपि' दानेऽपि न दुष्टसिद्धिः यतस्तदा 'पर्वतकविनाशः केवल कृतघ्नतामात्र फलं' यस्य तादृशः 'स्यात्' विश्वस्तं पर्वतकं हत्वा कृतघ्नता च कृता राज्यार्द्धञ्च नैव रक्षितम् इति निस्फला मित्रहत्या कलङ्कहेतुमात्रमापद्येत।

3. राक्षसोऽपि etc—राक्षसोऽपि इहैव अन्तर्नगरे वर्त्तमानः महान्तमन्तःकोपं खलु उत्पादयेत्। How? Because he is शीलज्ञाना नन्दानुरक्ताना प्रकृतीनाम् अत्यन्तविश्वास्यः। For this there are two reasons—(i) 'स्वामिनि' नन्दे 'स्थिरानुरागत्वात्' (ii) 'सुचिरम् एकवासाच्च'। He has great personal qualifications too for this work—he is प्रज्ञापुरुषकाराभ्यामुपेतः' सहायसम्पदाभियुक्तः, कोषवान। 'दूरीकृतस्तु' अपवाहितो राक्षसः पुनः 'बाह्यकोपमुत्पादयन्नपि उपाये.' सामादिभिः 'कथमपि वशयित्वा वश गमयितुं शक्यः' 'इति' हेतोः 'अवश्य एव' यदा इह वसति तदैव 'हृदयेशयः' मर्मगतः 'शङ्कुरिव' कील इव 'अयम्' उद्धृत्य दूरीकृतः यतो दूरस्थोऽयं नैव हृदयेशय इव शङ्कुः।

4. स्थिरानुरागत्वात्—स्थिरः अनुरागः अस्य। तस्य भावः etc हेतौ ५मी। Telang reads स्थिरानुरागित्वात्। Expound स्थिरः अनुरागः; सः अस्य अस्ति इति स्थिरानुराग + इनि मत्वर्थे। तस्य भावः etc. But remember 'न कर्मधारयान्मत्वर्थीयाः बहुव्रीहिश्चेत् अर्थप्रतिपत्तिकरः"। Hence we prefer our reading.

5. अत्यन्त etc.—अत्यन्तं विश्वास्यः, सुपसुपा।

6. प्रज्ञापुरुष etc.—पुरुषः क्रियते अनेन इति पुरुष + कृ + घञ् करणे पुरुषकारः manliness, enterprise etc. प्रज्ञा च पुरुषकारश्च। ताभ्यामुपेतः युक्तः।

7. सहाय etc —सह अयते इति सह + अय + अच् कर्त्तरि सहायः helper-सम् + पद + क्विप् भावे सम्पत् सम्पद्धिः profusion. सहायानां सम्पत् richness in allies etc. तथा अभियुक्तः। He has a large following, hence to be dreaded.

8 कोषवान्—कोष funds. He has money. With men and money at command, he would work vast mischief staying here.

9. अन्तर्नगरे—नगरस्य अन्तः अन्तर्नगरम्—राजदन्तादि। Or अन्तःस्थितं नगरम् etc.

10. अन्तःकोपम्—अन्तः मध्ये प्रकृतिषु इत्यर्थः कोपः अपराधः अन्तःकोपः internal trouble. सुप्सुपा।

11. बाह्यकोपम्—बहिर्भवम् बाह्यम् external, by "बहिषष्टिलोपश्च"। बाह्यः कोपः etc.

12. वशयितुम्—वशं गमयितुमिति वश + णिच् (मामधातु) + तुमुन्।

13. अवस्थ एव—He is like a dart lodged at heart only when he is here, not while away. (This is the force of एव)। Hence he was driven away.

14. हृदयेशयः—हृदये शेते इति हृदय + शी + अच् कर्त्तरि। The ङी is optionally retained by "शयवासवासिष्यकालात्"। Thus हृदयशयः also.

33. राजा—आर्य्य कस्मात् विक्रम्य न गृहीतः ?

King—Noble Preceptor, why was he not seized by force ?

चाणक्य—राक्षसः खल्वसौ। विक्रम्य गृह्यमाणो युष्मद्-बलानि बहूनि नाशयेत् स्वं वा विनश्येत्। एवं सति उभय-थापि दोषः। पश्य—

स हि भृशमभियुक्तो यद्यपेयाद्विनाशं
ननु बहुल वियुक्तस्तादृशेनासि पुंसा।
अथ तव बलमुख्यान् नाशयेत् सापि पीड़ा
वनगज इव तस्मात् सोऽभ्युपायैर्विनेयः ॥ २५ ॥

Chanakya—Verily, Vrishala, it was Rakshasa (we had to deal with). In an attempt to seize him by force, he might have either killed a large number of your warriors or perished himself. With such an attempt, undesirable result follows either way. Mark—Pressed hard, if he suffers death, then, Vrishala, you are indeed deprived (of the services) of an incomparably good man , if on the other hand, he kills your leading fighters, that again is an injury. So like a wild tusker he has to be managed by stratagem.

CHARCHA

1. विक्रम्य—वि + क्रम + ल्यप having applied force.

2. गृह्यमाणः—ग्रह + शानच् कर्मणि। Note the वर्त्तमानकाल—गृह्यमाणः *not* गृहीतः। He will either get killed himself or kill our heroes *before he is taken.*

3. एवं सति—एवम् thus. Thus happening, *i. e.*, attempt being made to seize by force.

4. असि—Telang reads अपि which is not easily parsed.

5. अथ—Introduces पक्षान्तर। On the one hand, such an able minister is lost unto you , on the other, there is such a huge loss of your leading fighters.

6. नाशयेत्—बलमुख्याः नश्येयुः = स बलमुख्यान् नाशयेत्। Telang reads घातयेत् (हन + णिच् + लिङ् यात्) with णिच् स्वार्थे।

7. वनगज—etc.—वनचरो गजः, शाकपार्थिवादि। Cf.—"आरण्यकं गजमिव प्रगृणीकरोमि" Act I, Sl. 26.

8. अन्वयः॥ ननु हृषल पश्य, भग्नमभियुक्तः स यदि विनाशमुपेयात् तादृशेन पुंसा वियुक्तः असि . अथ तव बलमुख्यान् नाशयेत्, सा अपि पीड़ा। तस्मात् स वनगज इव अभ्युपायैर्विनेयः। व्याख्या –'ननु हृषल' अयि चन्द्रगुप्त 'पश्य'—'भग्नमभियुक्तः' अस्मदृष्टैः बलवदाक्रान्तः 'सः' राक्षसः 'यदि विनाशम् उपेयात्' मरणं भजेत तदा 'तादृशेन' तथाविधेन प्रज्ञाविक्रमशालिना 'पुंसा' पुरुषेण 'वियुक्तः असि' विरहितो भवसि। यस्य ग्रहणार्थम् इयान् प्रयत्नः स एव चेत् म्रियते को लाभो लब्धः? 'अथ' पक्षान्तरे यदि स युध्यमानः 'तव बलमुख्यान्' सेनानायकान् 'नाशयेत्'

हन्यात् सा अपि पीडा महानपकारः [विधेयप्राधान्यात् स्त्रीलिङ्गता ।] 'तस्मात' ततः उभयथापि दोषे सति विक्रमस्य ग्रहणस्य अविषयोऽसौ किन्तु 'सः वनगज इव' काननकरी इव आरण्यकी गज इव 'अभ्युपायैः' कौशलेन 'विनेयः' साधनीयः शिक्षा ग्राहयितव्यः ।

34. राजा—न शक्नुमो वयम् आर्यस्य वाचा वाचमतिशाययितुम् । सर्वथा अमात्य राक्षस एव अत्र प्रशस्यतरः ।

King—We cannot make our speech excel Noble Sir's speech. In this matter minister Rakshasa indeed is by all means the more praise-worthy.

चाणक्यः—(सक्रोधम्) "न भवान्" इति वाक्यशेषः । भो वृषल, तेन किं कृतम् ?

Chanakya—(*In anger*) "Not thyself" ends your sentence. What has been done by him, Ho ! Vrishala ?

राजा—श्रूयताम् । तेन खलु महात्मना—

लब्धायां पुरि यावदिच्छमुषितं कृत्वा पदं नो गले
व्याघातो जयघोषणादिषु बलादस्माकुलानां कृतः ।
अत्यर्थं विपुलैश्च नीतिविभवैः सम्मोहमापादिता
विश्वास्येष्वपि विश्वसन्ति मतयो न स्वेषु वर्गेषुनः ॥२६॥

King—Listen. By him the lion-hearted (lit. high-minded) stay was made in the captured city planting his foot on our very neck, as it were, as long as he desired . obstruction was forcibly offered to proclamation of victory etc. by our troops . (by him) thrown into great confusion with the majesty of his policy our minds do not trust in even the most trust-worthy of our own partisans.

CHARCHA

1. वाचा etc.—वाक् वाचम् अतिशेते = वयं वाचा (अनुक्तौ कर्त्तरि तृतीया) वाचम् अतिशययामः etc. Cf.—"धात्वातिशयार्थेति धाम सहस्रधाम्नः" Sl. 17, *ante*. *Dhundhi* reads मतिमतिशयितुम्—to surpass the wit. But it seems more natural to speak of wit surpassing wit, speech surpassing speech etc. in stead of a *person* surpassing wit or speech etc.

2. न भवान् etc.—वाक्यस्य त्वदुक्तस्य शेषः उपसंहारः, *i. e.*, you mean to add भवान् न प्रशस्यतरः, but do not add it only through courtesy.

3. तेन खलु etc.—आत्मन् is सत्त्व। महान् आत्मा अस्य। Telang reads येन which seems to violate grammar, because the correlative तच्छब्द is wanting; nor is it connectedwith any noun in the preceding sentence शूयताम्।

4. अन्वयः॥ तेन खलु महात्मना नः गले पदं कृत्वा लब्धायां पुरि यावदिच्छम् उषितम्, अस्मद्बलानां जयघोषणादिषु व्याघातः कृतः; विपुलैः नीतिविभवैः नः मतयः अत्यर्थं सम्मोहमापादिताश्च (सत्यः) विश्वास्येष्वपि स्वेषु वर्गेषु न विश्वसन्ति। व्याख्या—'तेन खलु महात्मना' उरुसत्त्वेन विपुलबुद्धिना वा पुरुषेण 'नः गले पदं कृत्वा' पादेन नु गले पीड़यित्वा [लोकोक्तिरियम्] अस्मान् विधूय इत्यर्थः 'लब्धायां पुरि' जितायां नगर्यां कुसुमपुरे इत्यर्थः 'यावदिच्छं' यथारुचि 'उषितं' स्थितम्। अस्माभिर्जिता पुरी, स तु शत्रुः निजे इव नगरे तत्र यथेच्छं स्थितः, नूनं महात्मा सः। न केवलं स्थितोऽसौ किन्तु स्थितेन तेन 'अस्माकं बलानां' सेन्यानां 'जयघोषणादिषु' विजयप्रख्यापनप्रभृतिषु विजेतृकर्मसु बलात् [हेतौ, लक्षणेपि कर्मणि वा पञ्चमी] 'व्याघातः कृतः' विघ्नः उत्पादितः। सः अवस्थित इति वयं विजयं प्रख्यापयितुं न शक्ताः तत् महात्मा किल सः। तत उत्तरकालं पुनः तेन 'विपुलैः' महद्भिः 'नीत्याः' नयस्य सुप्रयुक्तस्य 'विभवैः' सम्पद्भिः निर्दोषनयबलैरित्यर्थः 'नः मतयः' अस्माकं बुद्धयः 'अत्यर्थं' परमं 'सम्मोहं' मूढताम् 'आपादिताः' गमिताः सत्यः 'विश्वास्येष्वपि' आप्तेषु च वर्गेषु' निजेषु पक्षेषु भद्रभटप्रभृतिषु 'न विश्वसन्ति' सन्दिहते। स्थित्वा च नः प्रधानपुरुषान् उपजापदूषितान् कृत्वा शिष्टांश्च अविश्वास्यान् विधाय गतः इति महात्मा एव सः।

5. यावदिच्छम्—यावती इच्छा तावत् उषितम् इति यावदिच्छम्, अव्ययीभावः। Or better यावती इच्छा यस्मिन् कर्मणि तद् यथा तथा—बहुव्रीहिः। Qual. the क्रिया in उषितम्।

6. *Remark*—After capitulation राक्षस lived in the city for some time making plans for the restoration of the Nanda Dynasty (See Intro.)

35. चाणक्यः—(विहस्य) एतत् कृतं राक्षसेन ? वृषल, मया पुनर्ज्ञातं नन्दमिव भवन्तमुद्धृत्य भवानिव भूतले मलयकेतुः राजाधिराजपदे नियोजित इति ।

Chanakya—(*With a laugh*) Is that all that is done by Rakshasa ? I thought, however, Vrishala, that like you Malayaketu has been raised in the world to the dignity of King of kings, you having been uprooted like Nanda.

राजा—अन्येनैवेदमनुष्ठितम् ; किमत्र आर्यस्य ?

King—This has been done by another, forsooth. What is in it of my Noble Preceptor ?

चाणक्यः—हे मत्सरिन् !
आरुह्यारूढकोपस्फुरणविषमिताग्राङ्गुलीमुक्तचूडां
लोकप्रत्यक्षमुग्रां सकलरिपुकुलोच्छेददीर्घां प्रतिज्ञाम् ।
केनान्येनावलिप्ता नवनवतिशतद्रव्यकोटीश्वरास्ते
नन्दाः पर्य्यायभूताः पशव इव हताः पश्यतो राक्षसस्य ॥२७॥

Chanakya—Ha ! Detractor,—By which 'another'—having undertaken before the eyes of the world the grim vow in which the tuft of hair was unloosened with the tips of fingers that were unsteadied by the sway of wrath which was aroused, the vow arduous because involving the extirpation of the entire family of the enemy—were killed the nine conceited Nandas, masters of ninety-nine hundred *Kotis* of gold like beasts doomed by turns, Rakshasa looking on ?

अन्वयः ॥ केन अन्येन लोकप्रत्यक्षम् आरूढकोपस्फुरणविषमितायाङ्गुलीमुक्तचूडाम् उग्रां सकलरिपुकुलोच्छेददीर्घां प्रतिज्ञाम् आरुह्य अवलिप्ताः नवनवतिशतद्रव्यकोटीश्वराः ते नन्दाः पर्य्यायभूताः पशव इव पश्यतो राक्षसस्य हताः ?—व्याख्या—हे 'मतसरिन्' सत्पौरुषे विहिष्ट इदमन्येन अनुष्ठितं मन्यसे, ननु पृच्छामि कोऽसौ अन्यः ? केन अन्येन लोकस्य' जगतः 'प्रत्यक्षं' गोचरं यथा तथा 'आरूढः' सञ्जातः यः 'कोपः' अस्य 'स्फुरणेन' आविर्भावेन बहिर्विकाशेन इत्यर्थः 'विषमिताः' अधीरा या 'अयाङ्गुल्यः' अङ्गुल्यग्राणि तैः मुक्ता' अपनीतबन्धना 'चूडा' शिखा यस्या ताद्दशीम 'उग्रां' घोरा प्राणहरत्वात् भयङ्करा 'सकलस्य' अखिलस्य निःशेषस्य इत्यर्थः 'रिपुकुलस्य' शत्रुवर्गस्य नन्दान्वयस्य इत्यर्थः 'उच्छेदेन' ध्वंसेन 'दीर्घां' कालापेक्षिणीं कठोरामिति यावत् 'प्रतिज्ञां' सत्यम् 'आरुह्य' अङ्गीकृत्य 'अवलिप्ताः' दृप्ताः नवनवतिशतानां द्रव्यकोटीनां वित्तकोटीनाम 'ईश्वराः' स्वामिनः 'ते' प्रसिद्धाः 'नन्दाः पर्य्यायभूताः' क्रमोपस्थिताः 'पशवः इव' बलिकर्मणि एकरज्जुनिबद्धाः छागला इव 'पश्यतो राक्षसस्य' पश्यन्त राक्षस मनादृत्य 'हताः' हिंसिता ? मयैव नान्येन केनापि इत्यर्थः ।

CHARCHA

1. एतत् कृतम् etc.—He feigns surprise at the smallness of Rakshasa's success.

2. मया पुनर् etc.—This is raillery. Cf.—"हु' वशिष्ठः मया पुनर्ज्ञातं व्याघ्री वा ह्रकी वा" ।

3. मत्सरिन्—"मत्सरीऽन्यगुणेषु" इत्यमरः । Here गुणेष is गुणद्वेष । सः अस्ति अस्य etc.

4. आरूढ etc.—सम smooth, co-ordinated. विभिन्नं समेभ्यः विषमम् without co-ordination. विषमा कृता इति विषमा + णिच् + क्त कर्मणि rendered without co-ordination. अया चासौ अङ्गुली च अयाङ्गुली tip of finger. Now see व्याख्या ।

5. लोकप्रत्यक्षम्—अक्ष is इन्द्रिय । प्रादितत् । Or अव्ययीभाव with अक्षि ; attaching अर्श आद्यच् ; see *ante.*

6. उग्रां दीर्घाम्—उग्र refers to the character of the vow. It is उग्र *grim*, because it wanted to *kill.* दीर्घ refers to the *scope*

of the vow. It was दीर्घ long, *i. e.*, *arduous* because it meant to kill *all.*

7. नवनवति etc.—द्रव्य is धन money. "द्रव्यं भव्ये धने क्वादौ" इति हैमः। नवधिका नवति नवनवतिः, शाकपार्थिवादि। तत्संख्यकानि शतानि, शाकपार्थिवादि। द्रव्यानां कौव्य. द्रव्यकौव्य। नवनवतिशतसंख्याकाः द्रव्यकौव्यः etc

8. पर्य्यायभूताः—परि + अय + अच् भावे पर्य्याय turn. भूत is जात appeared उपस्थित। पर्य्यायेण भूताः। The reference is to the tying up of animals for sacrifice one after another.

9. राक्षसस्य—"षष्ठी चानादरे" इति षष्ठी। Also optionally ७मी।

36. अपि च—

गृध्रेराबद्धचक्रं वियति विचलितैर्दीर्घनिष्कम्पपक्षैर्-
धूमैर्ध्वस्तार्कभासां सघनमिव दिशां मण्डलं दर्शयन्तः।
नन्दानां नन्द्यन्तः पितृवननिलयान् प्राणिनः पश्य चैतान्
निर्वान्त्यद्यापि नैते स्रुतबहलवसावाहिनो हव्यवाहाः ॥२७॥

Moreover—Behold, even now do not go out these funeral fires of the Nandas which cause the large amount of issued (*i. e.* melted) fat to flow, gladdening yonder creatures that live on the burning ground, and which cause the whole circuit of the points of the compass to appear as if clouded with sunlight dimmed by smoke in the shape of vultures hovering in the sky in circles with wide and quiverless wings.

अन्वयः॥ पश्य दीर्घनिष्कम्पपक्षैः आबद्धचक्रं वियति विचलितैः गृध्रैर्धूमैः ध्वस्तार्कभासां दिशां मण्डलं सघनमिव दर्शयन्तः पितृवननिलयान् प्राणिनः नन्द्यन्तश्च एते नन्दानां स्रुतबहलवसावाहिनः हव्यवाहाः अद्यापि न निर्वान्ति। व्याख्या—'पश्य' अवलोकय 'दीर्घाः' आयताः 'निष्कम्पाः' अपरिस्पन्दाश्च ये 'पक्षाः' तैः कारणभूतैः 'आबद्ध' रचितं 'चक्रं' मण्डलं यस्मिन् कर्मणि तत यथा तथा 'वियति' आकाशे 'विचलितैः' भ्रमद्भिः 'गृध्रैर्धूमैः' गृध्ररूपधूमैः तात्त्विकधूमस्य अपगमात धूमस्थानीयैर्गृध्रैः

'ध्वस्ताः' निरस्ताः 'अर्कभासः' रविकराः यासु तासां 'दिशां मण्डलं' परिवेषं दिग्विभागान्त्यर्थः 'सघनमिव' मेघाच्छन्नमिव 'दर्शयन्तः' अवभासयन्तः 'पितृवनं' श्मशानं 'निलयः' आवासो येषां तान् 'प्राणिनः' जीवान् प्रेतवटकादीन् 'नन्दयन्तश्च' हर्षयन्तश्च 'एते' दृश्यमानाः 'नन्दानां सुताः' गलिताः याः 'वहलाः' प्रचुराः 'वसाः' मज्जाः ताः ये 'वाहयन्ति' स्रोतःक्रमेण निःसारयन्ति तादृशाः सुतवहलनन्दवसावाहिनः इत्यर्थः [सापेक्षत्वेऽपि गमकत्वात् समासः]। 'हव्यवाहाः' अनलाः चितायय इत्यर्थः। 'अद्यापि न निर्वान्ति' न प्रशाम्यन्ति। एतानपि दृष्ट्वा मन्ये मत्पौरुषं स्मरिष्यसि, अन्येनैव इदमनुष्ठितम् इत्यसम्बद्धं भूयोऽपि न वक्ष्यसि इति भावः।

CHARCHA

1. आवर्तचक्रम्—See व्याख्या। The vultures formed themselves into a circular band and moved round.

2. दीर्घनिष्कम्प etc.—See व्याख्या। *Dhundhi* takes this as qualifying गृध्रैः। Expound दीर्घौ निष्कम्पौ पक्षौ येषाम्।

3. नन्दानाम्—शेषे षष्ठी connected with वसा. see next. *Dhundhi* reads नन्दैः and explains वहलवसावशेषैर्नन्दैः'—करणे तृतीया।

4. सुतवहल etc.—See व्याख्या। The वसा becomes सुत through the heat. सुतवहलवसा + वह + णिच् + णिनि कर्तरि साधुकारिणि। The fat melted down and coursed across the burning ground in torrents; hence the joy of the creatures that are fond of such fats and live in the neighbourhood of the burning ground. The वसा is of the Nandas. The करण of नन्दनक्रिया is वसा। *Ddundhi* gives करणत्व to नन्द and identifies Nandas with वसा which is a round about process.

5. हव्यवाहाः—हव्यं वहन्ति देवेभ्यः प्रापयन्ति इति हव्य + वह + अण् कर्तरि। Nom. to निर्वान्ति (निर् + वा + लट् अन्ति)।

37. राजा—अन्येनेवेदमनुष्ठितम्।

King—This has indeed been done by another.

चाणक्यः—आः केन।

Chanakya—Eh! By whom.

राजा—नन्दकुलविद्वेषिणा दैवेन ।

King—By Fate that hates the family of the Nandas.

चाणक्यः—दैवमविद्वांसः प्रमाणयन्ति ।

Chanakya—The unknowing swear by Fate.

राजा—विद्वांसोऽपि अविकत्थना भवन्ति ।

King—The knowing again are without barg.

चाणक्य—(सकोपम्) वृषल भृत्यमिव मामारोढ़ुमिच्छसि ?

शिखां मोक्तुं बद्धामपि पुनरयं धावति करः

(भूमौ पादं प्रहृत्य)

प्रतिज्ञामारोढ़ुं पुनरपि चलत्येष चरणः ।

प्रणाशान्नन्दानां प्रशममुपजातं त्वमधुना

परीतः कालेन ज्वलयसि मम क्रोधदहनम् ॥ २७ ॥

Chanakya—(*With heat*) Vrishala do you wish to trample me down as a slave ? This hand too flies to unloose the tuft of hair (*Stamping on the ground with his foot*) and this foot too rushes to enter into a vow. Encompassed by death, you are now kindling again the fire of wrath gone out through the extinction of the Nandas.

CHARCHA

1. आः कैन—The second contradiction of the king enrages Chanakya still more. आः impatient anger.

2. नन्दकुल etc. = नन्दकुलं विद्वेष्टि इति नन्दकुल + वि + द्विष + णिनि कर्त्तरि ताच्छील्ये etc. Qual. दैवेन ।

3. प्रमाणयन्ति—प्रमाणं authority (*ante*). प्रमाणं कुर्वन्ति इति प्रमाण + णिच् (नामधातु) + लट् अन्ति ।

4. अविकत्थना—कत्थ means to brag. It is a शब्दार्थ root ; hence विकत्थते इति वि + कत्थ + युच् कर्त्तरि विकत्थनः braggart, न विकत्थनाः

etc. The rule "वौ कषलसकत्थस्भ:" adds घिनुण् to वि+कत्थ, but does not bar युच्। Hence विकत्थी and विकत्थन:।

5. मामारोढुम्—मदुपरि वर्त्तितुम, *i. e.*, to shut my mouth, to suppress me etc. "आरोढुमिच्छसि अधिचेतुं प्रवर्त्तसे"—*Dhundhi.*

6. अन्वय.॥ अयं कर: अपि बद्धां शिखां मोक्तुं पुनर्धावति, एष चरण: अपि प्रतिज्ञामारोढुं पुनश्चलति। कालेन परीतस्वम् नन्दानां प्रणाशात् प्रशममुपजातं क्रोधदहनम् अधुना पुनर्ज्वलयसि। व्याख्या—'अयं कर: अपि' एष हस्तश्च 'बद्धा' तथालेन गृहीतां वस्तुतस्तु मुक्ता 'शिखा' चूडां 'मोक्तुं' अपबन्धनां कर्तुं 'पुनर्धावति' भूय प्रसर्पति। 'एष चरण: अपि' अयं पादश्च 'प्रतिज्ञामारोढुं' सत्यमध्यासितुं 'पुनश्चलति' भूय: प्रसरति। क्रुपतोऽहं शिखां मुक्ता भूमौ पादप्रहार कृत्वा शपथमुच्चारयामि एष मे स्वभाव:। स: स्वभाव: चिरपरिचयात् अद्य क्रुद्धस्य मे स्वत: प्रकाशते। 'कालेन परीत:' मृत्युना परिवारित: वशीकृत इत्यर्थ: 'त्व नन्दानां प्रणाशात्' विलोपात् 'प्रशममुपजात' प्रशान्तं 'क्रोधदहन' क्रोपाग्निम् 'अधुना' अद्य 'पुनर्ज्वलयसि' भूयो दीपयसि। दाह्याभावात् शान्तस्य कोपवह्ने: त्वमात्मान दाह्यत्वेन उपस्थापयसि इति भाव:।

7. शिखां मुक्ताम् etc.—Cf. "मुक्तां शिखां परामृशन्" etc., Act I.

8. प्रणाशात् etc.—This is a paraphrase of—"दाह्याभावान्न खेदात् ज्वलन इव वने शाम्यति क्रोधवह्नि:" Act I. The Nandas are dead, none of them are left to burn, hence the fire has gone out.

9. ज्वलयसि—ज्वल+णिच्+लट् सिप। ज्वलयसि or ज्वालयसि। मित्त्व of ज्वल is optional when no उपसर्ग precedes, but compulsory with an उपसर्ग—प्रज्वलयसि। The rule is "ज्वलह्वलक्ष्वलनमामनुपसर्गाद्वा"। Cf.—"अथ प्रयत्नोन्नमितानमतफणै:" Magha I, 13.

38. राजा—(सावेगमात्मगतम्) अये कथं सत्यमेव आर्य्य: कुपित:। तथा हि—

संरम्भाय्न्दिपक्ष्मच्छरदमलजलच्छालनच्छामयापि
भ्रूभङ्गोङ्गे दधूमं ज्वलितमिव पुर: पिङ्गया नेत्रभासा।
मन्ये रुद्रस्य रौद्रं रसमभिनयतस्ताण्डवेषु स्मरन्त्या
सच्छातोदग्रकम्पं कथमपि धरया धारित: पादघात:॥

King—(*In agitation—to himself*) Ha! how so, Noble Preceptor is really angry. Thus—The fiery glow of his eyes, though subdued by a wash of clear water dropping from the eye-lashes that are quivering in anger, is as if ablaze in front so as to have for its smoke the frown displayed. Methinks the blow with the foot has been withstood by the Earth some how with a rude shock felt as she remembered of Rudra acting the Raudrarasa (sentiment of wrath) at his dances.

अन्वयः ॥ संरम्भास्पन्दिपक्ष्मचरदमलजलचालनचामया अपि पिङ्गया नेत्रभासा भ्रूभङ्गोद्भेदधूमं पुरो ज्वलितमिव। मन्ये ताण्डवेषु रौद्रं रसमभिनयतः रुद्रस्य स्मरन्त्या धरया पादघातः कथमपि सञ्जातोदयकम्पं धारितः। व्याख्या—कोपलक्षणानि आह —'संरम्भेण' कोपेन 'आस्पन्दौनि' सन्यक् स्पन्दमानानि यानि 'पक्ष्माणि' नेत्रलोमानि तेभ्यः 'चरन्ति' स्रवन्ति 'अमलानि' विशदानि यानि 'जलानि' तैः यत् 'चालन'' सेचन' शोधनमिति यावत् तेन 'चामया' मन्दया 'अपि पिङ्गया' आरक्तया 'नेत्रभासा' लोचना-र्चिषा कर्त्तृभूतया 'भ्रूभङ्गस्य' भ्रुकुटेः यः 'उद्भेदः' आविर्भावः 'उद्भिन्नः भ्रूभङ्ग इत्यर्थः स एव 'धूमः' यस्मिन् कर्मणि तद् यथा तथा 'पुरः' अग्रे 'ज्वलितमिव' प्रदीप्तमिव। साम्यमेघारुणा नेत्रकान्तिरेव प्रदीप्तोऽग्निः भ्रुकुटिरेव तस्य धूमः इति भावः। 'मन्ये' अहं 'ताण्डवेषु' उद्धतनर्त्तनेषु 'रौद्रं' रसम् अभिनयतः' अभिनीय दर्शयतः 'रुद्रस्य' शम्भोः 'स्मरन्त्या' तत्सम्बन्धिनीं स्मृतिमनुभवन्त्या 'धरया' मह्या 'पादघातः' आर्य्यस्य अयं पादप्रहारः 'कथमपि' अतिक्लेशेन 'सञ्जातः' आविर्भूतः 'उदयः' प्रबलः 'कम्पः' यस्मिन् कर्मणि तद यथा तथा 'धारितः' सोढः। नूनं अतिगुरुम् आर्य्यपदप्रहारम् अनुभूय शिव एव ताण्डवप्रवृत्त इति मत्वा धरा कम्पमाना सती आत्मान विष्टम्भयामास इति भावः।

CHARCHA

1. संरम्भ etc.—आ सम्यक् स्पन्दते इति आ+स्पन्द+णिनि साधुकारिणि कर्त्तरि आस्पन्दि quivering. The up and down motion of the eye lids imparts an apparent similar motion to the eye-lashes-

The lashes can have no motion of their own. अमल is almost superfluous. क्षै + क्त कर्तरि क्षाम: wan, pale. The wash is supposed to have wiped off the redness to a certain extent. Now see व्याख्या। *Dhundhi* reads उत्स्यन्दि where उद् implies upward motion *only* ; but the motion is *both* up and down : prefer आस्यन्दि। Qual. नेत्रभासा (which has अनुक्ते कर्तरि इया)।

2. भ्रू भङ्ग etc.—भ्रू भङ्गोद्भेद = उद्भिन्नभ्रू भङ्ग। "भावानयने द्रव्यानयनम्"।

3. पुर:—In front of the eyes. The level of the eyes is lower than the level of the frown which is between the eyebrows. Hence the frown is compared to धूम topping fire.

4. रुद्रस्य—रुद्र is the कर्म of स्मृ, but treated as having सम्बन्धभाव not कर्मसम्बन्ध। Hence षष्ठी शेषे remains uncompounded by the rule "अधीगर्थदयेशां कर्मणि"।

5. चाणक्या—Chanakya's kick reminded the Earth of the stamping of feet by Rudra at his dances. Rudra was not directly remembered, hence there is शेषविवक्षा and अधीगर्थ applies.

6. सञ्जात etc.—उद्गतमगमस्य उद्ग: lit. *pointed* ; hence keen, mighty etc. Cf.—"चलात् किल वायत इत्युद्ग:", "अवल्गिनाथोऽयमुदग्रवाह:", "पश्योदग्रप्लुतत्वात्" etc. Now see व्याख्या। The earth withstood the blow, but she had to put out her whole strength to do it, and shook terribly in the effort. *Dhundhi* reads सञ्जातोग्रप्रकम्पम्। A shake is उग्र or रुद्र by its intensity ; but the intensive particle प्र in प्रकम्प already expresses the intensity, thus rendering उग्र superfluous. Prefer सञ्जातोद्ग।

39. **चाणक्य:—(कृतककोपं संहृत्य) वृषल, वृषल, अलमुत्तरोत्तरेण। यदि अस्मत्तो गरीयान् राक्षस: अवगम्यते तत् इदं शस्त्रं तस्मै दीयताम्। (इति शस्त्रमुत्सृज्य उत्थाय च आकाशे लक्ष्यं बद्ध्वा स्वगतम्) राक्षस राक्षस, एष भवत: कौटिल्यबुद्धिविजिगीषोर्बुद्धे: प्रकर्ष:।**

चाणक्यतश्चलितभक्तिमहं सुखेन
जेष्यामि मौर्य्यमिति सम्प्रति यः प्रयुक्तः ।
भेदः किलैष भवता सकलः स एव
सम्पत्स्यते शठ तवैव हि दूषणाय ॥ ३१ ॥

(इति निष्क्रान्तः)

Chanakya—(*Checking the sham anger*) Vriahala, Vrishala, no use bandying words. If Rakshasa be deemed worthier than ourselves, then let this weapon be entrusted to him. (*Throwing down the weapon, rising, and fixing the gaze in air—to himself*) Rakshasa, Rakshasa, this is the height of your wit that tries to beat the wit of Kautilya !! The whole of that very same policy to estrangement which is now adopted by you, (in the hope) that, with his reverence for Chanakya shaken, you will easlly conquer Maurya, will, Oh Rogue ! result in your own disgrace (lit condemnation). (*Exit.*)

CHARCHA

1. कृतककोपम्—कृत एव कृतकः false, sham. कृतकः कोपः etc.

2. उत्तरोत्तरेण—उत्तरत्यनेन इति उद् + + अप् करणे उत्तरम् a reply. उत्तरस्य उत्तरम् rejoinder to a reply, hence *dispute*. तेन। करणे श्या ; करण of साध्यते understood.

3. गरीयान्—अतिशयेन गुरुः इति गुरु + ईयसुन् = गर + ईयसुन् = गरीयान्।

4. शस्त्रमुत्सृज्य etc—See *ante*—वृषलापेक्षया शस्त्रं धारयामि, Act I.

5. एष भवतः etc.—'कौटिल्यस्य' चाणक्यस्य मम 'बुद्धिं विजिगीषोः' विजेतुमिच्छोः 'तव बुद्धेः एष प्रकर्षः, एतावती सम्पत्, ईदृशान् प्रसरः। एतावता तु चाणक्यबुद्धिर्विजेतुं न शक्यते। The range of intellect must be wider than this if you mean to beat me in the battle of wits. Cf.—"दृश्यसे भो जागर्त्ति खलु कौटिल्यः" *ante.*

6. अन्वयः ॥ हे शठ चाणक्यतश्चलितभक्तिं मौर्य्यमहं सुखेन जेष्यामि इति सम्प्रति भवता यः एष भेदः किल प्रयुक्तः स सकल एव तवैव दूषणाय सम्पत्स्यते हि। व्याख्या—हे 'शठ' धूर्त 'चाणक्यतः' चाणक्यात् 'चलितम्' अपगतं 'भक्तिः' यस्य तादृशं

निरस्तचाणक्यं 'मौर्य्यं' दृषलं चन्द्रगुप्तम 'अहं सुखेन' अवलीलया 'जेष्यामि वशीकरिष्यामि 'इति' हेतोः एवं निश्चित्य 'सम्प्रति' अधुना 'भवता य एष भेदः' उपजापः 'किल प्रयुक्तः' प्रक्रान्तः 'स' भेदः 'सकल एव' समग्र एव 'तवैव प्रयोक्तुरेव न मम 'दूषणाय' कलङ्काय 'सम्पत्स्यते हि' नूनं भविष्यति। आवयोर्भेदार्थं प्रयुक्ता नीतिः युवयोर्भेदं साधयिष्यति इत्याशयः।

7. चलितभक्तिम्—चलिता भक्तिर्यस्य। सामान्ये नपुंसकम् (see *ante.*). Also विदितभक्तिम् in Sak.

8. सकल etc.—Construe सकल एव सः every bit of it without exception.

9. भेदः किल—किल expresses अरुचि disapproval. You may call it a भेद, I do not—I disapprove. It is no भेद because, it will redound on your own head.

10. तवैव etc.—दुष + णिच् + ल्युट् भावे दूषण disgrace. तस्मै। "तुमर्थाच्च भाववचनात्" इति चतुर्थी। तवैव not of me, hence I do not call it a भेद। In Act IV, the incidents of this Act are related to Rakshasa by Karabhaka (See Act II, Para 49 also) and Malayaketu, accompanied by Bhagurayana, overhears. Rakshasa's occasional remarks are then deliberately misinterpreted to Malayaketu by Bhagurayana and distrust of Rakshasa is created in the mind of that prince who thought that Rakshasa tried to create भेद between Chanakya and Chandragupta so that he himself might step in as Chandragupta's minister. Thus the intended भेद between Rakshasa and Malayaketu culminating in Act V in the open disgrace (दूषण) of Rakshasa who is condemned by Malayaketu as being in pay of Chandragupta.

40. राजा—आर्य्ये वैहीनरे, अतः प्रभृति अनादृत्य चाणक्यं चन्द्रगुप्तः स्वयमेव राज्यं करिष्यति इति गृहीतार्थाः क्रियन्तां प्रकृतयः।

King—Noble Vaihinari, let the subjects be informed that

henceforth, ignoring Chanakya, Chandragupta will himself conduct the affairs of state.

कञ्चुकी—(आत्मगतम्) कथं निरुपपदमेव 'चाणक्य'मिति न 'आर्य्यचाणक्य'मिति। हन्त संगृहीतोऽधिकारः। अथवा न खलु अत्र वस्तुनि देवदोषः। कुतः—

स दोषः सचिवस्यैव यदसत्कुरुते नृपः।
यान्ति यन्तुः प्रमादेन गजो व्यालत्ववाच्यताम् ॥ २२ ॥

Chamberlain (*To himself*)—How is it he says 'Chanakya' without a honorific added, not Noble Chanakya ? Alas ! the appointment is withdarwn. Or, in this matter the fault is surely not Sire's. (Do you ask) Why ?—That the king dishonours him is verily the fault of the minister himself. The tusker comes to be branded as a 'rogue' through the carelessness of the driver.

CHARCHA

1. इति गृहीतार्थाः—'इति' अनेन प्रकारेण 'गृहीतः' परिज्ञातः 'अर्थः' वस्तु याभिः ताः who take matters thus.

2. निरुपपदम्—उपोच्चारितं पदम् उपपदम् a title. निरस्तम् उपपदम् अस्मात् with the honorific dropped.

3. चाणक्यमिति—Refers to the king's speech अनादृत्य चाणक्यम् etc., where the king has plain चाणक्य and not आर्य्यचाणक्य।

4. संगृहीतोऽधिकारः—अधिकार office (*ante*). संगृहीत withdrawn. Powers are with drawn, *i. e.*, he is dismissed.

5. अत्र वस्तुनि—अस्मिन् विषये, अधिकारसंग्रहे उपपदनिरासेन चाणक्यस्य असत्कारे च इत्यर्थः in this dismissal and disgrace.

6. अन्वयः॥ नृपः असत्कुरुते (इति) यत् स सचिवस्यैव दोषः। यन्तुः प्रमादेन गजः व्यालत्ववाच्यतां याति। व्याख्या—'नृपः' राजा 'असत्कुरुते' अनादरेण वीजयति सचिवम् इति 'यत्' स 'सचिवस्य एव' अमात्यस्य एव न तु राज्ञः, दोषः'

अपराधः। 'यन्तुः' हस्तिपकस्य 'प्रमादेन' अनवधानतया 'गजः' करी 'व्यालत्वेन' दुष्टगजतया 'वाच्यतां' निन्दा 'यास्ति' लभते। हस्तिपकदोषेणैव गजस्यमवमन्यते, एवं सचिवदोषेणैव राजा सचिवम् : अत्रापि चाणक्यदोषेणैव अद्य तस्येयमवमानना इत्यर्थः।

7. असतकुरुते—सत् is an अव्यय meaning आदर। "सदित्यादरे" वर्द्धमानः। अविद्यमानं सत् अस्मिन् असत् disgrace. असत्+कुरुते इति असत्+कृ+लट् ते। No समास owing to the prohibition "उपपदमतिङ्"। Commentators take अनादर here as a बहुव्रीहि and not a नञ्तत्, hence we do not say above न सत् असत्। *Dhundhi* here quotes the rule "आदरानादरयोः सदसती"। He does not mean that there is a गतितत् here which has to be justified, but he wants simply to justify the peculiar sense of असत्। No गतितत् can be formed with तिङन्त words.

8. व्यालत्व etc.—व्याल is दुष्टगज। "व्याली दुष्टगजे सर्पे" इति हैमः। तस्य भावः व्यालत्वम्। वक्तुमर्हः इति वच+ण्यत् कर्मणि वाच्यः one requiring admonition. तस्य भावः वाच्यता disgrace, censure etc. व्यालत्वेन व्यालत्वमेव वा वाच्यता।

41. **राजा—आर्य्य, किं विचारयसि।**

King—Noble Sir, what are you thinking of?

कञ्चुकी—देव, न किञ्चित्। दिष्ट्या देव इदानीं देवः संवृतः।

Chamberlain—Nothing whatever Sire. Luckily Sire has become a king now.

राजा—(आत्मगतम्) एवम् अस्मासु गच्छमाणेषु स्वकार्य्यसिद्धिकामः सकामो भवत्वार्य्यः। (प्रकाशम्) शोणोत्तरे, यदेनं शुष्ककलहेन शिरोवेदना मां बाधते। शयनगृहमादेशय।

King—(*To himself*) Let Nobly Preceptor who expects success in the undertaking on ourselves being viewed thus, have his desire fulufilled. (*Aloud*) Sonattara, through this dry

wrangle a headache is troubling me. Show me the bed-room.

प्रतीहारी—एदु एदु दुवो [एतु एतु देवः]।

Warder—Come, let Sire come.

राजा—(आसनादुत्थाय आत्मगतम्)—

आर्य्याज्ञयैव मम लङ्घितगौरवस्य
बुद्धिः प्रवेष्टुमवनेर्विवरं प्रवृत्ता।
ये सत्यमेव हि गुरूनतिपातयन्ति
तेषां कथं नु हृदयं न भिनत्ति लज्जा ॥ ३२ ॥

(इति निष्क्रान्ताः सर्वे)।

तृतीयोऽङ्कः।

King—(*Rising from his seat—to himself*) Of me that has over-stepped the bouhds of respectfulness at the command of Noble Preceptor himself, the intention arises to enter a hole in the Earth. How is it that shame does not rend the heart of those who really insult their superiors. (*Depart all*).

THIRD ACT.

CHARCHA

1. एवं etc.—'अस्मासु एवम् अनेन प्रकारेण स्वतन्त्रत्वेन 'गृह्यमाणेषु' प्रतीयमानेषु यः 'स्वकार्य्यसिद्धिम्' आत्मप्रयोजननिष्पत्तिं राक्षसयशसमित्यर्थः 'कामयते' तादृशः 'आर्य्यः' चाणक्यः इदानीं 'सकामो भवतु' सिद्धमनोरथः सम्पद्यताम्। स्वतन्त्ररूपेणैवाहमनेन कञ्चुकिना गृहीतः पौरा अपि नूनं तथैव ग्रहीष्यन्ति एतेन आर्य्यस्य कार्य्यसिद्धिर्भवतु।

2. शुष्कफलहीन—शुष्कः dry नीरसः purposeless. तादृशः फलहः etc. हेतौ श्या।

3. अन्वयः॥ आर्य्याज्ञया एव लङ्घितगौरवस्य मम अवनेः विवरं प्रवेष्टुं (स्थितस्य) बुद्धिः प्रवृत्ता। ये सत्यमेव हि गुरून् अतिपातयन्ति लज्जा तेषां हृदयं

कथं नु न भिनत्ति। व्याख्या—'आर्य्यस्य' गुरोश्चाणक्यस्य 'आज्ञया एव' आदेशेनैव न तु निजमत्या 'लङ्घितम्' उत्क्रान्त' गौरवं' मर्य्यादा येन तादृशस्य मम 'अवनेः' पृथिव्या 'विवरं' रन्ध्रं 'प्रवेष्टुम्' अन्तर्गन्तुं स्थितस्य भूगर्भप्रवेशाभिलाषिणः जनस्य 'बुद्धिः' मति. प्रवृत्ता सञ्जाता। गुरोरादेश एव अनुष्ठितः तथापि लज्जया अहं भूगर्भं प्रविश्य सुख-मावरीतुमिच्छामि इत्यर्थः। 'ये सत्यमेव हि' यथार्थमेव 'गुरून्' पूज्यान् 'अतिपात-यन्ति' अतीत्य पातयन्ति उल्लङ्घ्य गौरवस्थानादवरोहयन्ति 'लज्जा तेषां हृदयं कथ नु न भिनत्ति' न विदारयति ?

4. बुद्धिः—Here we have supplied स्थितस्य because otherwise we get different nom. to the क्रिया in प्रवृत्ता and प्रवेष्टुम्। The usual contsruction is—बुद्धिः अवनेर्विवरं प्रवेष्टुं प्रवृत्ता—my mind wants to enter a hole in the Earth. The grammar is saved no doubt, but at the sacrifice of the sense. It will take *some* thinking the sense ought to regulate the grammar and not the grammar the sense. *Dhundhi* reads प्रवेष्टुमिव भूविवरम् and explains "भूविवरं प्रवेष्टुं लज्जातिशयेन स्वबिलयम् अभ्युपगन्तुमिव प्रवृत्ता इत्यर्थः"।

5. अतिपातयन्ति—अति + प त + णिच् + लट् अन्ति tramples down under feet. Cf.—"भृत्यमिव माम् आरोढ़ुमिच्छसि" *ante.* We may also take अति as *intensive.* The meaning then is—cause to fall very low, *i.e.,* by showing disrespect drags them down from their high position.

चतुर्थोऽङ्कः

1. (ततः प्रविशत्यध्वगवेषः पुरुषः) पुरुषः—हीमाणहे !
जोअणसअं समधिअं को णाम गदागदं इह करेइ।
अत्थाणगमगुव्वो पहुणो अस्सा जइ न होइ ॥

[आश्चर्यम् !
योजनशतं समधिकं को नाम गतागतमिह करोति ।
अस्थानगमनगुर्वी प्रभोराज्ञा यदि न भवति ॥ १ ॥]

(*Now enters a person dressed as a traveller*) *Traveller*—Oh wonder ! Who in this matter would do the going and coming back over a hundred *Yojanas* and more, if there were no master's orders heavy by reason of travel without rest ?

CHARCHA

1. अध्वग etc.—अध्वन् road. अध्वानं गच्छति इति अध्वन् + गम + ड कर्तरि। तस्य वेषः : अध्वगवेष इव वेष अस्य etc.

2. हीमाणहे—This is rendered आश्चर्यम् following *Dhnudhi*. ही is an अव्यय expressing wonder. It is good Sanskrit and not restricted to Prakrita. Cf.—"हतिविधिलसितानां ही विचित्रो विपाकः" —*Magha*. The corresponding Sanskrit for माणहे is doubtful. Possibly it is connected with मानय, *i. e.*, पूजय। Together, ही मानय =Oh wonder, you must admit it etc *Dhnndhi* reads ही हीमाणहे and explains "अयं निपातसमुदाय आश्चर्यद्योतकः" (?)।

3. अन्वयः ॥ अस्थानगमनगुर्वी प्रभोराज्ञा यदि न भवति को नाम इह समधिकं योजनशतं गतागतं करोति ? व्याख्या—'अविद्यमानं स्थानं' स्थिति विरामः

इत्यर्थः यस्मिन् तादृशं यत् 'गमनम्' अविरतगमनमिति यावत् तेन 'गुर्वी' दुष्करा 'प्रभोः' भर्तुः राक्षसस्य 'आज्ञा' आदेशो 'यदि न भवति' प्रभुर्यदि न तथा आदिशति 'को नाम' न कोऽपि 'इह' अस्मिन् कर्मणि 'अधिकेन सङ्गतं योजनशतं' योजनशतादप्यधिकं 'गतं' गमनम् 'आगतम आगमनञ्च 'करोति'। मया तु तत् कृतम् इत्याश्चर्य्यम् तत् मच्चरितम् इति भावः।

4. योजनशतम्—योजन is about 8 miles. योजनानां शतम। See next.

5. समधिकम्—सङ्गतमधिकेन, प्राप्तितत्। समधिकं योजनशतम्=lit. a hundred *Yojanas* together with some more, *i. e.*, more than eight hundred miles. By लक्षणा this means समधिकयोजनशतपरिमितम्। The whole qualifies गतागतम्। *Dhundhi* reads राजनियोगो महीयान्—The king's command is above all. This is a clerical error (See Intro).

6. को नाम—नाम expresses सम्भावना possibility. Who would, *i. e.*, not I. How he could do the trip he explains in the next half to the verse.

7. अस्थान etc.—See व्याख्या। I took no rest, such were master's orders, hance I could do the distance in such a short time. *Dhundhi* explains the compound thus—"अस्थाने अकाण्डे एव गमने प्रस्थानविषये गुर्वी अनतिक्रमणीया"—Master wanted me to proceee at once and I could not disobey.

2. जाव अमच्चरक्खसस्स एदं गेहं गच्छामि [यावदमात्यराक्षसस्य एतद्गृहं गच्छामि]। (आन्तवत् परिक्रम्य) को एत्थ दुवारिआणं? निवेदह भट्टिणो अमच्चरक्खसस्स एसो करभओ तुवरन्तो पाटलिपुत्तआदो आगदोत्ति। [कोऽत्र दौवारिकाणाम्? निवेदय भर्त्तुरमात्यराक्षसस्य "एष करभकः त्वरयन् पाटलिपुत्रात् आगतः" इति]।

Let me now enter this house of Minister Rakshasa. (*Going round as if fatigued*) Which of the warders is here ? Report-

to Master, Minister Rrkshasa, that Karabhaka hastening from Pataliputra has just arrived.

(प्रविश्य) दौवारिकः—भद्द, मा उच्चं मन्तेहि। एसो अमच्चो कज्जचिन्ताजणिदेण जाअरेण समुप्पण्णसीसवेअणो अज्ज वि मअणं ण मुञ्चदि। ता चिट्ठ मुहुत्तअं। लद्धावसरो तुह आअमणं निवेदेमि [भद्र, मा उच्चं मन्त्रयस्व। एषः अमात्यः कार्यचिन्ताजनितेन जागरेण समुत्पन्नशीर्षवेदनः अद्यापि शयनं न मुञ्चति। तत्तिष्ठ मुहूर्तम्। लब्धावसरः तव आगमनं निवेदयामि।

(*Entering*) *Warder*—Good fellow, talk not so loud. Here, Minister, with a headache supervened through wakefulness caused by thinking of state affairs, does not leave the bed yet. So wait a moment having found an opportunity I will report your arrival.

पुरुषः—भद्दमुह, तह करेहि [भद्रमुख, तथा कुरु]।

Traveller—Do so, good man.

CHARCHA

1. दौवारिकाणाम्—द्वारे नियुक्ताः इति द्वार+ठन्। द्वार becomes दौवार by "द्वारादीनाञ्च"।

2. त्वरयन्—त्वर+णिच्+शतृ। The necessity for णिच् does not appear. त्वरमाणः without णिच् expresses the meaning equally well.

3. पाटलिपुत्रात्—Pataliputra is the same as Kusumapura. This city was founded by a prince named Putraka who named it after himself and his spouse Patali.

4. समुत्पन्न etc.—शीर्ष is an independent word meaning head (See *ante* शीर्षे कमलमुकुलाकारम् etc. Act I). शीर्षस्य शीर्षे वा वेदना शीर्षवेदना। समुत्पन्ना शीर्षवेदना अस्य।

5. भद्रमुख—भद्रं मुखमस्य etc. See Sak. Act VII.

3. (ततः प्रविशति शयनगृहगतः आसनस्थः शकटदासेन सह सचिन्तो राक्षसः)। राक्षसः—(आत्मगतम्)—

मम विमृशतः कार्य्यारम्भे विधेरविधेयताम्
अपि च कुटिलां कौटिल्यस्य प्रचिन्तयतो मतिम्।
अथ च विहिते सत्कृत्यानां निकाममुपप्लवे
कथमिदमिहेत्युन्निद्रस्य प्रयात्यनिशं निशा॥ २॥

(*Now enter. with Sakatadasa, Rakshasa, meditating, seated in his bed-room*). *Rakshasa* (*to himself*) Night always slips away as I keep wakeful—at the beginning of the venture brooding over the perversity of Fate and weighing the cunning designs of Kautilya, and thereafter thinking "how could it be so here (*Or*—how is it to be at this juncture)", a full check-mate having been effected unto all my moves.

अन्वयः॥ कार्य्यारम्भे विधेरविधेयतां विमृशतः अपि च कौटिल्यस्य कुटिलां मतिं प्रचिन्तयतः अथ च सत्कृत्यानां निकाममुपप्लवे विहिते 'इह इदं कथम्' इति अनिशम् उन्निद्रस्य मम निशा प्रयाति। व्याख्या—'कार्य्यस्य' कर्मणः कुसुमपुरनिरोधरूपस्य 'आरम्भे' मुखे प्रस्तावे इत्यर्थः 'विधेः' दैवस्य 'अविधेयतां' स्वातन्त्र्यं प्रतिकूलतामिति यावत् 'विमृशतः' ध्यायतः 'अपि च' तदुपरि पुनः 'कौटिल्यस्य' चाणक्यस्य 'कुटिलां मतिं' वक्रं नयं 'प्रचिन्तयतः' पर्य्यालोचयतः, दैवं प्रतिकूलं नः, षड्ना च चाणक्यनीतिः तत् कथं कार्य्यसिद्धिः इति कार्य्यारम्भे एव विचारयतः 'अथ च' अनन्तरं पुनः शङ्काकारणं सत्यपि प्रारब्धे कार्य्ये इत्यर्थः 'सत्कृत्यानाम्' सम्यत्पर्यागतां 'निकामं' सर्वाङ्गीनं यथा तथा 'उपप्लवे' उपमर्दे 'विहिते' साधिते, चाणक्यप्रयोगैः मत्प्रयोगेषु अत्यन्तं विफलीकृतेषु सत्सु 'इह' अस्मिन् मुविहितेऽपि 'मत्सयोगे' 'इदम्' एतत् विफलीभाव इत्यर्थः 'कथं' केन प्रकारेण जातम् 'इति' अनया रीत्या 'अनिशं' निरन्तरम् 'उन्निद्रस्य' जायत एव 'मम निशा प्रयाति' अतिगच्छति। या चिन्ता कार्य्यारम्भे सा एव आरब्धेऽपि कार्य्ये इति निद्रां नैव लभे इत्यर्थः।

CHARCHA

1. अविधेयताम्—वि + धा + यत् कर्मणि विधेयः विनयग्राही controllable. न विधेयः। तस्य भावः। I knew Fate was against us and passed sleepless nights brooding over it before the venture was launched.

2. कौटिल्यस्य etc.—Not only was Fate against us, we had also to deal with a particularly cunning adversary. I had to reflect of the counter moves he could possibly adopt. Thus I could not get a wink of sleep.

3. अथ च etc.—This refers to the stage after the work is in progress. उप + यह + अप् भावे उपग्रहः check. I find my moves all anticipated and counter-acted.

4. कथामदमिह etc.—I am foiled at every step. But the mystery is I cannot account for it. Toiling to find out how this could happen, I kept awake for nights together. Or, 'इह' अस्मिन् विषये, उपग्रहे मति इत्यर्थः 'इदं' प्रारब्धमेतत्कार्यं 'कथं' केन प्रकारेण निर्वोढव्यम्।

5. अनिशम्—निशा night ; by लक्षणा rest, cessation etc. अविद्यमाना निशा यस्मिन् कर्मणि तत् यथा तथा। Incessantly. Qual. the क्रिया in उन्निद्र or प्रयात—always passes, or always wakeful.

4. अपि च—

कार्य्योपक्षेपमादौ तनुमपि रचयंस्तस्य विस्तारमिच्छन्
बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च।
कुर्वन् बुद्ध्या विमर्शं प्रसृतमपि पुनः संहरन् कार्य्यजातं
कर्त्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा ॥ २ ॥

Moreover—The author of a drama as well as one like me suffers this trouble, devising at start means to the end though meagre, next thinking of its development and then secretly causing the very deep issue of the impregnated seeds to

germinate (*i. e.*,—means to develop), again mentally making a survey (of results) and lastly focussing together all the results though seattered.

N. B.—The व्याख्या applies to both the dramatist and the diplomat.

अन्वयः॥ आदौ तनुमपि कार्य्योपक्षेपं रचयन, (ततः) तस्य विस्तारमिच्छन्, गर्भितानां बीजानाम् अतिगहनं फलं गूढमुद्भेदयंश्च, (ततः) बुद्ध्या विमर्शं कुर्वन्, प्रसृतं कार्य्यजातं पुनः संहरन्नपि नाटकानां कर्त्ता वा अस्मद्विधो वा इमं क्लेशमनुभवति। व्याख्या—'आदौ' प्रारम्भे 'तनुमपि' स्वल्पञ्च 'कार्य्यस्य' इष्टार्थस्य 'उपक्षेपं' हेतुं बीजमित्यर्थः 'रचयन्' उद्भावयन् कार्य्यसिद्धिबीजं श्लोकमपि विदधत् इत्यर्थः। ततः उप्ते बीजे 'तस्य' बीजस्य 'विस्तारं' प्रचयम् 'इच्छन्' कामयमानः बीजप्रचयार्थमुपायं चिन्तयन्नित्यर्थः ततो 'गर्भितानां' सञ्जातगर्भाणां 'बीजानां' प्रसरतां प्ररोहाणामित्यर्थः 'अतिगहनं' दुरनुमेयं 'फलं' प्रसवं परिणतिमिति यावत् 'गूढं' सुगुप्तं यथा तथा 'उद्भेदयंश्च' प्ररोहयन् अङ्कुरता नयन्नपि ततः पश्चात् 'बुद्ध्या' स्वमत्या 'विमर्शं कुर्वन्' विघ्नादीनां बलाबलं विचार्य्य सुगमंगम्यं फलागमं पश्यन् 'प्रसृतं' बहुधा प्रधावितं 'कार्य्यजातम्' अवान्तरार्थसमूहं 'पुनः' भूयः 'संहरन्नपि' संगच्छंश्च एकस्यैव मुख्यस्यार्थस्य आनुगुण्येन परिणमयन्नपि इत्यर्थः 'नाटकानां' रूपकाणां 'कर्त्ता वा' रचयिता च 'अस्मद्विधो वा' मादृशश्च नीतिप्रयोक्ता जनः [वा इति समुच्चये] 'इमं क्लेशं' निद्रार्च्छेदरूपमायासम् 'अनुभवति' प्रजागरदुःखं भजते तदासौ तत्कथा। सन्धिराक्षसम्।

CHARCHA

1. **कार्य्योपक्षेपम्**—उपक्षिप्यते प्रस्तूयते अनेन इति उप+क्षिप+घञ् करणे उपक्षेपः that which presents or accomplishes, *i. e.*, cause हेतुः **बीजम्** etc. कार्य्यं is work undertaken. तस्य उपक्षेपः। Or कार्य्यं सुपक्षिप्यते अनेन इति कार्य्योपक्षेपः that which accomplishes the work, *i. e.*, which is taken as capable of accomplishing the work. **जातावेकवचनम्**—many are the steps adopted ; cf.—**बीजानाम्** in the next line. *N. B.*—In the case of a political drama, the dramatist records what is done by the diplomat. The diplomat thinks out the moves and passes sleepless nights in the effort. Supposing the diplomat to be a product of the poet's

fancy the effort is all the poet's own, and then it is *he* that has to pass sleepless nights in perfecting his creation. It is true चाणक्य and राक्षस are historical personages and not the result of the Vishakhadatta's imagination, but the incidents detailed in the drama, as also their inter-dependence mut be attributed to the poet. चाणक्य's कार्य्योपक्षेप is recorded by the poet in Act I, para 20, तन्नयापि तावत् etc., that of राक्षस in Act II, para 9, अपि च etc. *Dhundhi* takes कार्य्योपक्षेप as बीजन्यास sowing the seeds with घञ् भावे।

2. आदौ—At start. In the case of the drama the start is called मुखसन्धि। "आदौ मुखसन्धौ"—*Dhundhi*. The सन्धिs are five —"मुखं प्रतिमुखं गर्भः सविमर्शो निवर्हणम् (? निर्वहणम)"। मुखसन्धि is where the hero adpots means (बीज) betraying eagerness for the achievemeut of thc end (आरम्भ)। चाणक्य's eagerness is seen in "अतएवास्माकं स्वत्संग्रहे यत्नः" etc. Act I, para 19. The बीज follows in Para 20, etc.

3. तस्य विस्तारम् etc.—तस्य refers to बीजम् which is supposed to spread, *i. e.*, develop, unless averted (विस्तारि), cf.—"लोकोद्दिष्टं कार्यहेतुर्बीजं विस्तार्यनेकधा।"

4. बीजानां गर्भितानाम् etc—गर्भः सञ्जात. एषामिति गर्भ+इतच् गर्भितानि impregnated. Of the seeds sown, some rot, some dry up, and the rest are impregnated. In our case चाणक्य's कार्य्योपक्षेप becomes गर्भित not so of राक्षस। The blight in राक्षस's seeds is detailed at lenght in Act II, where विराधगुप्त meets राक्षस। The गर्भितता of चाणक्य's seeds is seen in the same Act in Paras 39 and 40, where jewellery is given to सिद्धार्थक and the same is deposited with राक्षस, and further in Act III, Para 30, where मलयकेतु is see admitting चाणक्य's men into his service. The definition of गर्भ is "गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः"। In accordance with this definition Act II is more the गर्भसन्धि of राक्षस than of चाणक्य। The बीज is दृष्ट in the efforts of दारुवर्मन् etc.

and नष्ट in their failure. अन्वेषणं मुहुः is seen in the efforts of अभयदत्त etc. whice are brought up before राक्षस one after another only to be told as having failed in succession. Again गर्भसन्धि is also supposed to be indicated by hopes raised by a story connected with the work in hand, but not dissociated from apprehensions of failure. "प्राप्त्याशापताकायोः सम्बन्धो गर्भसन्धिः"—*Dhundhi.* Act II, Para 45, satisfies this condition with regard to Rakshasa. This aspect of the गर्भसन्धि does not present itself to चाणक्य because he is always self-reliant, always confident of the result. To him there is no अपायशङ्का—apprehension of failure, and प्राप्त्याशा as defined by "उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः" is absent. In the case of चाणक्य the बीज is दृष्टनष्ट in the disappearanece of सिद्धार्थक and we have अन्वेषणं मुहुः in his reappearance with शकटदास before राक्षस।

5. फलमतिगहनम् etc.—The उद्देश of the फल will be described later (Acts IV and V).

6. कुर्वन् etc.—वि + मृश + घञ्, भावे विमर्श weighing of matters. This is also the technical name of a सन्धि, viz., विमर्शसन्धि। This occurs where, from a certain narration, all apprehensions as to the final result are allayed and success is assured. This is absent in the case of राक्षस ; he is always apprehensive. In the case of चाणक्य we have it clear in Act III, Sl. 32.

7. प्रस्तुतमपि etc.—This does not apply to राक्षस because he does not advance so far. चाणक्य's संहार of कार्यजात is seen in Act VII, Sl. c, भृत्या भद्रभटादयः etc.

8. कर्त्ता वा अस्मद्विधो वा—वा is rare in the sense of समुच्चय as here. But cf.—"सा वा शम्भोस्तदीया वा मूर्त्तिर्जलमयी मम"।

9. इदम् etc.—This refers to the trouble of sleeplessness spoken of in the verse proceeding. This trouble is unavoidable in the case of the diplomat and the novelist as well . so what is the good of complaining ?

5. तत् अपि नाम दुरात्मा चाणक्यवटुः—

Well then, is it likely that the vile-hearted brat Chanakya—

(उपसृत्य) दौवारिकः—जेदु [जयतु]।

Warder—(*Approaching*) Be victorious.

राक्षस ——अतिसंधातुं शक्यः स्यात् ?

Rakshasa——Might be capable of being deceived.

दौवारिकः—अमच्चो [अमात्यः]।

Warder—Minister.

राक्षसः (वामाक्षिस्पन्दनं सूचयित्वा आत्मगतम्)—"दुरात्मा चाणक्यवटुर्जयतु अतिसंधातुं शक्यः स्यात् अमात्यः" इति वागीश्वरी वामाक्षिस्पन्दनेन प्रस्तावगता प्रतिपादयति। तथापि नोद्यमस्त्याज्यः। (प्रकाशम्) भद्र, किमसि वक्तुकामः ?

Rakshasa—(*Indicating the throbbing of his left eye—to himself*) Divine Speech, ruling the context, establishes this by the throbbing of the left eye—"Let the vile-hearted brat Chanakya be victorious, the minister might be capable of being deceived". Still efforts must not be abandoned. (*Aloud*) good man what do you want to say ?

दौवारिकः—अमच्च, करभओ दुआरे चिट्ठदि [अमात्य, करभको द्वारि तिष्ठति]।

Warder—Minister, Karabhaka waits at the gate.

राक्षसः—शीघ्रं प्रवेशय।

Rakshasa—Show him in quick.

दौवारिकः—जं अमच्चो आणवेदि [यदमात्य आज्ञापयति]। (निष्क्राम्य पुरुषमुपसृत्य) भद्द उपसप्प अमच्चं [भद्र उपसर्प अमात्यम्] (इति निष्क्रान्तः)।

Warder—As Minister commannds. (***Going out and approaching the attendant***) Good man approach the Minister. (***Exit***).

CHARCHA

1. चाणक्यबटुः—"कुत्सितानि कुत्सनैः" इति समासः (see *ante*).

2. दौवारिकः—द्वारं नियुक्तः (see *ante*).

3. अतिसंधातुम्—अति + सम् + धा means to deceive. Cf.—"परातिसंधानम् अधीयते यैः"—Sak. Act V.

4. दुरात्मा चाणक्यबटुर्जयतु—This sentence is got by taking जैतु of दौवारिक along with the Minister's words preceding.

5. अतिसंधातुं शक्यः स्यात् अमात्य —'अमात्यः' मन्त्री राक्षसः 'अतिसंधातुं' वञ्चयितुं 'शक्यः स्यात्'। This is a combination o fthe immediately preceding two speeches.

6. वामाक्षिस्पन्दनेन etc.—वामं अक्षि। तस्य स्पन्दनम्। तेन। This bodes evil to males, but is auspicious for females. Cf.—Sak. Act I, Act V, Act VII. 'प्रस्तावं' प्रसङ्गं 'गता' आश्रिता 'वाग्मीश्वरी' देवीवाक् 'वामाक्षिस्पन्दनेन इति' एतत् 'प्रतिपादयति' व्यवस्थापयति आवयोः संलापे ये शब्दाः उच्चारिता वामाक्षिस्पन्दनरूपदुर्निमित्तानुसारेण तेषां योजनया एतत् प्रतिपाद्यते। किं तदित्याह—'दुरात्मा चाणक्यबटुर्जयतु, अमात्यः अतिसंधातुं शक्यः स्यात्' इति। The words in the conversation have to be construed so as to suit the evil omen of the throbbing of the left eye. This leads to the construction दुरात्मा चाणक्यबटुर्जयतु etc.

6. **करभकः**—(उपसृत्य) जेदु अमच्चो [जयतु अमात्यः]।

Karabhaka—(***Approaching***) Let Minister prosper.

राक्षसः—भद्र उपविश।

Rakshasa—Sit down, good man.

करभकः—जं अमच्चो आणवेदि [यत् अमात्य आज्ञापयति] (इति भूमावुपविष्टः)।

Karavaka—As Minister commands (*Squats on the ground*).

राक्षसः (आत्मगतम्)—कस्मिन् प्रयोजने मयायं प्रेषित इति प्रयोजनानां बाहुल्यात् न खलु अवधारयामि (इति चिन्तां नाटयति)।

Rakshasa—(*To himself*) Through multiplicity of purposes, I do not indeed recollect to what purpose this fellow was sent by me. (*Acts thinking.*)

(ततः प्रविशति वेत्रपाणिद्वितीयः पुरुषः) पुरुषः—ओसलेह ओसलेह। आअदो। अवेह अवेह माणवाः। किं ण पेक्खह—

दूले पच्चासत्तो ढंसणंवि दुल्लहमधण्णेहिं।
कल्लाणकुलहराणं देआणं विअ मनुस्सदेआणं ॥ ४ ॥

[अपसरत अपसरत। आगतः। अपेत अपेत मानवाः। किं न पश्यथ—

दूरे प्रत्यासत्तिर्दर्शनमपि दुर्लभमधन्यैः।
कल्याणकुलधराणां देवानामिव मनुष्यदेवानाम् ॥ ४ ॥

(*Now enter cane in hand a second attendant*). *Attendant*—Away, away. Arrived. Off, off, ye folks. Don't you see—Of god-like men (kings), the representative of blessed families, as of Gods, even the sight is hardly available to those without luck, let alone approach.

CHARCHA

1. कस्मिन् प्रयोजने—किं प्रयोजनमुद्दिश्य इत्यर्थः। Hence it is not the हेतु of the क्रिया in प्रहितः consequently we canuot have केन प्रयोजनेन etc. as substitutes. विषयाधिकरणे ७मी।

2. प्रहितः—प्र + हि (प्रेरणे) + क्त कर्मणि।

3. वेत्रपाणिः—वेत्र पाणौ यस्य। वेत्र is a rod i. e, it is something to strike with, it is प्रहरणार्थं। Hence "प्रहरणार्थेभ्यः परा निष्ठा" इति पाणिशब्दस्य परनिपातः।

4. अन्वय॥ देवानामिव, कल्याणकुलधराणां मनुष्यदेवानां दर्शनमपि अधन्यैः दुर्लभं, प्रत्यासत्तिर्दूरे। व्याख्या—'देवानामिव' यथा देवानां तथा 'कल्याण' मङ्गलमयं यत् 'कुलं' वंशः राजवंश इत्यर्थः, तस्य ये 'धराः' रक्षकाः तादृशा ये 'मनुष्यदेवा' नरदेवता राजान इत्यर्थः तेषां 'दर्शनमपि' अवलोकनञ्च 'अधन्यैः' हतभाग्यैः पुरुषैः 'दुर्लभं' दुष्प्रापम्। 'प्रत्यासत्तिः' उपसर्गात् 'दूरे' तिष्ठतु उपसर्गस्य का कथा।

5, प्रत्यासत्तिः—प्रति + आ + सद् + क्तिन् भावे approach, the root is here सकर्मक। उपसर्गवशात् सकर्मकत्वम्। अधन्याः मनुष्यदेवान् प्रत्यासीदन्ति = अधन्यैः वा अधन्यानां मनुष्यदेवानां प्रत्यासत्तिः। षष्ठी in the अनुक्तकर्तरि is optional by "शेषे विभाषा"।

6. अधन्यैः—"न लोका—"इति खलर्थयोगे षष्ठी प्रतिषेधः। Construe अधन्यैः दुर्लभम्।

7. कल्याण etc.—कल्याण blessed. Cf.—"कल्याणो ननु गाथेयं लौकिकी प्रतिभाति मे", also 'कल्याणवर' the current address to juniors Now see व्याख्या। कल्याण also means blessing, cf—"यत् कल्याण वयसि तरुणे भाजनं तस्य जातः", also 'निवृत्तसर्वकल्याणा तिथिः", *supra*. different readings.

8. मनुष्य etc.—मनु + यत् = मनुष्य with the augment पुक्। मनुष्य इमे देवा इव god-like men, *i. e.*, kings. Cf—"मनुष्यदेवः पुनरत्यावा" निद्राविधेयं नरदेवसैन्यम्"। अनुक्तौ कर्मणि षष्ठी (See प्रत्यासत्तिः)। Or better शेषे षष्ठी, related to दर्शनम् and प्रत्यासत्तिः।

7. (आकाशे) अज्जा किं भणाह—किंणिमित्तं ओमालणा करिअदित्ति। अज्जा एसो क्खु कुमालो मलअकेदु समुप्पण्णसीसवेअणं अमच्चरक्खसं पेक्खिदुं इदो एव्व आअच्छदि। ता ओसालणा करिअदि [आर्याः, किं भणथ किं निमित्तमपसारणा क्रियते इति ? आर्याः, एष खलु कुमारो मलयकेतुः

समुत्पन्नशीर्षवेदनम् अमात्यराक्षसं प्रेक्षितुम् इत एव आपच्छति। तस्मात् अपसारणा क्रियते] (इति निक्रान्तः पुरुषः)।

(*In the air*) Noble Sirs, do you ask what for the clearing is being made? Noble Sir, here indeed Prince Malayaketu is coming this very way to see Minister Rakshasa, who has got a head-ache. Hence the clearing is being made. (*Exit attendant*).

(ततः प्रविशति भागुरायणेन कञ्चुकिना च अनुगम्यमानो मलयकेतुः)। मलय०—(निश्वस्य आत्मगतम्) अद्य दशमो मासः तातस्य उपरतस्य। न च अस्माभिः वृथा पुरुषाभिमानमुद्वहद्भिः तमुद्दिश्य तोयाञ्जलिरप्यावर्जितः। प्रतिज्ञातमेतत् पुरस्तात्—

वक्षस्ताडनभिन्नरत्नवलयं भ्रष्टोत्तरीयांशुकं
हा हेत्युच्चरितात्तनादकरुणं भूरेणुरूक्षालकम्।
तादृङ्मातृजनस्य शोकजनितं सम्प्रत्यवस्थान्तरं
शत्रुस्त्रीषु मया विधाय गुरवे देयो निवापाञ्जलिः॥ ५॥

(*Now enter Malayaketu followed by Bhagurayana and the Chamberlain*). *Malayaketu* (*Sighing—to himself*)—To-day is the tenth month since father died, but even a handful of water has not yet been offered unto him by me falsely bearing the pride of man. This was vowed by me then (lit. formerly)—"The handful of libations has to be offered by me to father after having forthwith inflicted on the wives of my enemy the same dire change of circumstances through grief as befell my mothers with their upper garments slipped off, with locks roughened by dust from the ground, with the gem-bracelets smashed from beating the breast—change which was grievous by the wails of distress that went up in the shape "Ah! Ah!"

CHRCHA

1. आकाशे—See opening of Act II.

2. अपसारणा—अप + सृ + णिच् + युच भावे this means clearing the crowd by shouting अपसरत etc.

3. तातस्य etc—'उपरतस्य' मृतस्य 'तातस्य' सम्बन्धे 'दशमो मासः'। शेषे षष्ठी।

4. पुरुषाभिमानम् etc—अभि + मन + घञ् भावे अभिमानः conceit, pride etc—पुरुषस्य अभिमानः। शूरोऽहं कृतकर्माहम् इत्यादिरूपः अभिमानः etc.

5. तोयाञ्जलिः—तोयस्य अञ्जलिः, *i. e.*, अञ्जलिमितं तोयम्।

6. आवर्जितः—आ + वृज + णिच् + क्त कर्मणि offered. In this sense, cf—"मत्परं दुर्लभं मत्वा नूनमावर्जितं मया। पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते॥"

7. अन्वयः॥ मातृजनस्य शोकजनितं वक्षस्ताडनभिन्नरत्नवलयं षष्टोत्तरीया शुकं भूरेणुरूक्षालकं हा हेत्युच्चारितात्तेनादकरुणं तादृक् अवस्थान्तरं सम्प्रति शत्रुस्त्रीषु विधाय मया गुरवे निवापाञ्जलिर्देयः एतत् पुरस्तात् प्रतिज्ञातम्। व्याख्या—'मातृणाम्' अम्बानां 'जनस्य' समूहस्य 'शोकेन' भर्तृवियोगदुःखेन 'जनितम्' आपादितं तथा च 'वक्षसः' उरसः 'ताडनेन' करप्रहारेण 'भिन्नानि' भग्नानि 'रत्नवलयानि' मणिकङ्कणानि यस्मिन् तादृशम् अपि च 'सृष्ट' च्युतम् 'उत्तरीयं' पूर्वकायधृतम् अशुकं' वस्त्रं यस्मिन् तादृशं किञ्च 'भूरेणौ' धारायाः 'रेणुभिः' धूलिभिः 'रूक्षा' धूसराः 'अलकाः केशाः यस्मिन् तादृशम् अपि च 'हा हा इति' अनेन प्रकारेण 'उच्चरितः' उद्गतः यः आर्तनादः' दीनकण्ठः तेन 'करुणं' हृदयविदारणं 'तादृक' तथाविधं घोरम् 'अवस्थान्तरं' दशाविपर्ययं 'सम्प्रति' अद्य अविलम्बितमित्यर्थः 'शत्रुस्त्रीषु' अरिवनितासु 'विधाय' कृतपाद्य तासां वैधव्यं घटयित्वा इत्यर्थः 'मया गुरवे' पित्रे पर्वतराजाय 'निवापस्य' पिण्डदानस्य 'अञ्जलिः' अञ्जलिमितं निवापसलिलमित्यर्थः 'देयः' आवर्जनीयः। शत्रुं हत्वा पितृश्राद्धं करिष्यामि इति 'एतत् पुरस्तात्' पूर्वं तातस्य निधनकाले 'प्रतिज्ञातं' सत्यमुच्चारितं। ततः आरभ्य दश मासा विगता न च शत्रुः हतः नापि श्राद्धं कृतं धिक् पुरुषाभिमानमस्माकमित्याशयः। शार्दूलविक्रीडितं वृत्तम्।

8. वक्षः etc.—See व्याख्या। This is the reason why the upper garment fell off.

9. भग्न etc.—See व्याख्या। The garments slipped in the act of beating the breast. This exposed the head; hence भूरेणुरूक्षालकम्।

10. हा हा etc.—See व्याख्या। The scene was heart-rending, hence तादृक्।

11. भूरेणु etc.—See व्याख्या। Implies that the queens lay prostrate on the ground, though this is not expressly stated.

12. तादृक्—तद् + दृश + क्विन् कर्त्तरि such, *i. e*, so pitiable.

13. मातृजनस्य—जन here means समूह, वर्ग etc. This sense is not found in the lexicons, but when the leading word (पूर्व-पद) in the compound has a plural idea, only this sense of जन will give a clear meaning. In speaking of one mother only, we may say माता एव जनः मातृजनः, but if several mothers are intended, we must have मातर एव जनाः मातृजनाः not मातृजनः। We may look at it from another point of view also. जन = world लोक, cf.—"सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तुमतीं विशङ्कते" etc., Sak, Act V. But we may speak of the 'world of Philosophers' in the sense of the *whole body* of philosophers ; hence मातृजन may mean the *whole body* (*i. e.*, समूह' वर्ग etc.) of mothers.

14. सम्प्रति—Now, *i. e.*, forthwith—an अव्यय।

8. किमत्र बहुना ?
उद्यच्छता धुरमकापुरुषानुरूपां
गन्तव्यमाजिनिधनेन पितुः पथा वा।
आच्छिद्य वा स्वजननीजनलोचनेभ्यो
नेयो मया रिपुवधूनयनानि वाष्पः॥ ६ ॥

Away with talking much about it—Bearing the burden as befits one that is not a coward, I have either to tread along the track of my father by death in battle, or to transfer the tears to the eyes of the wives of my enemy snatching them away from the eyes of my mothers.

CHARCHA

1. अत्र—In this matter, *i. e.*, in the matter of revenge *preceding* the श्राद्ध।

2. अन्वय॥ अकापुरुषानुरूपां धुरमुदयच्छता मया पितुः पथा वा आजिनिधनेन गन्तव्यम्, वार्ष्णो वा स्वजननीजनलोचनेभ्य आच्छिद्य रिपुवधूनयनानि नेयः ; व्याख्या—गता दशमासाः सत्यम् इदानीन्तु 'अकापुरुषस्य' वीरस्य 'अनुरूपा' योग्यां 'धुरं' भारम् 'उदयच्छता' वहता वीरोचितं कर्म कुर्वता 'मया' शत्रुभिर्युध्यमानेन मया इत्यर्थः 'पितुः' तातस्य 'पथा वा वर्त्मना वा प्रेतानां मार्गेण वा 'आजौ' युद्धे 'निधनेन' मृत्युना 'गन्तव्यं' प्रस्थातव्यं शत्रुहस्ते विनाशो वा गन्तव्यो मया, शत्रून् जित्वा 'वार्ष्णो वा' नेतृजनं वा 'स्वस्य' आत्मनः 'जननीजनस्य' मातृवर्गस्य 'लोचनेभ्यः' नयनेभ्यः 'आच्छिद्य' गृहीत्वा 'रिपुवधूनां' अरिनारीणां 'नयनानि' नेत्राणि 'नेयः' प्रापणीयः। विधवा अरिनार्यो रोदननिरताः मातरश्च रोदनविरताः कार्याः। तदर्थं 'शरीरं' वा पातयेयं कार्यं वा साधयेयम्' इति भावः। वसन्ततिलका वृत्तम्।

3. उदयच्छता—उद् + यम + शतृ etc. The object (फल) of उदयमनक्रिया is directly शत्रुनाश and remotely निवापाञ्जलिदान। Hence the क्रियाफल goes to the शत्रु and not to Malayaketu · consequently the rule "समुदाङ्भ्यो यमोऽग्रन्थे" does not apply and we do not get the आत्मनेपद। आर्वभिप्राये क्रियाफले परस्मैपदम्।

4. अकापुरुष etc.—रूपमनुगता अनुरूपा। कुत्सितः पुरुषः कापुरुषः or कुपुरुषः by "विभाषा पुरुषे"। न कापुरुषः कुपुरुषविरोधी अकापुरुषः a hero. विरोधार्थे नञ्। तस्य अनुरूपाम् etc.

5. आजि etc.—आजि battle. "रणेऽपि आजिः" इत्यमरः। तस्या निधनम् etc.

6. वा—अव्यय indicating विकल्प। He makes the attempt. which may or may not be successful. If unsuccessful, he falls the result is पितुः पथा गन्तव्यम्। On the other alternative, he wins brings joy to his mothers and grief to the wives of his enemy.

7. स्वजननी etc.—जननीजन is मातृजन of Sl. 5. "ध्रुवमपाये—"इति ध्रुवौ because आच्छिद्य implies motion.

8. मयारिपु etc,—अहं वार्ष्णः रिपुवधूनयनानि नेष्यामि=मया वार्ष्णः रिपुवधूनयनानि नेयः। नी is द्विकर्मक,the प्रधानकर्म becomes उक्त by "न्यटः प्रधाने"।

9. **(प्रकाशम्) आर्य्य जाजले, उच्यन्ताम् अस्मद्वचनादनुयायिनो राजानः—"एक एवाहम् अमात्यराक्षसस्य अतर्कितगमनेन प्रीतिमुत्पादयितुमिच्छामि तत् कृतमनुगमनक्लेशेन" इति।**

(*Aloud*) Noble Jajali, let the princes that are following me be told this in my words—"Unattended I wish to give joy to Minister Rakshasa by unexpected approach, So away with the trouble of following."

कञ्चुकी—तथा। (इति परिक्रम्य आकाशे) भो भो राजानः कुमारः समाज्ञापयति "न खल्वहं केनचित् अनुगन्तव्यः" इति। (विलोक्य सहर्षम्) कुमारस्य आज्ञानन्तरमेव सर्वे राजानः प्रतिनिवृत्ताः। पश्यतु कुमारः—

सोत्सेधैः स्कन्धदेशैः खरतरकविकाकर्षणात्यर्थभुग्नै-
रश्वाः कैश्चिन्निरुद्धाः खमिव चुरपुटैः खण्डयन्तः पुरस्तात्।
केचिन्मातङ्गमुख्यैर्विहतजवतया मूकघण्टैर्निवृत्ता
मर्य्यादां भूमिपाला जलधय इव ते देव नोल्लङ्घयन्ति ॥ ७ ॥

Chamberlain—So be it. (*Going round—in the air*) Ho! Ho! Kings, the Prince commands thus—"I must not be followed by any one." (*Observing—with joy*) All the kings have turned back immediately after the Prince's order. Look, Oh Prince—By some have been checked their horses with necks much curved and bulged from a very tight pull of the reins—horses which are as if pounding with their hoofs the sky in front. Some others have stopped on lordly tuskers with the bells mute, because of the speed checked. The kings, Oh Sire, like the seas, do not overstep your bounds.

CHARCHA

1. जाजलि—Cf. आर्य्य जाजलि etc. Act II, Para 13.

2. अतर्कित etc.—तर्क + णिच् स्वार्थे + क्त कर्मणि तर्कित guessed. न तर्कितम्। तादृशं गमनम् etc.

3. कृतम्—अव्यय implying निषेध like अलम्। Cp "अथवा कृतं सन्देहेन"—Sak.

4. आज्ञानन्तरम्—आज्ञा is here आज्ञाश्रवण by लक्षणा। अविद्यमानमन्तरमस्मिन् अनन्तरम् immediate. आज्ञायाः अनन्तरं यथा तथा।

5. अन्वयः॥ कैश्चित् खुरपुटैः पुरस्तात् खं खण्डयन्तः इव अश्वाः खरतरकविकाकर्षणात्यर्थभुग्नैः सोत्सेधैः स्कन्धदेशैः निरुद्धाः। कैश्चित् विहतजवतया मूकघण्टैः मातङ्गमुख्यैः निवृत्ताः। हे देव जलधय इव भूमिपालास्ते मर्य्यादां न उल्लङ्घयन्ति। व्याख्या—'कैश्चित्' भूमिपालैः 'खुरपुटैः' पुटितैः खुरैः [करणे तृतीया] 'पुरस्तात्' अग्रतः 'खम्' आकाशं 'खण्डयन्त इव' कुट्टयन्त इव दूर्णयन्त इव इत्यर्थः 'अश्वाः' घोटकाः 'खरतर' सम्भ्रमात् अतिकठोरं यत् 'कविकाकर्षणं' खलिनसंग्रहः तेन 'अत्यर्थं' भृशं 'भुग्नैः' वक्रैः अतएव 'सोत्सेधैः' उन्नतैः 'स्कन्धदेशैः' ग्रीवाभागैः 'निरुद्धाः' संयताः संयतत्वेन उपलक्षिता इत्यर्थः। आभुग्ना उन्नताः स्कन्धाः कथयन्ति निरुद्धा इमे अश्वा इति। 'कैश्चित्' इतरे भूमिपालाः 'विहतः' अपगतः 'जवः' वेगः धावनवेग इत्यर्थः येषां तथाविधतया हेतुना 'मूकाः' नीरवाः 'घण्टाः' गलघण्टाः येषां तैः 'मातङ्गमुख्यैः' करीन्द्रैः 'निवृत्ताः' गमनविरताः स्थितत्वेन उपलक्षिताः। अतोऽहं ब्रवीमि हे 'देव' राजन् मलयकुतौ 'जलधय इव' सागरा यथा तथा 'भूमिपालाः' अमी राजानः 'ते मर्य्यादां' स्थितिं वेलाञ्च 'न उल्लङ्घयन्ति' न अतिक्रामन्ति। सागरा यथा वेलां प्राप्य निवर्त्तन्ते भूपालास्तथा खाज्ञां श्रुत्वैव निवृत्ता इत्यर्थः। सम्भराबृत्तम्।

6. सोत्सेधैः—उद्+सिध+घञ् भावे उत्सेधः height उच्छ्रायः। Here *bulge*. तेन सह। There was a big bulge because the neck was excessively bent.

7. स्कन्धदेशैः—स्कन्ध is here ग्रीवा neck. तस्य देशाः the region of the neck etc. इत्यभूतलक्षणे तृतीया। (See निरुद्धाः below).

8. खरतर etc.—कविका bit. खर tight. अतिशयेन खरं खरतरम् very tight. The pull was very tight, because the kings wanted to stop immediately on hearing the words of command. भुज + क्त कर्त्तरि भुग्न bent. Now see व्याख्या। "कविका तु खलिनोल्ली" इत्यमरः।

9. निरुद्धाः—नि+रुध+क्त कर्मणि checked. The कञ्चुकिन् was watching from a distance. He noticed that as soon as the orders were proclaimed the neck of the horses bulged out and *he inferred* that a very tight pull was applied to the reins. Thus the bulge in the neck (सोत्सेधः स्कन्धदेशः) was a लक्षण of निरोध: Hence the rule "इत्यभूतलक्षणे" applies.

10. पुरस्तात्—पूर्वस्मिन् देशे इति पूर्व + ङि + अस्ताति स्वार्थे—अव्यय।

11. मातङ्ग etc.—मातङ्गानां मुख्याः, इतत्—; or मातङ्गेषु मुख्याः, सुपसुपा।

12. निवृत्ताः—नि + वृत + क्त कर्त्तरि stopped. मूकघण्टमातङ्गमुख्य was the लक्षण of निवृत्त। Hence मातङ्गमुख्यैः has इत्थम्भूतलक्षणे तृतीया (see निवृत्ताः above).

13. भूमिपालाः—भूमिं पालयन्ति इति भूमि + पा + णिच् + अण कर्त्तरि। पा रक्षणे + णिच् gives पालि, but पा पाने gives पायि।

10. **मलय—आर्य्य, त्वमपि सपरिजनो निवर्त्तस्व। भागुरायण एको मामनुगच्छतु।**

Malayaketu—Noble Sir, you too retire with attendants. Let Bhagurayana alone follow me.

कञ्चुकी—तथा (इति सपरिजनो निष्क्रान्तः)।

Chamberlain—So be it (*Retire with attendants*).

मलय—सखे भागुरायण, विज्ञप्तोऽहम् इहागच्छद्भिः भद्रभटप्रभृतिभिः, यथा—"न वयम् अमात्यराक्षसद्वारेण कुमारमाश्रयनीयमाश्रयामहे, किन्तु कुमारस्य सेनापतिं शिखरकमूरीकृत्य दुष्टामात्यपरिग्रहीतात् चन्द्रगुप्तादपरक्ताः, कुमारम् आभिरामिकगुणयोगादाश्रयणीयम् आश्रयामहे" इति। तत् न मया सुचिरमपि विचारयता तेषामयं वाक्यार्थः अवधारितः।

Malayaketu—Friend Bhagurayana, I have been thus apprised by Bhadrabhatta and others when coming over here—"It is not through Minister Rakshasa that we attach ourselves to Prince, who is worthy of attachment. But having won over Sikharaka the general of Prince, we, estranged from Chandragupta who is gripped by a wicked minister, attach ourselves to Prince who is worthy of attachment through the possession

of attractive virtues." Now, thinking even for long the sense of their speech has not been caught by me.

CHARCHA

1. विज्ञप्तः—वि + ज्ञप + णिच् + क्त कर्मणि विज्ञप्त or विज्ञपित (see *ante*).

2. भद्रभट etc.—These are the men referred to in Act I, as having deserted from Chandragupta. They are Chanakya's emissaries. The desertion being a ruse as the reader is already aware.

3. अमात्य etc.—द्वार door, hence उपाय means. अमात्यराक्षस एव द्वारम् etc.

4. ऊरीकृत्य—ऊरी is an अव्यय implying अङ्गीकार, cf.—'तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते"—*Magha* II. It is a गति by "ऊर्यादिच्विडाचश्च"। ऊरी + कृ + ल्यप् having accepted.

5. दुष्टामात्य etc.—Cf. राक्षसमतिपरिगृहीत etc. Act I.

6. आभिरामिक etc.—अभि समन्तात् रमयति इति अभि + रम + णिच + अच् कर्तरि अभिरामम् charming. तत् शीलमस्य इति अभिराम + ठक् आभिरामिकम् one of an amiable disposition. तस्य गुणाः। तैर्योग, etc.

7. अवधारितः—अव + धृ + णिच् + क्त कर्मणि ascertained. I cannot make out what they mean, *i. e*, why they disavow Rakshasa and set up Shikhara as their patron. Bhagurayana explains why.

11. **भागु—कुमार, न दुर्बोधोऽयमर्थः। विजिगीषुम् आत्मगुणसम्पन्नं प्रियहितद्वारेण आश्रयणीयमाश्रयेत् इति ननु, न्याय्य एवायमर्थः।**

Bhagurayana—Prince, this is not a difficult matter to understand. This is indeed the proper thing, because through a beloved well-wisher one should attach one's self to the ambitious who are endowed with qualities of the heart (*Or*—virtue of courage) and are therefore worthy of attachment.

मलय—सखे भागुरायण, ननु अमात्यराक्षसः अस्माकं प्रियतमो हिततमश्च ।

Malayaketu—But friend Bhagurayana, Minister Rakshasa is the most beloved and the greatest well-wisher unto ourselves.

भागु—एवमेतत् । किन्तु अमात्यराक्षसः चाणक्ये बद्धवैरो न चन्द्रगुप्ते । तत् यदि कदाचित् चाणक्यमतिजितकाशिनम् असहमानः स माचिव्यात् अवरोपयेत् ततो नन्दकुलभक्त्या नन्दान्वयएवायमिति सुहृज्जनापेक्षया च, अमात्यराक्षसश्चन्द्रगुप्तेन सह मन्दधीत । चन्द्रगुप्तोऽपि पितृपर्य्यायागत एवायम् इति सन्धिमनुमन्येत ; एवं सति अस्मासु कुमारो न विश्वसेत्- इत्ययमेषां वाक्यार्थः ।

Bhagurayana—So it is. But—"Minister Rakshasa has rooted enmity with Chanakya not with Chandragupta. So if, intolerant of Chanakya who is too much elated by success, he ever displaces him from ministership, then he (Rakshasa) might treat with Chandragupta, as well for the sake of his friends as through devotion to the race of Nanda, because he (Chandra) is after all Nanda's son. Chandragupta too might approve of the treaty, because he (Rakshasa) is really connected with him by ancestral succession. This happening, prince may not trust us"—this is the sense of their speech.

मलय—युज्यते । अमात्यस्य गृहमादेशय ।

Malayaketu—This is reasonable. Guide me to the house of the Minister.

भागु—इतः इतः कुमार । (उभौ परिक्रामतः) इदममात्यगृहम् । प्रविशतु कुमारः ।

Bhagurayana—This way, Prince, this way. (*Both go round the stage*). This is Minister's house. Let Prince enter.

मलय—एष प्रविशामि ।

Malayaketu—Here I enter.

CHARCHA

1. विजिगीषुम् etc.—आत्मन् is सत्त्व strength of mind. Cf,—"उदयादिष्वविकृतिर्मनसः सत्त्वमुच्यते । आत्मवान् सत्त्ववान् प्रोक्तः" । 'आत्मगुणसम्पन्नं' सत्त्ववन्तम् अतएव 'आश्रयणीयं' शरण्यं' 'विजिगीषुं' मण्डलमधिरोढ़ मिच्छुं राजानं' 'प्रियश्च हितश्च' यो जनः तेन 'द्वारेण' तमेव द्वारीकृत्य 'आश्रयेत्' शरणं गच्छेत् 'इति' इतोः 'अयमर्थः' सेनापतिद्वारेण भवत्समाश्रयणरूपं वस्तु 'न्याय्य एव ननु' युक्त एव इति किमु वक्तव्यम् । Thee come through शिखरक, because the introduction has to be through one who is a favouritc (प्रिय) and a well-wisher (हित) at the same time. Such a person is शिखरक the general. The crafty rascal leaves it to Malayaketu to complete the sentence by adding 'and *not* Rakshasa.'

2. सखे etc,—Idiot as he is, Malayaketu does not understand the hint ; on the contrary he takes this as the more reason why they should come through Rakshasa and *not* through शिखरक, because Rakshasa is the most favoured and his greatest well-wisher.

3. एवमेतत् etc.—Bhagurayana sees that the Prince's faith in Rakshasa is unbounded and dares not contradict him, lest he himself be suspected as a traitor. So he notifies agreement saying एवमेतत्, but returns to the attack from a different side with किन्तु etc.

4. अतिशित etc.—See जीवसिद्धौ राजसेवकः, Act II.

5. अवरोपयेत्—अव + रुह + णिच् + लिङ् यात् should dismiss. Bhagurayana had probably watched the movements of Karabhaka and knew that he would find the servant reporting Chanakya's dismissal to Rakshasa. Hence, with a view to produce

an immediate effect on Malayaketu, he tries to explain to the Prince what this dismissal means to Rakshasa.

6. नन्दकुलभक्त्या etc.—Rakshasa is devoted to the family of Nanda, and Chandragupta is Nanda's son. Hence who knows that Rakshasa might not be attracted towards Chandragupta when Chanakya is discarded.

7. सुहज्जन etc.—Devotion apart, such a step would be to Rakshasa's interest, because he has so many friends at Kusumapura whose life is now in danger.

8. सन्दधीत—यदि अपसारयेत् तदा सन्दधीत ; hence हेतुहेतुमद्भावात् लिङ्।

9. पितृपर्य्याय etc.—परि + अय + घञ् भावे पर्य्याय succession क्रम। पितॄणां पर्य्यायः succession of ancestors, *i. e.*, the order of sons succeeding father. तेन आगतः arising ont of natural course of succession.

10. सन्धिम्—सम् + धा + कि भावे सन्धिः peace—peace with Rakshasa.

11. न विश्वसेत्—Might not trust if they came throgh Rakshasa because Rakshasa himself proves untrustworthy. वि + श्वस + लिङ् यास। सम्भावनायां लिङ्। This supposes the root to be of the भ्वादि class. It however, appears in the अदादि list which gives विश्वस्यात्। "यदा गणकार्य्यमनित्यम्" इति प्रदीपः। "आश्वसेयुर्निशचराः" इति भट्टिः।

12. युज्यते—युज (दिवादि) + लट् ते कर्त्तरि। Malayaketu has swallowed the bait. Rakshasa's defiction seems probable to him and Bhadrabhata etc. with a distrust in Rakshasa now appear to him to have acted reasonably by avoiding Rakshasa and approaching through Shikharaka.

12. राक्षसः—(आत्मगतम्) अये स्मृतम्। (प्रकाशम्) भद्र अपि दृष्टस्त्वया कुसुमपुरे स्तनकलशः ?

Rakshasa—(*To himself*) Ha ! I recollect. (*Aloud*) Good man, was Stanakalasa visited by you at Kusumapura ?

करभकः—अमच्च अह इं [अमात्य अथ किम्]।

Karabhaka—What else, Minister (Yes, Minister) ?

मलय—(आकर्ण्य) भागुरायण, कुसुमपुरवृत्तान्तः प्रस्तूयते, न तत्र तावदुपसर्पामः, शृणुमस्तावत्। कुतः ?

सत्त्वभङ्गभयाद्राज्ञां कथयन्त्यन्यथा पुरः।
अन्यथा विवृतार्थेषु स्वैरालापेषु मन्त्रिणः ॥ ८ ॥

Malayaketu—(*Listening*) Bhagurayana, Kusumapura-affairs are being discussed, we must not approach in the midst of it, but will listen. Why (do you ask) ?—Ministers speak differently in presence of kings, fearing loss of prestige, but otherwise in easy chats at which facts are disclosed.

भागु—यदाज्ञापयति कुमारः।

Bhagurayana—As the Prince commands.

राक्षसः—भद्र, अपि तत् कार्य्यं सिद्धम् ?

Rakshasa—Good man, is the work done ?

करभकः—अमच्चप्पसाएण सिद्धम् [अमात्यप्रसादेन सिद्धम्]।

Karabhaka—Done, through Minister's favour.

मलय—सखे भागुरायण, किं तत् कार्य्यम्।

Malayaketu—Friend Bhagurayana, what work is that ?

भागु—कुमार, गहनः सचिववृत्तान्तः। नेतावता परिच्छेत्तुं शक्यते। अवहितस्तावच्छृणु।

Bhagurayana—Prince, deep are the affairs of Ministers. This cannot be fathomed by this much only. Be attentive and listen.

राक्षसः—भद्र, विस्तारेण श्रोतुमिच्छामि ।

Rakshasa—Good man, I wish to hear in detail.

CHARCHA

1. न तव etc.—तव तस्मिन् कुसुमपुरप्रस्तावे । We shall not interrupt the coversation.

2. श्रवणमलावत्—With ears poisoned against Rakshasa, he thinks he will hear something which Rakshasa would not willingly disclose to him.

3. अन्वयः ॥ मन्त्रिणः राज्ञां पुरः सत्त्वभङ्गभयात् अन्यथा कथयन्ति, विवृतार्थेषु स्वैरालापेषु अन्यथा (कथयन्ति) । व्याख्या—'मन्त्रिणः' अमात्याः राज्ञा पुरः नृपाणां समक्षं 'सत्त्वस्य' प्राभावस्य यो 'भङ्गः' नाशः तस्मात् 'भयात्' शङ्कया राजा अस्मान् सत्त्वहीनान् मंस्यते इति शङ्कया 'अन्यथा' अन्यप्रकारेण सत्यापलापेन 'कथयन्ति' भाषन्ते प्रतिकूलं सत्यं गोपयन्ति किन्तु 'विवृतः' प्रकटीकृतः 'अर्थः' वस्तु येषु तादृशेषु 'स्वैरालापेषु' विश्रम्भवचनेषु 'अन्यथा, भिन्नया रीत्या सत्यमेव पुरस्कृत्य इत्यर्थः 'कथयन्ति' भाषन्ते । मम पुरः राक्षसः सत्यं गोपयेद्वा किन्तु नाधुना विश्रम्भालापे गोपयिष्यत तत् श्रवणमलावत् इति भावः ।

4. सत्त्व etc.—सत्त्व is प्रताप power, prestige etc. Now see व्याख्या । If the king thinks much of his minister, as I have been doing of Rakshasa, then the minister, to keep up his reputation with the king, will not inform the king when any of his calculations go wrong,

5. अन्यथा अन्य different, *i. e*, different mtrut He suppresses unpleasant facts, lest the king lose confidence in him.

6. अन्यथा विहत etc.—Here अन्य means different fron what is disclosed to the king, *i. e*, the true state of affairs.

7. स्वैरालापेषु—स्वैर is स्वच्छन्द (See Act I, Sl. 2.) आ + लप + घञ् भावे आलाप: conversation. स्वैराः आलापाः easy talk etc.

8. किं तत् कार्यम्—Malayaketu's curiosity and suspicion are roused. He thinks the work is adverse to his interest.

9. गहनः etc—गहन impenetrable. The remark makes Malayaketu still more suspicious. सचिव is Ministers in general

not Rakshasa necessarily. सचिवानां हृत्तान्त गहनः ministers do not take everybody into their confidence. Their affairs are not open to the public gaze.

10. नैतावता etc.—'एतावता' एतन्मात्रेण सिद्धं कार्य्यम् इत्येतन्मात्रेण उक्तेन किं तत् कार्य्यम् इति 'परिच्छेत्तुम्' अवधारयितुं 'न शक्यते'। तत् 'अवहितः' सन् 'शृणु तावत्' यदि ज्ञातुमिच्छसि।

31. **करभकः**—सुणादु अमच्चो। अत्थि दाव अहं अमच्चेणाणत्तो जह—'करभअ कुसुमपुरं गच्छ। मह वअणेण भण वेआलिअं थणकलसं जह चाणक्कहदएण तेसु तेसु अस्सा-भङ्गेसु अणुचिट्ठीअमाणेसु चन्दउत्तो उत्तेअणसमत्थहिं सिलोएहिं उवमिलोइदव्वोत्ति' [शृणोतु अमात्यः। अस्ति तावत् अहममात्येन आज्ञप्तः यथा—'करभक, कुसुमपुरं गच्छ। मम वचनेन भण वैतालिकं स्तनकलशं यथा चाणक्यहतकेन तेषु तेषु आज्ञाभङ्गेषु अनुष्ठीयमानेषु चन्द्रगुप्तः उत्तेजनसमर्थैः श्लोकैरुपश्लोकयितव्य' इति।

Karabhaka—Listen Minister. The fact is, I was ordered by Minister thus—"Kara bhaka, go to Kusumapura and in my words tell the bard Stanakalasa that at each and every supercession of orders done by cursed Chanakya, Chandragupta has to be belauded with verses capable of rousing him."

राक्षसः—भद्र ततस्ततः।

Rakshasa—What next, good man, what next ?

करभदः—तदो मए पाडलिपुत्तं गदुअ सुणाविदो अमच्च-सन्देसं वेआलिओ थणकलसो। एत्थन्तरे णन्दउलविणास-दूणस्स पोरजणस्स परितोसं समुप्पादअन्तेण रण्णा आघोसिदो

कौमुदीमहोत्सवो। सो अ चिरआलपरिवट्टमाणो जणिद-परिचओ अभिमदवधूजणसमागमो विअ ससिणेहं माणिदो णअरजणेण [ततो मया पाटलिपुत्रं गत्वा श्रावितः अमात्यमन्देशं वैतालिकः स्तनकलशः। अत्रान्तरे नन्दकुल-विनाशदूनस्य पौरजनस्य परितोषं समुत्पादयता राज्ञा आघोषितः कौमुदीमहोत्सवः। स च चिरकालपरिवर्त्तमानो जनितपरिचयः अभिमतवधूजनसमागम इव सस्नेहं मानितो नगरजनेन]।

Karabhaka—Then the bard Stanakalasa was informed of Minister's command by me going to Pataliputra. In the meantime the great Kaumudi festival was proclaimed by the king affording great joy to the citizens who were depressed by the extinction of the family of Nanda and familiar as it had become by recurring for a long time, it was affectionately greeted by the towns-men like union with a desired bride.

राक्षसः—(सवाष्पम्) हा देव नन्द

कौमुदी कुमुदानन्दे जगदानन्दहेतुना।
कीदृशी सति चन्द्रेऽपि नृपचन्द्र त्वया विना ॥ ८ ॥

भद्र ततस्ततः।

Rakshasa—(*In tears*) Alas? Sire Nanda, the moon among kings, without thee, the source of joy to the world, what like will Kaumudi be in spite of there being the moon the delighter of lilies? Next, good man what next?

CHARCHA

1. अत्थि तावत्—अत्थि in such cases is an अव्यय, cf.—"अत्थि तावदहमार्येण पौरजन—" Act I.

2. आज्ञप्तः—Cf. विज्ञप्तः above.

3. आज्ञाभङ्गेषु etc.—Cf. Act II, Para 44.

4 आवितः etc.—स्तनकलशः अमात्यसन्देशं श्रुतवान् = अहं स्तनकलशम् अमात्यसन्देश श्रावितवान् = मया स्तनकलशः अमात्यसन्देशं श्रावितः। This is by "मतिबुद्धि—", the root शृ being बुद्ध्यर्थ। But from the Varttika "दृशेश्च" grammarians argue that बुद्धि in the rule means knowledge *in general.* Knowledge, when spoken of as got through any particular sense, is not बुद्धि within the meaning of the rule. So दृश, शृ, घ्रा, स्पृश etc. do not give कर्मसंज्ञा to the अणिकर्त्ता। This is why special provision is made for दृश by the Varttika above. We expect then स्तनकलशेन अमात्यसन्देशः श्रावितः। The poet treats it as बुद्ध्यर्थ it will then have the alternative form मया स्तनकलशं अमात्यसन्देशः श्रावति। 'बुद्धिमच्चार्थयोः शब्दकर्मणाञ्च निजेच्छया'।

5 नन्दकुल etc.—दू + क्त कर्त्तरि दून grieved (दिवादि) cf —"न दूये सावतौमूनर्यन्मन्मथमपराध्यति"—*Magha.* नन्दकुलविनाशेन हेतुना दूनस्य, सुप्सुपा।

6. चिरकाल etc.—परि + वृत + शानच् कर्त्तरि परिवर्त्तमानः recurring. चिरः कालः। चिरकालं परिवर्त्तमानः etc. रथातत। Here रथा is अत्यन्त संयोगे। And the समास is by the rule "अत्यन्त संयोगे च"।

7. अन्वयः॥ हे नृपचन्द्र, कुमुदानन्दे चन्द्रे सति अपि, जगदानन्दहेतुना त्वया विना कौमुदी कौदृशी। व्याख्या—हे 'चन्द्रतुल्य नृप' राजन् नन्द 'कुमुदाना कैरवाणाम् 'आनन्दे' हर्षवर्द्धने विकाशके इत्यर्थः 'चन्द्रे' विधौ 'सति अपि' स्थितेऽपि 'जगतः' समग्रायाः धरायाः 'आनन्दस्य' हर्षस्य यो 'हेतुः' निदानं तथाविधेन 'त्वया विना' विरहिता 'कौमुदी 'कौमुदीमहोत्सवः ज्योत्स्ना च 'कौदृशी' कथम्भूता? शोच्या सा इत्यर्थः। उत्सवेऽस्मिन् मन्ये पूर्णेन चन्द्रेण कुमुदान्येव हृष्यन्ति मे। त्वया वियोजितस्य जगतः पुनः नासीत् तोषः इति भावः। अत्र 'कौ' पृथिव्यां 'मुदं' हर्षं 'आनन्दयति' वर्द्धयति यस्मादृशे 'चन्द्रे' चन्द्रगुप्ते राजनि 'सति अपि' इत्यादि दुष्टिर्व्याख्यत्।

8. कौमुदी—The festival; also moonlight. Neither the festivites, nor the beams of the autumn at fulloon please the people.

9. कुमुदानन्दे—See व्याख्या। कुमुद + आ + नन्द + णिच् + अच कर्त्तरि।

तस्मिन्। Qual. चन्द्रे। *Dhundhi* takes चन्द्र as meaning चन्द्रगुप्त and expounds thus—मुदं हर्षम् आनन्दयति वर्द्धयति इति मुद्+आ+नन्द्+णिच्+अण् कर्त्तरि मुदानन्दः the promoter of joy. The root is टुनदि समृद्धौ and समृद्धि is वृद्धि। कौः पृथिव्या मुदानन्दः कुमुदानन्दः the promoter of the joy of the world. तस्मिन् चन्द्रे चन्द्रगुप्ते etc. In this explanation आनन्द in the sense of वर्द्धक—promoter—is very very rare—अप्रसिद्ध। Again it is not expected of Rakshasa to speak so appreciatingly of Chandragupta as to describe him as the promoter of joy of the world. Moreover, if Chandragupta is the promoter of joy on Earth (कौः पृथिव्याः etc), then the व्यतिरेक in the verse requires that जगत् in जगदानन्दहेतुना should be the *whole universe*. By no amount of hyperbole would Rakshasa describe Nanda as जगदानन्दहेतु in this sense. We have therefore taken चन्द्र here as the moon and not चन्द्रगुप्त। Some of Dhundhi's followers here interpret कुमुदानन्दे differently thus—कैरवसिता सुत् एषां कुमुदः who delight in mean pursuits. आनन्दयति इति आ+नन्द्+णिच्+अच्. कर्त्तरि आनन्द delighter. कुमुदाम् आनन्दः the delighter of the mean, *i. e.*, Chandragupta. This is worse than Dhundhi's exposition (See अपि below).

10 जगत् etc.—जगतः आनन्दः etc. See व्याख्या। Nanda was a source of joy to the whole world, while the moon delights only the water-lilies that are in the world. Hence, even the presence of the full-moon did not make up for the absence of Nanda. His beams fell flat on the people.

11. कौदृशी—किमिव पश्यति इति किम् + दृश + कञ् कर्त्तरि स्त्रियाम् what like, *i. e.*, of no moment तुच्छा।

12. अपि—Implies गर्हा। The गर्हा lies in the absence of the expected. The delighter of Kumuda was expected to delight the rest of the world also, but it did not. If we say कुमुदानन्दः —the delighter of the mean, then the meanig becomes—even the dellghter of the mean did not delight the rest of the world,

which is unintelligible, because such a person is not expected to delight those that are not mean

13. नृपचन्द्र—नृपोऽयं चन्द्र इव, उपमित कर्मधा—। This epithet explains why नन्द was जगदानन्दहेतु। The best of kings is bound to be a source of joy to the world.

14. करभकः—तदो सो लोअलोअणाणन्दभूदो अणिच्छन्तस्सएव तस्स णिवारिदो चाणक्कहदएण। एत्थन्तरे थणकलसेण चन्दउत्तसमुत्तेजिआ सिलोअपरिपाटी पवट्टिदा [ततः स लोकलोचनानन्दभूतः अनिच्छत एव तस्य निवारितः चाणक्यहृतकेन। अत्रान्तरे स्तनकलशेन चन्द्रगुप्तसमुत्तेजिका श्लोकपरिपाटी प्रवर्त्तिता]।

Karabhaka—This joy to the eyes of the people was then stopped by the cursed Chanakya, the unwilling king notwithstanding At this stage, a set of verses that was to rouse Chandragupta was launched out by Stanakalasa.

राक्षसः- कीदृशी सा।

Rakshasa—How was it like ?

करभकः - (सत्त्वोत्कर्षस्य इत्यादि पूर्वोक्तं पठति)।

Karabhaka—(Recites the verse 'सत्त्वोत्कर्षस्य' etc. as previously said).

राक्षसः- -(सहर्षम्) साधु ! स्तनकलश साधु ! काले भेदबीजमुप्तम् अवश्यं फलमुपदर्शयिष्यति। कुतः—

सद्यःक्रीड़ारसच्छेदं प्राकृतोऽपि न मर्षयेत्।
किमु लोकाधिकं धाम बिभ्राणः पृथिवीपतिः ॥ १० ॥

Rakshasa (*With joy*)—Bravo ! Stanakalasa, Bravo ! seed of discord is sown in time , it will surely bear fruit. (Do you ask)

Why ?—Even an ordinary person will not stand the instant stoppage of the pleasures of sport, would the lord of the world, bearing power that transcends the world, do so ?

CHARCHA

1. लोक etc.—लोकस्य लोचनम्। तस्य आनन्दः। तेन भूतः तुल्यः "युक्ते च्चदाहते भूतं प्राख्यतौते समे विषु" इत्यमरः)।

2. अनिच्छतः etc.—न इच्छन् अनिच्छन् not liking, *i. e.*, not liking the prohibition निवारणमनिच्छतः। तस्य has अनादरे भावलक्षणे षष्ठी—अनिच्छन्तं तमनादृत्य इत्यर्थः।

3. समुत्तेजिका—सम् + उद + तिज + ण्वुल् कर्त्तरि स्त्रियाम् that which incites.

4. श्लोकपरिपाटी—परि + पाटि + ङ भावे औणादिक = परिपाटि + ङीष = परिपाटी succession, series, क्रम। श्लोकयोः परिपाटी, *i. e.*, परिपाटितः क्रमोच्चारितौ श्लोकौ। "भावानयनं द्रव्यानयनम्"।

5. काले etc.—'भेदस्य' विरोधस्य 'बीजं' मूलं 'काले' यथासमयं एव 'उप्तं' निखातं खननकर्मणि। 'फलं' सिद्धिं चाणक्यचन्द्रगुप्तयोर्भेदम् इत्यर्थः 'अवश्यं' निश्चितम् 'उपदर्शयिष्यति' उत्पादयिष्यति। उपदर्शयति इति पाठे सामान्यतो निर्देशः—'काले उप्तं भेदबीजमवश्यं फलम् उपदर्शयति' प्रसूते। तत् अत्रापि फलं द्रष्टव्यम्।

6. अन्वयः॥ प्राकृतः अपि सद्यःक्रीडारसच्छेदं न मर्षयेत्, लोकाधिकं धाम बिभ्राणः पृथ्वीपतिः किमु (मर्षयेत्)। व्याख्या—'प्राकृतः अपि' इतरोऽपि जनः 'सद्यः' प्रसभं यः 'क्रीडारसस्य' खेलारसस्य 'छेदः' भङ्गः तं 'न मर्षयेत' न क्षमेत छेदं सति कुर्य्यात् इत्यर्थः। 'लोकात् अधिकं' जनातिगं 'धाम' प्रभावं 'बिभ्राणः' धारयन् 'पृथ्वीपतिः' धराधीशः 'किमु मर्षयेत्' नैव मर्षयेत्। तत प्राप्त एव चाणक्यचन्द्रगुप्तयोर्भेदः।

7. सद्यः etc.—क्रीड़ायाः रसः। तस्य छेदः। सद्यः क्रीड़ारसच्छेदः, सुप्-सुपा। The unceremonious stoppage gives affront, and the king retaliates.

8. प्राकृतः—पृथग्जनः an ordinary person. cf.—"अप्राकृतस्य चरितातिशयस्य"।

9. किमु etc.—Telang reads 'किं नु लोकाधिकं तेजः' meaning the same. धाम improves the diction. See also under धाम।

10. लोकाधिकम्—लोक is जन people. लोकादधिकम्, सुप्सुपा। Cf.—'अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः। तस्मादभिभवत्येष सर्वभूतानि तेजसा॥"

11. धाम etc.—This seems to be an imitation of Bharavi's 'सहते न जनाऽप्यधःक्रियां किमु लोकाधिकधाम राजकम्'। Hence we retain किमु and धाम and reject किंतु and तेज.

12. विधाणः—धृ + श्यानच् कर्तरि। The root is उभयपदी।

15. मलय—एवमेतत्।

Malayaketu—So it is.

राक्षसः—ततस्ततः।

Rakshasa—Next, what next.

करभकः—तदो चन्दउत्तेण अस्साभङ्गकलुसिदेण पसङ्गसूचिदं अमच्चगुणं पसंसिअ अपब्भंसिदो अहिआरादो चाणक्कहदओ [ततश्चन्द्रगुप्तेन आज्ञाभङ्गकलुषितेन प्रसङ्गसूचितममात्यगुणं प्रशस्य अपभ्रंशितः अधिकारात् चाणक्यहतकः]

Karabhaka—Accursed Chanakya was then removed from office by Chandragupta who was ruffled by the supercession of orders and extolled the virtues of Minister suggested by the course of conversation.

मलय—सखे भागुरायण, गुणप्रशंसया दर्शितश्चन्द्रगुप्तेन राक्षसे भक्तिपक्षपातः।

Malayaketu—Friend Bhagurayana, by extolling virtues, Chandragupta has disclosed a bias towards Rakshasa through esteem.

भागु—न तथा गुणप्रशंसया यथा चाणक्यवटोर्निराकरणेन।

Bhagurayan—Not so much by extolling virtues as by the dismissal of the brat Chanakya.

राक्षसः— किमयमेवैकः कौमुदीमहोत्सवप्रतिषेधः चन्द्रगुप्तस्य चाणक्यं प्रति कोपकारणम् उत अन्यदप्यस्ति ?

Rakshasa—Is this prohibition of the Kaumudi festival the sole reason for Chandragupta's anger on Chanakya or is there anything else also ?

मलय—सखे, चन्द्रगुप्तस्य अपरकोपकारणान्वेषणे किं फलमेष पश्यति ।

Malayaketu—Friend, what good does he see in looking for other cause of anger of Chandragupta ?

भागु—कुमार, मतिमांश्चाणक्या न निष्प्रयोजनमेव चन्द्रगुप्तं कोपयिष्यति, न च कृतवेदो चन्द्रगुप्त एतावता गौरवमुल्लङ्घयिष्यति । सर्वथा चाणक्यचन्द्रगुप्तयोः पुष्कलात् कारणात् यो विश्लेष उत्पद्येत स आत्यन्तिको भविष्यति इति ।

Bhagurayana—Prince, wise Chanakya will not indeed annoy Chandragupta without a motive, nor again will greateful Chandragupta overstep reverence for this trifle. That estrangement between Chanakya and Chandragupta will be permanent every way which results form a variety of sufficient reasons.

CHARCHA

1. आज्ञाभङ्ग etc.—कलुष is मलिन hence कुपित । कलुषः कृत इति कलुष + णिच् (नामधातु) + क्त कर्मणि कलुषितः । आज्ञाभङ्गेन कलुषितः । आज्ञाभङ्गकलुषः would do as well. Cf.—"तां प्रत्यकस्मात् कलुषप्रवृत्तौ", "भावावरोधकलुषा दयिता" etc. But the नामधातु seeme to be the poet's favourite , cf.—"भर्तुस्तथा कलुषितां बहुवल्लभस्य", Act III, Sl. 9,

2. प्रसङ्गसूचितम्—प्रसङ्ग is प्रस्ताव course ofconversation. तेन सूचितः brought to notice in the course of conversation. This refers to 'तेन खलु महात्मना' etc Act III. Para 34.

3. भक्तिपक्षपातः—भक्तेः पक्षपातः। चन्द्रगुप्तस्य भक्तिः राक्षसे पक्षपातिनी न चाणक्ये इत्यर्थः। Cf—"विद्वेषपक्षपातः" Act III, 21.

4. निराकरणेन—नि + आ + कृ + ल्युट् भावे निराकरण dismissal. The insinuation is that Chandragupta removes Chanakya to make room for Rakshasa.

5. मतिमान् etc.—मतिरस्यास्ति प्रशस्ता इति मतुप् प्रशंसायाम्। Hence he will not insult the king for nothing. The point perhaps is that Chanakya suspected the king's leaning towards Rakshasa and offended him.

6. न च कृतवेदी etc.—कृतम् उपकृतं वेत्ति जानाति इति कृत + विद + णिनि साधुकारिणि कर्त्तरि कृतवेदी one who remembers services. Chandragupta knew how deep his obligattions were to Chanakya; so the mere supercession of an order could not be reason enough for him to insult and dismiss Chanakya. If there be some slight friction through this incident it would soon be made up.

7. पुष्कलात् कारणात् etc:—पुष्कल enough, sufficient. अतिगतम् अत्यन्तम् अत्यन्तम् very much. अत्यन्ते भवः इति अत्यन्त + ठञ् आत्यन्तिकः permanent. Supercession of orders is not reason enough. Something better than that must happen for a permanent separation. Rakshasa is looking out for such a reason.

16. करभकः—अत्थि अण्णं वि चन्द्रउत्तस्स कोवकारणं। मलअकेदू अमच्चरक्खसो त्ति [अस्ति अन्यदपि चन्द्रगुप्तस्य कोपकारणम्। उपेक्षितोऽनेन अपक्रामन् मलयकेतुः अमात्यो राक्षस इति]।

Karabhaka—There are other reasons too for Chandragupt's annoyance, viz., Malayaketu and Minister Rakseasa escaping were overlooked by him.

राक्षसः—शकटदास, इस्ततलगतो मे चन्द्रगुप्तो भविष्यति। इदानीं चन्दनदासस्य बन्धनात् मोक्षः तव च पुत्रदारैः सह समागमः।

Rakshasa—Sakatadasa, Chndragupta will become placed on the plam of my hand. Now will follow Chandanadasa's release from prison and your union with son and wife.

मलय—सखे भागुरायण, हस्ततलगत इति आहरतः कोऽस्याभिप्रायः।

Malayaketu—Friend Bhagurayana, what is his meaning in saying 'on the palm of the hand'

भागु—किमन्यत्? चाणक्यात् अपकृष्टस्य चन्द्रगुप्तस्य उद्धरणात् न किञ्चित् कार्यमवश्यं पश्यति।

Bkagurayana—What else? Surely he sees no good from the overthrow of Chandragupta withdrawn from Chanakya

राक्षसः—भद्र, हृताधिकारः क्व साम्प्रतमसौ वटुः।

Rakshasa—My good man, with office wrested, where is that brat now?

करभकः—तर्हि एव्व पाडलिपुत्ते अहिवसदि [तस्मिन्नेव पाटलिपुत्रे अधिवसति (तदेव पाटपुत्रमधिवसति)]।

Karabhaka—Staying in Patalıputra itself.

राक्षसः—(सावेगम्) भद्र, तत्रैव प्रतिवसति? तपोवनं न गतः? प्रतिज्ञां वा पुनर्न समारूढवान्?

Rakshasa—(*With concern*) Good man, there is he staying? Not gone to the hermitage? Nor undertaken a fresh vow?

करभकः—अमच्च, तपोवनं गच्छदित्ति सुणीअदि [अमात्य तपोवनं गच्छतीति श्रूयते]।

Karabhaka—Manister, it is rumoured that he is going to a hermitage.

CHARCHA

1. उपेक्षितः अनेन etc.—Cf.—"मलयकेतुः कस्मात् अपक्रामन्नुपेक्षितः"and "राक्षसः पुनरिहैव वर्त्तमानः अर्थेनोपेक्षितः"—Act III.

2. हस्ततलगतः etc.—हस्तस्य तलं गतः प्राप्तः गृहीत इत्यर्थः। Rakshasa deems now the overthrow of Chandragupta easy because he will no longer have Chanakya to guide him.

3 चाणक्यादपक्रुष्टस्य etc.—'अवश्य' निश्चितम् एष 'चाणक्यादपक्रुष्टस्य' दूरीकृतस्य चाणक्यविरहितस्य 'चन्द्रगुप्तस्य उद्धरणात्' समुच्छेदात् 'किञ्चित् कार्य्यं' कामपि स्वार्थसिद्धिं 'न पश्यति' न उत्प्रेक्षते। ततश्च मन्यते चाणक्येन वियुक्तः, निराश्रयश्चन्द्रगुप्तः अस्य 'हस्ततलं भुजच्छायां 'गतः' प्राप्तः श्रितः 'भविष्यति' स्वयमस्य साचिव्यं कृत्वा सचिवव्यसनमस्यापनेष्यति इत्यर्थः। The rascal deliberatey distorts the meaning of Rakshasa's words (see above), and Malayaketu is such a fool that he cannot see through it.

4. पाटलिपुत्रे—The Sanskrit is पाटलिपुत्रम् by "उपान्वध्याङ्वसः"।

5. तत्रैव प्रतिवसति etc.—These are indicative of surprise. It was expected he would go to some hermitage being disgusted with the world , or in the alternative, it was expected he would vow Chandragupta's death just as he did of Nanda.

6. गच्छति—वर्त्तमानसामीप्ये भविष्यति वर्त्तमानम्।

17. राक्षसः—शकटदास नेदमुपपद्यते। पश्य—

देवस्य येन पृथिवीतलवासवस्य
स्वाग्रासनापनयनान्निकृतिर्न सोढ़ा।
सोऽयं स्वयंकृतनराधिपतेर्मनस्वी
मौर्य्यात् कथं नु परिभूतिमिमां सहेत ॥११॥

Rakshasa—Sakatadasa, this is not consistent. Just consider—How can he, the supersensitive, tolerate this disgrace from Maurya, the king created by himself—he by whom the dishonour of removal from his front-seat by Sire, a veritable Indra on the surface of the Earth, was not tolerated.

अन्वयः ॥ येन पृथिवीतलवासवस्य दैवस्य स्वायासनापनयनात् निष्कृतिः न सोढा, मनस्वी स अयं स्वयंकृतनराधिपतेः मौर्य्यात् इमां परिभूतिं कथं नु सहेत। व्याख्या—'येन' चाणक्येन 'पृथिव्याः तले' महीपृष्ठे 'वासवः' इन्द्र इव यो 'दैवः' राजा नन्दः तस्य, तेन कृता इत्यर्थः 'स्वस्य' आत्मनः आत्माधिष्ठितमित्यर्थः, यत् 'आसन' वरपीठ तस्मात् यत 'अपनयन' निष्कासणं ततः या 'निष्कृतिः' अवमानना सा 'न सोढा' न चक्षमे 'मनस्वी' मानी अमर्षणः इत्यर्थः 'सः अयं' चाणक्यः 'स्वयम् आत्मना कृतः' विहितः यः 'नराधिपतिः' लोकनाथः राजा 'मौर्य्यः' मुरागर्भसम्भवश्चन्द्रगुप्तः तस्मात् 'इमाम्' एताम् अधिकारापनयनरूपा घोरा 'परिभूतिं' निकारम् अपमानं 'कथं नु' केन वा प्रकारेण 'सहेत' मर्षयेत् न कथमपि। तथाप्यसौ प्रतिज्ञां नारुढः तत्रैव वसति इति नोपपद्यते।

CHARCHA

1. दैवस्य—Construe दैवस्य निष्कृतिः। कर्तरि षष्ठी।

2. पृथिवी etc.—Contrast this with स्वयंकृतनराधिपतेः। One apparently too high for him to reach, the other capable of being squeezed to death.

3. स्वायासन etc.—Cf. मामयासनतोऽवकृष्टम् etc., Act I, Sl. 12.

4. मनस्वी—प्रशस्तं मनः अस्य इति मनस् + विनि मत्वर्थे। Sensitive, hence, intolerant of insults.

5. मौर्य्यात्—This hints at the low origin of Chandragupta and is contrasted with वासव। One a low-born mortal, the other a veritable Indra on Earth. अपादाने ५मी। परिभूति leaves मौर्य्य and reaches चाणक्य, hence "ध्रुवमपाये—" applies. This is after the भाष्यकार। मौर्य्यात् परिभूतिः = मौर्य्यात् प्राप्ता परिभूतिः।

K. R.—Mudra—21.

6. परिभूतिम्—परि+भू means to insult, cf.—'मा मां महात्मन् परिभूरयोग्यं"।

7. इमाम्—This is emphasized. It points to the gravity of the insult. Removal from a seat was not borne, would then removal from office be tolerated? Add to this that the first was done by Indra, and the second is now done by a Sudra made king by himself. This is incredible—नेदमुपपद्यते।

18. मलय—सखे, चाणक्यस्य वनगमने पुनः प्रतिज्ञारोहणे वा कास्य स्वार्थसिद्धिः ?

Malaya—Friend, what purpose of his is served by Chanakya's retirement to a forest or adoption of a fresh vow?

भागु—नात्यन्तदुर्बोधोऽयमर्थः। यावद्यावत् चाणक्यकृतकश्चन्द्रगुप्तादूरीभवति तावत्तावदस्य स्वार्थसिद्धिः।

Bhagu. | This is not a very hard matter to understand. By whatever extent Chanakya is withdrawn from Chandragupta, just to that extent is his own interest served.

शकटदासः—अलमन्यथा विकल्प्य। उपपद्यते एवैतत्। पश्यतु अमात्यः—

राज्ञां चूडामणीन्दुद्युतिखचितशिरे मूर्ध्नि विन्यस्तपादः
स्वैरेवोत्पाद्यमानं किमिति विषहते मौर्य्य आज्ञाविघातम्।
कौटिल्यः कोपनोऽपि स्वयमभिचरणप्रातदुःखः प्रतिज्ञां
दैवात् पूर्णप्रतिज्ञः पुनरपि न करोत्यायतिग्लानिभीतः॥ १२॥

Sakata—Minister, no use thinking otherwise This fits in. Let Minister consider—With his foot planted on the head of kings the tuft of hair on which is tinged with the lustre of moon-like gems on their crests, how could Maurya brook supercession of orders caused by the very men that are

his own ? Kautilya, though irata, with the trouble of personal incantations realised and with vow redeemed through luck, does not undertake a vow again, afraid of subsequent failure.

CHARCHA

1. यावदद्यावत etc.—This is quite a broad hint that Rakshasa wants to step into the place Chanakya has vacated.

2. अलम etc.—'अन्यथा' अन्यप्रकारेण 'विकल्प्य' 'विचार्य 'अलम्' विचारं मा कुरु। "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति क्त्वा प्रत्ययः। Rakshasa ends with an expression of incredulity. How then are the facts to be explained ? The report is not false because the messenger is reliable. Something like a quarrel *did* take place, followed by what looked like removal of Chanakya from office. The question is, was it real or mere sham to throw Rakshasa off his guard ? Rakshasa sees inconsistency in taking it as real (शकटदास, नेदमुपपद्यते) and is inclined to treat the whole scene as a got-up affair Sakatadasa differs and tries to reconcile the apparent inconsistency (उपपद्यत एवैतत्)।

3. अन्वयः॥ चूड़ामणीन्दुद्युतिखचितशिखे राज्ञां मूर्द्धि विन्यस्तपादः मौर्य्यः स्वैरेव उत्पाद्यमानम् आज्ञाविघातं किमिति विषहते। स्वयमभिचरणज्ञातदुःखः दैवात् तीर्णप्रतिज्ञः कौटिल्यः कोपनोऽपि आयतिग्लानिभीतः (सन्) पुनरपि प्रतिज्ञां न करोति। व्याख्या—'इन्दुः' इव चन्द्र इव यः 'चूड़ामणिः' शिरोरत्नं तस्य 'द्युतिभिः' किरणैः 'खचिता' अनुलिप्ता 'शिखा' केशगुच्छः यस्मिन् तथाविधे 'राज्ञां भूर्द्धि' नृपाणां शिरसि 'विन्यस्तौ' स्थापितौ 'पादौ' चरणौ यस्य तथाविधो 'मौर्य्यः' मुरापुत्र-चन्द्रगुप्तः 'स्वैः' एव निजैरेव जनैः न हि केनचित् प्रतीपभूपालेन 'उत्पाद्यमानं' विधीयमानम् 'आज्ञाविघातं' शासनप्रत्याहारं 'किमिति' कथं 'विषहते' मर्षयति न कथमपि। तत् उपपद्यते किल यत् तत्त्वत एव, न हि कृतकतया, चाणक्योपरि कुपितश्चन्द्रगुप्तः तमधिक्कारादवारीपयत्। इतोऽपि पश्य—स्वयम् आत्मना यत् 'अभि-चरणम्' अभिचारः कृत्यानिर्बाहः तस्मिन् 'ज्ञातं' विदितं 'दुःखं' क्लेशो यस्य तादृशः अपि च दैवात्' दैवानुकूल्येन न हि केवलेन अभिचरणेन 'पूर्णा' सत्या 'प्रतिज्ञा' सङ्करः नन्दोन्मूलनरूपः यस्य तथाविधः 'कौटिल्यः' चाणक्यः 'कोपनोऽपि' अमर्षणोऽपि 'आयतौ' उत्तरे काले या 'ग्लानिः' हानिः निष्फलता तस्याः 'भीतः' शङ्कितः सन् पूर्वं पूर्णापि

प्रतिज्ञा यद्यधुना अपूर्णा स्यात इति विभ्यत् इत्यर्थः 'पुनरपि प्रतिज्ञाम्' एष उन्मूलयामि त्वां मौर्यापसद इत्येवंरूपं सत्य 'न करोति' नोच्चारयति। तत् चाणक्यस्यापि सत्यप्रतिज्ञोपकारणे औदासीन्येनावस्थानम् उपपद्यत एव।

4. चूडामणि etc.—See व्याख्या। इन्दु shows the excellence of the gems, hence the high position of Chandragupta.

5. किमिति—A compound अव्यय meaning 'why', 'now' etc. Cf.—"किमिति जीवमास्यते", "किमित्यपास्याभरणानि यौवने", "किमिति मुधा मलिनं यशः कुरुध्वम्" etc.

6. विषहते—वर्तमानसामीप्ये लट् अतीते। "परिनिविभ्यः—"इति षत्वम्।

7. स्वयमभिचरण etc.—See व्याख्या। अभिचरण is the same as अभिचार murderous rites हिंसाकर्म। "हिंसाकर्माभिचारः स्यात्" इत्यमरः। They are mystic rights the performance of which is very arduous. Chanakya is said to have personally conducted the rites to kill Nanda. Cf.—"यस्याभिचारवज्रेण वज्रज्वलनतेजसः। पपात मूलतः श्रीमान सपर्वा नन्दपर्वतः॥ एकाकी मन्त्रशक्त्या यः, शक्तः शक्तिधरोपमः। आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम्॥"—कामन्दकः। Telang reads "स्वयमभिचरणज्ञातदुःखप्रतिज्ञः"—स्वयमभिचरणेन ज्ञातं दुःखं यस्यां तादृशी प्रतिज्ञा यस्य। This is clumsy; besides the कर्म of करोति (*i. e.*, प्रतिज्ञाम्) is then absent, which is not desirable.

8. दैवात्—दैवेनो युक्तो। He was helped by Fate.

9. पूर्णप्रतिज्ञः—Telang reads तीर्णप्रतिज्ञः। तीर्ण comes from तॄ to cross, hence प्रतिज्ञा should be likened to some broad piece of water. Cf.—"निस्तीर्णा दुस्तरा प्रतिज्ञासरित्" Act I, "अपरं तीर्णप्रतिज्ञार्णवम्" Act II etc. In the absence of such comparison, पूर्ण seems preferable.

10. आयति etc.—आ+यम+क्तिन् अधिकरणे आयति subsequent time, उत्तरकाल। "उत्तरः काल आयतिः" इत्यमरः। Now see व्याख्या। Some read here आयतिव्यानिभीतः। व्या+नि भावे औणादिक व्यानि loss, failure. It is the same as ग्लानि। आयतौ व्यानिः सुप्सुपा। तस्याः भीतः। Or आ+यम+क्तिन् भावे आयति power, prestige. तस्याः व्यानिः or ग्लानिः loss of prestige etc. Cf.—"आत्मोदयः परव्यानिः" Magha II.

19. राक्षसः—शकटदास, एवमेतत् । गच्छ, विश्रामय करभकम् ।

Rakshasa—So it is Sakatadasa. Go, let Karabhaka rest.

शकट—तथा (इति करभकेन सह निष्क्रान्तः) ।

Sakat.—So be it (*Exit with Karabhaka*).

राक्षसः—अहमपि कुमारं द्रष्टुमिच्छामि ।

Rakshasa—I too wish to see Prince.

मलय—अहमेवार्यं द्रष्टुमागतः ।

Malaya—Myself have come to see Noble Sir.

राक्षसः—(नाट्येनावलोक्य) अये कुमारः ! (आसनादुत्थाय) इदमासनम् । उपवेष्टुमर्हति कुमारः ।

Rakshasa—(*Acting observation*) Ha ! The Prince ! (*Rising from the seat*) Here is a seat, behoves Prince to sit down.

मलय—अयमुपविशामि । उपविशत्वार्यः । (यथार्हमुपविष्टाः) आर्य, अपि सह्या शिरोवेदना ?

Malaya—Here, I sit down. Let Noble Sir sit down. (*All are seated befittingly*). Noble Sir, is the headache bearable ?

राक्षसः—कुमार, कुमारस्य अधिराजशब्देन अतिरस्कृते कुमारशब्दे कुतो मे शिरोवेदनायाः सह्यता ?

Rakshasa—Prince, whence is the bearability of my headache, Prince's title of 'Prince', not being yet overshadowed (*i. e.*, superceded) by that of 'Emperor' ?

मलय—अरीक्षतमेतदार्येण न दुष्प्रापं भविष्यति । तत्

कियन्तं कालमस्माभिरेवं संभृतबलैरपि शत्रुव्यसनमुदीक्षमाणै-रुदासितव्यम् ?

Malaya—Undertaken by Noble Sir, this will not be hard to attain. How long then are we thus to lie inactive though with gathered troops biding enemy's disaster ?

राक्षसः—कुतोऽद्यापि कालहरणस्यावकाशः ? प्रतिष्ठस्व विजयाय ।

Rakshasa—Whence is the occasion even now for wasting time ? March for victory.

मलय—आर्य्य शत्रुव्यसनमुपलब्धम् ?

Malaya—Noble Sir, has any disaster to the enemy transpired ?

राक्षसः—उपलब्धम् ।

Rakshasa—It has transpired.

मलय—कीदृशं तत् ?

Malaya—What sort is it ?

राक्षसः—सचिवव्यसनम्, किमन्यत् ? अपकृष्टश्चाणक्या-च्चन्द्रगुप्तः ।

Rakshasa—What else ? Loss of minister. Chandragupta is alienated from Chanakya.

मलय—आर्य्य, सचिवव्यसनमव्यसनमेव ।

Malaya—Noble Sir, loss of minister is surely no loss.

राक्षसः—अन्येषां भूपतीनां कदाचित् अमात्यव्यसनम-व्यसनं स्यात्, न पुनश्चन्द्रगुप्तस्य ।

Rakshasa—Loss of minister might not be a loss sometime to other kings, but not to Chandragupta.

CHARCHA

1. विश्रामय—See विश्रामय सिद्धार्थकम, Act II.

2. शकटदासः—Sakatadass leaves without waiting for Rakshasa to finish his speech. अहमपि कुमारं द्रष्टुमिच्छामि is spoken to Sakatadasa—You go and arrange for Karabhaka's rest, I too will go and see the Princet

3. सह्या—सोढुं शक्या इति सह + यत् कर्मणि स्त्रियाम् capable of being borne.

4. कुमारस्य etc.—'अधिराजशब्देन' अधिराज इत्याख्यया 'कुमारस्य कुमारशब्दे' कुमार इत्याख्यायाम् 'अतिरस्कृते' अन्तर्धानमनीते, यावत् कुमारसंज्ञा निरस्य अधिराजसंज्ञा नारोप्यसि तावत मे 'शिरोवेदनायाः सह्यता' सहनयोग्यता 'कुतः' सम्पद्यते ? नैव सम्पद्यते इत्यर्थः। अद्यापि कुमारः कुमारपदे एव स्थितः अधिराजपदे न मया आरोपित इति शिरो मे पीड्यते इति भावः।

5. क्रूरोक्तम् etc.—For क्रूरो see *ante*. एतत् is अधिराजशब्देन कुमारशब्दस्य तिरस्करणम। Telang spells it with a short उ which is not usua

6 एवम्—Construe एवमुदासितव्यम। 'सम्भृतबलैः' समाहृतसैन्यैः 'अपि' समयसाधनैरपि 'शत्रोः व्यसन' विपदम् 'उदीक्षमाणैः' उत्पश्यद्भिः 'अस्माभिः क्रियन्तं कालम् एवम्' अनेन प्रकारेण 'उदासितव्यम्' आसनमङ्गीकृत्य स्थातव्यम्। We are now in a state of watchful in activiy (आसन) how long are we to continue this watch ? The prince insinuates that Rakshasa is wasting precious time in useless watching.

7. उपलब्धम्—You have been waiting for some disaster to the enemy. Have you news of any mishap that you seem now so eager to march out ?

8. सचिवव्यसनम्—सचिवस्य व्यसनम् loss of minister. "व्यसनं विपदि भ्रंशे"।

20. **मलय—आर्ये, नैतदेवम्। चन्द्रगुप्तप्रकृतोनं चाणक्य दोषा एव अपरागहेतवः। तस्मिंश्च निराकृते प्रथममपि चन्द्रगुप्तेऽनुरक्ताः सम्प्रति सुतरामेव तत्र अनुरागं दर्शयिष्यन्ति।**

Malaya—It is not so, Noble Sir. The faults of Chanakya are the cause for the disaffection of the officers of Chandragupta. He being dismissed, they, devoted to Chandragupta from before, will certainly show even greater devotion to him now.

राक्षसः—मामेवम्। ताः खलु द्विप्रकाराः प्रकृतयः—चन्द्रगुप्तसहोत्थायिन्यो नन्दानुरक्ताश्च। तत्र चन्द्रगुप्तसहोत्थायिनीनां चाणक्यदोषा एव विरागहेतवो न नन्दकुलानुगतानाम्। तासु खलु नन्दकुलमनेन पितृकुलभूतं घातितमिति अपरागामर्षाभ्यां विप्रकृताः सत्यः स्वाश्रयमलभमानाः चन्द्रगुप्तमेव अनुवर्त्तन्ते। त्वादृशं पुनः प्रतिपक्षोद्वरणे सम्भाव्यशक्तिम् अभियोक्तारमासाद्य क्षिप्रमेनं परित्यज्य त्वामेव आश्रयिष्यन्ते। इति अत्र निदर्शनं वयमेव।

Rakshasa—No, not so, These officers are of two classes—those who made common cause with Chandraupta and those who are attached to Nanda. The lapses of Chanakya are the cause of discontent to those only amoug these who rose with Chandragupta, and not of those who are inclined towards the family of Nanda. These again, goaded indeed by anger and disaffection for the reason that Nanda's family, which was like his parental family, was murdered by thts man, follow this very man Chandragupta, from not finding a worthy master. But on coming across an invader like you whose power to extirpate enemies may be guessed, they, forthwith quitting this man, will cling to thyself. I am an instance myself in this matter.

CHARCHA

1. चन्द्रगुप्तप्रकृतीनाम्—Refers to भद्रभट etc.

2. तस्मिन्—चाणक्ये इत्यर्थः। Chanayka has to be gathered from चाणक्यदोषाः preceding, though there चाणक्य is compounded

(वृत्तिच्छन्न)। Vamana says,—"सर्वनाम्नानुसन्धिर्वृत्तिच्छन्नस्य"। Cf.—"पटोलपत्रं मूलं तस्य कफापहम्"।

3. सुतारामेव etc.—Hence, the loss of that of wise counsels of the minister is more than compensated by the more whole-hearted devotion of the subjects Cf.—"अनानुरागप्रभवा हि सम्पदः"।

4 चन्द्रगुप्तसहोत्थायिन्यः—Refers to भद्रभट etc. See कृतकृत्यामापादिताः चन्द्रगुप्तसहोत्थायिनः etc. Act I.

5. चाणक्यदोष एव—एव is misplaced, construe चन्द्रगुप्तसहोत्थायिनोनामेव।

6. तास्तु खलु—ताः refers नन्दकुलानुगतानाम्।

7. पितृकुलभूतम्—"युक्ते त्रादाहृते भूत प्राप्ततीते समे त्रिषु" इत्यमरः। पितुः कुलम्। तेन भूत समम् etc.—As good as paternal family This is another proof that Chandragupta was not born in wedlock. *Dhundhi* reads पितृभूत like his father which seems meaningless.

8. घातितम्—हन + णिच् + क्त कर्मणि। चाणक्यः पितृकुलभूतं हतवान् = अयं चाणक्येन पितृकुलभूतं घातितवान् = अनेन चाणक्येन पितृकुलभूतं घातितम्।

9. अपराग etc.—अप + रञ्ज + घञ् भावे अपरागः disaffection. रुष + घञ् भावे forbearance, न मर्षः anger. अपरागश्च अमर्षः, ताभ्याम्।

10. विप्रकृताः—वि implies विरोध, वैषम्य etc. वि + प्र + कृ + क्त कर्मणि perturbed.

11. स्वाश्रयम्—स + आश्रयम् स्वाश्रयम्। आ + श्रि + अच् कर्मणि आश्रयः resort. शोभनः आश्रयः worthy protection etc They follow Chandragupta simply because they do not know of a good master.

12. त्वादृशम् etc—'पुनः' पश्चात्तरं 'प्रतिपक्षाणां' शत्रूणाम् 'उद्धरणे' उन्मूलने 'सम्भाव्या' अनुमेया 'शक्तिः' सामर्थ्यं यस्य तथाविधं 'त्वादृशं' भवत्तुल्यम् 'अभियोक्तारं' कुसुमपुरावरोधकम् 'आसाद्य' प्राप्य 'एनं चन्द्रगुप्तं' क्षिप्रं परित्यज्य त्वामेव आश्रयिष्यन्ते' त्वदधीना भविष्यन्ति। यदा तु ता भवता पुरी निरुध्यमाना द्रक्ष्यन्ति तदैव ज्ञास्यन्ति ते सारं, नगरीञ्च त्वदधीनां करिष्यन्ति। तत मा विचारय प्रतिष्ठस्व विजयाय इति भावः।

13. वयमेव etc.—"अस्मदो द्वयोश्च" इत्येकत्वे बहुवचनम्। निदर्श्यते अनेन

इति नि+दृश्+णिच् ल्युट करणे निदर्शनम् example दृष्टान्त:। This is predicated of वयम्, hence "सविशेषणानां प्रतिषेध:" does not apply. Cf.—"अस्मान् साधु विचिन्त्य संयमधनान्"।

21. मलय—आर्य्य, किमेतदेकमेव सचिवव्यसनम् अभियोगकारणं चन्द्रगुप्तस्य, आहोस्वित् अन्यदप्यस्ति ?

Malaya—Noble Sir, is this loss of minister alone the reason for warring upon (marching against) Chandragupta, or is there any other reason also ?

राक्षस:—किमन्यैर्बहुभिरपि ? एतद्धि प्रधानतमम्।

Rakshasa—What with a host of others ? This indeed is the most prominent.

मलय—आर्य्य, कथमिव प्रधानतमम् ? किमिदानीं चन्द्रगुप्त: स्वकार्य्यधुरामन्यत्र मन्त्रिणि आत्मनि वा समासज्य स्वयं प्रतिविधातुमसमर्थ: ?

Malaya—How indeed most prominent, Noble Sir ? Is Chandragupta unable personally to counteract (the evil) after having placed the burden of his affairs now on another minister or on himself ?

राक्षस:—वाढ़मसमर्थ:। कुत: ? स्वायत्तसिद्धिषु उभयायत्तसिद्धिषु वा तत् सम्भवति। चन्द्रगुप्तस्तु दुरात्मा नित्यं सचिवायत्तसिद्धावेव स्थित: चक्षुर्विकल इव अप्रत्यक्षलोकव्यवहार: कथमिव स्वयं प्रतिविधातुं समर्थ: स्यात् ? कुत:—अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्री:। सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥ १२ ॥

Rakshasa—Unable forsooth. (Do you ask) Why ? That

is possible with those whose success is at their own command or controlled by both (King and Minister). But dull-headed, always depending upon such success as is under the command of the minister alone, like one destitute of eyes with the ways of the world unseen, as he is, how would Chandragupta be able to counteract this himself? (Do you ask) Why—*Śri* attends having placed her feet on the minister and king grown too high. But, through feminine nature, unable to poise her weight, she quits one of the two. (*Or*—when the king and minister are very powerful, *Śri* attends supporting their feet. But unable to bear the weight through feminine nature, she lets go one of the two).

CHARCHA

1. **अभियोग** etc.—चन्द्रगुप्तस्य is related to **अभियोग**। "सापेक्षत्वेऽपि गमकत्वात् समासः"।

2. **अहो स्वित्**—**आहो** introduces an alternative, cf.—"**आहो निवत्स्यति सम हरिणाङ्गनासु**"—Sak. Act I. **स्वित्** implies a question, '**आहोस्वित् प्रसवो समापचरितैर्विभ्रमो वीरुधाम्**"—Sak Act V.

3. **स्वकार्थ्य**—**स्वस्य कार्य्यम्**। **तस्य धुः**। The **समासान्त** is by "**ऋक्-पूरब्धूःपथामानक्षे**"।

4. **स्वायत्तसिद्धिषु** etc.—See "**इह खलु अर्थशास्त्रकाराः** etc." **Act III**, Para 23.

5. **दुरात्मा**—**आत्मन्** here is **बुद्धि**। "**आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्म च**" इत्यमरः। **दुष्टो मन्दः आत्मा अस्य** of weak intellect **मन्दबुद्धिः**।

6. **चक्षुर्विकलः**—**विगता कला अस्य विकलः** mutilated. **चक्षुर्भ्यां विकलः**।

7. **अप्रत्यक्ष** etc.—**लोकानां व्यवहारः**। **प्रत्यक्ष** seen (See **तत् प्रत्यक्षो-कुर्वता चाणक्यहतकेन** etc. Act II). **अप्रत्यक्षः लोकव्यवहारः अस्य**। *N. B*—. The verse following speeks of an **उभयायत्तसिद्धि** king and shows that **उभयायत्तसिद्धिता** does not last long, but soon changes into **स्वायत्तसिद्धिता** or **सचिवायत्तसिद्धिता**।

8. अन्वयः ॥ श्रीः अत्युच्छ्रिते मन्त्रिणि पार्थिवे च पादौ विष्टभ्य उपतिष्ठते । स्त्रीस्वभावात् भरस्य असहा सा तयोर्द्वयोः एकतरं जहाति । व्याख्या—उभयायत्त-सिद्धेर्भूपस्य 'श्रीः' राजलक्ष्मीः 'अत्युच्छ्रिते' अत्युन्नते 'मन्त्रिणि' अमात्ये 'पार्थिवे च' भूपतावपि 'पादौ विष्टभ्य' व्यवस्थाप्य मन्त्रिणि एकं चरणम् अपरञ्च राजनि निधाय इत्यर्थः 'उपतिष्ठते' तयोः समीपस्था भवति । तुल्योच्छ्राये मन्त्रिणि भूपतौ च पादौ निधाय सा समोच्छ्राययोः वंशदण्डयोः काचिन्नर्त्तकीव सुखं तिष्ठति । किन्तु चिर-तादृशावस्थानं स्त्रीणां न सुकरं, तत् 'स्त्रीस्वभावात्' नारीप्रकृत्या स्त्रीजनोचितदुर्बलतया इत्यर्थः 'भरस्य' स्वदेहभरस्य 'असहा' अक्षमा तथाविधयोश्चलयोरालम्बनयोः देहं व्यवस्थापयितुमसमर्था सती 'तयोर्द्वयोः' मन्त्रिपार्थिवयोः 'एकतरं' यं कमपि 'जहाति' त्यजति । एकं परित्यज्य अन्यस्मिन् सुस्थिरा भवति । तदा तु राज्ञः उभयायत्त-सिद्धिता दूरीभवति, मन्त्रिणि त्यक्ते स्वायत्तसिद्धिता, आत्मनि च त्यक्ते सचिवायत्त-सिद्धिता समायाति इति भावः । Or thus—अन्वयः ॥ मन्त्रिणि पार्थिवे च अत्युच्छ्रिते (सति) श्रीः पादौ विष्टभ्य उपतिष्ठते इत्यादि प्राग्वत् । व्याख्या—'मन्त्रिणि पार्थिवे च अत्युच्छ्रिते' सति द्वाभ्यामाकृष्टा ऋटिति वशगा भूत्वा 'श्रीः' राजलक्ष्मीः अनुरक्तैव कामिनी 'पादौ' उभयोश्चरणौ 'विष्टभ्य' धारयित्वा अङ्के निधाय इत्यर्थः 'उपतिष्ठते' उपचरति । 'परन्तु स्त्रीस्वभावात् भरस्य' उभयोः पादभारस्य 'असहा' अङ्के वहने असमर्था सती इत्यादि प्राग्वत् ।

9. अत्युच्छ्रिते—अति + उद् + श्रि + क्त कर्त्तरि उच्छ्रित high, etc. Qual. both मन्त्रिणि, and पार्थिवे । The reference is to physical height and also to the height of power. *Dhundhi* thinks here of the game of stilts in which the actor moves with his feet on two poles. The higher the poles the greater is the difficulty in preserving balance. श्री is here being carried on the shoulders of two men—the king and the minister—with a foot on the shoulder of each.

10. मन्त्रिणि पार्थिवे—अधिकरणे ७मी (1st Expl.), भावे ७मी (2nd Expl.).

11. विष्टभ्य—वि + स्तम्भ + ल्यप् । "स्तम्भे" इति षत्वम् having placed, having supported.

12. पादौ—She places one पाद on earth in the 2nd explanation she holds the पादौ of each. Kalidasa speaks of श्री, thus

holding the पाद of विष्णु—cf. "श्रियः पद्मनिषद्नायाः चौमान्तरितमेखले। अङ्के निक्षिप्तचरणमासीनं करपल्लवे ॥"

13. भरस्य—भर weight. Her own weight in the first case, and the weight of the feet of the two in the second.

14. जहाति—See quits. हा त्यागे। What happens thereafter? In the 1st expl., it is easier to balance after withdrawing the foot from one person and placing both the feet on the shoulder of the other person. But the dancer finds greater difficulty in moving about on a single pole. Hence the resemblance with the dancer to which *Dhudhi* refers does not hold. Lakshmi carried on the shoulders of the king and the minister points to an उभयायत्तसिद्धि prince etc. See व्याख्या and also remak under Sl. 14.

22. अपि च—

नृपोऽपकृष्टः सचिवात् तदर्पणः स्तनंधयोऽत्यन्तशिशुः स्तनादिव
अदृष्टलोकव्यवहारमन्दधीर्मुहूर्त्तमप्युत्सहते न वर्त्तितुम् ॥१४॥

Moreover—Like a very young suckling weaned from the brensts, the king, withdrawn from the minister after having entrusted all to him, with judgment dull because the ways of the world are not seen, cannot survive even for a moment.

अन्वयः॥ सचिवादपकृष्टः तदर्पणः (अतएव) अदृष्टलोकव्यवहारमन्दधीः नृपः स्तनादपकृष्टः अत्यन्तशिशुः स्तनन्धय इव मुहूर्त्तमपि वर्त्तितुं न उत्सहते। व्याख्या—'सचिवात्' अमात्यात् 'अपकृष्टः' अपसारितः 'तस्मिन्' सचिवे 'अर्पणं' न्यासः सर्वकर्त्तव्यसन्न्यासः यस्य तादृशः अतएव 'अदृष्टः' अविदितः 'लोकस्य' संसारस्य 'व्यवहारः' आचारः यस्य तादृशः तेन च हेतुना 'मन्दधीः' मूढ़मतिः 'नृपः' राजा 'स्तनात्' मातृस्तनात् अपकृष्टः 'अत्यन्तशिशुः' अतिबालः 'स्तनन्धयः' स्तन्यपायी अर्भकः 'इव मुहूर्त्तमपि' क्षणमपि 'वर्त्तितुं' स्थातुं 'न उत्सहते' न शक्नोति। कुतः पुनस्तेन विपत्प्रतीकारः तत् सचिवायत्तसिद्धेश्चन्द्रगुप्तस्य प्राप्तमेव समुच्छेदमवेहि।

CHARCHA

1. तदर्पण:—कृ + णिच् + ल्युट् भावे अर्पणम् entrusting. तद् refers to सचिव। Now see व्याख्या।

2. स्तनन्धय:—स्तनं धयति पिबति इति स्तन + धे (पाने) + खश् कर्त्तरि। ह्रिस्वात् सुमागम:।

3. अदृष्ट etc.—See अप्रत्यक्षलोकव्यवहार: above. Having no experience of state management he is मन्दधी:।

4. *Remark*—In this speech, Rakshasa shows the helplessness of Chandragupta. Loss of minister is of no consequence to a स्वायत्तसिद्धि king. Such a king, in the present circumstances, will adopt measures which may hinder or even stop our progress. The case of a उभयायत्तसिद्धि prince presents different points of view. So long as he remains उभयायत्तसिद्धि, he has nothing to fear ; *Sri* will continue to serve him as a slave (विष्टभ्य पादावुपतिष्ठते श्री:—Sl. 12), but *Sri* might any moment leave the minister (एकतरं जहाति—Sl. 13) and render the king a स्वायत्तसिद्धि one which again makes no difference to him whether his minister still continues to serve him or leaves him altogether. If however, *Sri* leaves the king himself (अकतरं जहाति—Sl. 13), he forthwith becomes a सचिवायत्त prince as Chandragupta had been so long. It now becomes a question of life and death to him whether or not he loses the serviees of such a minister. Loss of minister is then fatal to him (मुहूर्त्तमप्युत्सहते न वर्त्तितुम्—Sl. 14). Hence I say प्रतिष्ठस्व विजयाय।

23. मलय—(आत्मगतम्) दिष्ट्या न सचिवायत्ततन्त्रोऽस्मि। (प्रकाशम्) यद्यप्येवं तथापि बहुषु अभियोगकारणेषु सतसु सचिवव्यसनिनम् अभियुञ्जानस्य शत्रुमभियोक्तु: ऐकान्तिको कार्य्यसिद्धि: भवति।

Malaya—(*To himself*) Luckily I am not one with affairs

entrusted to the minister. (*Aloud*) Although this is so, still lasting success in the undertaking results unto the invader that attacks the enemy when visited by the loss of minister only if several other reasons for an offensive are present.

राक्षसः—ऐकान्तिकीमेव कार्यसिद्धिमवगन्तुमर्हति कुमारः।

कुतः—

त्वय्यत्युत्कटबलेऽभियोक्तरि नृपे नन्दानुरक्ते पुरे
चाणक्ये चलिताधिकारविमुखे मौर्ये नवे राजनि।
स्वाधीने मयि—(इत्यर्धोक्ते लज्जां नाटयन)—
मार्गमात्रकथनव्यापारयोगोद्यमे
त्वद्दाक्षान्तरितानि सम्प्रति विभो तिष्ठन्ति साध्यानि नः॥१५

Rakhasa—It behoves the prince to consider the success in the undertaking as indeed lasting. (Do you ask) whence? The invader being youself, a king with a splendid army; the city being devoted to Nanda; Chanakya being adverse because turned out of office; Maurya being a new king; I being at your command—(*Acting modesty when half-uttered*)—with effort consisting merely in the application of energy in showing the way, our objects now stand, O puissant prince, screened by your wish (unexpressed).

CHARCHA

1. सचिवायत्त etc.—आ' + यत्त + क्त मर्मणि आयत्त cofined. तन्त्र management ef affairs, cf.—"कुसचिवदुष्टराज्यतन्त्रः" Act III, Sl. 12. सचिवे आयत्तम् confined the minister, सुप्सुपा। तादृशं तन्त्रमस्य।

2. यद्यप्येवम् etc.—'यद्यपि' एतत् 'एवम्' ईदृशं सचिवायत्तसिद्धेः सचिवव्यसनस्य दुःसहत्वेऽपि 'सचिवेन व्यसनिनम्' अमात्येन वियुक्तं 'शत्रुम् अभियुञ्जानस्य' विगृह्णतः; योधयत इत्यर्थः; 'अभियोक्तुः' कृताभियोगस्य विजिगीषोः बहुषु अभियोगकारणेषु' आक्रमणहेतुषु 'सत्सु' न हि केवले सचिवव्यसने 'ऐकान्तिकी' नित्या

अनपायिनी 'कार्यसिद्धिर्भवति' सफलता जायते। अतोऽहम् अपरमपि अभियोग-कारणं पृच्छामि।

3. सचिवव्यसनिनम्—सचिवस्य व्यसनम् loss of ministers. तत् अस्ति अस्य इति सचिवव्यसन + इनि सत्वर्थे etc ; also see व्याख्या। *Dhundhi* reads व्यसनम् and explains—'व्यसनमभियुञ्जानस्य' अनुसन्दधानस्य व्यसनमस्मिन् 'अयमभियोक्ता' अभिषेणयतः इत्यर्थः।

4. ऐकान्तिकी—एकः अन्तः स्वरूपम् एकान्तः। तत्र भवा इति ठक्, अध्यात्मादि। ऐकान्तिक (lasting) and आत्यन्तिक (thorough) often go together. For the latter, cf.—"आत्यन्तिकक्षेयसे" Act II, Sl. 15.

5. ऐकान्तिकीमेव etc.—Here Rakhasa points out the existence of several other very cogent reasons for an immeditate march with an assurance of victofy.

6. अन्वयः॥ हे विभो सम्प्रति उत्कृष्टबले नृपे त्वयि अभियोक्तरि, पुरे नन्दानुरक्ते, चाणक्ये चलिताधिकारविमुखे, राजनि मौर्ये नवे, मार्गमावस्कथने व्यापारयोगायमे मयि स्वाधीने, नः साध्यानि त्वद्वाञ्छान्तरितानि तिष्ठन्ति। व्याख्या—हे 'विभो' निग्रहानुग्रहक्षम कुमार 'सम्प्रति' अधुना 'उत्कृष्ट' प्रशस्यं समग्रञ्च 'बलं' सैन्यं यस्य तथाविधे 'नृपे' राजनि 'त्वयि अभियोक्तरि' प्रतिपक्षे सति, 'पुरे' कुसुमपुरे "नन्दानुरक्ते नन्दभक्ते' अतएव चन्द्रगुप्तविद्वेषिणि सति 'चाणक्ये' शक्ते अमात्ये 'चलितः' भ्रष्टः 'अधिकारः' नियोगः अमात्यपदं यस्य तथाविधे अतएव 'विमुखे' प्रतीकारपराङ्मुखे सति 'राजनि' नृपे 'मौर्ये' वृषले चन्द्रगुप्ते 'नवे' अचिरारूढे अतएव प्रतीकारानभिज्ञे सति 'मार्गमावस्य कुसुमपुरवर्त्मनः एव 'कथने' प्रदर्शने यो 'व्यापारयोगः' प्रयत्नघटना स एव 'उद्यमो' व्यवसायो यस्य तादृशे ततोऽधिकं किञ्चिदप्यकर्त्तरि 'मयि स्वाधीने' तवैव निजायत्ते सति 'नः' अस्माकं 'साध्यानि' कर्त्तव्यानि रिपुदमनभवदभिषेचनादीनि 'तव' या 'वाञ्छा' अभिलाषः तया 'अन्तरितानि' व्यवहितानि 'तिष्ठन्ति' वर्त्तन्ते। कथय आत्मनो वाञ्छां सर्वं सम्पत्स्यते एव इत्यर्थः।

7. त्वय्युत्कृष्ट etc.—Reasons for invasions are of two kinds—(i) Own growth, (ii) Enemy's loss. Cf—"स्वशक्त्युपचये केचित् परस्य व्यसनेऽपरे। यानमाहुस्तदासीनं त्वामुत्थापयति द्वयम्॥"—Magha II. The verse notes both these. Own growth includes त्वय्युत्कृष्टबले and स्वाधीने मयि। Among enemy's losses are चाणक्ये विमुखे and मौर्ये

नवे राजनि। नन्दानुरक्ते पुरे is of a double character—it is a loss to Chandragupta and gain to Malayaketu.

8. चलित etc.—चलितः अधिकारः अस्य। अतएव विमुखः etc. Telang also suggests चलितः अधिकारः, कर्मधा—। तेन विमुखः।

9. स्वाधीने मयि—अधिगतः इनः प्रभुरनेन अधीनः a dependant. स्वस्य तवैव अधीनः स्वाधीनः etc. Or स्वस्मिन् त्वयि अधि इति स्व + अधि + ख = स्वाधीनः under you ; "अध्युत्तरपदात् खः" इति नित्यः खः। You can count upon my help which is a great asset to you. This is self-laudation of which Rakshasa was incapable. But the order in which the words are uttered for the sake of the metre is liable to suggest this construction. Rakshasa perceives this and is ashamed. So, acting shame—लज्जां नाटयन्—he hastens to add मार्गमात्र etc., which completely alters the sense (See next).

10. मार्ग etc.—वि + आ + पृ + घञ् भावे व्यापार effort, energy. तस्य योगः व्यापारयोगः application of energy. Now see व्याख्या। Rakshasa was a redoubtable warrior cf.—"गच्छसः खल्वसौ etc." Act III, Pare 33. His स्वाधीने मयि might suggest that he would fight his best and is here referring to the feats of heroism he was going to perform in the coming struggle. The epithet मार्ग etc., however shows the nature of the service he wants to render, not in the exalted capacity of a hero, but in the humbler vocation of a reliable guide. We cannot however desist here from noticing that the verse, while enumerating a host of advantages, omits to mention the most important one for the expedition, namely, the appointment of a capable leader. Rakshasa's own capacity as such is undoubted ; cf—"यवैषा मेघनीला चरति गजघटा राक्षसस्तत्र यायात्" etc. Act II, Sl. 14. The fact is, Rakshasa himself was to be the leader ; cf.—"प्रस्थातव्यं पुरस्तात् खशमगधगणैर्मामनु वृद्धसैन्यैः", Act V, Sl. 11, where मामनु openly mentions Rakshasa as the leader. As a guide too his place would be just there in front.

11. त्वदाज्ञा etc.—अन्तर is अन्तर्धि screen. अन्तरं सञ्जातमेषाम् इति

अन्तर + इतच् अन्तरितानि। Now see व्याख्या। The meaning is—our objects are as good as accomplished. The are not actually seen accomplished yet, simply because, you are not expressing the wish to see them accomplished It is your wish *unexpressed* that is screening the objects.

12. साध्यानि—सिध + णिच् + यत् or ण्यत् कर्मणि . or साध + ण्यत् कर्मणि साध्य that which is to be accomplished, *i. e.*, the aim or object of an undertaking. Here it is of coure चन्द्रगुप्तस्य अवरोपणं मलय केतोरारोपणञ्च।

24. मलय—यद्येवमभियोगकालमार्य्यः पश्यति ततः किमास्यते ? पश्य—

उत्तुङ्गास्तुङ्गकूलं स्रुतमदसलिलाः प्रस्यन्दिसलिलं
श्यामाः श्यामोपकण्ठद्रुममलिमुखराः कल्लोलमुखरम्।
स्रोतःखातावसीदत्तटमरुदशनैरुत्सादितनटाः
शोणं सिन्दूरशोणा मम गजपतयः पास्यन्ति शतशः ॥१६॥

Malayaketu—If Noble Sir thinks this to be such a (precious) time for attack, then why should we be sitting down (here)? Behold—My lordly tuskers, tall in stature, running the fluid of ichor, dark, humming with black-bees, demolishing the bank with their huge tusks, and crimson with vermillion, will, by hundreds, drink up the *Sona* with high banks, with a rushing current, with green trees in the neighbourhood, with a roar of billows, and with the banks subsiding because undermined by the current.

CHARCHA

1. एवम्—Such, *i. e.*, so favourable.
2. आस्यते—Nom. अस्माभिः। We are led by you. If you think

we should go, then forthwith we go at the enemy. Telang omits पश्य after this.

3. **अन्वयः**॥ पश्य मम उत्तुङ्गाः स्रुतमदसलिलाः अलिमुखराः उरुदशनैरुत्सादिततटाः श्यामाः सिन्दूरशोणाः गजपतयः तुङ्गकूलं प्रस्यन्दिसलिलं कल्लोलमुखरं स्रोतःखातावमौदत्तटं श्यामोपकण्ठद्रुमं शोणं शतशः पास्यन्ति। व्याख्या—'पश्य' आश्चर्यम्! [पश्य इति आश्चर्ये अव्ययम् दृशिधातोर्लोट्वा] 'मम उत्तुङ्गाः' महोच्छ्रायाः महाप्रमाणा इत्यर्थः 'स्रुतं' प्रवाहितं 'मदसलिलं' दानवारि यैषां तादृशाः अतएव 'अलिभिः' मदलुब्धैर्भ्रमरैः 'मुखराः' गुञ्जन्तः 'उरुभिः' बृहद्भिः 'दशनैः' दन्तैः उत्सादितं पाटितं 'तटं' कुलं यैः तथाविधाः 'श्यामाः' प्रकृत्या नीलाः किन्तु 'सिन्दूरैः' अङ्गरागार्थं प्रयुक्तैः 'शोणाः' आलोहिताः 'गजपतयः' करीन्द्राः 'तुङ्गम्' उन्नतं 'कूलं' तीरं यस्य तादृशं 'प्रस्यन्दि' प्रवहत् 'सलिलं' स्रोतो यस्य तथाविधं 'कल्लोलैः' वीचिभिः 'मुखरं' गर्जन्तं 'स्रोतसा' प्रवाहेण 'खातं' विशीर्णम् अतएव 'अवमौदत्' पतत् 'तटं' कुलं यस्य तथाविधं 'श्यामाः' नीलाः 'उपकण्ठे' प्रान्ते स्थिताः 'द्रुमाः' वृक्षाः यस्य तथाविधं स्वयं पुनः 'शोणं' शोणाख्यं नदं 'शतशः' शतेन शतेन 'पास्यन्ति'। ततो निःशेषपीते जले वयं सुखेन तीर्णाः परपारे कुसुमपुरं प्राप्स्याम इति भावः। सुवदना वृत्तम्। तल्लक्षणं "ज्ञेया मनाश्चषड्भिर्मरभनययुता स्त्रीगः सुवदना" इति।

4. उत्तुङ्गाः etc.—तुङ्ग is उन्नत। उच्छ्रितात्तुङ्गेभ्यः, प्रादि तत्—। Qual. गजपतयः। The corresponding epithet तुङ्गकूलं (See व्याख्या) attaches a similar character to *Sona*, the river. This correspondence runs through the whole verse. It is not clear what purpose is served by drawing attention to the resemblance. We shall hazard a guess. Malayaketu would be marching from north to south towards Kusumapura, and will have to negotiate the river Sona befere reaching the city. Do you think, says Malayaketu, the river will be an insuperable barrier to my march? You are mistaken. My elephants are a match to the river. They possess all the characterisics that attach to the river. If the river is तुङ्गकूल my elephants are उत्तुङ्ग etc.

5. स्रुतमद etc.—स्रुत in the past shows that the flow is already established, so both the elephants and the river are pouring, hence the resemblance (शोणं प्रस्यन्दिसलिलम्)। 6.

6. श्यामाः etc.—उपगतः कण्ठम् उपकण्ठः neighbourhood. तत्र द्रुमाः

सुप्सुपा। श्यामाः उपकण्ठद्रुमाः। The foliage makes the banks dark.

7. अलि etc —The black-bees are attracted by the fragrance of the ichor. Cf. "गण्डोडडीनालिभाखासुखरितककुभस्तावके मूलपार्णेवनाय-कस्थिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः"। Telang reads अतिसुखराः very noisy. This is owing to the shrill cry of the elephants.

8. खोतःखात etc.—The Sona rends its banks undermining them with the force of its currents. The elephants too will rend the bank butting at it with their tusks. Hence the resemblance. उत्खादित in उत्खादिततटाः has a past sense, but the event is a future one—भविष्यदपेक्षया निर्देशः।

9. शोणम् etc.—The river is *Sona* (red), but it ill deserves the title, not being at all red, whereas my elephants are literalls *Sona* (red) with the vermillion paint applied to them. In this respect my elephants excel the river.

10. पास्यन्ति—This a hyperbole. It is indeed a habit with elephants to suck water from every piece of water they cross. Hence Malayaketu exaggerates—I have such a vast army of elephants, and, owing to their strength, stature etc. each of them will suck such a volume of water at a time, that the river will dry up? What he means is that the river will be easily forded by means of a bridge formed of his elephants. Cf.—"स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः"।

25. अपि च—

गम्भीरगर्जितरवाः खमदाम्बुमिश्र-
मासारवर्षमिव शीकरमुद्विरन्त्यः।
विन्ध्यं विकीर्णसलिला इव मेघमाला
रोत्स्यन्ति वारणघटा नगरं मदीयाः ॥१७॥

(इति भागुरायणेन सह निष्क्रान्तो मलयकेतुः)।

Moreover—My array of elephants, the note of whose roar is deep, will invest the city, emitting, like a torrential downpour, sprays mixed with their ichoral fluid, as a row of clouds that is pouring and whose cry is its deep roar, does the Vindhya. (*Exit Malayaketu with Bhagurayana*)

अन्वय ॥ गम्भीरगर्ज्जितरवाः स्वमदाम्बुमिश्रं शीकरम् आसारवर्षमिव उद्गिरन्त्यः मदीयाः वारणघटाः विकीर्णसलिला मेघमाला विन्ध्यमिव नगरं रोत्स्यन्ति। व्याख्या—शीघ्रं पीत्वा तीव्रोत्कीर्णाः सत्यः 'गम्भीरः' मन्द्रः 'गर्जितरवः' ह्रेंहितध्वनिः यासां ताः अपि च 'स्वैः' स्वकीयैः 'मदाम्बुभिः' दानजलैः 'मिश्रं' संभिन्नं 'शीकरं' जलकणराशिम् 'आसारवर्षमिव' धारासम्पातमिव 'उद्गिरन्त्यः' वमन्त्यः [करिस्वभाव एष तज्जलं पीत्वा ते शीकरमुद्गिरन्ति] 'मदीयाः' मम इमा 'वारणघटाः' गजराजयः 'विकीर्ण' विकीर्यमाणं क्षय्यमाणं 'सलिलं' जलं याभिः तादृश्यः 'मेघमालाः' जलदजालाः 'विन्ध्यमिव' तदाख्यं पर्वतमिव 'नगरं' पुरं कुसुमपुरमित्यर्थः 'रोत्स्यन्ति' निरोधेन योजयिष्यन्ति।

CHARCHA

1. अपि च—This implies **समुच्चय** of **पास्यन्ति** in Sl. 16 with **रोत्स्यन्ति** here. पश्य पास्यन्ति रोत्स्यन्ति च implies immediate execution, *i. e.*, Malayaketu wants to start forthwith on the expedition.

2. गम्भीर etc.—Qual' **वारणघटाः** as in व्याख्या। This may be applied to **मेघमालाः** also. Thus—गम्भीरगर्जितं मन्द्रध्वनिः। स एव रवो यासाम् whose cry is the deep rumble ; qual. **मेघमालाः**।

3. स्वमद etc.—(Qual. **शीकरम्**, see व्याख्या। The मद has come out in torrents (स्वमदसलिलाः, Sl 16). This gets mixed with the spray (शीकर)। See शीकर below.

4. आसारवर्षम्—**आसार** is torrential rain. आसारस्य वर्षम् shower of torrential rain.

5. शीकरम्—**शीकर** is spray. (See "सुरनदीशीकरासार" etc., Act III, Sl. 1) But spray cannot compare with a torrential downpour,(आसारवर्ष) ; hence the epithet स्वमदाम्बुमिश्रम् is added. It is a habit with elephants to squirt out sprays after drinking water. Hence शीकरमुद्गिरन्त्यः naturally follows शीघ्रं पास्यन्ति of Sl. 16

6. विकीर्ण etc.—वि+कृ+क्त कर्मणि विकीर्ण scattered, poured. The क्त in the past is better replaced by शतृ in the present to keep up correspondence with उद्गिरन्त्यः।

7. रौत्स्यन्ति—रुध+लृट् स्यन्ति। The investment of the city follows, as a matter of course, the fording of the river. Telang reads रुन्धन्तु। But समुच्चय is better applied to actions of the *same character*. पास्यन्ति of Sl. 16, implies mere futurity, while रुन्धन्तु carries a विधि with it अपि च suits पास्यन्ति and रौत्स्यन्ति better than पास्यन्ति and रुन्धन्तु।

8. वारणघटाः—See द्विपघटाः, Act II, Sl. 13.

26. **राक्षसः—कः कोऽत्र भोः ?**

Rakshasa—Who is here, Ho ! who ?

(प्रविश्य) पुरुषः—आणवेदु अमच्चो [आज्ञापयतु अमात्यः]।

Attendant Entering—Let Minister command.

राक्षसः—प्रियंवदक, सांवत्सरिकाणां द्वारि कस्तिष्ठति ?

Rakshasa—Priyamvadaka, which of the astrologers is at the gate ?

पुरुषः—क्षपणओ—[क्षपणकः—]

Attendant—The mendicant—

राक्षसः—(आत्मगतम्—अनिमित्तं सूचयित्वा) कथं प्रथममेव क्षपणकः।

Rakshasa—(*Acting the presentation of a bad omen—to himself*)—What ! a mendicant at the very start.

पुरुषः—जीवसिद्धिः [जीवसिद्धिः]।

Attendant—Jivasiddhi.

राक्षसः—(प्रकाशम्) अबीभत्सदर्शनं कृत्वा प्रवेशय।

Rakshasa—(*Aloud*) Let him in, making him rid of his loathsome sight (attire ?).

पुरुषः—जं अमच्चो आणवेदि [यत् अमात्य आज्ञापयति] (इति निष्क्रान्तः)।

Attendant—As Minister commands (*Exit*)

(प्रविश्य) क्षपणकः—

सामण्णमलिहन्ताणं पडिवज्जह मोहवाहिवेज्जाणं।
ये मुत्तमाउकरुअं पच्छा पत्थं उपदिसन्ति ॥ १८ ॥
[शासनमर्हतां प्रतिपद्यध्वं मोहव्याधिवैद्यानाम्।
ये मुहूर्त्तमात्रकटुकं पश्चात् पथ्यमुपदिशन्ति ॥]

(उपसृत्य) धम्मसिद्धी होदु सावगाणम् [धर्मसिद्धिर्भवतु श्रावकाणाम्]।

(*Entering*) *Mendicant*—Adopt the tenets of the *Arhats*, the healers of the ills of delusion, who advise what is bitter for the moment but wholesome in the end. (*Advancing*) May attainment of piety come unto the believer.

CHARCHA

1. सांवत्सरिकाणाम्—See "सांवत्सरिकादिशात्" Act II, Para 23.

2. क्षपणकः—See राज्ञापथ्यकारी क्षपणकः, Act I The speech is incomplete, Rakshasa interrupting, though mentally (क्षपणकः)। The servant wants to say—क्षपणकी जीवसिद्धिः।

3. अनिमित्तम्—निमित्त cause हेतु good omen. न निमित्तम्, विरोधार्थे नञ्, bad omen.

4. कथं प्रथममेव etc.—प्रथम does not refer to day-break, but the *outset* of the expedition. No sooner he thinks of marching out, than out comes a mendicant presaging disaster. Mendicants are deemed inauspicious at start etc., cf.—"कथं क्षपणक आगच्छति। यावदस्य अशकुनभूतं दर्शनं मम" Act V.

5. अन्वयः॥ मोहव्याधिवैद्यानाम् अर्हतां शासनं प्रतिपद्यध्वम् ये मुहूर्त्तमात्र-कटुकं पश्चात पथ्यम् उपदिशन्ति। व्याख्या—'मोहरूपस्य' अज्ञानमयस्य 'व्याधेः' रोगस्य ये 'वैद्याः' चिकित्सकाः तेषाम् 'अर्हतां' जैनसंन्यासिनां 'शासनम्' उपदेशं 'प्रतिपद्यध्वं' गृह्णीत। के ते इत्याह 'ये' अर्हन्तः 'मुहूर्त्तमात्रं' क्षणमात्रं ग्रहणकाले एव 'कटुकं' तिक्तं विरसमित्यर्थः 'पश्चात' परिणामे 'पथ्यं' हितम् 'उपदिशन्ति' शासति। मया वक्ष्यमाणम् आपाततो विरसमपि हितायैव तु भविष्यति इति भावः।

6. अर्हताम्—अर्ह+शतृ कर्त्तरि अर्हन् deserving पूज्य। Thence it is used as a name of Jina. "अर्हन्पूज्ये जिनेऽपि च" इति विश्वः। Hence by transference of epithets it is used for a follower of Jina, क्षपणक। Hence the plural. It is also used for बुद्ध। "अर्हस्तु क्षपणे बुद्ध पुंसि मान्येऽन्यलिङ्गकः" इति मेदिनी।

7. मुहूर्त्त etc.—मुहूर्त्तं मात्रा अस्य मुहूर्त्तमात्रम्। मुहूर्त्तमात्रं कटुकम्. bitter for the time being, स्वतः—।*Dhundhi* explains why bitter—"कैशोल्लवनतप्तशिलाधिरोहणादितीक्ष्णतपसा मोक्षः इति आर्हतानां मतम्"।

8. श्रावकाणाम्—शृण्वन्ति इति श्रु + ण्वुल् कर्त्तरि श्रावकाः patient listeners, *i. e.*, believers. तेषाम्। This is applied to Rakshasa by courtesy, though Rakshasa is not a Jaina. गौरवे बहुवचनम्।

27. राक्षसः—भदन्त, निरूप्यतां तावत् अस्माकं प्रस्थान-दिवसः।

Rakshasa—Mendicant, let a day be found for our march.

क्षपणकः—(नाट्येन चिन्तयित्वा) सावगा, णिरूविदा मए आमज्झक्खादो णिवुत्तमत्तमकलणा सोभणा तिहि सम्पुण्ण-चन्दा पुण्णमासी। तुह्माणं उत्तराए दिसाए दक्खिणां दिसं पत्थिदाणं अ दक्खिणे णक्खत्ते। अवि अ—

अत्थाहिमुहे सूरे उदिए संपुण्णमण्डले चन्दे।
गमणं बुधस्स लग्गे उदिदत्थमिदे अ केदुम्मि॥

[श्रावक, निरूपिता मया आमध्याह्नात् निवृत्तसप्तमकरणा

शोभना तिथिः सम्पूर्णचन्द्रा पौर्णमासी। युष्माकम् उत्तरस्यां दिशो दक्षिणां दिशं प्रस्थितानाञ्च दक्षिणं नक्षत्रम्। अपि च—

अस्ताभिमुखे सूरे उदिते सम्पूर्णमण्डले चन्द्रे।
गमनं बुधस्य लग्ने उदितास्तमितं च केतौ ॥ १८ ॥]

Mendicant—(*Acting reflection*) Well, believer, the full-moon day (तिथि) with the moon complete, which is auspicious from mid-day with the seventh *Karana* over, is selected by me. The mansion (नक्षत्र) too is favourable to you proceeding from north to south. Moreover.—The start is to be when the constellation presided over by Budha is rising, the sun about to set, the moon has come up with the whole of her orb, and the Ketu has appeared and disappeared.

CHARCHA

1. भदन्त—*Dhundhi* says this is a designation of astrologers. But Bhattoji has "भदन्तः प्रव्रजितः"—भदन्त is a mendicant (भन्द कल्याण + झच कर्त्तरि औणादिक)। *Dhundi* may be supported from the consideration that when an astrologer predicts disaster, the individual that suffer by it, is, as it were, bit by the astrologer, not with his real teeth, but with the stars as teeth. It is the stars that really bite him, not the teeth of the sooth-sayer Hence भानि नक्षत्राणि दन्ताः अस्य भदन्तः one with the stars for his teeth, *i. e.*, an astrologer. "भं नक्षत्रे गभस्तौ स्त्री पुंसि स्यात् भगुनन्दने" इति मेदिनी।

2. श्रावक, निरूपिता etc.—पूर्णो मासः पूर्णमासः। तस्य इयं पौर्णमासी the full-moon day. Half of a lunar day is called a *Karana*. "तिथ्यर्द्धं करणं स्मृतम्"। These are eleven in all of which the first seven are called चर or चल moveable. They are बव, बालव, कौलव, तैतिलः गर, वणिज, विष्टिभद्रा। The seventh करण *i. e.*, विष्टिभद्रा is also called विष्टि or भद्रा। ह्वे 'श्रावक मया आ मध्याह्नात्' दिनमध्यात् आरभ्य 'निहतं' व्यतीतं 'सप्तमं करणं' विष्टिभद्राख्यं करणं यस्यां तादृशी अतएव 'शोभना' शुभकरी 'सम्पूर्ण-

चन्द्रा, ग्रहणयोगवर्जिता 'पौर्णमासी' तिथिः भवता प्रस्थानार्थं निरूपिता' प्रशस्तत्वेन अवधारिता। विष्टिभद्रा is inauspicious, hence it to be avoided. "विष्टिं सर्वत्र वर्जयेत"। Also the first half of पूर्णिमा is विष्टि—"पूर्वार्द्धं पूर्णमीतगौ"। This half, on this particular day selected by Jivasiddhi, ends at noon. Thereafter the day is auspicious, not merely because विष्टि is past, but because it has a virtue of its own from the fact that विष्टि has ended with *moon*. "दिनार्द्धोत्तरं विष्टिपूर्वञ्च शस्तम्"। सम्पूर्णचन्द्रा pehaps intends to say that there is no fear of an eclipse which is always looked upon as boding evil. *Dhundhi* reads निरुत्तसर्वकल्याणा। Explain—आ मध्याह्नात् मध्याह्नपर्यन्तम् till mid-day, निरुत्तं सर्वकल्याणमस्याः from which all blessings have departed. This is because विष्टिभद्रा lasts up to noon, the पूर्णिमा having commenced at the previous mid-night.

3. उत्तरस्यां दिशी etc.—अदक्षिणे in the Prakrita should be taken as अ दक्षिणे uncompounded, the अ standing for च in the Sanskrit. च दक्षिणं नक्षत्रम् = नक्षत्रञ्च दक्षिणम् with च misplaced, the misplacement of particles being very common with our poet. The moon was in the constellation मिथुन at the time (See गमनं बुधस्य लग्नं Sl. 17 below). This covers the mansions (नक्षत्र) मूला, पूर्वाषाढ़ा and a fourth of उत्तराषाढ़ा। If the poet is thinking of मूला then the नक्षत्र was indeed propitious. Cf.—"अश्विनौ मैत्ररेवत्यौ मृगमूले पुनर्वसुः। पुष्या हस्ता तथा ज्येष्ठा प्रयाणे चोत्तमाः स्मृताः॥ Thus far जीवसिद्धि has justified his choice of तिथि and नक्षत्र। He next speaks of the लग्न in verse 19. *Dhundhi* takes अदक्षिणं compounded and expounds अदक्षिणं वामं प्रतिकूलम्। He also sees here a covert allusion to भद्रभट etc. and their plans, thus—"पत्थिदाणं अदक्खिणं नक्खत्तं। इत्थं प्रस्थितानां नक्षत्रं न दक्षिणमिति योजना।.....नक्षत्रं भद्रभटप्रभृति दक्षिणं न भवति किन्तु प्रतिकूलं मलयकेतुनियन्त्रोन्मूलमित्यर्थः"। Unluckily we have a नञ् too many in the text for this interpretation—प्रदक्षिणम् has a नञ् already, and another is separated from नक्षत्रम्। This yields न दक्षिणं न क्षत्रम् which but emphasises the दक्षिणता or क्षत्र instead of denying it. We suspect the

text of Dhundhi's commentary here is corrupt, and the correct reading is "नक्षत्रञ्च दक्षिणमिति योजना", the च in अदक्षिणम् being taken as च as in our rendering.

4. अन्वयः॥ सूरे अस्ताभिमुखे सम्पूर्णमण्डले चन्द्रे उदिते केतौ च उदितास्तमिते बुधस्य लग्ने गमनम्। व्याख्या—'सूरे' सूर्ये 'अस्ताभिमुखे' अस्ताचलं गच्छति 'सम्पूर्णे' समग्रं मण्डलं' बिम्बं यस्य तथाविधे उपचितकले 'चन्द्रे उदिते' आविर्भूते 'केतौ च' राहुपुच्छे अपि 'उदितास्तमिते' दृष्टनष्टे आविर्भूयैव तिरोभूते सति 'बुधस्य' बुधग्रहाधिष्ठितस्य मिथुनराशेः 'लग्ने गमन' यात्रा प्रशस्ता इत्यपि मया मिरूपितमिति पूर्वेण सम्बन्धः। दृग्गणितज्ञास्तु राहुकेतोरभेदं मत्वा एकस्मिन्नुदिते अपरः अस्तमेति इति केतोरेव उदयास्तमय उक्त इत्याहुः। Also see next.

5. अस्ताभिमुखे—The Prakrita word अत्थाहिमुहे may also be rendered अर्थाभिमुखे। *Dhundhi* thinks that too is intended here. Explain—अन्वयः—बुधस्य लग्ने केतौ उदितास्तमिते चन्द्रे सम्पूर्णमण्डले सूरे अर्थाभिमुखे गमनम्। व्याख्या—'बुधस्य' चाणक्यस्य यत् 'लग्ने' सम्बन्धः [भावे क्तः] तस्मिन् सति 'केतौ' मलयकेतौ 'उदितास्तमिते' उत्थाय एव पतिते तेन च हेतुना चन्द्रे' चन्द्रगुप्ते 'सम्पूर्णमण्डले' राजमण्डलाधिरूढे सुप्रतिष्ठिते इत्यर्थः, 'सूरे' तेजसा सूर्यतुल्ये राक्षसे [यद्वा प्राकृते सूरे इति शूरे इत्यनुवाद्यम्। ततः 'शूरे' वीरे प्रख्यातपौरुषे राक्षसे। "शूरसूर्य्यार्कमार्तण्डादशात्मदिवाकराः" इत्यमरः] 'अर्थः' मौर्य्यसाचिव्यमिति यावत् 'अभिमुखः' अयाचितोपस्थितः यस्य तादृशे सति 'गमन' तमेव अर्थं प्रति गमनं कार्य्यं मौर्य्यसाचिव्यमङ्गीकार्य्यमिति गूढम्।

6. गमनम्—गमन march. He means the march is favourable just then. *Dhundhi* considers the moment *unfavourable*. He says—"धनुषि सप्तमकेन्द्रं स्थितेन क्रूरेण अस्तमितेन सूर्येण युक्तं केतुना पापग्रहेण च युक्तं प्रयाणे अनिष्टम्। तथा चोक्तम्—"हिमूर्त्तिराशावुदये प्रपन्ने क्रूरग्रहैर्युक्तनिरीक्षिते च। प्रयाति यद्यप्यबलदानीं निवर्तते शत्रुजनाभिभूतः॥" इति। It is an error to say here 'केतुना पापग्रहेण च युक्तम्'। There is no केतुयोग in our case, for a केतुयोग at the time of a full-moon causes an eclipse of the moon. जीवसिद्धि saw no eclipse, for then he would not have recommended this full-moon for the start, nor would he have said "चन्द्रस्य बलेन गच्छन्" as he does below. बल of a अस्तचन्द्र is out of the question. Without केतुयोग the condition "क्रूरग्रहैर्युक्तनिरीक्षिते च" is not satisfied, and the लग्न

becomes unexceptionable ; cf.—"कन्यायां मिथुने ऋषे त्वभिमतं प्राप्नोति लग्ने फलम्" ।

7. बुधस्य लग्ने—लग+क्त भावे लग्नम् contact, *i. e*, the whole time for which the contact lasts. The contact is that of the signs of the Zodiac with the horizon. Now बुध is one of the planets and not a sign of the Zodiac. Hence बुधस्य लग्ने has to be explained as "during contact of that sign of the Zodiac which belongs to बुध, of which बुध is the अधिपति, or as is technically called which is चैत्र of बुध" । But both मिथुन and कन्या are बुध's चैत्र ; cf.—कुजशुक्रबृहस्पतिसौम्यशुक्रावनीभुवाम् । जीवार्किभानुजेज्यानां चैत्राणि सुररादयः ॥" Of these, कन्या does not suit our case, because the full-moon in कन्या requires the sun to be in मीन, *i. e*, the month is to be that of चैत्र । If we remember that करभक has just returned from Pataliputra after witnessing the कार्तिक-पूर्णिमा festival there, and that the distance from Pataliputra to Malayaketu's capital, and back again, is a little over a hundred Yojanas ("शतयोजनतः समधिकम्", *ante*), then चैत्र will give too long an interval On the other hand, if the चैत्र be taken as मिथुन, the sun is हस्थिक and the month is अग्रहायण, the interval then becomes one month only, which is quite reasonable

8. उदितास्तमिते—उदितश्चासौ अस्तमितश्च । The meaning is केतु appears in the horizon, and immediately disappears—it just grazes the horizon. This supposes the केतु to be at the south point of the horizon and राहु to be at the north point. The former is उदितास्तमित and the latter अस्तमितोदित । केतु is the descending node of the orbit of the moon and राहु the ascending node. Dhundhi's identification of केतु with राहु will not be tolerated by astrologers. They treat the two as distinct, each with characteristic attributes of its own and जीवसिद्धि must not be supposed to have forgotton this fact while employed on an important scientific calculation like the present one.

28. राक्षसः—भदन्त, तिथिरेव न शुध्यति ।

Rakshasa—Well, Mendicant, the very day is inauspicious (lit. not clean).

क्षपणकः—सावगा,

एक्कगुणा होहि तिहि चोउग्गुणे होहि नक्खत्ते ।
चउसत्तिगुणे लग्गे एसे जोइसतन्तसिद्धन्ते ॥ २० ॥
लग्गे होइ सुलग्गे सोमम्मि गहम्मि जइ वि दुल्लग्गे ।
वहसि दीहं सिद्धिं चन्दस्स बलेण गच्छन्ते ॥२१॥

[श्रावक—

एकगुणा भवति तिथिश्चतुर्गुणं भवति नक्षत्रम् ।
चतुःषष्टिगुणं लग्नमेष ज्योतिषतन्त्रसिद्धान्तः ॥२०॥
लग्नं भवति सुलग्नं सौम्ये ग्रहे यद्यपि दुर्लग्नम् ।
वहसि दीर्घां सिद्धिं चन्द्रस्य बलेन गच्छन् ॥२१॥

Mendicant—Well, believer, the day (तिथि) is a single measure, four-fold is the mansion (नक्षत्र), the touch (लग्न) is sixty-four fold , this is the conclusion of the science of Astrology. The rise of a sign, even if of an unlucky touch, becomes one of lucky touch when a planet of benign aspect is there. Marching on the strength of the moon you will attain lasting success.

CHARCHA

1. भदन्त &c.—For भदन्त See *ante*. There are defects in the day (तिथि) itself, so what is the good of discussing the eligibility of the नक्षत्र or the लग्न ? This he says because the 15th day the moon is inauspicious. Cf.—"चतुर्दश्यां पञ्चादश्यां गमनं नैव कारयेत्" । Rakshasa does not like the तिथि at all, and on that account does not like to accept जीवसिद्धि's selection.

2. एकगुणा etc.—The तिथि matters little. The नक्षत्र is four times as powerful as the तिथि। And I have shown that the नक्षत्र is in your favour. Any slight defect in the तिथि is of no moment against the four-fold strength of the नक्षत्र। Add to this that the लग्न, with an influence sixty-four times stronger than that of the तिथि, is also favourable. So away with apprehensions.

3. अन्वयः॥ लग्नं यद्यपि दुर्लग्नं सौम्ये यहे सुलग्नं भवति। चन्द्रस्य बलेन गच्छन् दीर्घो सिद्धिं वहसि। व्याख्या—'लग्नं यद्यपि' यदि च 'दुर्लग्नं' दुरुदितं निर्दोषं जायते। दुर्लग्नमपि गृह्यति मच्चिन्तितस्य सुलग्नस्यास्य का कथा? अत्र न केवलं सुभगहस्चन्द्रः अस्ति अपि तु बलवानसौ परिपूर्णमण्डलः। तत् परिहर शङ्कां 'चन्द्रस्य बलेन गच्छन् दीर्घो' स्थिरां 'सिद्धिं' जयश्रियं 'वहसि' वक्ष्यसि लप्स्यसे। "चन्द्रगुप्तस्य बलेन भद्रभटादिना गच्छंस्त्वं दीर्घां चिरमनपायिनीं चन्द्रगुप्तस्य साचिव्य-वदसिद्धिं वहसि इति राक्षसं प्रति गूढाभिसन्धिवचनम्"—इति ढुण्ढिराजः।

29. **राक्षसः—भदन्त अपरैः सांवत्सरिकैः सह संवाद्यताम्।**

Rakshasa—Mendicant, seek agreement with other astrologers.

क्षपणकः—संवादेदु सावगो, अहं उण गमिस्सं [संवादयतु श्रावकः। अहं पुनर्गमिष्यामि]।

Mendicant—But let believer seek agreement, I will go.

राक्षसः—न खलु कुपितो भदन्तः।

Rakshasa—Surely Mendicant is not offended.

क्षपणकः—कुविदे न तुम्हाणं भदन्ते [कुपितो न युष्माकं भदन्तः]।

Mendicant—It is not the Mendicant that is offended with you.

राक्षसः—कस्तर्हि?

Rakshasa—Who then?

क्षपणकः—भअवं कअन्तो। जेन अत्तणो पक्खं उज्झिअ परपक्खो पमाणीकरीअदि [भगवान् कृतान्तः। येन आत्मनः पक्षमुज्झित्वा परपक्षः प्रमाणीक्रियते]। (इति निष्क्रान्तः क्षपणकः)।

Mendicant—Death the worshipful. Because other pepole are accepted as guide and own men avoided. (*Exit Mendicant*).

राक्षसः—प्रियंवदक, ज्ञायतां का वेला वर्त्तते इति।

Rakshasa—Priyambadaka, see what time it is.

प्रियंवदकः—ज्जं अमच्चो आणवेदि [यत् अमात्यः आज्ञापयति]। (इति निष्क्रम्य पुनः प्रविश्य च) अत्थाहिलासो भअवं सूरो [अस्ताभिलाषो भगवान् सूरः]।

Priyamvadaka—As Minister commands (*Going out and coming back*). Worshipful Sun desires setting.

राक्षसः—(उत्थाय विलोक्य च) अये अस्ताभिलाषी भगवान् भास्करः। सम्प्रति हि—

आविर्भूतानुरागाः क्षणमुदयगिरेरुज्झितस्थानस्य भानोः
पर्णच्छायैः पुरस्तादुपवनतरवो दूरमाश्लेष मत्वा।
एते तस्मिन्निवृत्ताः पुनरपरकुपप्रान्तपर्य्यस्तबिम्बे
प्रायो भृत्यास्त्यजन्ति प्रचलितविभवं स्वामिनं सेवमानाः ॥२८॥

(इति निष्क्रान्ताः सर्वे।)

Rakshasa—(*Rising and looking*) Ha! The worshipful sun longs to set. These garden trees, with a tinge manifest for a moment, having with the shades of foliage approached (lit. gone) with evident alacrity (lit. rapidity) in front of the

sun that was coursing up from the Rising Hill, have indeed turned back now, he having his disc cast on the edge of the other side (of the meridian). Servants in attendance usually leave the master whose power is shaken (*Or*—whose fortune has waned).

(*Exunt all.*)

CHARCHA

1. संवादयताम्—सम्+वद here means to consult. The usual meaning is to agree, cf.—"संवदन्त्यचराणि" Act V, "अस्य बालकस्य रूपसंवादिनी ते आकृतिः' Sak. Act VII etc. सम+वद+णिच्+लोट् ताम् भावे, the root being treated as अकर्मक। For सांवात्सरिक see ante.

2. संवादयतु श्रावकः etc.—This shows that the Mendicant is piqued at the incredulity of Rakshasa.

3. भगवान् कृतान्तः etc.—Death the all powerful is offended with you, *i. e*, you will be ruined. The reason follows—'येन' यतः 'आत्मनः पक्षं वर्गं मां' 'उज्झित्वा परपक्षः' अपरः सांवत्सरकः 'प्रमाणीक्रियते' प्रमाणत्वेन आश्रीयते' त्वया। Others will misguide you and lead you to ruin. येन is an अव्यय implying हेतु। *Dhundhi* has 'आत्मनः पक्षं नन्दवंश्यं चन्द्रगुप्तमुपेक्ष्य परपक्षी मलयकेतुः प्रमाणीक्रियते अतस्तव कालः कुपितः इति हृदि गूढम्"। He sees a double meaning in कृतान्त too which also means सिद्धान्त, conclusion—"कृतान्तौ यमसिद्धान्तौ"। "ज्योतिःशास्त्रस्य कृतान्तः सिद्धान्तो व्याकोपितः इति मत्वा कृतान्तः कुपितः इति निष्ठुरवचनम्"।

4. अस्ताभिलाषी etc.—अस्ते अस्ताचले अभिलाषः अस्ति अस्य। He is going towards the setting hill, *i. e.*, the time is past noon. Rakshasa awoke late and then received visitors including the Prince ; so the day was far advanced.

5. अन्वयः॥ एते उपवनतरवः क्षणम् आविर्भूतानुरागाः (सन्तः) उदयगिरेः उज्झितानस्य भानोः पुरस्तात् पर्णच्छायैः आश्रय एव दूरं गत्वा तस्मिन् अपरकूपप्रान्त-पर्य्यन्तविम्बे (सति) सम्प्रति पुनर्निर्वृत्ता हि। सेवमानाः भृत्याः प्रचलितविभव स्वामिनं प्रायः त्यजन्ति। व्याख्या—'एते' आसन्ना इमे 'उपवनतरवः' आरामपादपाः 'क्षणं' मुहूर्तमात्रम् 'आविर्भूतः' सञ्जातः दृश्यमानः इत्यर्थः 'अनुरागः' अनुलेपः

अनुरञ्जनमिति यावत् येषां तादृशाः सन्तः भक्तिमन्तो भूत्वा इत्याशयः 'उदयगिरेः' पूर्वपर्वतात् 'उज्जिहानस्य' उद्गच्छतः भानोः भास्करस्य 'पुरस्तात्' भानोः पुरः, पश्य-त्ययमस्माकं भक्तिम् इति तत्समक्षमेव 'दूरं' गत्वा' तदभिमुखम् आपादपमूलमुपसृत्य 'तस्मिन्' भानौ 'अपरस्याः' इतरायाः पश्चिमायाः 'ककुभः' दिशः 'प्रान्ते' सीमनि 'पर्य्यन्तं' लम्बितं 'बिम्बं' मण्डलं यस्य तादृशे सति 'सम्प्रति पुनः' अधुना तु 'निहताः हि' पृष्ठतः अपसृता एव। यावत् प्रतापः तावत् पुरस्तात् उपसर्पणं' प्रतापक्षये तु पश्चादपसर्पणम् इत्येषां कृतघ्नता। एवमेव दृश्यते लोके इत्याह—'सेवमाना' उप-चरन्तः 'भृत्याः' कर्मकराः 'प्रचलितः' विच्युतः 'विभवः' प्रभुत्वं यस्य तादृशं 'स्वामिनं' प्रभुं प्रायः' बाहुल्येन 'त्यजन्ति' जहति।

6. उज्जिहानस्य—उद्+हा (गतौ)+शानच् कर्त्तरि। लिट्रीते—लट्।

7. भानोः—The reference to the भा, light, in भानु is necessary to cause अनुराग (tint).

8. पर्णच्छायैः—पर्णानां छाया पर्णच्छायम्। पर्णच्छायच्च पर्णच्छायच्च पर्णच्छायच्च पर्णच्छायानि, एकशेष। तैः। Here पर्णानां छाया, givesmultiplicity of shades through multiplicity oi *leaves*. But what is here wanted is multiplicity through multiplicityof trees. Hence the necessity of एकशेष। Remember एकशेष is no समास।

9. पुरस्तात्—पूर्वस्मिन् देशे पुरस्तात् (See *ante*). They keep in front to attract notice. The fact is, the sun is facing the tress, hence the shade is moving in front of the sun.

10. दूरम् etc.—As the day advances, the shade shortens, *i.e.* its tip moves *towards* the sun, like one approaching one's mas-ter. This goes on the whole of the forenoon, *i. e.*, so long as the sun is waxing in power. At noon, the shade is level with the tree ; and then as the sun goes to the west, the shade travels *east i. e., away* from the sun. Thus the sun is losing heart, and the shade is leaving him. *Dhundhi* here thinks of fore-runners moving in fornt of their master—"पूर्वोक्ते वृक्षछायाः (?) प्रत्यक प्रसरन्तीति भानोः पुरोगामिभृत्यत्वेन उत्प्रेक्षिताः। पश्चादपराह्णे तस्मिन् अस्तोन्मुखे सति निहतास्तं परित्यज्य पराङ्मुखा इव दृश्यन्ते"। This does not agree with facts. Runners move *with* their master, *i. e.*, go the same way with

him ; but the shadow and the sun in the morning move in opposite directions—the sun moves east to west, while the tip of the shadow travels *west to east.* Again as the day advances, the sun's power grows, but the shadow moves less quick , this is not at all like a runner in front, but suits one *approaching* one's master—the more powerful the master is, the more timid being the approach.

11. अपरकक्षप etc.—See व्याख्या। This is Dr. Hille-brandt's reading. *Dhundhi* notices the reading अपकक्षभः प्रान्तपर्य्यस्तबिम्बे, which seems to be a variant of अपरकक्षपपान्तपर्य्यस्तबिम्बे। Telaog reads अपरगिरिपान्तपर्य्यस्तबिम्बे : expound अपरस्य उदयेतरस्य गिरेः अस्ताचलस्य प्रान्ते पर्य्यस्तं बिम्बं यस्य। This makes the time as *dusk* which is inconceivable. Rakshasa was in bed when करभक came in the morning , cf.—"जागरेण समुत्पन्नशीर्षवेदनः अद्यापि शयनं न मुञ्चति", *ante.* He next received the Prince, who did not perhaps take up more than an hour of his time ; and then came the Mendicant, That was all. It was all in *one* sittiug. It seems impossible for a single sitting to last from morning to evening. Moreover सम्प्रति निवृत्ताः shows that the receding of the shadows has but com nenced and not proceeded far. We therefore prefe अपरकक्षप्रान्तपर्य्यस्तबिम्बे।

12. प्रायो भव्याः etc.—*Dhundhi* thanks that this presages Malayaketu's downfall and desertion of his followers. प्रायः is an अव्यय meaning 'generally'. Cp "प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा"—*Megha.*

End of Act. IV.

पञ्चमोऽङ्कः ।



1. (ततः प्रविशति लेखम् अलङ्करणस्थगिकाञ्च मुद्रिता-मादाय सिद्धार्थकः) ।

सिद्धार्थकः—हीमाणहे हीमाणहे ।

बुद्धिजलणिज्झरेहिं सिञ्चन्ती देसकालकलसेहिं ।
दंसेदि हि कज्जफलं गुरुअं चाणक्कणीदिलदा ॥ १ ॥

ता गहीदो मए अज्ज चाणक्केण पढमलिहिदो अमच्च-रक्खसस्स मुद्दालंछिओ अअं लेहो । तस्स ज्जेव्व मुद्दालंछिआ इअं आहरणपेडिआ । चलिदोह्मि किल पाडलिउत्तं । जाव गच्छामि । [आश्चर्य्यमाश्चर्य्यम् ।

बुद्धिजलनिर्झरैः सिच्यमाना देशकालकलसैः ।
दर्शयति हि कार्य्यफलं गुरुकं चाणक्यनीतिलता ॥ १ ॥

तस्माद् गृहीतो मया आर्य्यचाणक्येन प्रथमलेखितः अमात्य-राक्षसस्य मुद्रालाञ्छितः अयं लेखः । तस्यैव मुद्रालाञ्छिता इयमाभरणपेटिका । चलितोऽस्मि किल पाटलिपुत्रम् । यावद् गच्छामि] (परिक्रम्य अवलोक्य च) कहं खवणओ आ-अच्छदि । जाव से असउणभूदं दंसणं मह सम्मदमेव । ता ण परिहरामि [कथं क्षपणक आगच्छति । यावदस्य अशकुन-भूतं दर्शनं मम सम्मतमेव तस्मात् न परिहरामि] ।

(*Now enter Siddharthaka carrying a letter and a sealed packet of jewellery*).

Siddharthaka—Wonder ! Oh wonder ! The creeper of Chanakya's policy watered by the pitcher of time and place with a liberal flow of the water of wisdom is indeed showing the weighty fruit of the undertaking. So this letter previously caused to be written by Noble Chanakya and stamped with the seal of Minister Rakshasa is taken with me ; this packet of jewellery too is stamped with his own seal ; and I pretend going to Pataliputra. Let me proceed. (*Going round and observing*). How so ! A mendicant is approaching ! As his inauspicious sight is desired by me, so I do not avoid him.

CHARCHA

Scene—Malayaketu's camp during march to Kusumapura.

1. अलङ्करण etc.—स्थगयति इति स्थग + णिच् + अच् कर्तरि स्थगः that which stops. स एव स्थगकः। स्त्रियां स्थगिका, a basket, a purse etc. पेटिका। अलङ्करणानां स्थगिका etc.

2. हीमाणहे—See Act IV, Para 1.

3. अन्वयः॥ देशकालकलसैः बुद्धिजलनिर्झरैः सिच्यमाना चाणक्यनीतिलता बृहत्कं कार्य्यफलं दर्शयति हि। व्याख्या—'देशः' समुचितं स्थानं 'कालः' योग्यः समयः तौ एव 'कलसौ' घटौ येषां तादृशैः 'बुद्धिरूपं' 'यत्' जलं तस्य 'निर्झरैः' प्रवाहैः 'सिच्यमाना' अभ्युक्ष्यमाणा या 'चाणक्यस्य नीतिरूपा लता' सा 'गुरुकं' महत् 'कार्य्यस्य' प्रारब्धस्य राक्षसग्रहणरूपस्य कर्मणः 'फलं' दर्शयति हि' सूते एव इति भावः। पश्य आश्चर्य्यम् लता एव अपूर्वा दृश्यम् आर्य्यचाणक्यनीतिः बुद्धिरूपेण जलेन अभिषिक्ता, तच्च जलं देशकालरूपेषु घटेषु आधीयते फलमपि महदस्या राक्षसग्रहणरूपमद्य सिध्यत्येव।

4. बुद्धि etc,—निर् + झृ + अप् भावे निर्झरः good flow. बुद्धिजलस्य निर्झराः। तैः। बुद्धिजलस्य निर्झराः = निर्झरैः बुद्धिजलम् ; भावानयने द्रव्यानयनम्।

5. देश etc.—देशकालौ एव कलसौ। Also see व्याख्या।

6. दर्शयति—Note the present tense. सिद्धार्थक watches the development of events and notices that the measures are actually bearing fruit—दर्शयति। He did not expect so speedy fruition, hence the wonder—हीमाणहे हीमाणहे।

7. हि—अवधारणे। There is no doubt about it.

8. प्रथमलेखितः etc.—Refers to the letter which शकटदास wrote at the instance of सिद्धार्थक (see Act I).

9. तस्यैव मुद्रा etc.—Refers to the jewellery presented by Rakshasa to Siddharthaka and deposited by him with Rakshasa after sealing the packet (Act II, Paras 39-40). Originally they belonged to Malayaketu (Act II, Paras 12-14).

10. चलितोऽस्मि किल etc.—"किल इत्यलीके। गमनम् अलीकं कृत्रिमम् इत्यर्थः"—*Dhundhi*. He pretends that he is going to Pataliputra.

11. अथं चपणकः etc.—He is annoyed, hence he did not know that Jivasiddhi also was an emissary of Chanakya.

12. अशकुनभूतम् etc.—Cf. "कथं प्रथममेव चपणकः"—Act IV, Para 26.

13. सम्मतमेव—It was welcome to him because he wanted to know the aspect of the stars which the mendicant was best qualified to tell him. *Dhundhi* explains differently thus—"अनेन अशकुनेन कुसुमपुरं प्रति गमनप्रतिबन्धः इष्ट एव इत्यर्थः"। This is his meaning—An inauspicious sight at the start frustrates the object of the start. My object is to go to Kusumapura. The sight of the mendicant will frustrate it and I shall be taken back bound hand and foot to Bhagurayana. This is just what I want—सम्मतमेव। So I do not avoid the mendicant. To this may be objected, that the object of the start is *not* to go to Kusumapura, but to pretend going there, and court capture. The sight of the mendicant will prevent *that*. Our explanation assumes that सिद्धार्थक has not yet made up his mind finally and wants to consult an astrologer before doing so. The

importance of the undertaking demands this caution. Cf.—"भदन्त साम्प्रतमपि.. तदा गमिष्यामि" (supra)। If the mendicant prohibits the start, he goes back, so he avoids the evil that might result from the mendicant's sight. If on the other hand the day is declared auspicious, success of the undertaking is assured, the mendicant's sight notwithstanding, and the start is undertaken. Thus the sight is सम्प्रतमेव।

2. (प्रविश्य) क्षपणकः—

अलहन्ताणं पणमामि जे दे गम्भीलदाए बुद्धीए।
लोउत्तलेहिं लोए सिद्धिं मग्गेहिं गच्छन्दि॥
[आर्हतानां प्रणमामि ये ते गम्भीरतया बुद्धेः।
लोकोत्तरैर्लोके सिद्धिं मार्गैर्गच्छन्ति॥ २॥]

(*Entering*) *Mendicant.*—I bow to those illustrious *Arhatas* who through the depth of their intellect, attain success (*Or*—salvation) in this world by ultra-mundane methods.

सिद्धा—भदन्त वन्दामि [भदन्त वन्दे]।

Siddh.—Mendicant, I bow to you,

क्षप—सावगा धम्मसिद्धी होदु [श्रावक, धर्मसिद्धिर्भवतु] (निर्वर्ण्य) सावगा पत्थाणसमुब्बहणे किअव्ववसाअं विअ तुमं पेक्खामि [श्रावक, प्रस्थानसमुद्वहने कृतव्यवसायमिव त्वां पश्यामि]।

Mend.—Well, believer, let attainment of piety be yours. (*Scrutinizing*) Believer, you look like one with mind made up to accomplish a journey.

सिद्धा—कहं भदन्तो जाणादि [कथं भदन्तो जानाति]।

Siddh.—How does the mendicant know it ?

क्षप—सावगा किं एत्थ जाणिदव्वं। एसो दे मग्गादेस-कुसलो सउणो करगदो लेहो अ सूअदि [श्रावक, किमत्र ज्ञातव्यम्। एष ते मार्गादेशकुशलः शकुनः करगतो लेखश्च सूचयति]।

Mend.—Believer, what is there to know it. This letter in your hand, that is clever at ordering one out on the way (*Or*—at declaring the journey) is itself the omen that indicates it.

सिद्धा—जाणिदं भदन्तेण। देसन्तरं पत्थिदोह्मि ता कहेदु भदन्तो कीदिसो अज्ज दिवसो त्ति [ज्ञातं भदन्तेन। देशान्तरं प्रस्थितोऽस्मि तस्मात् कथयतु भदन्तः कीदृशोऽद्य दिवस इति]।

Siddh.—Rightly guessed by mendicant. I am proceeding to another land, so let mendicant declare how the day is to-day.

क्षप—(विहस्य) सावगा मुण्डिअमुण्डो णक्खत्ताइं पुच्छसि। [श्रावक मुण्डितमुण्डो नक्षत्राणि पृच्छसि]।

Mend.—(*Laughing*) Believer, with the head shaved already you ask of the stars ?

सिद्धा—भदन्त सम्पदं वि किं जादं। कहेहि, पत्थाणस्स जइ अनुउलं भविस्सदि तदो गमिस्सम् [भदन्त, साम्प्रतमपि किं जातम्। कथय, प्रस्थानस्य यदि अनुकूलं भविष्यति तदा गमिष्यामि]।

Siddh.—Mendicant, am I gone yet ? (*Or*—what has pro-

gressed even now). Speak, if favourable for a journey, then I shall go [जादं = यातम् or जातम्]।

चप—सावगा णं संपदं एदस्मिं मलअकेदुकड़ए अणुकुलं भविस्सदि [श्रावक, ननु साम्प्रतम् एतस्मिन् मलयकेतुकटके अनुकूलं भविष्यति]

Mend.—Believer, verily what is favourable just now will be found in Malayaketu's encampment.

सिद्धा—भदन्त कहेहि कुदो एदं [भदन्त, कथय कुत एतत्]।

Siddh.—Mendicant, tell me, how so. (*Or*—why is this).

आर्हतेति। अन्वयः॥ आर्हतानां प्रणामाः ते ये बुद्धेर्गम्भीरतया लोके लोकोत्तरैर्मार्गैः सिद्धिं गच्छन्ति। व्याख्या—'आर्हतानां' जैनसन्यासिना बौद्धसन्यासिनां वा 'प्रणामाः' प्रणता भवामः। के इमे आर्हता इत्याह—'ते' प्रसिद्धाः 'ये बुद्धेः' निजमतेः 'गम्भीरतया' गहनगाहनशीलतया हेतुना 'लोके' जगति 'लोकोत्तरैः' अप्राकृतैः 'मार्गैः' वर्त्मभिः उपायैरित्यर्थः 'सिद्धिं' गच्छन्ति' कृतकृत्या भवन्ति मोक्षं लभन्ते वा।

CHARCHA

1. आर्हतानाम्—अर्हं + अत्र अर्हत् a name of Buddha also of Jina. See *ante.* अर्हतः इमे अर्हत + अण् आर्हताः followers of *Arhat.* Or अर्हन् भक्तिरेषाम् इत्यण् आर्हताः। तेषाम्। शेषविवक्षया षष्ठी। Cf—"भजे अभीश्वरणयोः"—*Bhattoji.*

2. लोकोत्तरैः—लोक world or ordinary people. लोकेभ्यः उत्तराः लोकोत्तराः etc.

3. भदन्त—See Act IV, Para 27.

4. श्रावक etc.—See Act IV, Para 26 etc.

5. प्रस्थान etc.—समुद्वहन accomplishment. प्रस्थानस्य समुद्वहनम।

6. किमत्र ज्ञातव्यम् etc.—शक्नोति सूचयितुम् इति शक + उन कर्त्तरि औणादिक शकुनः a sign, an indicator (not necessarily—an omen). Here it is an ordinary attributive. Hence it is वाच्यलिङ्ग। Explain thus—'अत्र' भवत्प्रस्थानविषये 'ज्ञातव्यं किम्' अस्ति ? न किञ्चित्, प्रकटमेवेतत्। कुतः प्रकटमित्याह 'एष ते करगतः' हस्तस्थितः 'मार्गस्य' प्रस्थानस्य 'आदेशः' विज्ञापने 'कुशलः' दक्षः [यद्वा—'मार्गस्य' वर्त्मनः 'आदेशे' अनुज्ञायां 'कुशलः' दक्षः] मार्गं ख्यापयितुं शक्तः इत्यर्थः। 'शकुनः' सूचकः 'लेखश्च' पत्रमेव [चकारः अवधारणे] 'सूचयति'। पत्रहस्तो जनः प्रस्थानोद्यत एव भवति तत् किमत्र ज्ञातव्यमस्ति इत्यर्थः। By मार्गादेशकुशलः शकुनः *Telang* understands a good omen which will direct you well on your way. In other words सिद्धार्थक's journey is inferred by *two* things—(i) a शकुन (omen) , (ii) the लेख (letter). Prof. Goswami and Chakraburty justly observe that शकुन meaning omen is neuter. The former takes it as meaning खग a bird, in which sense it is masculine. But be it a lucky omen or a bird it does not suit the context. किमत्र ज्ञातव्यम् implies that no expert knowledge is necessary to infer सिद्धार्थक's journey. But an inference from an omen or a bird certainly depends upon expert knowledge. Hence we take शकुन here as an ordinary attributive used in its derivative sense qualifying लेखः। च implies अवधारण। लेखश्च = लेख एव। The letter itself declares it, no expert knowledge is necessary. "चान्वाचये" इति प्रसृत्य "पक्षान्तरे तथा पादपूरणेऽप्यवधारणे" इति मेदिनी। The fact is इन्दुशर्मन् the intimate friend of Chanakya who is playing the part of चपणक here was in charge of the great work to which Chanakya refers in Act I (तेनेदानीं महत् कार्य्यमनुष्ठेयं भविष्यति etc.). That work is now nearing completion. इन्दुशर्मन् knew Chanakya's secret, the emissaries were all known to him, and were being watched by him in the discharge of the duties assigned to each of them, though they themselves knew him only as a mendicant enjoying the friendship of Rakshasa. Hence it is no wonder that the चपणक was aware of सिद्धार्थक's mission that day.

7. मुण्डितमुण्डः etc.—मुण्डित shaved . मुण्ड head , मुण्डितः मुण्डः अनेन । Stars should be consulted before shaving the head , it is useless consulting them after the shaving. You are already on your journey. So what is the good of asking me about the stars now ?

8. साम्प्रतमपि etc.—जादं in the Pakrita may be translated as यातम् or जातम् । In the former case 'साम्प्रतमपि किं यातम्' प्रस्थितं मया ? नैव यातम् । I am not on my way yet so my query is relevant. With the second—साम्प्रतमपि even now किं जातम् what has happened प्रस्थानोचितं किं निर्वृत्तम् ? न किमपि । I have made no progress in my journey, hence the query is not meaningless.

9. आवक ननु etc.—The Prakrita should be read सावगा णं = आवक, ननु । ननु here implies आक्षेप a mild censure. "नन्वाक्षेपे परिप्रश्ने" इति हैमः । ननु' हं 'आवक साम्प्रतम्' अधुना अस्मिन् मुहूर्त्ते गमनसुखे यत् 'अनुकूलं' शुभं तत् 'मलयकेतुकटके भविष्यति' न च तिथिनक्षत्रलग्नेषु । You are looking for favourable signs in the heavens. Why go so far ? Go and look for them in the camp itself. Immediately favourable for the journey in the passport ; this you will get in the camp.

3. क्षप—सावगा णिसामेहि । पुढमं दाव एत्थ कडए लोअस्स अणिवारिदो णिग्गमपवेसो आसी । दाणीं इदो पच्चासण्णे कुसुमपुले ण कोवि असुद्दालंछिओ णिग्गमिदुं पवेट्ठं, वा अणुमोदीअदि । ता जदि भाडरायणस्स मुद्दालंछिओ तदो गच्छ विस्सद्धो अस्सहा चिट्ठ । मा गुम्माहिआरिएहिं संजमिअ-कलचलणो राअकुलं पवेसीयसि [आवक, निशामय । प्रथमं तावदत्र कटके लोकस्य अनिवारितो निर्गमप्रवेश आसीत् । इदानीमितः प्रत्यासन्ने कुसुमपुरे न कोऽपि असुद्रालाञ्छितो निर्गन्तुं प्रवेष्टुं वा अनुमोद्यते । तत् यदि भागुरायणस्य मुद्रा-

लाञ्छितः तदा गच्छ विश्रब्धः। अन्यथा तिष्ठ मा गुल्माधिकारिकैः संयमितकरचरणो राजकुलं प्रवेश्यसे]।

Mend—Listen, Believe. Previously in this camp people's ingress and egress were unchecked. Now Kusumapura becoming near, no one, unmarked by a stamp (*i. e.*, without a passport) is allowed to come in or go out, So if marked with Bhagurayana's seal, then proceed in confidence, otherwise stay, be you not carried to the royal camp by commanders of piquets with hands and feet fettered.

सिद्धा—किं ण जानादि भदन्तो अमच्चरक्खसस्स सण्णिहिदो त्ति ? ता अमुद्दालञ्छिदं वि मं णिक्कमन्तं कस्स सत्ती णिवारेदुम्। किं न जानाति भदन्तः अमात्यराक्षसस्य सन्निहित इति ? तत् अमुद्रालाञ्छितमपि मां निष्क्रामन्तं कस्य शक्तिर्निवारयितुम् ?

Siddh.—Does not mendicant know that I am an attendant of Minister Rakshasa ? So who has the power to stop me going out even unmarked by a stamp (*i. e.*, without a passport) ?

चप—सावगा, रक्खसस्स पिसाचस्स वा होहि,, ण उण अमुद्दालंछिदस्स इदो णिक्कमणोवाओ [श्रावक, राक्षसस्य पिशाचस्य वा भव। न पुनरमुद्रालाञ्छितस्य इतो निष्क्रमणोपायः]।

Mend—Believer, be you of a Rakshasa or a Pishacha ; but you have no means to go out hence, unstamped by a signet (*t. e.* without a pass-port).

सिद्ध—भदन्त ण कुप्प कज्जसिद्धी होदु [भदन्त, न कुप्य कार्य्यसिद्धिर्भवतु]।

Siddh—Mendicant, be not angry May success in the undertaking be mine.

क्षप—सावगा गच्छ। होदु दे कज्जसिद्धी। अहं हि भाउरायणादो मुद्दं जाचेमि [श्रावक गच्छ। भवतु ते कार्य्यसिद्धिः। अहमपि भागुरायणात् मुद्रां याचे]। (इति निष्क्रान्तौ)।

(प्रवेशकः)।

Mendicant—Go believer. Let success in the undertaking be yours. I too will apply for a seal (*i. e.* pass-port) from Bhagurayana. (*Thay go out*).

Here ends the Prelude.

CHARCHA

1. निशामय—नि + शम् (चुरादि) + णिच् + लोट् हि। The root means 'to see' as in "अनुत्तमिदं तीर्थं भारद्वाज निशामय"। Here however the meaning is 'to hear'; cf.—"निशामय तदुत्पत्तिं विस्तराद्गदतो मम"।

2. निर्गमप्रवेशः—This is Dhundhi's translation. But the neuter is compulsory, when the इन्द्र is in the singular. Cf.—"न नपुंसकम्"। निर्गमप्रवेशौ is preferable.

3. अमुद्रालाञ्छितः—लाञ्छ + णिच् + क्त कर्मणि लाञ्छितः marked. मुद्रयते अनया इति मुद्र + णिच् + अ करणे मुद्रा seal. मुद्रया लाञ्छितः। न तथा।

4. गुल्माधिकारिकैः—अधिक्रियते अस्मिन् अधिकारः post, appointment. तत्र नियुक्ताः इति अधिकार + ठक् आधिकारिकाः। गुल्म is घट्ट called घाटि in भाषा. a piquet. "गुल्मः स्तम्बे घट्टभेदे"। गुल्मेषु आधिकारिकाः, सुपसुपा etc

5. संयमित etc.—करौ च चरणौ च करचरणम्, प्राण्यङ्गत्वादेकवद्भावः। संयमितं करचरणमस्य etc.

6. राजकुलम्—कुल here is गृह। Cf.—"राजकुलसेवकः" Act II para 2.

7. प्रवेश्यसे—मा is here different from माङ् through meaning like it prohibition. Hence "माङि लुङ्" does not apply. Cf.—"मा कुरु" "गच्छ त्वं मा ह्रकेभ्यः" etc.

8. न कुप्य etc.—कुप is दिवादि। लोट् हि। The belief was that stars were at the command of the astrologers who when angry would set them upon offenders. Hence सिद्धार्थक tries to pacify the mendicant.

9. भागुरायणात्—We do not get भागुरायणं मुद्रां याचे, because भागुरायण is not अकथित here. He is कथित as अपादान। अपादान-विवक्षया 'अकथितञ्च' इति न।

10. प्रवेशकः—प्रवेशयति कथाप्रसङ्गं गमयति पात्रं प्रवेशयति वा इति प्र+विश+णिच्+खुल् कर्तरि। Like the विष्कम्भक it shows the connection of parts, but differs from it in being conducted by the humbler actors (नीचपात्र) only. Cf.—"इतस्वर्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भः आदावङ्कस्य दर्शितः...प्रवेशकस्तु नाट्याङ्गं नीचपात्रप्रयोजितः"।

4. (ततः प्रविशति पुरुषेण अनुगम्यमानो भागुरायणः)।

भागु—(स्वगतम्) अहो वैचित्र्यमार्य्यचाणक्यनीतेः—

सुहृर्लक्ष्योद्भेदा सुहुरधिगमाभावगहना
सुहुः सम्पूर्णाङ्गी सुहुरतिकृशा कार्य्यवशतः।
सुहुर्नैश्यद्बीजा सुहुरपि बहुप्रापितफले-
त्यहो चित्राकारा नियतिरिव नीतिर्नयविदः॥ ३॥

(*Now enter Bhagurayana followed by an attendant*). *Bhagurayana*—(*To himself*) O the strikingness of Noble Chanakya's policy! Often with germination visible often inscrutable in the absence of trace! Often full in its parts, often

very subtle on purpose !! Often with its very basis disappearing, often again leading to ample reward !!! Thus O of a striking character like Fate is the policy of the diplomat.

अन्वयः ॥ सुदुर्लक्ष्योद्दिदा, सुदुरधिगमाभावगहना ; सुहुः सम्पूर्णाङ्गी, सुहुः कार्य्यवशतः अतिक्रूरा . सुदुर्नश्यबीजा, सुहुः बहुप्रापितफला अपि । इत्यहो नियतिरिव नयविदः नीतिः चित्राकारा । व्याख्या—चाणक्यनीतेर्लोकोत्तरतां वर्णयन्नाह—'सुहुः' बारंबार 'लक्ष्यः' दृश्यः 'उद्दिदः' परिव्यक्तिः अङ्कुरोद्गमो यस्याः तादृशी, 'सुहुः' पुनरपि 'अधिगमस्य' उपलब्धेः अभावात् विरहात् अनुपलब्धतया इत्यर्थः 'गहना' दुर्ग्रहा । क्षणं स्पष्टं प्रतीयमाना क्षणमपि सुतरामदृश्या इत्याश्चर्य्यम् । 'सुहुः' क्षणे क्षणे 'सम्पूर्णाङ्गी' परिपुष्टदेहा 'सुहुः' पुनरपि 'कार्य्यवशतः' प्रयोजनानुरोधेन 'अतिक्रूरा' सुसूक्ष्मा । क्षणं व्यापिनी क्षणमपि संहृता इत्याश्चर्य्यम् । 'सुहुः' असकृत् 'नश्यत्' तिरोभवत् 'बीजं' यस्याः तादृशी विफलेव दृश्यमाना इत्यर्थः 'सुहुः' पुनरपि बहु प्रचुरं यथा तथा 'प्रापितं दापितं फलं' यया तादृशी 'अपि' भूरिप्रसवा च । क्षणं विशीर्णा क्षणमपि परिपूर्णफला इत्याश्चर्य्यम् । 'इति' अनेन प्रकारेण 'अहो' आश्चर्य्यं 'नियतिरिव' दैवगतिरिव 'नयविदः' नीतिज्ञस्य 'नीतिः' उपायप्रयोगः 'चित्राकारा' आश्चर्य्यरूपा ।

CHARCHA

1. अहो वैचित्र्यम् etc.—Bhagurayana, Bhadrabhata, Siddharthaka etc. were working in concert. They knew their plans were well laid and were expecting the climax that very day with Siddharthaka's pretended attempt to go out of the camp carrying the letter and the casket of jewellery. Hence Bhagurayana's expression of wonder.

2. लक्ष्योद्दिदा—The reference is to the first stage of the plot when Bhagurayana etc. came out of Kusumapura and were admitted into Malayaketu's service. This was an unexpected success, for, Rakshasa was there to advise Malayaketu to the contrary. The बीज was then उद्भिन्न ।

3. अधिगम etc.—See व्याख्या। This refers to the long period of lull since their entry into service without any apparent development of the plot.

4. सम्यूर्णाङ्गी etc.—सम्यूर्णानि अङ्गानि अस्याः सम्यूर्णाङ्गी or सम्यूर्णाङ्गा with all parts complete. The parts are—(i) Entry into service ; (ii) शकटदास's arrival ; (iii) Siddharthaka's stay with Rakshasa ; (iv) Gift of jewellery to सिद्धार्थक ; (v) Deposit of jewellery.

5. अतिक्लेश etc.—The reference is to the slow work to avoid suspicion on the part of the prince whose reverence for and confidence in Rakshasa were unbounded. Any hurry or indiscretion on their part would not go unnoticed by Rakshasa. The progress was so long very meagre and that was due to the nature of the work—कार्य्यवशतः।

6. नष्टबीजा—Note the वर्त्तमानकाल in नश्यत्। The बीज was नश्यत् and not नष्ट। This happened twice—(i) When चाणक्य made his attempt ; it was Chanakya's sagacity which saved the बीज on that occasion, for he saw that Rakshasa was working there ; (ii) When Rakshasa exclaiming "शकटदास नेदमुपपद्यते" (Act IV, Para 17), nearly found out and unveiled the whole show. This time the obtuseness of Sakatadasa came to the rescue. The बीज was saved when Rakshasa remarked शकटदास एवमेतत् (Act IV, Para 18

7. बहुप्रापितफला—See व्याख्या। प्रापितबहुफला is easier to expound and more direct. This refers to the talk between Bhagurayana and Malayaketu whilst listening to Karabaaka's report to Rakshasa. Then at last Bhagurayana succeeded in creating distrust towards Rakshasa in the mind of the prince. This was an assurance of success—the प्राप्ति of बहुफल।

5. (प्रकाशम्) भद्र भासुरक न मां दूरीभवन्तमिच्छति कुमारः। अतः अस्मिन्नेव आस्थानमण्डपे न्यस्यतामासनम्।

(*Aloud*) Gentle Bhasuraka, the Prince does not want me to go far. So let my seat be placed in the Durbar pavilion itself.

पुरुषः—एदं आसनं उवविसदु अज्जो [एतदासनम् । उपविशत्वार्यः] ।

Attendant—Here is the seat, let Noble Sir sit down.

भागु—(उपविश्य) भद्र यः कश्चिन्मुद्रार्थी मां द्रष्टुमिच्छति स त्वया प्रवेशयितव्यः ।

Bhag.—(*Sitting down*) Good man, whoever wanting a pass wishes to see me should be admitted by you.

पुरुषः—जं अज्जो आणवेदि [यदार्यो आज्ञापयति] ।

(इति निष्क्रान्तः)

Attendant—As noble Sie commands. (*Exit*)

भागु—(स्वगतम्) कष्टम्! एवमपि अस्मासु स्नेहवान् कुमारो मलयकेतुरतिसन्धातव्य इत्यहो दुष्करम् । अथवा—

कुले लज्जायाञ्च स्वयशसि च माने च विमुखः
शरीरं विक्रीय क्षणिकधनलोभाद्धनवति ।
तदाज्ञां कुर्वाणो हितमहितमित्येतदधुना
विचारातिक्रान्तः किमिति परतन्त्रो विमृशति ॥ ४ ॥

Bhag.—(*To himself*) Oh woe! Even Prince Malayaketu, so kind to me, is to be decieved. Alas! this is hard. Or—Having sold his self unto the rich through greed after transcient wealth regardless of family, decency, personal reputation and self-respect, why now does the slave of another, past the stage of reflection, reflect if proper or improper while doing his behests?

CHARCHA

1. आस्थान etc.—आ + स्था + ल्युट् भावे आस्थानम् rest. मण्डप a house, pavillion. आस्थानस्य मण्डपः etc.

2. एवमपि etc —Construe—एवम् स्नेहवान् मलयकेतुरपि or मलयकेतुरपि एवमतिसन्धातव्यः etc Both एवम् and अपि are misplaced.

3 अन्वयः ॥ क्षणिकधनलोभात लज्जाया मानं च स्वयशसि च कुलं च विमुखः (भूत्वा) धनवति शरीरं विक्रीय विचारातिक्रान्तः परतन्त्रः अधुना तदाज्ञां कुर्वाणः हितमहितमित्यतत किमिति विमृशति ? यद्वा—इति हितम् एतत अहितम् इति किमिति विमृशति ? व्याख्या—'क्षणिक' अस्थिरं नश्वरमित्यर्थः यत् 'धनं' तस्मिन् यो 'लोभः' तस्माद्धेतोः 'लज्जाया' त्रपायाः 'मानं च आत्मादरं च 'स्वयशसि च' आत्मकीर्त्तौ च 'कुलं च' निजवंशं च 'विमुखः' पराङ्मुखं भूत्वा, लज्जायाः मानात् यशसः कुलाच्च धनमेव अधिकं गणयित्वा 'धनवति' आढ्ये प्रभौ राजनि चन्द्रगुप्ते 'शरीरं' विक्रीय' मूल्येन स्वदेहविक्रयं कृत्वा 'विचारं' सद्यः असद्यः एतत् इति विमर्शदशाम् 'अतिक्रान्तः' अतीतः 'परतन्त्रः' पराधीनो मन्त्रचणो जनः 'अधुना' सम्प्रति सिद्धे विक्रये 'तस्य' धनवतः प्रभोः 'आज्ञां कुर्वाणः' आदेशमनुतिष्ठन् 'हितं' पथ्यमेतन्मे 'अहितम्' अपथ्यं वा स्यात् 'इत्यतत्' इदं किमिति' कथं 'विमृशति' विचारयति। यद्वा—'इति हितम्' पथ्यम् 'एतदहितम्' इदमपथ्यम् 'इति' एतत् 'किं' कथं 'विमृशति'? विक्रयात् प्रागेव विचारकालः आसीत न तु परम। तदेष कुमारख्यातिसन्धाने सज्जोऽस्मि इति भावः ।

4. कुलं etc.—लज्जा implies that the act was mean yet it was unblushingly done. मान is self respect. One with a sense of self-respect does not accept service, which is a humiliation यशस् refers to events subsequent to the transaction, *i. e.*, after the sale of self , infamous deeds have to be done for the sake of the master. These three refers to the self of the seller. कुल implies that he does not stop with the degradation of himself, but brings infamy unto his race also.

5. क्षणिक etc.—The reading क्षणिकमपि लोभात् is condemned by *Telang.* क्षणिकमपि शरीरं विक्रीय is meaningless, because if the शरीर is क्षणिक, the sooner one parts with it, the better ; the sale then becomes a bargain and अपि loses force.

5. हितमहितम् etc.—The alternative construction given under यद्वा above is preferable. It avoids the awkward compound इत्येतत् in the sense of इति and makes up for the absence of च in हितम् अहितम्।

6. (ततः प्रविशति प्रतीहार्यनुगम्यमानो मलयकेतुः)।

मलय—(स्वगतम्) अहो राक्षसं प्रति विकल्पबाहुल्यात् आकुला मे बुद्धिर्न निश्चयमधिगच्छति। कुतः ?—

भक्त्या नन्दकुलानुरागदृढ़या नन्दान्वयालम्बिना
किं चाणक्यनिराकृतेन कृतिना मौर्य्येण सन्धास्यते।
स्थैर्य्यं भक्तिगुणस्य वाधिगणयन् किं सत्यसन्धो भवेद्
इत्यारूढ़कुलालचक्रमिव मे चेतश्चिरं भ्राम्यति ॥ ५ ॥

(प्रकाशम्) विजये, क्व भागुरायणः ?

(*Now enter Malayaketu followed by the Warder*).

Malayaketu—(*To himself*) O my mind perplexed by a multiplicity of alternatives does not reach certainty regarding Rakshasa. (Do you ask) Why ?—Through devotion firm from attachment to the family of Nanda, would he unite with Maurya the successful who is descended from the Nanda family and is forsaken by Chanakya ? Or, esteeming more the steadiness of the virtue of reverence, would he be of true promise ? Thus my mind ceaselessly whirls about like one mounted on a potter's wheel. (*Aloud*) Vijaya, where is Bhagurayana ?

CHARCHA

1. विकल्प etc.—विशेषेण कल्प्यते इति विकल्पः supposition, alternative, कर्मणि घञ्। तस्य बाहुल्यम्। तस्मात्। द्वितौ ५मी। अधिगच्छति attains, reaches.

2. **अन्वय** ॥ क्रतिना चाणक्यनिराकृतेन नन्दान्वयालम्बिना मौर्य्येण नन्दकुलानुरागदृढ्या भक्त्या सन्धास्यते किम्, भक्तिगुणस्य स्थैर्य्यम् अधिगणयन् सत्यसन्धोभवेद्वा, इति मे चेतः आरूढकुलालचक्रमिव चिरं भ्रास्यति। व्याख्या—विकल्पप्रकारमाह—असौ राक्षसः 'क्रतिना' क्रतार्थेन प्राप्तराज्येन इत्यर्थः अतएव आश्रयणीयेन, अपि च 'चाणक्येन' महामतिना मन्त्रिना यो 'निराकृतः' परित्यक्तः अतएव अनुकम्प्यो रक्षणीयश्च तादृशेन, पुनश्च 'नन्दान्वये नन्दान्वयाद्वा' यः 'अवलम्बते' अवसक्तो भूत्वा आस्ते तादृशेन अतएव यद्वाभाजनेन आत्मीयेन च 'मौर्य्येण' मरापुत्रेण चन्द्रगुप्तेन 'नन्दकुले' यः 'अनुरागः' श्रद्धा तया 'दृढ्या' स्थिरा अचला इत्यर्थः या 'भक्तिः' तया हेतुना 'सन्धास्यते किं [सम्पूर्वकस्य धाधातेः लृट्] मां परित्यज्य सयोक्ष्यते नु? नन्दकुलगतो चन्द्रगुप्तः शक्तेनमन्त्रिना वियुक्तो विपन्न इत्यनुकम्पया नन्दकुलभक्तो राक्षसस्तेन सन्धिं गमिष्यति किम् इत्येकः कल्पः। "भक्तिः" सदंशस्य राक्षसे या भक्तिः सा एव या 'गुणः' तस्य 'स्थैर्य्यम्' अचलताम् 'अधिगणयन्' आधिक्येन पश्यन्, पिता पर्वतकेन महतो मयि दर्शिता या भक्तिः पुरो मलयकेतुस्तामप्यतिशेते इति मन्यमानः 'सत्या' यथार्था 'सन्धा' प्रतिज्ञा सकलनन्दराज्यप्रतिपादनविषया यस्य यादृशी 'भवेद्वा' स्यात् किम्' मय्येव स्थितः प्रतिश्रुतं कुर्य्यान्न इति द्वितीयः कल्पः। 'इति' अनेन प्रकारेण 'मे चेतः' मदीयं मनः 'आरूढम्' अधिष्ठितं 'कुलालचक्रं' कुम्भकारचक्रं येन तादृशम् 'इव चिरं भ्रास्यति' अनिशं परिवर्त्तते निश्चयं न लभते इत्यर्थः।

3. नन्दकुल etc.—See व्याख्या। अव + लम्ब means 'to hang down', also 'to hold'. Hence नन्दान्वयालम्बिन् my mean (i) suspended from the race of Nanda, *i. e.*, having connection with that race ; or (ii) leaning on the race of Nanda, *i. e.*, claiming descent from Nanda. In the absence of a direct descendant, such a person mtght draw the नन्दभक्त राक्षस towards him.

4. चाणक्यनिराकृतेन—श्तत्—(See व्याख्या)। Elsewhere the poet speaks of निराकरण *of* चाणक्य *by* चन्द्रगुप्त ; thus—"न तथा गुणप्रशंसया यथा चाणक्यवटोर्निराकरणेन"—Act IV, Para 15. The fact is, the initiative in the matter lay with चाणक्य। He it was who first threw down office ; चन्द्रगुप्त's part was merely a passive one—he did not press चाणक्य to take up office again. Cf.—"तदिदं शस्त्रं तस्मै दीयताम्" etc.—III, Para 39. Thus चाणक्येन निराकृतः agrees better with facts. For force see व्याख्या।

5. *Remark*—The verse mentions only two alternatives. So it establishes विकल्पद्वैध not विकल्पबाहुल्य as it promised to do. This is carelessness and should be contrasted with the scrupulous care of Kalidasa in such matters. Cf.—"किं तावत् प्रतिनासुपोढ़तपसा विघ्नैरलंपो दृषितं धर्मारण्यचरेषु केषु चिदुत प्राणिष्वसच्चेष्टितम्। आहोस्वित् प्रसवो ममापचरितैर्विप्रकृतो वोरुधाम् इत्याकूढ़बहुप्रतर्कमपरिच्छेदाकुलं मे मनः॥'—*Sak.* Act V, where three suppositions are mentioned to establish the बहुत्व of प्रतर्क।

7. प्रतीहारो—कुमार एसे क्खु कड़आदो णिक्कमिदुकामाणं मुद्दासंपदाणं अणुचिट्ठदि [कुमार, एष खलु कटकान्निष्क्रमितुकामानां मुद्रासंप्रदानमनुतिष्ठति]।

Ward.—Prince, he is here attending to the issue of pass to those who wish to go out of the camp.

मलय—विजये, मुहूर्त्तममचारा भव यावदस्य पराङ्मुखस्यैव पाणिभ्यां नयने पिदधामि।

Malaya.—Vijaya, keep motionless for a moment till I cover his eyes with my hands while he has his face turned away.

प्रतीहारो—जं कुमारो आणवेदि [यत् कुमार आज्ञापयति]

Word.—As the Prince commands.

(प्रविश्य) पुरुषः—अज्ज एसो खु क्षवणओ मुद्दाणिमित्तं अज्जं पेक्खिदुमिच्छदि [आर्य्य, एष खलु क्षपणकः मुद्रानिमित्तम् आर्य्यं प्रेक्षितुमिच्छति]।

(*Entering*) *Attendant*—Noble Sir, here is a mendicant wishing to see Noble Sir for the sake of a pass.

भागु—प्रवेशय।

Bhagu.—Show him in.

पुरुषः—तह [तथा]। (इति निष्क्रान्तः)

Att n.—So be it. (*Exit*).

(प्रविश्य) चपणकः—धम्मसिद्धो सावगाणं होदु [धर्मसिद्धिः श्रावकाणां भवतु]।

Entering Mend—Let the attainment of piety be achieved unto the believer.

भागु—(अवलोक्य स्वगतम्) अये राक्षसस्य मित्रं जीवसिद्धिः। (प्रकाशम्) न खलु राक्षसस्य प्रयोजनमेव किञ्चिदुद्दिश्य गम्यते।

Bhagu.—(*Looking—To himself*) Ha! Rakshasa's friend Jivasiddhi! (*Aloud*) Are you not going (*Or*—Surely you are not going) with a view to do some work for Rakshasa himself?

CHARCHA

1. निष्क्रमितुकामानाम्—निष्क्रमितुं कामः एषाम्। "तुङ्कामनसोरपि" इति मलोपः। The बहु—is व्यधिकरणपद with निष्क्रमितुं in the ७मी। The reason is निष्क्रमितुम् has भावे तुमुन् by the maxim "अव्ययकृतो भावे" it is therefore equivtlent to निष्क्रमण। Thus निष्क्रमितुम् निष्क्रमणं कामः एषाम् etc.

2. असञ्चारा—सञ्चारः movement. अविद्यमानः सञ्चारः अस्याः।

3. पिदधामि—Here अपि has dropped अ। Cf.—"वाष्पभागुरिरक्षोपमवाष्पीरूपसर्गयोः। आपञ्चापि हलन्तानां यथा वाचा निशा दिशा॥"

4. राक्षसस्य मित्रम etc.—भागुरायण does not know that जीवसिद्धि is चाणक्य's trusted friend and in charge of the affairs at मलयकेतु's capital—his official superior! Nor did he expect him here.

8. चप—सन्तं पावं, सन्तं पावं! सावगा, तहिं गमिस्सं जहिं रक्खसस्स पिशाचस्स वा णामं वि ण सुणीअदि [शान्तं पापं

शान्तं पापम् । श्रावक, तत्र गमिष्यामि यत्र राक्षसस्य पिशाचस्य वा नामानि न श्रूयते] ।

Mend.—Begone sin ! Begone sin ! Believer, there I will go where the name even is not heard of Rakshasa or Pishacha.

भागु—बलवान् सुहृदि प्रणयकोपः । तत् किमपराद्धं राक्षसेन भदन्तस्य ?

Bhagu.—Great is the petulance of love towards your friend Has then Rakshasa wronged the mendicant ?

क्षप—सावगा, ण मम किं वि रक्खसेण अवरद्धं । अअं जेव्वमन्दभाओ अत्तणो अवलद्धामि [श्रावक, नं मे किमपि राक्षसेन अपराद्धम् । स्वयमेव मन्दभाग्यः आत्मनः अपराध्यामि] ।

Mend.—Believer, no wrong has been done me by Rakshasa. Ill starred as I am, I am myself wronging me.

भागु—भदन्त, वर्द्धयसि मे कुतूहलम् । श्रोतुमिच्छामि ।

Bhagu—Mendicant, you rouse my curiosity. I long to hear.

मलय—(स्वगतम्) अहमपि श्रोतुमिच्छामि ।

Malaya.—(*To himself*) I too long to hear.

क्षप—सावगा, किं अणेण असुणिदव्वेण सुदेण [श्रावक, किमनेन अश्रोतव्येन श्रुतेन] ।

Mend.—Believer, what is the good of hearing this that should not be heard.

भागु—यदि रहस्यं तत्तिष्ठतु ।

Bhagu.—Let it alone if a secret.

क्षप—ण रहस्सं किन्दु अदिणिस्संसम् [न रहस्यं किन्तु अतिनृशंसम्]।

Mend.—Not a secret but very painful (lit. cruel).

भागु—यदि न रहस्यं तत् कथ्यताम्।

Bhagu—Let it be told if not a secret.

उप—सावगा, ण रहस्सं एदं तहवि ण कहिस्सं [श्रावक, न रहस्यमेतत् तथापि न कथयिष्यामि]।

Mend. Believer, it is not a secret, yet I will not tell it.

भागु—अहमपि मुद्रां न दास्यामि।

Bhagu.—I too will not grant you a pass

क्षप—(स्वगतम्) युक्तमिदानीमर्थिने कथयितुम्। (प्रकाशम्) का गई। सुणादु सावगो। अत्थि दाव अहं मन्दभग्गो पुढअं पाडलिउत्ते णिवसमाणो रक्खसेण मित्तत्तणं उवगदे। तहिं अवसले लक्खसेण गूढं विसकण्णआपओअं उप्पादिअ घादिदे पव्वदीसले। [का गतिः। शृणोतु श्रावकः। अस्ति तावत् अहं मन्दभाग्यः प्रथमं पाटलिपुत्रे निवसन् राक्षसेन मित्रत्वमुपगतः। तस्मिन्नवसरे राक्षसेन गूढं विषकन्यकाप्रयोगमुत्पाद्य घातितः पर्वतेश्वरः।]

Mend.—(*To himself*) It is now meet that I tell at entreaties. (*Aloud*) What help (is there) ? Listen, Believer. It is a fact, that formerly my ill-starred self living in Pataliputra contracted friendship with Rakshasa. During that period Parvatesvara was caused to be killed by Rakshasa who devised the means of the application of the poison-girl.

CHARCHA

1. बलवान् etc.—प्रणयकृतः कोपः प्रणयकोपः। किम् may be taken as प्रश्न or qualifying अपराद्धम्। In the first case अप + राध् (दिवादि) + क्त भावे अपराद्धम् offence. For the second, derive अप + राध (स्वादि) + क्त कर्मणि अपराद्धम् ill-served.

2. किमपि राक्षसेन etc.—किमपि is a compound अव्यय meaning some how. आत्मनः has शेषविवक्षया षष्ठी. ४थी is expected because अप + राध is द्वीहार्थ। Cf.—"न दूये मात्वतीसूनुर्यन्मत्त्यमपराध्यति"—*Magha* II. Telang reads हताशो मन्दभाग्यः आत्मनः कर्मसु लज्जे। But जीवसिद्धि refers to no act that might cause him to blush. Besides न किमपि राक्षसेन अपराद्धम् seems to imply अन्येन अपराद्धम, so स्वयम् अपराध्यामि in the latter half would be in keeping with it.

3. युक्तमिदानीम् etc.—He was anxious that his communication should not be taken as a voluntary one, but one extorted from him by very pressing importunities. This will create faith in the news otherwise it is likely to cause suspicion. 'इदानीम्' अधुना दूरं प्रस्तावायामर्थितायाम् इत्यर्थः 'अर्थिने कथयितुं' युक्तम्'—Bhagurayana having proved to be a determined अर्थी I may tell him

4. घातितः पर्वतेश्वरः—The rumour fixing the guilt on Rakshasa had not reached Malayaketu's capital. Rakshasa was aware of it (cf.—परिहृतमयशः etc. Act II, Para 35). But he thought, outside Chanakya's following, no one would believe it. Now that Bhagurayana's villainy has created distrust in Rakshasa in the mind of Malayaketu, Indusarman thinks it to be the right moment to break the news with Malayaketu to whom he knew Bhagurayana was sure to communicate the information at once.

9. मलय—(सवाष्पमात्मगतम्) कथं राक्षसेन घातितस्तातो न चाणक्येन।

Malaya.—(*In tears—To himself*) How so! Father was done to death by Rakshasa and not by Chanakya!

भागु—भदन्त ततस्ततः ?

Bhagu.—Next, Mendicant, what next ?

क्षप—तदो हगे रक्खसस्स मित्तंत्ति कदुअ चाणक्कहदएण मणिकालं णअरादो निव्वासिदो। दाणीं वि लक्खसेण अणेअ-अकज्जकुसलेण किंवि तालिस आलहीअदि जेण हगे जीअलो-आदो णिक्कासिज्जेमि [ततोऽहं राक्षसस्य मित्रमिति कृत्वा चाणक्यहतकेन सनिकारं नगरान्निर्वासितः। इदानीमपि राक्षसेन अनेकाकार्य्यकुशलेन किमपि तादृशमारभ्यते येनाहं जीवलोकात् निष्कासिष्ये]।

Mend.—Thereat I was expelled from the city with indignities by cursed Chanakya, because, as he said, I was Rakshasa's friend. Now again is begun by Rakshasa, clever at misdeeds of sorts, something of such a type as to drive me out of the land of the living.

भागु—भदन्त, प्रतिश्रुतराज्यार्द्धमयच्छता चाणक्यहतकेन इदमकार्य्यमनुष्ठितं न राक्षसेन इति श्रुतमस्माभिः।

Bhagu.—Mendicant, this indeed was done by Chanakya not parting with the promised half of the kingdom and not by Rakshasa, this is what has been heard by us.

क्षप—(कर्णौ पिधाय) सन्तं पावं। चाणक्केण विसकण्णाए णामंवि ण सुदम् [शान्तं पापम्। चाणक्येन विषकन्याया नामापि न श्रुतम्]।

Mend.—(*Blocking his ears*) Begone sin! Not the name even of the poison-girl was heard by Chanakya.

भागु—मुद्रा दीयते। एहि कुमारं श्रावय।

Bhagu.—The pass is being issued. Come inform the Prince.

CHARCHA

1. राक्षसस्य मित्रमिति कृत्वा—He suppresses the fact of his own complicity in the matter, because Malayaketu's people would then treat him with the contempt he deserved. The fact is he was all along in league with Chanakya, and when he was employed by Rakshasa to treat Chandragupta with the poison-girl, he set her upon Parvateswara instead. Thus, while Rakshasa's attempt was foiled by Jivasiddhi himself, the Minister, with unbounded faith in the mendicant, did not know how to explain the mystery and attributed the mishap to दैव। Cf.—"कर्णेनेव विषाङ्गना etc." Act II, Sl. 15, "कन्या तस्य वधाय etc." Act II, Sl 16, "कथमिदमिहैत्युन्निद्रस्य etc." Act IV, Sl. 2.

2. इदानीमपि etc.—Once I have suffered through his friendship, but the suffering was not much, involving as it did a mere change of residence. This time however Rakshasa is at something still more heinous, and the result will be that as before I shall be hauled up as his friend and punished with punishment not merely from the city, but from the Earth itself. The fault is mine, for I allow myself to be taken as his friend —स्वयमेव आत्मनः अपराध्यामि। I have therefore made up my mind to cut off all connection with Rakshasa and "श्रावक तव गमिष्यामि यत्र राक्षसस्य पिशाचस्य वा नामापि न श्रूयते"।

3. कुमारं श्रावय—श्रु is treated here as बुद्ध्यर्थ। This is irregular (see *ante.*)

10. मलय—(उपसृत्य)

श्रुतं सखे श्रवणविदारणं वचः
सुहृन्मुखाद्रिपुमधिकृत्य भाषितम् ।
पितुर्वधव्यसनमिदं हि येन मे
चिरादपि द्विगुणमिवाद्य वर्धते ॥ ६ ॥

Malaya.—(*Advancing*) Friend, the ear-splitting words, spoken with reference to the enemy, have been heard by me from his friend's mouth—words by which this calamity of the murder of father, even after such a long time, grows unto me as if indeed two-fold to-day.

अन्वयः॥ हे सखे रिपुमधिकृत्य भाषितं श्रवणविदारणं सुहृन्मुखात् श्रुतम् । येन इदं मे पितुर्वधव्यसनं चिरादपि अद्य द्विगुणमिव वर्धते हि । व्याख्या—हे 'सखे' मित्र भागुरायण 'रिपुं' मदीयं शत्रुं राक्षसम् 'अधिकृत्य' आश्रित्य 'भाषितं' कथितम् 'श्रवणयोः' कर्णयोः 'विदारणं' दारुणतया भेदकमिव 'वचः' वचनं तातप्रणाशाश्रयं वाक्यं 'सुहृदः' मित्रस्य रिपोरिव राक्षसस्य सुहृदः जीवसिद्धेः; अतएव विश्वास्यस्य 'मुखात् श्रुतम्' तत् तस्य पुनः श्रावणं निष्प्रयोजनम् । ततः किमित्याह—'येन' वचसा येन श्रवणेन वा 'इदम्' एतत् कालोचितेन वेषेण सूचितं 'मे पितुः' यो 'वधः' उपांशुघातः तद्रूपं यत् 'व्यसनं' विपत् । यद्वा—पितुः' तातस्य 'वधेन' उपांशुघातेन यत 'व्यसनं' भंशः मृत्युरित्यर्थः । तत् 'चिरादपि बहोरपि कालात् 'अद्य' अस्मिन् क्षणे 'द्विगुणमिव' पूर्वानुभूतात् प्रबलतरमिव 'वर्धते हि' दृश्यते एव । शत्रुणा चाणक्येन घातितत्वात् इति तापकारणं सत्यं किन्तु मित्रवत् पूजितेन राक्षसेन घातित इति तु असह्यम् इति भावः ।

CHARCHA

1. श्रवण etc—विदारयति इति वि + दारि + ल्युट् कर्तरि बाहुलकात् विदारणम् । श्रवणयोर्विदारणम् । Or श्रवणे विदीर्यते अनेन इति श्रवण + वि + दारि + ल्युट् करणे । This shows to what extent Malayaketu was affected by the news This is just as Chanakya expected.

2. सुहृन्मुखात्—His own friend informs against him, hence there is no reason to doubt the correctness of the information.

3. रिपुम्—The news is terrible (श्रवणविदारणम्), and it is well authenticated (सुहृन्मुखात्) । Hence the person concerned is an enemy. This is enough for the भेद intended by Chanakya. But the crafty diplomat does not stop here (see supra).

11. क्षप—(स्वगतम्) अये श्रुतं मलयकेतुहतकेन, हन्त कृतार्थोऽस्मि (इति निष्क्रान्तः)

Mend.—(*To himself*) Ha ! it is heard by cursed Malayaketu. Hurrah ! I have my purpose served. (*Exit*)

मलय—(प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा) राक्षस राक्षस युक्तं युक्तम् ।

मित्रं ममायमिति निर्वृतचित्तवृत्तिं
विश्रम्भतस्त्वयि निवेशितमर्वकार्य्यम् ।
तातं निपात्य सह बन्धुजनाश्रुतोयै-
रन्वर्थतोऽपि ननु राक्षस राक्षसोऽसि ॥ ७ ॥

Malaya—(*Fixing his gaze in the sky as on something visible*) Rakshasa, Rakshasa, this is fitting, fitting indeed ! Oh Rakshasa, literally too have you become a Rakshasa (demon) indeed, having, along with the tears of the kindred, brought down father who had his mind's care (lit. action) eased with all affairs entrusted to you in the confidence that you were his friend.

CHARCHA

1. अये etc.—The mendicant did not know that Malayaketu was within hearing. But he learns from Malayaketu's words that—(i) he had heard all, (ii) he has taken the news as

true, (iii) he now treats Rakshas as an enemy. Hence he exclaims कृतार्थोऽस्मि—I have well-served my end—Chanakya's महत्कार्य्य (Act I) is now accomplished.

2. अन्वयः ॥ ननु राक्षस, अयं मम मित्रम् इति विश्रब्धतः त्वयि निवेशितसर्वकार्य्यम् (अतएव) निर्वृत्तचित्तवृत्तिं तातं वन्धुजनाश्रुतोयैः सह निपात्य अन्वर्थतोऽपि राक्षसः असि । व्याख्या—'ननु' अयि तो 'राक्षस अयं मम मित्रम्' एष राक्षसो मे सुहृत् 'इति विश्रब्धतः' एवंविधात विश्वासात् [पञ्चम्यास्तसिः] 'त्वयि निवेशितं समर्पितं 'सर्वकार्य्यं' निखिलं राज्यतन्त्रं येन तादृशम् अतएव 'निर्वृत्ता' स्वस्था 'चित्तवृत्तिः' मनोव्यापारः यस्य तादृशं 'तातं' जनकं मे पर्वतेश्वरं 'बन्धुजनाना' स्वगणानाम् 'अश्रुतोयैः' नेत्रजलैः 'सह निपात्य' धराशायिनं कृत्वा प्रायेणैवौर्ध्वदेहिक्यं इत्यर्थः 'अन्वर्थतः अपि' अभिधेयधारणं च 'राक्षसः असि' । न केवलं नाम्ना राक्षसस्त्वं परन्तु कर्मणा अनेन यथार्थमेव राक्षसः संवृत्तोऽसि ।

3. मित्रं ममायम् etc.—*Dhundhi* remarks "अनेन ज्ञायते राक्षस पर्वतकयोः पूर्वं महत् सौहृदमासीत् । अनन्तरं चाणक्येन राज्यार्द्धदानपरिपणप्रलोभनेन राक्षसात् विभिद्य स्वकार्य्यसिद्धिये पर्वतकः सहायत्वेन प्रगुणीकृत इति । तथा च अनुपदमेव कुपितो मलयकेतुर्भागुरायणेन समाधीयते 'तस्मिनकाले सर्वार्थसिद्धिं राजानम्' इत्यादिना 'महानरातिरासीत्' इत्यन्तेन ग्रन्थेन ।" Telang reads ममेदम् which seems to emphasise the मित्रता rendering the विधेय as प्रधान, hence इदम् takes the gender of the विधेय, *i. e.*, of मित्र ।

4. अन्वर्थतः etc—अनुगतः अर्थः अन्वर्थः the meaning attached तेन । तृतीयायास्तसि as in "दुष्टः शब्दः स्खरतो वर्णतो वा" । Here play is on the word राक्षस which means a monster. You are राक्षस in name ; but by this act you are one in deed also. Hence you keep within the meaning of your name (अन्वर्थतः राक्षसः) ।

12. **भागु—(स्वगतम्) रक्षणीया राक्षसस्य प्राणा इत्याद्यादेशः भवतु एवं तावत् । (प्रकाशम्) कुमार, अलमावेतेन । आसनस्थं कुमारं किञ्चित् विज्ञापयितुमिच्छामि ।**

Bhag.—(*To himself*) Noble Sir's command is that Rakshasa's life is to be spared. Let it be thus (managed). (*Aloud*)

Prince, away with excitement. I wish to say something to Prince (when you are) seated.

मलय—(उपविश्य) सखे किमसि वक्तुकामः ?

Mal.—(*Sitting down*) Friend what are you about to say ?

भागु—कुमार, इह खलु अर्थशास्त्रव्यवहारिणाम् अर्थवशात् अरिमित्रोदासीनव्यवस्था न लौकिकानामिव स्वेच्छावशात्। तस्मिन् काले सर्वार्थसिद्धिं राजानमिच्छतो राक्षसस्य चन्द्रगुप्तादपि बलीयस्त्वया सुगृहीतनामा देवः पर्वतेश्वर एव अर्थपरिपन्थी महानरातिरासीत्। तस्मिंश्च राक्षसेन इदमनुष्ठितम् इति नास्ति दोष एव अत्र इति पश्यामि। पश्यतु कुमारः—

Bhag.—With those who here practice ihe science of diplomacy, the classification into foes, frinds and neutrals is from consideration of interest and not from the sway of personal inclination as with ordinary people. On that occasion, to Rakshasa seeking to make Sarvarthasiddhi the King, it was Sire Parvartesvara of blessed name. who become the great enemy crossing his purpose, stronger as he was than even Chandragupta ; and unto him was done this by Rakshasa. So there is no blame in it. This is what I think. Mark, Prince—

CHARCHA

1. भवतु एवं तावत्—'एवम्' ईदृशम् 'तावत् भवतु'—Let it be thus managed. This refers to what he is about to do.

2. अर्थशास्त्र &c.—अर्थ is धन wealth. अर्थशास्त्रम् the science of Political Economy. Here नीतिशास्त्रम् the science of state-

craft. तेन व्यवहरन्ति इति अर्थशास्त्र + वि + अव + हृ + णिनि कर्तरि ताच्छील्ये &c.

3. अर्थवशात्—अर्थ here is प्रयोजन interest. तस्य वशम् आयत्तता &c.

4. अरिमित्र &c—अरि enemy-kings, मित्र friendly kings; उदासीन indifferent kings. These are 12 in all. See Mallinatha on "उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि" Magha II, 81. वि + अव + स्था + अङ् भावे व्यवस्था grouping, classification. अरिमित्रोदासीनानां व्यवस्था।

5. लौकिकानाम्—लोके भवा लौकिकाः as happen in the world. ठञ् अध्यात्मादि। Refers to the ordinary run of people, as in "लौकिकानाञ्च साधूनामर्थं वागनुवर्त्तते"—*Bhavabhuti.*

6. तस्मिन् काले &c.—परिपन्थ is a primitive word (अव्युत्पन्न) meaning परिपथ way all round (परितः पन्थाः परिपथः)। "परिपथशब्दपर्य्यायः परिपन्थशब्दः अस्ति"—*Kasika.* परिपन्थः अस्य अस्ति इति परिपन्थ + इनि मत्वर्थे परिपन्थी one with a way all round, *i. e*, an enemy who is on the look out for a loop—hole. "रिपौ वैरिसपत्नारि" इत्युपक्रम्य "प्रत्यर्थिपरिपन्थिनः" इत्यमरः। On this Bhanuji comments "परि दोषाख्यन पन्थयितुं शीलः" *i. e.*, परि + पथि (गतौ चुरादि) + णिनि कर्तरि ताच्छील्ये परिपन्थी! अर्थस्य परिपन्थी inimical to his interest. Hence, though previously a friend, he became an enemy—a great enemy (महानरातिः)। It was his own fault, not Raksha's. Telang adds यतः before तस्मिन् काले। It is superfluous and has no syntactical connection with what follows.

13. मित्राणि शत्रुत्वमुपानयन्ती मित्रत्वमस्यार्थवशाच्च शत्रून्।
नीतिर्नयत्यस्मृतपूर्वदुक्तं जन्मान्तरं जीवत एव पुंसः ॥८॥
तदत्र वस्तुनि नोपालम्भनीयो राक्षसः। आ नन्दराज्यलाभात् उपग्राह्यश्च। परतश्च परिग्रहे वा परित्यागे वा कुमारः प्रमाणम्।

To one still alive, Policy bestows new birth with prior events unremembered, giving unto him the character of a foe

to friends and that of a friend to foes, under the sway of self-interest. So in this matter Rakshasa is not to be blamed, but has to be humoured until the acquisition of Nanda's kingdom. Thereafter the Prince will decide if to retain or to dismiss him.

मलय—एवं सखे सम्यग्दृष्टवानसि। यतः अमात्यवधे प्रकृतिक्षोभः स्यात् एवञ्च संदिग्धो विजयः।

Mal.—So it is friend; rightly have you viewed it. For at the execution of the minister discontent among the people would follow, thus victory would be jeopardised.

(प्रविश्य) पुरुषः—जेदु कुमारो। अज्ज, गुम्मट्ठाणाधिकिदो दीहरक्खो विण्णवेदि एसा खु अम्हेहिं कडआदो णिक्कमन्तो अगहीदमुद्दो सलेहो पुरिसो गहीदा। ता पअक्खीकरेदु णं अज्जोत्ति। [जयतु कुमारः। आर्य्य, गुल्मस्थानाधिकृतो दीर्घरक्षो विज्ञापयति एष खलु अस्माभिः कटकान्निष्क्रामन् अगृहीतमुद्रः सलेखः पुरुषो गृहीतः, तत् प्रत्यक्षीकरोतु एनमार्य्यः इति]।

(*Entering*) *Attendant*—Let Prince prosper. Noble Sir, Dirgharaksha, in charge of the piquet-station, thus reports—"This man, with a letter and without a pass, slipping away from the camp, was arrested by us; so let Noble Sir see him."

भागु—भद्र प्रवेशय।

Bhag.—Good man, show him in.

पुरुष—तह [तथा] (इति निष्क्रान्तः)।

Atten.—So be it. (*Exit.*)

अन्वयः ॥ अर्थवशात् नीतिः अस्मृतपूर्वङ्गतं (यथा तथा) अस्य मित्राणि शत्रुत्वं शत्रूंश्च मित्रत्वम् उपानयन्ती जीवत एव पुंसः जन्मान्तरं नयति। व्याख्या—'अर्थवशात्' प्रयोजनानुरोधात् 'नीतिः' नयव्यवहारः 'अस्मृतं' स्मृतिपथमनारूढं 'पूर्वङ्गतं' प्राग्व्यवहारः पूर्वसम्बन्ध इत्यर्थः यस्मिन् कर्मणि तत यथा तथा 'अस्य' पुंसः 'मित्राणि' सुहृदः 'शत्रुत्वम्' अरितां 'शत्रूंश्च' अरीनपि 'मित्रत्वं' सुहृत्ताम् 'उपानयन्ती' प्रापयन्ती सती 'जीवत एव पुंसः' जीवलोके वर्तमानस्यैव पुरुषस्य सम्बन्धे 'जन्मान्तरं' अन्यत् जन्म इव 'नयति' उपहरति। नयजीवी प्रयोजनानुरोधात् मित्रस्य मित्रत्वं विस्मृत्य शत्रुमिव तं पश्यति। तत् यदि राक्षसस्तदानीं मित्रे एव पर्वतेश्वरे अमित्रवदाचरितवान् स दोषो नयप्रयोगस्य न राक्षसस्य इति पश्यतु कुमारः।

CHARCHA

1. अस्मृत &c.—See व्याख्या। This may also be taken as qualifying शत्रुत्वम् and मित्रत्वम् instead of the क्रिया in उपानयन्ती। Either way the *new* stage, be it one of शत्रुत्व or मित्रत्व, begins in complete forgetfulness of the previous stage. This is just what happens in a new birth also. Hence these new stages are as it were so many new lives. अस्मृतपूर्वङ्गतं शत्रुत्वम् मित्रत्वञ्च जन्मान्तरमिव। *Or*—अस्मृतपूर्वङ्गतं शत्रुत्वोपानयनं मित्रत्वोपानयनञ्च जन्मान्तरनयनमिव।

2. जन्मान्तरं नयति—Literally this is absurd, hence this means जन्मान्तरं नयतीव।

3. अत्र वस्तुनि—अस्मिन् पर्वतेश्वरवधे इत्यर्थः।

4. उपयाच्ञ्यः—उप + यच्ञ् means 'to engage'. उप + यच्ञ् + ण्यत् कर्मणि। Rakshasa has to be retained in his present capacity at the head of your advisors, only hencefourth we shall have to watch him carefully.

5. अमात्यवधे—अमात्य is minister, not of Malayaketu, but of Nanda. Having been Nanda's minister, and also of Parvataka for sometime, Rakshasa is called Minister Rakshasa. The minister of Malayaketu at the time was Bhagurayana. Cf.—"अमात्यपदं याचितः" Act III, Para 30.

6. प्रकृतिचोभः—प्रकृति subjects, *i. e.*, those at Kusumapura that are devoted to Nanda. प्रकृतीनां चोभः &c.

7. संदिग्धः—सम्+दिह is 'to entertain doubts' cf.—संदिग्धे कार्य्यवस्तुनि"—*Magha.* In doubts, the mind wanders and सम्+दिह is therefore here taken as गत्यर्थ। Thus संदिग्धे अस्मिन् इति सम्+दिह +क्त अधिकरणे by "अधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेषु"।

8. आर्य्य &c.—This is addressed to Bhagurayana. The exclamation जयतु कुमारः is of course meant for Malayaketu.

6. गुल्मस्थानाधिकृतः—For गुल्म see *ante.* गुल्मस्थाने अधिकृतः नियुक्तः।

14. (ततः प्रविशति पुरुषेणानुगम्यमानः संयतः सिद्धार्थकः)

सिद्धा—(स्वगतम्)

आणंतोए गुणेसु दोसेसु परंमुहं कुणन्तीए।
अह्मारिसजणणीए पणमामो सामिभत्तीए॥ ८॥
[आनयन्त्यै गुणेषु दोषेषु पराङ्मुखं कुर्वत्यै।
[अस्माद्दृशजनन्यै प्रणमामः स्वामिभक्त्यै]॥

(*Now enter Siddharthaka fettered and followed by the attendant*). *Sidh*—(*To himself*) We bow to devotion to the employer which is a mother to those of our type drawing us towards her virtues and causing us to shut our eyes to (lit to stand with face averted in the matter of) her faults.

पुरुषः—अज्ज अत्थं से पुरिसो [आर्य्य, अयं स पुरुषः]।

Att.—Noble Sir, here is the man.

भागु—(नाट्येनावलोक्य) भद्र, किमयमागन्तुक आहोस्वित् इहैव कस्यचित् परिग्रहः।

Bhag.—(*Acting observation*) Good man, is he a new arrival, or some one's servant in this very place ?

सिद्धा—अज्ज, अहं खु अमच्चरक्खसस्स सेवओ [आर्य्य, अहं खलु अमात्यराक्षसस्य सेवकः]।

Siddh.—Noble Sir, I am Minister Rakshasa's servant.

भागु—भद्र, तत् किमगृहीतमुद्रः कटकान्निष्क्रामसि।

Bhag.—Why then, good man, do you go out of the camp without a pass ?

सिद्धा—अज्ज, कज्जगोरवेण तुवराविदोह्मि [आर्य्य, कार्य्यगौरवेण त्वरायितोऽस्मि]।

Siddh.—Noble Sir, I am being hastened by the gravity of my mission (lit—of my work).

भागु—कीदृशं तत् कार्य्यगौरवं यत् राजशासनमुल्लङ्घयति ?

Bhag.—What sort of gravity of work is that which causes you to trangress royal command ?

मलय—सखे भागुरायण लेखमुपानय।

Mal.—Friend Bhagurayana, bring me the letter.

भागु—(सिद्धार्थकहस्तात् लेखं गृहीत्वा मुद्रां दृष्ट्वा) कुमार अयं लेखः। राक्षसनामाङ्कितेयं मुद्रा।

Bhag.—(*Taking the lettar from Siddarthaka's hand and noticing the seal*) Prince, here is the letter. This seal is marked with Rakshasa's name.

मलय—मुद्रां परिपालयन्नुद्घाट्य दर्शय।

Mal.—Show me having opened it preserving the seal.

भागु—तथा कृत्वा दर्शयति।

Bhag.—(*Shows the letter doing as desired*).

CHARCHA

1. अन्वयः॥ गुणेषु आनयन्त्यै दोषेषु पराङ्मुखं कुर्वत्यै अस्मादृशजनन्यै स्वामिभक्त्यै प्रणमामः। व्याख्या—'गुणेषु' स्वामिभक्तिरूपाया जनन्या आत्मगुणेषु विषये 'आनयन्त्यै' अस्मादृशम् अभिमुखं कुर्वत्यै 'दोषेषु' तस्या एव आत्मदोषेषु विषये 'पराङ्मुखम्' अस्मादृशं विहस्तवदनं 'कुर्वत्यै' विदधत्यै 'अस्मादृशानां' सहिधानां सैवकानां 'जनन्यै' अन्नदानादिपोषणकर्मभिः मातृरूपायै 'स्वामिभक्त्यै' प्रभुपरायणतायै 'प्रणमामः' नमस्कुर्मः। यथा जनन्या गुणा एव ग्राह्या दोषा उपेक्ष्याः, जननीरूपाया मे राजभक्तेरपि तथा। तत् राजभक्त्या नोदितः सदोषमप्यद्य राक्षसबन्धनकर्म करिष्ये इत्यर्थः।

2. गुणेषु—विषयाधिकरणे ७मी। नी is द्विकर्मक with an अकथित कर्म। That कर्म however is here not अकथित, but कथित as आधार। Hence आधारविवक्षया अधिकरणत्वं न तु कर्मत्वम्। Cf.—"भागुरायणात् मुद्रां याचे" Para 3 *ante*.

3. अस्मादृश &c.—See व्याख्या। Mother's virtues only are noticed, faults are ignored. Loyalty is my mother; I take no notice of her faults, but attend to her virtues only. Hence, though treachery to Rakshasa is heinous in me, still urged by loyalty I do not hesitate at it.

4. स्वामिभक्त्यै—प्र + नम is सकर्मक; hence स्वामिभक्तिम् is expected. We may say स्वामिभक्तिमनुकूलयितुं प्रणमामः इति स्वामिभक्त्यै प्रणमामः—"क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति ४थी। Cf.—"प्रणम्य शिरसा कण्ठाय विबुधास्तदनन्तरम्"—*Kumara*.

5. आगन्तुकः—Here Bhagurayana feigns inacquaintance. The fact is, सिद्धार्थक and भागुरायण are both officers of Chandragupta and they left Kusumapura together on the same mission (See Act I)

6. परिग्रहः—परिगृह्यते इति परि + ग्रह + अप् कर्मणि a servant.

7. त्वरायितः—त्वरा haste. त्वराम् अयितः गमितः त्वरायितः। क्यङ् does not give the sense, for we do not want to say acting *like* one in haste, but he was actually in haste.

8. उल्लङ्घयति—त्वं राजशासनम् उल्लङ्घयसि = कार्य्यगौरवं त्वां राजशासनम् उल्लङ्घयति। हेतुमण्णिच् after स्वार्थिक णिच्।

9. परिपालयन्—पालि is 'to guard'; hence परिपालयन् preserving.

10. उद्ग्राह्य—उद् + ग्रह् (सर्वाते चुरादि) + ल्यप्। This is not मित्। ग्रह चेष्टायाम् is मित्, cf —"अन्वयेन घटितम्", *supra*.

15. मलय—(वाचयति) "स्वस्ति। यथास्थानं कुशोऽपि कोऽपि क्रमपि पुरुषविशेषम् अवगमयति। अस्मत् प्रतिपन्नं निराकृत्य दर्शिता कापि सत्यता सत्यवादिना। माम्प्रतम् एतेषामपि प्रथममुपन्यस्तसन्धीनाम् अस्मत्सुहृदां पूर्वप्रतिज्ञातसन्धिपरिपूरणप्रोत्साहनेन सत्यसन्धः प्रीतिमुत्पादयितुमर्हति। एतेऽपि एवमुपगृहीताः मन्तः स्वाश्रयविनाशेन उपकारिणमाश्रयिष्यन्ति। अविस्मृतमेतत्: सत्यवतः स्मारयाम—एतेषां मध्ये केचिदरेः कोषदन्तिभ्यामर्थिनः केचित् विरयेण इति। अलङ्कारत्रयञ्च सत्यवता यदनुप्रेषितं तदुपगतम्। मयापि लेखस्य अशून्यार्थं किञ्चिदनुप्रेषितं तदुपगमनीयम्। वाचिकञ्च आप्ततमादस्मात् श्रोतव्यमिति"। भागुरायण कोदृशो लेखः ?

Mal.—(*Reads*) "May good result. Some one from somewhere informs a certain distinguished personage in the right place thus—Great integrity is shown by your truthful self by dismissing our enemy. True to your promise as your are, it behoves you now, by encouragement regarding the already promised price for the peace, to give pleasure to these friends of mine also to whom peace was previously suggested. Thus retained, these will indeed serve their benefactor by the ruin of their present refuge. Though not forgotten by the truthful one, we remind that among these, some are tempted by the treasure and elephants of the enemy, some by his territories. The three pieces of jewellery which have been sent by the truthful one are received. By me too a trifling accompain-

ment to the letter is forwarded . it deserves to be accepted. Verbal message also has to be heard from this most trusted person". Bhagurayana, what sort of a letter is this ?

1. यथास्थानम् &c.—स्थानमनतिक्रम्य यथा स्थानम् । स्थान is the destination of the letter. The address, the addressee &c. are all suppressed in accordance with the statement प्रथमं तावत् अव्यक्तम् &c. Act I.

2. पुरुषविशेषम्—विशिष्यते or विशेष्यते इति विशेषः distinguished. पुरुषाणां विशेषः &c. Cf.—"अतिथिविशेषलाभेन" *Sak.* Act I.

3. सत्यता सत्यवादिना—सत्य in सत्यवादिना is *truth*. With अग्र्यादयश्च it means *truthful* in सत्यता ।

4. प्रथमसुपन्यस्त &c.—'प्रथमं' प्राक् 'उपन्यस्तः' प्रस्तावितः 'सन्धिः' येभ्यः तेषाम् । Chandragupta first suggested peace to Rakshasa's friends. This is of course untrue.

5. अमात्यसुहृदाम्—Refers to कौलूत &c. as mentioned in Act I, Sl. 20.

6. पूर्वप्रतिज्ञात &c.—This continues the false story introduced by प्रथमसुपन्यस्तसन्धीनाम । 'पूर्वं प्रतिज्ञातः' भवता प्रतिश्रुतः यः 'सन्धिः' वैरत्यागः तस्य 'परिपणनं' मूल्यं तस्य 'प्रीतिसाहसेन' अवश्यं दास्यामि इत्युक्त्वा &c. Peace was suggested by Chandragupta with a price mentioned. What is wanted now is a confirmation of the price. Also see next.

7. सत्यसन्धः—True to promise. This reference to *promise* shows that the प्रतिज्ञा in पूर्वप्रतिज्ञात &c., was चन्द्रगुप्त's. But then, if चन्द्रगुप्त had already promised the price, the talk of प्रीतिसाहस, becomes meaningless and is almost insulting to चन्द्रगुप्त । Perhaps the correct reading of the passage is not before us. चन्द्रगुप्त did make some promise undoubtedly as is evident from "प्रथमभणितः अर्थः सम्पादयितव्यः" in Para 18 *infra*.

8. उपगृहीताः—उप + ग्रह means 'to retain.' Cf.—"आ नन्दराजावासात् उपगृह्यन्ते" Para 13, *ante*. Telang reads अनुगृहीताः, but reference

to अनुग्रह is better avoided in a business-contract, the price being for service rendered उपकारिष्यम् below is however in favour of Telang. Perhaps the talk of उपकार is a piece of humility.

9. स्वाशय &c.—स्वेषाम् आशयः, *i. e.*, मलयकेतुः ।

10. कोषदन्ति &c.—कोषश्च दन्तौ च कोषदन्तिनौ ताभ्याम् । कोषदन्तिभ्यां क्रता अर्थिनः = कोषदन्तिभ्यामर्थिनः । दन्तिन् in singular in the वाक्य has जातावेकवचनम् । Telang reads कोषदण्डाभ्याम् , but cf.—"अपरौ हस्तिबलं कोषश्च" Para 18, *infra*, and "इतरौ हस्तिबलकामुकौ" Para 35, *infra*.

11. अशून्यार्थम्—Telang explains—"लेखस्य अशून्यार्थम् = in order that this letter might not be unaccompained by the customary present.,' शून्य is void. अशून्य not void, *i. e*, substantial (which the *words* in an epistle are not). अर्थ is वस्तु । अशून्यः अर्थः अशून्यार्थः something substantial, *i. e.*, a present. तम् । Cf.—"अयं लेखस्य अशून्यार्थः" (Page 17, *infra*) spoken with reference to the अलङ्करण-पेटिका । Do not take this as a क्रियाविशेषण ।

12. वाचिकम्—Verbal message. Cf.—"निर्द्धारितेऽर्थे लेखेन खलूक्ता खलु वाचिकम्"—*Magha* II.

13. कौडम्बो लेखः—I cannot make out anything of this letter. It is a queer letter. What do *you* think of it ?

16. **भागु—भद्र सिद्धार्थक कस्यायं लेखः ?**

Bhag—Gentle Siddharthaka, whose letter is this ?

सिद्ध—अज्ज ण आणामि [आर्य, न जानामि] ।

Siddh—Noble Sir, I do not know.

भागु—हे धूर्त्त, लेखो नीयते, न ज्ञायते कस्यायमिति । सर्वं तावत् तिष्ठतु, वाचिकं त्वत्तः केन श्रोतव्यम् ?

Bhag—Holla, knave, the letter is being carried, but whose it is, is not known. Let all this alone, by whom is the verbal message to be heard from you.

सिद्धा—(भयं नाटयन्) तुह्मेहिं—[युष्माभिः—]।

Siddh—(*Acting fright*) By you—

भागु—किमस्माभिः ?

Bhag—By us what ?

सिद्धा—तुह्मेहिं गिहीदो ण आणामि किं भणामित्ति [—युष्माभिः गृहीतो न जानामि किं भणामि इति]।

Siddh—By you arrested, I do not know what I am saying.

भागु—(सरोषम्) एष जानासि। भासुरक, बहिर्नीत्वा तावत् ताड्यतां यावत् कथयति।

Bhag—(*Angrily*) You shall know presently. Bhasuraka take him outside and batter him till he discloses all.

पुरुषः—जं अमच्चो आणवेदि [यदमात्य आज्ञापयति]। (इति तेन सह निष्क्रम्य पुनः प्रविश्य) अज्ज इअं तस्स ताडिअमाणस्स णाम मुद्दालञ्छिदा पेडिआ कक्खादो णिवडिदा [आर्य, इयं तस्य ताड्यमानस्य नाम मुद्रालाञ्छिता पेटिका कक्षतो निपतिता]।

Attendant—As the Minister commands. (*Going out with him and coming back*) Noble Sir, this basket marked with a seal has dropped from his arm-pit, as he was being thrashed.

CHARCHA

1. भद्र सिद्धार्थक &c.—Bhagurayana has treated him as a stranger. Cf.—"किमयमागन्तुकः" *ante*. Yet he now addresses him by name. It seems "भद्र कस्यायं लेखः" is the correct readnig. कस्यायं लेखः refers to the addressee, cf.—चन्द्रगुप्तस्य लेखः" Para 17.

2. सर्वं तावत् &c—Very well I shall not question you on these points, but restrict myself to the verbal message alone.

3. युष्माभिः—The speech is here interrupted by the impatience of Bhagurayana. Dhundhi thinks otherwise and treats this as a complete answer to कीदृशं श्रोतव्यम् of भागुरायण। Then युष्माभि.=युष्माभिः श्रोतव्यम्। "युष्मच्छ्रवणगोचरीकर्तुमेवाद्य मया समारब्धः।... श्रोतव्यमिति वाक्यशेषः।"—*Dhundhi.* The tone of the reply then becomes ironical and does not suit the stage-direction 'मद्य नाटयन्"।

4. किमस्माभि—किम may be treated here as an exclamation also. Translate—"What! By us?"

5. युष्माभिर्गृहीतः &c—This speech has been interrupted above. Dhundhi reads मिश्रैः गृहीत and explains—'मिश्रशब्दः पूज्यवचनः" and has reference to युष्माभिः of the previous speech, *i. e.*, मिश्रैः युष्माभिः गृहीतः (=पूज्यैः युष्माभिर्गृहीतः) is what is intended. This supposes that मिश्र by itself means पूज्य। It is however usual to take it as पूजार्थक only when compounded. Cf.—"प्रशंसा वचनत्वञ्चैषां समास एव इति वाक्यं न भवति"।

6. न जानामि &c.—This means—'The arrest has frightened me out of my wits and perhaps I am talking incoherently, I really do not know"

7 एष जानासि—You will know now The hammering will bring you to your senses.

17. भागु—(विलोक्य) कुमार, इयमपि राक्षसमुद्राङ्कितैव।

Bhag—(*Observing*) Prince, this too is indeed stamped with Rakshasa's seal.

मलय—सखे अयं लेखस्य अशून्यार्थो भविष्यति। इमामपि मुद्रां परिपालयन् उद्घाटय दर्शय। (भागुरायणस्तथा कृत्वा दर्शयति)।

Mal—Friend, this will prove to be the accompaniment

of the letter Open this too, preserving the seal, and show me. (*Bhagurayana does the same and shows*).

मलय—(विलोक्य) अये तदिदमाभरणं मया स्वशरोरादवतार्य्य राक्षसाय प्रेषितम् । व्यक्तं चन्द्रगुप्तस्य लेखः ।

Mal—(*Observing*) Ha ! This is the jewellery that was taken off from my own body and sent to Rakshasa. Evidently the letter is Chandragupta's.

भागु—कुमार एष निर्णीयते एव संशयः । भद्र, पुनरपि ताड्यताम् ।

Bhag—Here, Prince, the guess (lit.—doubt) is being confirmed. Good man, let him be drubbed again.

पुरुषः—तथा (इति निष्क्रम्य सिद्धार्थकेन सह पुनः प्रविश्य) एसो खु ताडिअमाणो कुमारस्स एव्व णिवेदेमित्ति भणादि [एष खलु ताड्यमानः कुमारस्यैव निवेदयामि इति भणति] ।

Attendant—So be it. (*Going out and coming back with Siddharthaka*) Being thrashed, he says, he will tell all to Prince himself.

मलय—तथा भवतु ।

Mal—Be it so.

सिद्धा—(पादयोर्निपत्य) अभएण मे कुमारो पसादं करेदु [अभयेन मे कुमारः प्रसादं करोतु] ।

Siddh—(*Falling at his feet*) May Prince favour me with (promise of) impunity.

मलय—भद्र अभयमेव परवतो जनस्य । निवेद्यतां यथावस्थितम् ।

Mal—Good man, a dependant always has impunity. Let it be told as it is,

सिद्धा—णिसामेदु कुमारो। अहं क्खु अमच्चरक्खसेण इमं लेहं देइअ चन्दउत्तसआसं पेसिदो [निशामयतु कुमारः। अहं खलु अमात्यराक्षसेन इमं लेखं दत्त्वा चन्द्रगुप्तसकाशं प्रेषितः]।

Siddh—Let Prince listen. I was really given this letter by minister Rakshasa and despatched to Chandragupta.

CHARCHA

1. अयं लेखस्य अघ्न्यार्थः—अघ्न्यार्थः is the विधेय। Hence विधेय-प्राधान्यात् अयमिति पुंलिङ्ग निर्देशः and पेटिका अयम् अघ्न्यार्थः is not to be condemned. For अघ्न्यार्थः see Para 15, *ante*.

2. उद्घाट्य दर्शय—See Para 14, *ante*.

3. अभयेन—भयस्य अभावः अभयम् safety, अव्ययी—। By लक्षणा here this means *promise* of safety. तेन।

4. परवतः—See इन्त परवान्, Act III, Sl. 4., "परवती चावर्तते"—*Sak* Act II.

5. यथावस्थितम्—अवस्थित is वृत्त transpired. अवस्थितमनतिक्रम्य निवेद्यताम्. यथावस्थितं निवेद्यताम्। अव्ययी—qual. निवेद्यताम्।

6. निशामयतु—See श्रावक निशामय Para 3, *ante*.

18. **मलय—वाचिकमिदानीं श्रोतुमिच्छामि।**

Mal—I wish now to hear the verbal message.

सिद्धा—कुमाल, आदिट्ठोह्मि अमच्चेण यहा—"एदे मह वअस्सा पञ्च राआणो तुए सह समुप्पण्णसिणेहा। ते जहा—कुलूदाहिवो चित्तवम्मो, मलअणराहिवो, सिंहणादो कस्मीर-देसणाहो पुक्खरक्खो, सिन्धुराओ सिन्धुसेणो, पारसीओ मेह-

णादोत्ति। एदेसु पुढमगिह्दो तिण्णि राआणो मलअकेदुणा विसअं इच्छन्दि अवरो हत्थिबलं कोसं अ। ता जह चाणक्कं णिराकरिअ महाभाएण मह पीदि समुप्पादिदा तहा एदाणं वि पुढमभणिदो अत्थो सम्पादयिदव्वोत्ति"-एत्तिओ बाआसंदेसो [कुमार, आदिष्टोऽस्मि अमात्येन यथा एते मम वयस्याः पञ्च राजानस्त्वया सह समुत्पन्नस्नेहाः। ते यथा—कुलूताधिपश्चित्रवर्मा, मलयनगराधिपः सिंहनादः, काश्मीरदेशनाथः पुष्करात्तः, सिन्धुराजः सिन्धुषेणः पारसीको मेघनाद इति। एतेषु प्रथमगृहीतास्त्रयो राजानो मलयकेतोर्विषयमिच्छन्ति अपरौ हस्तिबलं कोषञ्च। तत् यथा चाणक्यं निराकृत्य महाभागेन मम प्रीतिः समुत्पादिता यथा एतेषामपि प्रथमभणितोऽर्थः सम्पादयितव्यः इति"—एतावन् वाक्मन्देशः]।

Siddh—Prince, I was instructed by minister Rakshasa thus—"My friends, these five princes, have friendliness grown towards you. They are Chitravarman the ruler of Kulūta, Simhanada the chief of the city of Malaya, Puskaraksha the lord of the land of Kashmere, Sindhushena the king of Sindhu and Meghanada the Persian" Of these the first-stated three kings desire the land of Malayaketu, the other two his force of elephants and treasure So just as my pleasure has been caused by your highly endowed self by discarding Chanakya, the same way of these also the object named above has to be accomplished." This much is the verbal message.

मलय—(स्वगतम्) कथं चित्रवर्मादयोऽपि मामभिद्रुह्यन्ति। अथवा अतएव एतेषां राज्ञमे निरतिशया प्रीतिः। (प्रकाशम्) विजये राज्ञमं द्रष्टुमिच्छामि।

Mal.—(*To himself*) How so ! Chitravarman and others also war upon me ! Or for this very reason is their excessive love for Rakshasa. (*Aloud*) Vijaya, I wish to see Rakshasa.

प्रतीहारी—जं कुमारो आणवेदि [यत् कुमार आज्ञापयति] (इति निष्क्रान्ता) ।

Warder—As the Prince commands. (*Exit*).

CHARCHA

1. वयस्याः—वयसा तुल्या इति वयस+यत् lit of the same age Hence a friend.

2. कुलताधिपः &c.—See Act I, Sl 20.

3. मामाभिद्रुह्यन्ति—"क्रुधद्रुहोरुपसृष्टयोः कर्म" इति कर्मत्वम् ।

4. निरतिशया—अतिशय excess. निर्व्यूढः निश्चितो वा अतिशयः अस्याः endowed with excessive.

19. **(ततः प्रविशत्यासनस्थः स्वभवनगतः पुरुषेण सह सचिन्तो राक्षसः) राक्षसः—(आत्मागतम्) पूर्णमस्माद्बलं चन्द्रगुप्तबलैरिति यत् सत्यं न मे मनसः परिशुद्धिरस्ति। कुतः—**

साध्ये निश्चितमन्वयेन घटितं बिभ्रत् सपक्षे स्थितिं
व्यावृत्तञ्च विपक्षतो भवति यत् तत् साधनं सिद्धये ।
यत् साध्यं स्वयमेव तुल्यमुभयोः पक्षे विरुद्धञ्च यत्
तस्याङ्गीकरणेन वादिन इव स्यात् स्वामिनो निग्रहः ॥१०॥

(*Now enter with an attendant, Rakshasa, seated in his own house, meditating*) *Rakshasa*—(*To himself*) Tranquillity of mind really does not come unto me because our army is filled with Chandragupta's warriors. (Do you ask) Why ?—Of a king, that army selected for the work leads to success, which, brought together by lineal succession and maintaining stay with

its own side is driven by a feeling of repulsion away from the enemy ; (while) defeat might ensue from the incorporation of such as are themselves yet to be won over, or are opposed to the king himself . just as of a disputant, that reason undoubtedly seen in the subject, becomes suitable for a conclusion, which, maintaining presence in similar cases it attended by (subject to) succession and is non-existent in dis-similar cases, (while) by the assumption of that which is itself to be proved, or is equally true of both sides, or what is opposed to the subject, error might creep into the agument.

CHARCHA

1. यत् सत्यम्—अव्यय meaning really. Cf.—"यत्सत्यं काव्यविशेषवेदिन्याम &c."—Act I, Para 3.

2. अन्वय ॥ साध्ये &c.—'वादिनः' तार्किकस्य 'इव स्वामिनः' भर्तुः राज्ञ इत्यर्थः 'निग्रहः स्यात्' पराजयो भवेत् । कदा स्यात् इत्यपेक्षायाम्—

वादिनस्तावत्—अन्वयः ॥ यत् साधनं साध्ये निश्चितं, सपक्षे. स्थितिं बिभत् अन्वयेन घटितं विपक्षतो व्यावृत्तं, तत सिद्धये भवति । यत् स्वयमेव साध्यं, उभयोः तुल्यं, यच्च पक्षे विरुद्धं, तस्य अङ्गीकरणेन निग्रहः स्यात् । व्याख्या—'साध्य' प्रतिप्राद्यं, प्रमाणेन व्यवस्थापयितुमिष्टं धर्मरूपं वस्तु । साध्यमस्मिन् अस्ति इति कृत्वा साध्यवत् अपि 'साध्य' पक्षः इति नाम्ना नैयायिकैः आख्यातः धर्मिरूपः पदार्थः, यत्र किञ्चिदपि व्यवस्थापनं स इति यावत् । 'यत् साधनं' सिद्धिबीजत्वेन ऊहितं वस्तु 'स्वाध्ये' पक्षे 'निश्चितम्' असन्दिग्धं वर्त्तमानं तत् सिद्धये भवति इत्यनेन सम्बन्धः । साध्ये वर्त्तमानमपि सिद्धये नैव वा भवेत् इति धर्मान्तरमाह—किञ्च 'सपक्षे' पक्षसदृशे, निश्चितसाध्यवति, प्रतिपाद्यधर्मविशिष्टे अपरस्मिन् इत्यर्थः 'स्थितिं बिभत्' सत्त्वं धारयत्, स्थितं सत् इत्यर्थः यत् साधनम् अन्वयेन घटितं प्रतिपाद्यस्य धर्मस्य अनुगमनेन युक्तं, तत् सदैव प्रतिपाद्यमन्वेति तदित्यर्थः. यद्वस्तु स्थिते प्रतिपाद्ये स्वयमपि स्थितमिति यावत्, तत् सिद्धये भवति इत्यनेन सम्बन्धः । एवमपि कदाचित् सिद्धिर्न वा भवेत् इति तृतीयं धर्ममाह अपितु 'विपक्षतः' पक्षविरुद्धात् साध्याभाववतः, प्रतिपाद्यधर्मविहीनात् प्रदार्थात् इत्यर्थः 'व्यावृत्तं' व्यपगतं सत् व्यतिरेकेण च योजितं अवर्त्तमाने प्रतिपाद्ये स्वयमप्यवर्त्तमानमित्यर्थः 'तत्' तादृशं साधनं 'सिद्धये भवति' अनुमितिसिद्धये, प्रतिज्ञातार्थव्यवस्थापनाय, साध्यधर्मस्य सत्ताप्रतिपादनाय इत्यर्थः अलं स्यात् । किं पुनर्नालमित्याह—'यत्' साधनं साधनत्वेन ऊहितं

वस्तु 'स्वयमेव साध्यं' व्यवस्थापनीयं, पक्षे अनिश्चितमित्यर्थः; अथवा यत् 'उभयोः' सपक्षविपक्षयोः 'तुल्यम्' उभयत्र वर्त्तमानमवर्त्तमानं वा दृश्यते अतएव अन्वयेन न घटितं 'यच्च पक्षे विरुद्धं' विपरीतं, साध्यधर्मासत्त्वेऽपि स्वयं सदित्यर्थः अतएव विपक्षतः व्यावृत्तत्वेन, व्यतिरेकवत्त्वेन इत्यर्थः अनिर्देश्यं 'तस्य' तथाविधस्य साधनस्य 'अङ्गीकरणेन' स्वीकरणेन सिद्धौ योग्यतया ग्रहणेन, वादिनो निग्रहः स्यात् !

स्वामिनः पुनः—अन्वयः ॥ साध्ये निश्चितं यत् साधनम् अन्वयेन घटितं, समत्वे स्थितिं बिभ्रत् विपक्षतो व्यावृत्तं तत्, सिद्धये भवति। शेषं प्राग्वत्। व्याख्या—'साध्ये' अनुष्ठेये अरिविजयादिके 'निश्चित' निर्णीतं योग्यतया अध्यवसितमित्यर्थः, 'यत् साधन' सैन्यं 'अन्वयेन' पुरुषपरम्परया 'घटितं' प्राप्तं, कुलक्रमागतं मौलमित्यर्थः; अपि च 'सपक्षे' निजवर्गे 'स्थितिम्' अवस्थान' 'बिभ्रत्' दधत् सत् 'विपक्षतः' शत्रुतः 'व्यावृत्तं, पराङ्मुखम् उपजापादिभिः असाध्यमित्यर्थः 'तत् सिद्धये' कार्य्यसिद्धये 'भवति' सम्पद्यते। 'यत्' पुनः 'स्वतमेव' आत्मना एव 'साध्यं' सम्पाद्यं न तु मौलमिव सिद्धम्, अथवा 'उभयोः' सपक्षविपक्षयोः 'तुल्यं' समानादरं 'यच्च पक्षे' निजवर्गे 'विरुद्धं' विषमम् उपजापदूषितमित्यर्थः 'तस्य अङ्गीकरणेन, कार्य्यसिद्धये उपगृहणेन स्वामिनो निग्रहः स्यात्। स्वार्थसिद्धये उपगृहीता एते भद्रभटादयो मे शङ्कां जनयन्ति इति भावः।

3. साध्ये—साध + ण्यत् कर्मणि साध्य। This means—(वादिपक्षे that which is to be proved ; the predicate in the conclusion. Also साध्यमस्यस्मिन् इति साध्य + अच् मत्वर्थे साध्यम् the subject, *i. e.*, the subject in the conclusion. गौतम call it the पक्ष। "साध्यनिर्देशः प्रतिज्ञा" इति साध्यवत्तया पक्षनिर्देशः इति दीधितिकारः। (स्वामिपक्षे) that which is to be accomplished , the work undertaken.

4. निश्चितम्—(वादिपक्षे) undoubted, *i. e.*, undoubtedly present. This refers to all the known attributes of the पक्ष। Suppose the पक्ष is a पर्वत (mountain). We find it to be (i) woody, (ii) solid, (iii) smoky &c. Then (i) woodiness, (ii) solidity, (iii) smokiness &c. are properties (धर्म) that ere निश्चित in the पर्वत। Let us further suppose that we want to show that the mountain *holds fire* (वह्निमान्) without actually seeing *fire* in it. The problem now is to infer the presence of fire from one or more of the known attributes *woodiness, solidity, smokiness* &c., *i.e.*, to find out which of these attributes is so related to fire that

from the presence of that attribute the presence of fire may be inferred. Now see next. Again (स्वामिपक्षे) निश्चितम् is अवधारितम् selected. In this sense, cf.—"तव निश्चित्य कन्दर्पमगमत् पाकशासनः"—*Kumara.*

5. अन्वयेन घटितम्—(वादिपक्षे) अनु + इ + अच् भावे अन्वयः succession (स्वामिपक्षे) अनु + इ + अच् अधिकरणे अन्वयः race, family. घट + णिच + क्त कर्मणि घटित। "मिता ह्रस्वः" इति ह्रस्वः। (वादिपक्षे) attended युक्त। Cf —विघटित in the sense वियुक्त in "जटायुषा विघटितः काष्णायसोऽयं रथः"। (स्वामिपक्षे) attained लब्ध। Cf. "आनीय झटिति घटयति विधिरभिमतम्"। (वादिपक्षे) अन्वयेन घटितम् = attended by succession, *i. e.*, that which follows. This is a condition for the validity of the inference. If presence of fire is to be rightly concluded from any one of the attributes *woodiness*, *solidity*, *smokiness* &c., then that attribute must be seen in nature to *follow* the presence of fire. Now, we have never seen *woodiness*, *solidity* &c. to succeed the presence of fire. Hence these attributes should be excluded. But *smokiness* is oftenseen to *follow* the presence of fire. Where is it so seen ? Now see next Again (स्वामिपक्षे) अन्वयेन घटितम् = come by through lineal descent, *i e.*, a hereditary army, मौलबल।

6. विभत् &c.—सपक्ष = (वादिपक्षे) पक्ष is the subject in the conclusion (see note 3). पक्षेण सह वर्तमानः सपक्षः appearing in the same class with the पक्ष, *i. e.*, possessing the साध्यधर्म (which is वह्निमत्ता in our example) in common with the पक्ष। Hence सपक्षे स्थितिं विभत् = appearing in one that possesses the साध्यधर्म in common with the पक्ष। Now *smokiness* is seen to *follow* the presence of fire in *certain instances*, *e. g.*, in the kitchen, in the steam engine, in the mill, and so forth. But this is not enough to infer the presence of fire in the mountain from its *smokiness*. If we can say that fire is the *cause* of smoke, then from seeing smoke we may infer the presence of fire. But the instances cited merely show that fire *precedes* smoke in

their cases. The precedence does not necessarily imply *causal* relation. Hence further condition are necessary. Now see next. (स्वामिपक्षे) पक्ष is वर्ग side. समानः पक्षः अस्य सपक्षः on the same side with the army, *i. e.*, the king (स्वामिन्)। सपक्षे स्थितिं विधत् = siding with the king. समान becomes स by योगविभाग in "समानस्य छन्दसि अमूर्धप्रभृत्युदर्केषु"।

7. व्याहृतश्च &c.—(वादिपक्षे) विभिन्नः पक्षात् विपक्षः distinguished from पक्ष (by the absence of the साध्यधर्म)। प्रादितत्—। वि + आ ÷ हृत + क्त कर्मणि excluded. The root is अन्तर्भावितण्यर्थ as in "तेन निर्वृत्तम्"। व्याहृतश्च विपक्षतः = excluded from the विपक्ष। In our example, anything that does not possess वह्निमत्ता (the साध्यधर्म), say a tank, is a विपक्ष। *smokiness* is absent in the विपक्ष, witness the tank. This means that if fire is absent, smoke is absent (अन्यथा सिद्धिशून्यस्य)। Also we have seen above (note 6) that fire *precedes* smoke (नियता पूर्ववर्त्तिता)। We now see that this precedence is *causal*, not accidental. Had it been accidental, then the absence of fire would not have affected smoke. Thus finally fire is the *cause* and smoke the *effect*. Comp. "अन्यथा सिद्धिशून्यस्य नियता पूर्ववर्त्तिता। कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्त्तितम्॥" Again, the presence of the *effect* always implies the previous presence of the *cause*. Hence—

All that is smoky, holds fire
The mountain is smoky
∴ The mountain holds fire.
The inference here is perfecty sound.

(स्वामिपक्षे) विरुद्धः पक्षः अस्य विपक्षः enemy. वि + आ + हृत + क्त कर्तरि व्याहृत averse. विपक्षतो व्याहृतम् = averse to the enemy, *i e.*, encouraging no advances from him.

6. साधनम्—साध्यते अनेन इति साध + ल्युट् करणे (वादिपक्षे) reason ; (स्वामिपक्षे) army. "साधनं सिद्धिसैन्ययोः" इति हेमः।

7. सिद्धये—सिद्धि is (वादिपक्षे) establishment of the proposition ; (स्वामिपक्षे) success in the undertaking.

8. यत साध्यम् &c.—साध्य is—(वादिपक्ष) to be established, yet to be proved ; such a thing cannot be used as a reason in a proof. (स्वामिपक्ष) to be won over : an army not already won over cannot be trusted and might cause disaster.

9. तुल्यमुभयोः—उभय refers to सपक्ष and विपक्ष। A reason equally true of both sides leads to no inference. An army also, with a leaning to both sides, is of no use.

10. पक्ष &c.—विरुद्ध is—(वादिपक्ष) incongruous, contradictary , (स्वामिपक्ष) inimical.

11. अङ्गीकरणेन—अङ्गीकरण is—(वादिपक्ष) assumption, adoption ; (स्वामिपक्ष) incorporation with one's standing army.

12. निग्रहः—नि + ग्रह + अप् भावे निग्रह [lit. capture ; hence *discomfiture*, which applies to both वादिन् and स्वामिन्। In the case of वादिन् however निग्रह is the technical name for a *contradiction* of what is to be proved (विप्रतिपत्ति), and also for *inconclusion* (अप्रतिपत्ति) leading to no inference. Cf. "विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्"—*Gotama*.

20. अथवा विज्ञातापराधहेतुभिः प्राक्परिगृहीतोपजापैः आपूर्णमिति न विकल्पयितुमर्हामि। (प्रकाशम्) भद्र प्रियंवदक, उच्यतामस्मद्वचनात् कुमारानुयायिनो राजानः—सम्प्रति दिने दिने प्रत्यासीदति कुसुमपुरम्, तत् परिकल्पितविभागैः भवद्भिः प्रयाणे प्रयातव्यम्। कथमिति ?

प्रस्थातव्यं पुरस्तात् खशमगधगणैर्मामनुव्यूह्य सैन्यै-
र्गान्धारैर्मध्ययाने सयवनपतिभिः संविधेयः प्रयत्नः।
पश्चात् गच्छन्तु वीराः शकनरपतयः संभृताश्वोग्रहस्ते:
कौलूताद्यश्च शिष्टः पथि परिहरणयाद्राजलोकः कुमारम् ॥११॥

Or, it behoves me not to hesitate, because it is filled with such as have the reason for their disaffection well-known,

and had previously accepted our overtures. (*Aloud*) Gentle Priyamvadaka, let the kings following the Prince be informed in my name that Kusumapura is now nearing day after day, so during march you should proceed with divisions formed. (Do you ask) How ?—Drawing up troops in battle array, the Khasa and Magadha warriors should march in the van, behind me, Gandharas with the Yavana chiefs should take care of the march in the centre ; let the valiant Saka kings, re-inforced by the Chinese and the Huns, march in the rear ; and the rest of the kings—the king of Kulata and others—should shield the prince at the stages of the march.

प्रिय.—जं अमच्चो आणवेदि [यत् अमात्य आज्ञापयति]

इति निष्क्रान्तः)।

Attendant—As Minister commands. (*Exit*)

CHARCHA

1. विज्ञात &c.—अपराग is dis-affection (see *ante*). तस्य हेतुः। विज्ञातः अपरागहेतुः एषाम् &c. These people have a real grievance against Chandragupta. Hence desertion was expected.

2. प्राक्परिगृहीत &c.—उपजाप overtures (see *ante*). प्राक् previously, *i. e.*, before they joined us. परिगृहीत accepted. प्राक् परिगृहीतः उपजाप एभिः। They were about to desert, just then we made offers which they accepted and came over to us ; so there is no reason to doubt their *bonafides*.

3. परिकल्पित &c.—विभाग is division of an army. 'तत् भवद्भिः प्रयाणे' अध्यातिक्रमणे 'परिकल्पितः विभागः' यैः तादृशैर्भूत्वा 'प्रयातव्यम्' प्रस्थातव्यम्। You should have your positions allotted to you—some in the van, some again in the rear, and so forth.

4. अन्वयः॥ सैन्यैः व्यूह्य पुरस्तात् मामनु खशमगधगणैः प्रस्थातव्यम। मध्ययाने मयवनपतिभिः गान्धरैः प्रथमः संविधेयः। पश्चात् चशचङ्गणैः संभृता वीराः शकनपरतयः गच्छन्तु। शिष्टः च राजलोकः कौलूताद्यः पथि कुमारं परिवृणुयात्। व्याख्या—'सैन्यैः'

सैनिकैः 'व्यूह्य' व्यूहं रचयित्वा सन्नद्धैः सैनिकैरित्यर्थः 'पुरस्तात्' यानमुखे 'माम् अनु' मम पृष्ठतः 'खशानां मगधानां' च 'गणैः' समूहैः 'प्रस्थातव्यं' प्रयातव्यम्। 'मध्ययाने' यानकेन्द्रे 'यवनराजैः यवरनाजैः 'सह गान्धारैः' गान्धारदेशवासिभिः सैन्यैः 'प्रयत्नः सविधेयः' व्यापारः कर्त्तव्यः। जागरूकैः प्रस्थातव्यमित्यर्थ। 'पश्चात्' यानपृष्ठे 'चौणैः हूणैः' च 'संभृताः' परिपुष्टाः 'वीराः' शूराः 'शकनरपतयः शकराजाः गच्छन्तु' यान्तु। 'अिष्टश्च राजलोकः' इतरो राजवर्गः 'कौलूताद्यः' कुलूतराजप्रमुखः आप्तपञ्चजनघटितः सङ्घः 'पथि' मार्गे प्रयाणे इत्यर्थः 'कुमारं' मलयकेतुं परिहृणुयात्' वेष्टयित्वा यायात् परिवार्य्य आपद्भ्यः संरक्षेत् इत्यर्थः। स्कन्धरावृत्तम्।

5. खश &c.—The Khashas are a hill-tribe at present residing in the Khasia hills to the north-east of Bengal. The Magadhas are the warriors Bhadrabhata &c. who have come over from Chandragupta. खशाश्च मगधाश्च। तेषां गणाः &c.

6. मामनु—Rakshasa plans himself at the head of the whole host; he is the leader. He wants to keep Bhadrabhata &c. under his eye to guard against treachery on their part.

7. व्यूह्य &c.—व्यूह is a fromation of troops. व्यूहं कृत्वा इति व्यूह + णिच् + ल्यप्। The ल्यप seems irregular (why ?). सैन्य is the करण of व्यूहरचनक्रिया; hence it takes करणे ३या।

8. गान्धारैः:—The Gandharas are hill tribes dwelling in Candahar.

9. मध्ययाने—मध्ये यानम् the march in the centre, सुप्सुपा। *Or* मध्ये यानम् the central march, कर्मधा—।

10. पश्चाद्गच्छन्तु—Telang reads पश्चात्तिष्ठन्तु should stay in the centre. गम seems to suit a march better than स्था।

11. पथि परिहृणुयात् &c.—Telang reads पथि पथि हृणुयात् should shield stage after stage. But हृ by itself is rare in this sense. आहृणुयात् should have been used. Also cf.—"त एव मां परिहरन्ति"—Para 23, supra.

21. (प्रविश्य) प्रतीहारी—जेदु अमच्चो। अमच्च, इच्छदि तुमं कुमारो पेक्खिदुं [जयतु अमात्यः। अमात्य, इच्छति त्वां कुमारः प्रेक्षितुम्]।

(Entering) Warder—Let Minister prosper. Minister, the Prince wishes to see you.

राक्षसः—भद्रे, मुहूर्त्तं तिष्ठ। कः कोऽत्र भोः।

Rak.—Good woman, wait a moment. Who is here? Who Ho!

(प्रविश्य) पुरुषः—आणवेदु अमच्चो [आज्ञापयतु अमात्यः]।

(Entering) Attendant—Let Minister command.

राक्षसः—उच्यतां शकटदासः यथा—परिधापिताः कुमारेण आभरणानि वयम्। तत्र युक्तमनलङ्कृतैः कुमारदर्शनमनुभवितुम्। अतो यत्तदलङ्करणत्रयं क्रीतं तन्मध्यादेकं दीयताम् इति।

Rak.—Let Sakatadasa be informed this—I have been persuaded by Prince to resume decorations, it is not therefore meet that I should enjoy the sight of prince undecorated. So, of the three pieces of jewellery that have been bought, let one be handed over.

पुरुषः—जं अमच्चो आणवेदि [यदमात्य आज्ञापयति]। (इति निष्क्रम्य पुनः प्रविश्य) अमच्च इदं आहरणं [अमात्य, इदमाभरणम्]।

Atten.—As the Minister commands. *(Going ont and re-entering)* Minister, this is the piece of jewellery.

राक्षसः—(नाट्येन आत्मानमलंकृत्य उत्थाय च) भद्रे राजोपगामिनं मार्गमादेशय।

Rak.—*(Acting the decoration of person and rising)* Good woman, show me the way leading to the royal presence.

प्रती०—एदु अमच्चो [एतु अमात्यः]।

Warder—Let Minister come.

राक्षसः—(आत्मगतम्) अधिकारपदं नाम निर्दोषस्यापि पुरुषस्य महदाशङ्कास्थानम्। कुतः—

भयं तावत् सेव्यादभिनिविशते सेवकजनं
ततः प्रत्यासन्नाद्भवति हृदये चैव निहितम्।
ततोऽध्यारूढ़ानां पदमसुजनद्वेषजननं
गतिः सोच्छ्रायानां पतनमनुरूपं कलयति ॥ १२ ॥

Rak.—(*To himself*) This thing called 'office' is indeed a source of great apprehension even to an innocent person. (Do you ask) Whence ?—Apprehension comes to the server from the served, to be sure, next it becomes planted at his heart indeed from his intimates, over and above this, the office of those that are highly placed excites envy in bad people. The rise of the exalted entails a commensurate fall.

CHARCHA

1. परिधापिता: &c.—परिधान implies motion, so the root is "गत्यर्थ—" : or परिधानम् is परिधेयत्वेनबोधः which makes the root बुद्ध्यर्थ। Thus गत्यर्थत्वात् बुद्ध्यर्थत्वाद्वा अधिकर्तुः कर्मसंज्ञा।

2. राजोपगामिनम्—राजानमुपगच्छति इति राजन् + उप + गम + णिनि साधुकारिणि कर्त्तरि, &c.

3. अधिकारपदम्—अधिकार office नियोग (see *ante*). पद thing वस्तु। "पद व्यवसितत्राण स्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः। अधिकाररूपं पदम्।

4. अन्वयः॥ सेवकजनं तावत् भयं सेव्यात् अभिनिविशते। ततः प्रत्यासन्नात् हृदये निहितमेव च भवति ततः। अध्यारूढ़ानां पदं असुजनद्वेषजननम्। सोच्छ्रायानां गतिः अनुरूपं पतनं कलयति। व्याख्या—'सेवकजनं तावत्' इत्यवर्गं खलु भयं यद्वा 'सेव्यात्' सेवापावात् राज्ञः इत्यर्थः 'अभिनिविशते' समायाति 'ततः'

तदनन्तरम् आगमात् परमित्यर्थः 'प्रत्यासन्नात्' राज्ञः सन्निहितात् जनात् तत् पूर्वप्राप्तं भयं 'हृदये' मनसि 'निहितमेव च भवति' सदैव लग्नं तिष्ठति। 'ततः' तदुपरि 'अध्यारूढानां पदं' प्रधानपुरुषाणामधिकारः 'असुजनानां' खलानां 'द्वेषजननम्' असूयाहेतुः। महतां प्रधानपुरुषाणां बहूनि शङ्कास्थानानि। इतो राजा, ततः क्षुद्रास्तत्परिचारकाः; अन्यतश्च खलाः। तस्मन्यं 'उच्छ्रायेण' उन्नत्या 'सह' ये वर्तन्ते तेषामध्यारूढानामित्यर्थः 'गतिः' गमनम् ऊर्ध्वगमनम् अत्यारूढिरित्यर्थः 'अनुरूपं' सदृशम् उच्छ्रायसदृशं 'पतनम्' अधःपातं 'कलयति' घटयति। यावानारोहस्तावन्तमेव अवरोहं प्रकुरुते इत्यर्थः। शिखरिणी वृत्तम।

5. *Remark*—Cf—"भेतव्यं नृपते ततः सचिवतः &c"—Act III, Sl. 14. Thoughts, as embodied here, at this time forebode the coming downfall of Rakshasa.

6. अभिनिविशते &c.—'नेर्विशः' इत्यात्मनेपदम्। सेवकजनम् has कर्मणि द्वितीया। The rule "अभिनिविशश्च" has no scope here : for no आयह is implied (See under अभिन्यवीविशत्, Magha 1).

7. हृदये चैव—Fear at first arises from the king, then it takes a permanent footing through back biters that hang is implied here. about the king's person.

8. तत्रोऽध्यारूढानाम् &c.—What precedes applies to servnts in general. This line refers specially to those that are high in office. Over and above the common dread of the king and his attendants, the envy of the wicked persecutes the high.

9. अनुरूपम्—Cf—"प्रमनाशाः समुच्छ्रयाः"। Dhundhi reads अनुकूलम which is obscure He explains 'अनुकूलम्' अवश्यम्भाविन्न उचितम्। Telang interprets—'The condition of those who have risen high finds a fall to be appropriate. Comp—"अत्यारूढिः भवति महतामप्यपथं गतिष्ठा" Sak.

22. (परिक्रम्य) प्रतीहारो—अमच्च, अयं कुमारो। उपसप्पदु णं अमच्चो [अमात्य, अयं कुमारः। उपसर्पतु एनम् अमात्यः]।

Warder (*Going round*)—Minister here is prince, let Minister approach him.

राक्षसः—(विलोक्य) अयं कुमारस्तिष्ठति। य एष—

पादाग्रे दृशमवधाय निश्चलन्तीं
शून्यत्वादपरिगृहीततद्विशेषाम्।
वक्त्रेन्दुं वहति करेण दुर्वहाणां
कार्य्याणां कृतमिव गौरवेण नम्रम् ॥ १३ ॥

(उपसृत्य) विजयतां कुमारः।

Rak.—(Observing) Here is waiting Prince. This one who, fixing his motionless eye on the forepart of his feet with its different parts unperceived through vacancy, supports in his hss hand moon-like face which is as if bowed down (lit caused to bend) by the weight of heavy tasks. *(Advancing)* Let Prince prosper.

अन्वयः ॥ य एष शून्यत्वात् अपरिगृहीततद्विशेषां निश्चलन्तीं दृशं पादाग्रे अवधाय दुर्वहाणां कार्य्याणां गौरवेण इव नम्रं कृतं वक्त्रेन्दुं करेण वहति। व्याख्या—'य एष शून्यत्वात्' मनसा रिक्तीकृतत्वात् दर्शनप्रयत्नाभावात् इत्यर्थः 'न परिगृहीता' न अवबुद्धा तस्य' पादाग्रस्य 'विशेषाः' तत्तद्भागाः अङ्गुष्ठकनिष्ठिकादयः यया तादृशीं 'निश्चलन्तीं' पादाग्रस्यैव क्वचित् प्रदेशे स्थिरां 'दृशं' नयनं 'पदाग्रे' चरणाङ्गुलिषु 'अवधाय' पातयित्वा 'दुर्वहाणां' अस्मिन् चणे विग्रहे प्राप्ते दुर्वहाणां 'कार्य्याणां' कुसुमपुरावरोधाश्रयाणां राजकार्य्याणां 'गौरवेण इव' गुरुतया इव तद्भरेणेव 'नम्रं कृतम् अवनमितं 'वक्त्रेन्दुं' मुखचन्द्रं करेण वहति' हस्तेन अवलम्ब्य आस्ते साऽयं कुमारस्तिष्ठति इति पूर्वेण सम्बन्धः। प्रहर्षिणी वृत्तम्।

CHARCHA

1. निश्चलन्तीम्—He was in deep thought concerning Rakshasa. So the eye was fixed in a vacant stare at the toes of his feet. Telang reads निश्चताङ्गाम्। अङ्ग refers to the parts of the eye, *i. e.*, the ball, the lids &c.

2. शून्यत्वात् &c.—The eye was open but the mind was not there ; hence the look conveyed no impression of the objects looked at. विशेष is *particular* as opposed to सामान्य the *general*. पादस्य अग्रं पादाग्रम् is a wide region having five particularly named parts, *i. e.*, the toes of the foot ; these were not distinguished—अङ्गुलीना विशिष्य पृथक् अग्रहणम्। Dhundhi explains विशेष as विषयविशेष, तत् refering to the eye. Telang accepts this when he says "perceiving done of its objects". Explain thus :—न गृहीता तस्या दृशः विशेषाः विषयविशेषाः यया ताम्। But विशेष for विषयविशेष seems to be a big ellipsis.

3. वक्रीचुम् &c.—He was moodily meditating plans of revenge on Rakshasa with a downcast look, but Rakshasa in his simplicity thought that he was bowed down by anxious thoughts of the momentous issues at hand.

23. **मलय—आर्य्य, अभिवादये। इदमासनमास्यताम्। (राक्षसस्तथा करोति) आर्य्य, चिरदर्शनेनार्य्यस्य वयमुद्विग्नाः।**

Mal—Noble Sir, I bow to you. Here is a seat, be you seated. (*Rakshasa does as desired*) Noble Sir, we are uneasy through Noble Sir's delayed appearance (lit. sight).

राक्षसः—कुमार, प्रयाणे प्रतिविधानमनुतिष्ठता मया कुमारात् अयमुपालम्भः अधिगतः।

Rak—Prince, adopting precaution in the matter of the march, I have come by this censure from Prince.

मलय—आर्य्य, प्रयाणे कथं प्रतिविहितमिति श्रोतुमिच्छामि।

Mal—Noble Sir, I wish to know how precautions for the march have been adopted.

राक्षसः—कुमार, एवमादिष्टा अनुयायिनो राजानः ("प्रस्थातव्य"मिति पूर्वोक्तं पठति)।

Rak—Prince, the kings following us have been thus instructed (*Repeats* the verse "प्रस्थातव्यम् &c." *as said before*).

मलय—(स्वगतम्) कथं य एव मद्विनाशेन चन्द्रगुप्तमाराधयितुमुद्यताः त एव मां परिवारयन्ति । (प्रकाशम्) आर्य्य, अस्ति कश्चित् यः कुसुमपुरं प्रति गच्छति तत आगच्छति वा ।

Mal—(*To himself*) How so ! The very men who are trying to serve Chandragupta with my ruin are surrounding me ! (*Aloud*) Noble Sir, is there any one who is going to Kusumapura or coming from there ?

राक्षसः—अवसितमिदानीं गतागतप्रयोजनम् । अल्पैरहोभिर्वयमेव तत्र गन्तारः ।

Rak—The necessity for going and coming has now ended We ourselves will go there in a few days.

मलय—(स्वगतम्) विज्ञायते । (प्रकाशम्) यद्येवं, ततः किमार्य्येण अयं सलेखः पुरुषः प्रेषितः ।

Mal.—(*To himself*) I know ! (*Aloud*) If so, then why was this man with a letter sent there by Noble Sir ?

CHARCHA

1. चिरदर्शनेन—Malayaketu sees Rakshasa for the first time then that day, and gently rebukes him for his late appearance. He suspects Rakshasa was busy with matters relating to Chandragupta.

2. प्रयाणे प्रतिविधानम् &c.—Rakshasa explains that he was busy adopting precautions for the day's march.

3. प्रतिविहितम्—भावे क्त with the nom. भवता understood.

4. कथं य एव—His suspicions are strengthened. With the

incriminating letter before him, he thought these kings were placed about his person with the object of स्वाश्रयविनाश as spoken of in the letter.

5. अवस्थितम्—अव + स्था + क्त कर्तरि ।

6. विज्ञायते—He means to say 'you are found out'. Rakshasa's वयम् in वयमेव तत्र गन्तारः means *we*, *i. e.*, our side, all of us with our troops. But Malayaketu perverts it into 'I' the plural being used for the singular by "अस्मदो द्वयोश्च" । So Malayaketu understands it as an artful expression with a double entendre, viz., 'we all will go and invest the city,' but really meaning 'I shall go as Chandragupta's minister taking Malayaketu with me in fetters'.

24. राक्षसः—(विलोक्य) अये सिद्धार्थकः ! भद्र, किमिदम् ?

Rak—(*Looking*) Ha ! Siddharthaka ! Good man, what is this ?

सिद्धा—(सवाष्पं लज्जां नाटयन्) पसीददु अमच्चो । ताडिअन्तेण—(इत्यर्धोक्ते सभयमधोमुखस्तिष्ठति) ।

Siddh—(*Acting shame—with tears*) Mercy, Minister. Being thrashed—(*At this half-utterance stands with face cast down with fear.*

मलय—भागुरायण, स्वामिनः पुरस्तात् भीतो लज्जितो वा नैष कथयिष्यति । स्वयमेव आर्यस्य कथय ।

Mal—Bhagurayana, frightened or shamed before his master, he will not tell it ; you tell it yourself to Noble Sir.

भागु—यदाज्ञापयति कुमारः । अमात्य, एष कथयति यथा—अहम् अमात्येन लेखं दत्त्वा वाचिकं सन्दिश्य चन्द्रगुप्तसकाशं प्रेषित इति ।

Bhag—As Prince commands. Minister, he says this—'Minister sent me to Chandragupta giving me a letter and speaking a verbal message.'

राक्षसः—भद्र सिद्धार्थक, अपि सत्यम् ?

Rak—Good Siddharthaka, is this true ?

सिद्धा—(लज्जां नाटयन्) एवं अतिताड़ीअन्तेण मए निवेदिदं [एवम् अतिताडामानेन मया निवेदितम्]।

Siddh—(*Acting shame*) Being severly thrashed, I said so.

राक्षसः—अनृतमेतत्। ताड्यमानः पुरुषः किमिव न ब्रूयात्।

Rak—This is false. What indeed would not a man say on being beaten ?

मलय—सखे भागुरायण, दर्शय लेखम्। वाचिकमेष भृत्यः कथयिष्यति।

Mal—Friend Bhagurayana, show him the letter. This servant will speak the verbal message.

CHARCHA

1. ताड्यमानेन—After this Dhundhi add—**न पारितं रहस्यं मया धारयितुम्।**

राक्षसः—भद्र कौटशं रहस्यमिति न खल्ववगच्छामि।

सिद्धा—ननु विज्ञापयामि ताड्यमानेन मया—।

This is inconsistent with what passes between Rakshasa and Siddharthaka from **भद्र सिद्धार्थक अपि सत्यम्** to **किमिव न ब्रूयात्** below. **न पारितं रहस्यं धारयितुम्**—I could not guard your secret—is an admission of the truth of the allegations against Rakshasa. But when Rakshasa questions him 'Good Siddharthaka is this true' his answer 'I said so under torture'. Evidently implying thereby that the charges are *not* true. Rakshasa him-

self interprets the answer in that way, for he says 'अनृतमेतत्। ताड्यमानः पुरुषः किमिव न ब्रूयात्'। Hence for consistency's sake Dhundhi's additions have to go. One of Telang's manuscripts, the one marked by him 'E' indeed omits them.

25. भागु—अमात्य, अयं लेखः।

Bhag—Minister, this is the letter.

राक्षसः—(वाचयित्वा) कुमार, शत्रोः प्रयोग एषः।

Rak—(*Reading*) Prince, this is a plot of the enemy.

मलय—लेखस्य अशून्यार्थम् आर्येण इदमप्याभरणम् अनुप्रेषितम्। तत् कथं शत्रोः प्रयोग एषः।

Mal—This jewellery too is sunt by Noble Sir, as an accompaniment to the letter ; how then is it a move of the enemy.

राक्षसः—(आभरणं निर्वर्ण्य) कुमारेण एतन्मह्यमनुप्रेषितम्, मयापि एतत् कस्मिंश्चित् परितोषस्थाने सिद्धार्थकाय दत्तम्।

Rak—(*Scrutinising the jewellery*) This was sent me by Prince, and I gave it to Siddharthaka on a certain occasion for joy.

भागु—ईदृशस्य, विशेषतः कुमारेणात्मगात्रात् अवतार्य्य प्रसादीकृतस्य इयं परित्यागभूमिः।

Bhag—Is this the place to part with such jewellery especially what has been gifted as a favoured by Prince after taking off from his own person ?

मलय—वाचिकमप्यार्येण सिद्धार्थकाच्छ्रोतव्यमिति लिखितम्।

Mal—It is also written by Noble Sir, that a verbal message has to be heard from Siddharthaka.

राक्षसः—कुतो वाचिकं कस्य वाचिकम् ? लेख एव अस्मदीयो न भवति ।

Rak—From whom is the verbal message ? To whom is the verbal message ? The letter itself is not mine.

मलय—इयं तर्हि कस्य मुद्रा ।

Mal—Whose then is this seal ?

राक्षसः—कपटमुद्रामुत्पादयितुं शक्नुवन्ति धूर्त्ताः ।

Rak—The wily can make forged seals too.

भागु—कुमार, सम्यगमात्यो विज्ञापयति । भद्र सिद्धार्थक, केनायं लिखितो लेखः ।

Bhag—Prince, justly does Minister object. Good Siddharthaka, by whom is this letter written ?

सिद्धार्थकः—(सिद्धार्थकः राक्षसमुखमवलोक्य तूष्णीमधोमुखस्तिष्ठति) ।

Siddh—(*Keeps silent with head downcast, after having looked at Rakshasa's face.*)

CHARCHA

1. अशून्यार्थम्—&c.—For **अशून्यार्थम्**, see Para 15 *ante*. Construe—**इदं लेखस्य अशून्यार्थमाभरणम् आर्येण अनुप्रेषितम्** in which **अशून्यार्थम्** is in the same case with **आभरणम्**। Do not take it as क्रि वि (adverb)। The jewellery was with yourself ; how then can you say **अन्ये: प्रयोग एषः** ?

2. परितोषस्थाने—**स्थान** is **अवकाश**। [**परितोषस्य स्थानम्** &c. See Act II, Para 39—**स्वगावादवतार्य्य भूषणानि प्रयच्छति** &c.

3. ईदृशस्य &c.—ईदृशस्य refers to the quality of the jewellery. आत्मगावात् &c., implies that irrespective of quality, the circumstances of the gift make it impossible to part with it. परित्यागस्य दानस्य भूमिः स्थानं पात्रमित्यर्थः, *i. e.*, Siddharthaka is certainly not worthy to receive it. The insinuation is that the jewellery is worth a prince's ransom ; you knew that very well and your story of gift to your servant is false.

4. कुतो वाचिकम् &c.—कुतः refers to the sender, and कस्य to the receiver of the message.

26. भागु—भद्र, अलं पुनरात्मानं ताडयित्वा । कथय ।

Bhag.—Good man, do not get tharshed.

सिद्धा—अज्ज, सअडदासेण [आर्य्य, शकटदासेन] ।

Siddh.—Noble Sir, by Sakatadasa.

राक्षसः—कुमार, यदि शकटदासेन लिखितः ततो मयैव ।

Rak.—Prince, if by Sakatadasa, then it is written by myself.

मलय—विजये, शकटदासं द्रष्टुमिच्छामि ।

Mal.—Vijaya, I wish to see Sakatadasa.

प्रतीहारी—जं कुमारो आणवेदि [यत् कुमार आज्ञापयति] ।

Warder.—As Prince commands.

भागु—(स्वगतम्) न खलु अनिश्चितार्थम् आर्य्यं चाणक्यप्रणिधयोऽभिधास्यन्ति । आगत्य शकटदासो वा सोऽयं लेख इति प्रत्यभिज्ञाय पूर्वलुप्तं प्रकाशयेत् । एवं सति सन्दिहानो मलयकेतुरस्मिन् प्रयोगे श्रद्धादरो भवेत् । भवतु एवम् । (प्रकाशम्) कुमार, न कदाचिदपि शकटदासः अमात्य-

राक्षसस्य अग्रतो मया लिखितमिति प्रतिपत्स्यते। अतः अन्यलिखितम् अस्य आनीयताम्। वर्णसंवाद एव एतं विभावयिष्यति।

Bhag.—(*To himself*) The emissaries of Noble Chanakya will not surely state anything unverified. Sakatadasa, on coming and recognising that this is that letter, might disclose past events. It turning out thus, Malayaketu, becoming suspicious, might have his faith shaken in this manouvre. Be it thus managed. (*Aloud*) Prince, Sakatadasa will never own in presence of minister that this was written by him. So let some other of his writings be produced. Resemblance of that characters will enable us to guess.

मलय—विजये, एवं क्रियताम्।

Mal.—Vijaya, let this be done.

प्रती—कुमार, मुद्दावि [कुमार, मुद्रा अपि]।

Ward.—The seal too, Prince ?

मलय—उभयमप्यानीयताम्।

Mal.—Bring both.

प्रती—जं कुमारो आणवेदि [यत् कुमार आज्ञापयति]। (इति निष्क्रम्य पुनः प्रविश्य) कुमार, इदं खु सअडदासेण सहत्थलिखिदं पत्तअं मुद्दावि [कुमार, इदं खलु शकटदासेन स्वहस्तलिखितं पत्रम् मुद्रा अपि]।

Ward.—As the Prince commands. (*Going out and re-entering.*) Prince, this is indeed a letter written by Sakatadasa with his own hand. (This is) the seal also.

मलय—(उभयमपि नाट्येन विलोक्य) आर्य, संवदन्त्यक्षराणि।

Mal—(*Acting the inspection of both*) Noble Sir, the characters agree.

राक्षसः—(स्वगतम्) संवदन्त्यक्षराणि। शकटदासस्तु मित्रमिति च विसंवदन्त्यक्षराणि। किं न शकटदासेन—

स्मृतं स्यात् पुत्रदाराणां विस्मृतस्वामिभक्तिना।
चलेष्वर्थेषु लुब्धेन न यशःस्वनपायिषु ॥ १४ ॥

Rak—(*To himself*) The characters agree (with each other), but the letters do not agree with the fact that Sakatadasa is a friend. Could it be that Sakatadasa, greedy after fleeting wealth and not after fame unfading, thought of wife and children with devotion to master ignored ?

CHARCHA

1. ताडयित्वा—'अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वा। Telang reads ताड़यितुम्।

2. न खलु &c.—Bhagurayana did not know whose writing it was. He is now in a dilemma. Sakatadasa will surely recognise the letter and will give out the facts concerning it. Malayaketu will then see through the entire plot from first to last. Not only will then the strategy fail, but the safety of the instruments of it—Bhagurayana, Bhadrabhata &c.—will be at stake (आगत्य...अयादरो भवेत्)। Hence Sakatadasa has to be kept away at any risk. But the Prince wants to see him then and there (शकटदासं द्रष्टुमिच्छामि)। What to do in the circumstances ? He makes up his mind and says भवतु एवम्—let me proceed thus. Dhundhi omits—आगत्य...अयादरो भवेत्, but this is necessary to explain what passes in the mind of Bhagurayana and leads to भवत्वेवम् &c.

3. अन्यलिखितम् &c.—सम् + वद + घञ् भावे संवादः agreement. वर्णानां संवादः। वि + मृ + णिच् + खुट् तिप् will cause to guess. 'वर्ण-

संवाद एव एतम्' अर्थं शकटदासेन लिखितमिति 'विभावयिष्यति' अनुमापयिष्यति कथयिष्यति इत्यर्थः। Sakatadasa need not be dragged up here for this matter, such a simple solution being available. This is a very clumsy suggestion. But the fool Malayaketu adopts it. The wonder is Rakshasa did not object. Sakatadasa was the only witness, and the most material witness, in this case against him. His presence was absolustely necessary. Dhundhi reads —प्रतिलिखितम् for अन्यलिखितम्। The latter means 'some other writing', and the former 'a copy of this writing.' But it is absurd to suggest to Sakatadasa to make a copy. He would recognise the letter at once, suspect foul play, and rush to the royal presence without waiting to be summoned. Hence we rejetct प्रतिलिखितम्। Also cf.—'तस्यैवापरलेख्यमूचितमिदं लेख्यं प्रलोगाय:" below. If it were a copy, the poet would have said "तस्यैव प्रतिलेख्यमूचितमिदं" &c. instead of तस्यैवापरलेख्य &c.

4. शकटदासस्तु &c.—'शकटदासो मित्रं' मम सुहृत् 'इति' अनेन वस्तुना सह 'अक्षराणि विसंवदन्ति' लेखाक्षराणि विरुद्धानि, मित्रं हि कदापि नैवं लेखिष्यति! No friend would write such an epistle to ruin me. Is then Sakatadasa no longer a friend? Has he been bribed by the enemy?

5. अन्वयः॥ विस्मृतस्वामिभक्तिना चलेषु अर्थेषु न अनपायिषु यशःसु लुब्धेन शकटदासेन पुत्रदाराणां स्मृतम् (इति) किं नु स्यात्? व्याख्या—'विस्मृता स्वामिभक्तिः' नन्दकुलानुरागः येन तादृशेन अतएव 'चलेषु' अस्थिरेषु 'अर्थेषु' वस्तुषु 'न अनपायिषु' स्थिरेषु 'यशःसु' कीर्त्तिषु 'लुब्धेन' सञ्जातलोभेन 'शकटदासेन पुत्राणां दाराणां' च 'स्मृतम्' स्वामिभक्तिं पृष्ठतः कृत्वा पुत्रस्नेहः पत्नीप्रेम च पुरस्कृतमिति 'किं नु स्यात्' तत एव वा रिपुभिः सन्धाय इमं भेदविधिम् अनुष्ठितवानसौ।

6. पुत्रदाराणाम्—पुत्राश्च दाराश्च &c., पुत्र is here supposed to be the अभ्यर्हित, becauae it is the end to which दार is the means. It is however usual to take दार as the अभ्यर्हित, cf.—"सदारापत्य" —*Sak.* Act VII. The षष्ठी is by "अधीगर्थदयेशां कर्मणि"। Dhundhi reads पुत्रदारस्य—say "सर्वो द्वन्द्वो विभक्तया एकवद्भवतीति वक्तव्यम्"।

7. विस्मृत &c.—Note that here in the व्याख्या we say विस्मृता स्वामि-

भक्तिः &c. with विस्मृता in the feminine, while under "नेदं विस्मृत-भक्तिना &c. we explain विस्मृतं भक्तिः with विस्मृतं in the neuter. The reason for this difference is that भक्ति being of the प्रियादि class, the पूर्वपद does not take पुंवद्भाव in a बहुव्रीहि ; but स्वामिभक्ति is not of the प्रियादि class. So with it पुंवद्भाव is available.

27. अथवा कः सन्देहः—

मुद्रा तस्य कराङ्गुलिप्रणयिनो सिद्धार्थकस्तत्सुहृत्
तस्यैवापरलेख्यसूचितमिदं पत्रं प्रयोगाश्रयम् ।
सुव्यक्तं शकटेन भेदपटुभिः सन्धाय सार्द्धं परैः
भर्तृस्नेहपराङ्मुखेन कृपणं प्राणार्थिना चेष्टितम् ॥ १५ ॥

Or what doubt (can be there in the matter) ?—This writing, the basis of the plot, is surely his, indentified (as it is) by another writing ; the seal is a companion of the fingers of his hand . Siddharthaka is his friend. Evidently, Sakata, desiring the life (of his wife and children) and with face averted from master's kindness, has thus meanly acted leaguing with enemies that are clever in (bringing about) a rupture.

अन्वयः ॥ प्राणार्थिना भर्तृस्नेहपराङ्मुखेन शकटेन भेदपटुभिः परैः सार्द्धं सन्धाय कृपणं चेष्टितम् (इति) सुव्यक्तम् । मुद्रा तस्य कराङ्गुलिप्रणयिनी, प्रयोगाश्रयम् अपरलेख्यसूचितम् इदं पत्रं तस्यैव, सिद्धार्थकः तत्सुहृत् । व्याख्या—'प्राणार्थिना' पुत्रदाराणां जीवनमिच्छता अतएव सम्प्रति क्लेशप्रदो यो 'भर्तृस्नेहः' स्वामिभक्तिः तस्मादनुराग इत्यर्थः तेन 'पराङ्मुखेन' हतादरेण 'शकटेन' शकटदासेन 'भेदे' विश्लेषणे गृहविवादे इत्यर्थः 'पटुभिः' निपुणैः 'परैः सार्द्धं' शत्रुभिः सह 'सन्धाय' कृतसन्धिः सन् 'कृपणं चेष्टितं' हीनमाचरितं मित्रं मां जातविश्वासम् अतिसन्धाय इति 'सुव्यक्तं' परिस्फुटमेव । कुत इत्याह—'मुद्रा' इयम् अङ्गुलिमुद्रा 'तस्य' शकटस्य 'कराङ्गुलिषु प्रणयिनी' साभिलाषा तत्रैव नित्यलग्ना अन्यैर्दुष्प्रापा तत् शकटेनैव मुद्रितो लेखः । भवतु, अनर्पिताचरं पत्रं शकटेन मुद्रितं पश्चात्तत्र भेदार्थिना केनापि कूटं लिखितम्

इत्यपि स्यात्। न इत्याह—'प्रयोगस्य' शत्रुकृतभेदोपायस्य 'आश्रयम्' आलम्ब: [क्लीवत्वं चिन्त्यम्] 'अपरेण' अन्येन लिखेन' वर्णयोजनया शकटस्यैव इति भाव: 'सूचितं' शकटस्य इति कथितम् 'इदं पत्रं' तस्यैव' शकटस्यैव नान्यस्य कस्यचित्। तथापि पत्रेण चन्द्रगुप्तो नाभिप्रेत इति यदि स्यात्। न इत्याह—एष पत्रवाहक: 'सिद्धार्थक: तस्य' शकटदासस्य 'सुहृत्' मित्रं तत् शकटस्य प्रोत्साहनं विना नायमेवं वदेत्। एवं सति परोपज्ञापदूषित: शकट इति क: सन्देह: इति भाव:।

CHARCHA

1. मुद्रा तस्य &c.—The signet-ring was handed over to Sakatadasa for use in his transactions ; cf.—"अनयैव मुद्रया स्वाधिकारे व्यवहर्त्तव्यम्"—Act II, Para 42.

2. अपरलेख्य &c.—लिख + ण्यत् कर्मणि लेख्यम् writting. Now see व्याख्या।

3. पत्रम्—Telang reads लेख्यम् which means the same.

4. प्रयोगाश्रयम्—प्रयोग is means, *i. e.*, any one of the four—सामन्, दान, भेद, दण्ड। Now see व्याख्या। The means here is of course भेद। आश्रय is masculine. प्रयोगाश्रय: would be a good substitute as it preserves the metre also. Cf.—however, उपायनिलये Act I, Sl. 4, in which निलय is used in the feminine. प्रयोग: आश्राय: अस्य does not remove the difficulty. It does not suit the context , because the प्रयोग, *i. e.*, भेद is not basis of the पत्र। It is the पत्र which is the basis of the प्रयोग, *i. e.*, on which the भेद is based. पत्रमवलम्ब्य प्रयोग: प्रवर्त्तते।

5. शकटेन—शकट is a contraction for शकटदास like भीम for भीमसेन।

6. भर्त्तृस्नेह &c.—परा away. परा अञ्चति इति परा + अञ्च + क्विप् कर्त्तरि पराच् (प्रातिपदिक)। पराक् मुखमस्य पराङ्मुख: wtih face averted ; तेन। "पदव्यवायी च" इति यत्वनिषेध:।

7. प्राणार्थिना—प्राण refers to the life of son and wife. Telang thinks that by threatening the life of son and wife his own life too was threatened though indirectly. The reference is to previous incidents when Sakata was condemned. It is then that he entered with a compact with the enemies for his ownlife played into the hands of his enemies by allowing himself to be led to Rakshasa.

28. मलय—(विलोक्य) आर्य "अलङ्कारत्रयं श्रीमता यदनुप्रेषितं तदुपगतम्" इति यल्लिखितं तन्मध्यात् किमिदमेकम् ? (निर्वर्ण्य आत्मगतम्) कथं तातेन धृतपूर्वमिदमाभरणम् । (प्रकाशम्) आर्य्य, कुतोऽयमलङ्कारः ?

Mal.—(*Noticing*) Noble Sir, (regarding) "the pieces of jewellery which have been forwarded by the blessed one, are received" as written (here) is this one of the three ? (*Eying closely—to himself*) How so ! This piece of jewellery was previously worn by father. (*Aloud*) Whence is this ornament, Noble Sir ?

राक्षसः—वणिग्भ्यः क्रयादधिगतः ।

Rak.—Got by purchase from merchants.

मलय—विजये अपि प्रत्यभिजानासि भूषणमिदम् ।

Mal.—Vijaya, do you recognise this jewellery ?

प्रती—(निर्वर्ण्य सवाष्पम्) कुमार, कहं ण पच्चभिजाणामि इदं सुगिहीदणामहेएण पव्वदीसरेण धारिदपुव्वं [कुमार, कथं न प्रत्यभिजानामि ? इदं सुगृहीतनामधेयेन पर्वतेश्वरेण धारितपूर्वम्]

Ward.—(*Eying closely—with tears*) How cold I not recognise it, Prince ? This was previously worn by Parvatesvara of auspicious name

मलय—(सवाष्पम्) हा तात—

एतानि तानि तव भूषणवल्लभस्य
गात्रोचितानि कुलभूषण भूषणानि ।
दैवः शोभितोऽसि मुखचन्द्रकृतावभासो
नक्षत्रवानिव शरत्समयप्रदोषः ॥ १६ ॥

Mal.—(*With tears*) Alas! Father, the ornament of your race, fond of jewellery, these are those ornaments suiting your person, decorated with which you appeared, with light furnished by your moon-like face, like dusk in the autumn-season decorated with stars.

CHARCHA

1. यल्लिखितम्—Written in the letter. See *Ante.*

2. तन्मध्यात्—तत् refers to अलङ्कारत्रय। बौद्धमपादानमपेक्ष्य ५मी।

3. प्रत्यभिजानामि—प्रति + अभि + ज्ञा + लट्मि। प्रत्यभिज्ञा is recognition. Hence the root is स्मरणार्थ। Thus apparently the rule "संप्रतिभ्यामनाध्यने" should have given the आत्मनेपद, because आध्यान being उत्कण्ठापूर्वकस्मरण, the rule has scope if *mere* स्मरण is implied as in this case. The fact is, the rule provides for सम् and प्रति only, not for अभि also which here separates प्रति from ज्ञा; consequently the rule does not apply. अभिना व्यवधानात् नात्मनेपदम्। Cf.—"कमिह समुपस्थास्यति विधिः"—*Sak.* Act I, where the intervention of उप bars the आत्मनेपद though सम् is there.

4. सुगृहीतनामधेयेन—See *ante*, Act I.

5. धारितपूर्वम्—Same as धृतपूर्वम्। Only we have स्वार्थे णिच् added.

6. अन्वयः॥ हे कुलभूषण, भूषणवल्लभस्य तव गात्रोचितानि एतानि तानि भूषणानि यैः शोभितः सुखचन्द्रकृतावभासः नक्षत्रवान् शरत्समयप्रदोष इव असि। व्याख्या—हे 'कुलस्य' अस्मद्वंशस्य 'भूषण' अलङ्कारस्वरूप तात 'भूषणानि' अलङ्काराः 'वल्लभानि' प्रियाणि यस्य तादृशस्य प्रियमण्डनस्य 'तव गात्रस्य' वपुषः 'उचितानि' योग्यानि परिचितानि वा 'एतानि तानि' प्रसिद्धानि 'भूषणानि' आभरणानि 'यैः शोभितः' अलङ्कृतः त्वं चन्द्रतुल्ये सुखे कृतः' विहितः 'अवभासः' उत्फुल्लता यस्य तादृशो भूत्वा 'सुखतुल्येन चन्द्रेण कृतः अवभासः' दीप्तिः यस्मै तादृशः अपि च 'नक्षत्रवान्' तारकाभिरिष्टतः 'शरत्समयस्य' शरत्कालस्य 'प्रदोषः' रजनीमुखमिव 'असि' अभूः।

7. भूषण &c.—वल्लभ is प्रिय। This is a general term including *all* that please. भूषण, jewellery, specifies the particular object

of pleasure. Hence भूषण is the विशेषण and वल्लभ the विशेष्य here. Thus the बहुव्रीहि (see व्याख्या) is quite regular.

8. अभि—This is for अभूः in the past. वर्त्तमानसामीप्ये वर्त्तमानम्।

9. सुखचन्द्र &c.—This applies to both तात and प्रदोष। तातपक्षे —सुखं चन्द्र इव, उपमितकर्मधा—। Now see व्याख्या। Decoration over, a sense of satisfaction was felt, and the face beamed with joy (कृतावभासः)। प्रदोषपक्षे—सुखतुल्यचन्द्रः, कर्मधा—like शाकपार्थिव। तेन कृतावभासः lighted up by the moon which looked like the face of प्रदोष। पर्वतक and प्रदोष are compared, both being dark. भूषण compares with नक्षत्र and the सुख with चन्द्र। शरत्समय implies a clear sky so that the moon, which is here the face of प्रदोष, is visible

29. राक्षसः—(स्वगतम्) कथं पर्वतेश्वरेण धृतपूर्वाणि इत्याह। व्यक्तमेवास्य भूषणानि। एतान्यपि चाणक्यप्रयुक्तेन वणिग्जनेन अस्मासु विक्रीतानि।

Rak.—(*To himself*) How so! He says, they were previously worn by Parvatesvara! Clearly these are his jewellery. These again were sold to me by merchants set on by Chanakya.

मलय—आर्य्य तातेन धृतपूर्वाणां विशेषतश्चन्द्रगुप्तहस्तगतानां वणिग्भ्रः क्रया (दा?) धिगत इति न युज्यते। अथवा युज्यते एवैतत्। कुतः—

चन्द्रगुप्तस्य विक्रेतुरधिकं लाभमिच्छतः।
कल्पिता मूल्यमेतेषां क्रूरेण भवता वयम् ॥ १७ ॥

Mal.—Noble Sir, 'got by purchase from merchants' does not fit in with what had been previously worn by father, especially what fell into the hands of Chandragupta. Or

perhaps it does fit in. (Do you ask) How ?—By you, the heartless, ourselves are the price offered for these unto Chandragupta the seller, coveting a big profit.

CHARCHA

1. व्यक्तमेव &c.—एव is misplaced. Construe व्यक्तम् अस्यैव भूषणानि ।

2. एवान्यपि &c.—Telang takes this as प्रकाशम् । But then एतान्यपि &c., becomes an *explanation* of how hawkers could sell such priceless articles. The explanation is uncalled for now, the matter being already explained. and becomes suspicious. We have therefore omitted प्रकाशम् following Telang's manuscripts marked M. R. and G. एतान्यपि &c. is a remark to himself (स्वगत) due to the flood of light suddenly thrown on the entire transaction by the lamentations of Malayaketu. For the incidents see Act I, "प्रतिगृह्य आभरणानि भवद्भिरहं द्रष्टव्यः" &c. and "परितोष्य विक्रेतारं गृह्यन्ताम्"—Act II. Para 44.

3. तातेन धृतपूर्वाणाम् &c.—This is a comment on Rakshas's explanation above, viz., "वणिग्भ्यः क्रयादधिगतः" । Hence we prefer our reading to Telang's वणिग्वक्रयः because ours follows more closely the wording of Rakshasa's explanation. चन्द्रगुप्त &c implies that it is not conceivable that the king would sell them to vendors (who in their turn sold to you). The insinuation is, you yourself murdered Parvatesvara.

4. अन्वयः ॥ अधिकं लाभमिच्छतः विक्रेतुश्चन्द्रगुप्तस्य क्रूरेण भवता वयमेतेषां मूल्यं कल्पिताः । व्याख्या—'अधिकं लाभं' प्रकृष्टां वृद्धिम् 'इच्छतः' प्रार्थयमानस्य 'विक्रेतुः' विनिमयकामस्य 'चन्द्रगुप्तस्य' मौर्यरूपस्य वणिजः 'क्रूरेण' नृशंसेन 'भवता वयम् एतेषाम्' अलङ्काराणां 'मूल्यं कल्पिताः' पणत्वेन निरूपिताः । एभिर्भूषणैर्वंशोत्कृतत्वं महिनाशे व्यवसितोऽसि इति तिरस्कारः ।

30. **राक्षसः—(सगतम्) अहो सुश्लिष्टोऽभूत् प्रत्ययोगः । कुतः—**

लेखोऽयं न ममेति नोत्तरमिदं मुद्रा मदीया यतः
सौहार्दं शकटेन खण्डितमिति श्रद्धेयमेतत् कथम् ।
मौर्य्येभूषणविक्रयं नरपतौ को नाम सम्भावयेत्
तस्मात् संप्रतिपत्तिरेव हि वरं न ग्राम्यमत्रोत्तरम् ॥ १८ ॥

Rak.—(*To himself*) Ha ! The enemie's plot was well laid. For, "This is not my letter" is no answer, because the seal is mine. How is it believable that friendship has been severed by Sakata ? Who indeed would think of the sale of ornaments in Maurya the king ? So in this matter admission indeed is preferable, not the ordinary reply (*i. e.*, the usual defence).

CHARCHA

1. सुश्लिष्ट: &c.—सुष्ठु श्लिष्टः, *i. e.*, the parts fit in well with one another. For अभूत् in the past, cf.—"नैनां पश्यसि येनैवमवादीः"—*Sak.* II.

2. अन्वयः ॥ अयं लेखो मम न इति इदं नोत्तरं यत मुद्राः मदीया । शकटेन सौहार्दं खण्डितम् इति एतत् कथं श्रद्धेयम् ? नरपतौ मौर्य्ये को नाम भूषणविक्रयं सम्भावयेत् ? तस्मात् अत्र संप्रतिपत्तिरेव हि वरं, ग्राम्यम् उत्तरं न । व्याख्या—शकटदासेन लिखितो लेख इति स्थिते हौ पक्षौ—स्वमतेन लिखितम् अमत्सम्मत्या वा । तत्र 'अयं लेखः' एतत् पदं 'मम न' न हि मन्मतेन लिखितम् 'इति इदं न उत्तरं नैव मे युक्तं प्रतिवचनम् । कुतो न युक्तमित्यत्र हेतुमाह—'यतः' यस्मात 'मुद्राः' पदस्थम् अङ्गुलिमुद्राङ्कनं 'मदीया' मन्नामलाञ्छिता । नैतत् किञ्चित्, मुद्रा तदायत्ता तत् तया शकटेनैव मुद्रणं न दुष्करम् । मित्रस्नेहं विस्मृत्य तदेव तेन कृतमिति चेत् 'शकटेन सौहार्दं खण्डितं' मित्रता परिहृता इति एतत कथं श्रद्धेयं केन प्रमाणेन विश्वास्यम् ? प्राणार्थिना तेन सौहार्दं खण्डितमिति यन्मयामन्यते तत्र प्रमाणाभावः । पत्रान्तरे मया धृतात् अस्मादलङ्कारादेव परित्यक्तं ममैव सम्मत्या लिखितो लेखः चन्द्रगुप्तस्याभिप्रेत इति । यच्च मयोक्तं वणिगग्र्यः क्रयादधिगतमिति तत्र 'नरपतौ मौर्य्ये' राजनि चन्द्रगुप्ते 'को नाम' जनः 'भूषणविक्रयं अलङ्कारपणनं' 'सम्भावयेत' विश्वस्यात्? न कोऽपि । 'तस्मात्' हेतोः 'अत्र' अस्मिन् प्रस्तावे 'संप्रतिपत्तिरेव हि' अभ्युपगम एव लेखोऽयं मम

इति स्वीकार एव 'वरं' याच्यतरा 'याच्ञा' जानपदम् अकुशलमित्यर्थः 'उत्तरं न' लेखोऽयं न ममेति प्रतिवचनं न याच्यम्। तव हि जनो मन्यैत क्रूरमाचरितम् अनृतेन च क्रादयितुमिच्छते इति।

3. मम—This does not mean *mine*, but *written at my instance.* Rakshasa was not the writer, this is proved.

4. सौहार्दम्—सुहृदो भाव इति सौहार्दम्. "हृदयसिन्भ्यो पूर्वपदस्य च" इत्यभयपदवृद्धिः।

5. शक्येयम् &c.—शकटः सौहार्दं ख्यख्यितवान् इति शकटेन सौहार्दे खख्यितम्। No one would believe in this, becauce this would be a bare statement unsupported by evidence.

6. मौर्ख्ये &c.—Here the idea of charging Sakatadasa is relinquished and the evidence against himself is being scrutinized. The piece of jewellery, he is wearing, incriminates him. This was on Parvataka's person and passed into the hands of Chandragupta after that prince was dead. How could it be with Rakshasa? Evidentiy it came from Chandargapta as price for the head of Malayaketu. Rakshasa's story that he bought it from hawkers is incredible, because a king, especially one of the status of Chandragupta, would never think of selling jewellery.

7 संप्रतिपत्तिरेव &c.—He prefers to plead guilty, because a defence would only expose him to ridicule. People would say that treason is being concealed with lies. This scene may be compared with the trail of Charudatta in the मृच्छकटिक। Cf.—मया खलु नृशंसेन &c.—मृच्छकटिक Act IX.

31. **सलय—एतदार्यं पृच्छामि।**

Mal.—I ask Noble Sir this.

राक्षसः—(सवाष्पम्) कुमारय आर्यस्तं पृच्छ। वयमिदानीमनार्याः संवृत्ताः।

Rak.—(*With tears*) Prince, ask him who is noble; we have now turned ignoble.

मलय—

मौर्योऽसौ स्वामिपुत्रः परिचरणपरो मित्रपुत्रस्त्वहं
दाता सोऽर्थस्य तुभ्यं स्वमतमनुगतस्त्वं तु मह्यं ददासि ।
दास्यं सत्कारपूर्वं ननु सचिवपदं तत्र ते स्वाम्यमत्र
स्वार्थे कस्मिन् समीहा पुनरधिकतरे त्वामनार्यं करोति ॥१९॥

Mal.—Maurya there is your master's son ; I am your friends' son in constant attendance. Of wealth he it is who is the giver unto you , but unto me you give following your own humour ; There your office as a minister is but slavery preceded by honour, here mastery. Regard for which weightier self-interest then does make you ignoble.

CHARCHA

1. वयमिदानीम् &c.—"We have turned ignoble" is an admisson of guilt—the संप्रतिपत्ति thought of above. It sticks into the throat of his honourable self ; hence सबाष्पम् ।

2. अन्वयः ॥ तव असौ मौर्यः स्वामिपुत्रः ; अहं परिचरणपरो मित्रपुत्रः । अर्थस्य स तुभ्यं दाता ; त्वं तु स्वमतमनुगतः मह्यं ददासि । तत्र ते सचिवपदं सत्कारपूर्वं दास्यं ननु ; अत्र स्वाम्यम् । अधिकतरे कस्मिन् स्वार्थे समीहा त्वां पुनः अनार्यं करोति ? व्याख्या—'तव' सम्बन्धे 'असौ' त्वया आश्रयत्वेन चिन्तितो 'मौर्यः' सुरापुत्रचन्द्रगुप्तः 'स्वामिनः' प्रभोः नन्दस्य 'पुत्रः' अतः प्रभुरिव सेव्यः, 'अहं परिचरणपरः' सेवानिरतः 'मित्रपुत्रः' सुहृत्सुत स्वसुतः अतः इव सेवकः । तव दास्यम् अत्र स्वाम्यमिति भावः । 'अर्थस्य' धनस्य सम्बन्धे 'स' मौर्यः 'तुभ्यं दाता' स्वमतेन प्रतिपादयिता 'त्वं तु' पश्चान्तरे त्वमिह 'स्वमतम्' आत्माभिरुचिम् 'अनुगतः' आश्रितः' सन् 'मह्यं ददासि' प्रतिपादयसि । धनेषु तव परतन्त्रता अत्र स्वतन्त्रता । एवं सति 'तत्र' चन्द्रगुप्ताश्रये ते 'सचिवपदं' अमात्याधिकारः 'सत्कारः' पूजा 'पूर्वं' यस्मिन् तथाविधं 'दास्यं' ननु' भृत्यता एव नाधिकं किञ्चित्, 'अत्र' इह मत्सकाशे 'स्वाम्यं' प्रभुता । एतावता अर्थैव ते स्वार्थं पश्यामि न तत्र, तथापि त्वं तत्रैव उत्कण्ठसे । ननु पृच्छामि तत्र 'अधिकतरे' स्वाम्यादपि लोभनीये 'कस्मिन् स्वार्थे' कौटिल्ये आत्मप्रयोजने 'समीहा' अभिलाषः 'त्वां पुनः' आर्यमपि त्वाम् 'अनार्यं' हीनवृत्तं 'करोति' कुतो हेतोः यूयमिदानीम् अनार्याः संवृत्ताः ब्रत यद्यन्तु चिन्तयन्तोऽपि न विद्मः ।

3. मौर्य्योऽसौ &c.—Here you are being waited upon, there you have to wait upon . with me your movements are free, there they ary restricted ; thus from considerations of personal liberty you should prefer to stay here.

4. दाता &c.—Sacrifice of liberty may be agreeable to some in return for money. But in that matter also the funds here are in your control, while there they are beyond your reach.

5. दास्यम् &c.—In a word you have slavery there and mastery here. Certaintly one cannot prefer slavery to mastery. Cp "It is better to reign in Hell then serve in heaven".

6. स्वार्थे कस्मिन् &c.—We are thus at a loss to see what tempts you there. Apparently this vile attempt on your part lacks motive. Nothing अधिकतर in comparison with स्वान्य exists in the world.

32. राक्षसः—कुमार, एवम् अभियुक्तव्याहारिणा भवतैव मे निर्णयो दत्तः। कुतः (मौर्य्योऽसौ स्वामिपुत्र इति युष्मदस्मदोर्व्यत्ययेन पठति)।

Rak.—Prince, an answer is offered me by yourself, speaking so nobly. (Do you ask) How ? (Repeats 'मौर्य्योऽसौ स्वामिपुत्रः' &c. with an interchange of युष्मद् and अस्मद्)।

CHARCHA

1. अभियुक्तव्याहारिणा &c.—अभियुक्तम् उदारं साधु व्याहरति इति साधुकारिणि कर्त्तरि णिनिः। Cf.—"अभियुक्त वादितः"—*Sak.* Act VI. निर्णयः is conclusion, *i.e.*, a decided answer. This is with reference to the indecision expressed by Malayaketu's स्वार्थे कस्मिन् समीहा। कस्मिन् समीहा इति वितर्कगर्भं भवत्प्रश्नं 'एवम्' अनेन प्रकारेण मौर्य्योऽसौ इत्यादिना पद्येन 'अभियुक्तम्' आर्य्यजनोचितं 'व्याहरति' यः ताहृशेन 'भवता एव' स्वयं त्वया 'मे' मम 'निर्णयो दत्तः' भवदितर्के निश्चय उक्तः। आर्य्यो भवान् अतः आर्य्योचितेन चेतसा अत्र मे स्वार्थसमीहां न पश्यति, तत् न स्वं व समीहा इति निर्णयः। तेन च अपापोऽहम् इत्यायाति, त्वच्च अत्र भिः परिवारितः मोहमासादित इति भावः। You have answered your own question. There is no motive, hence the charge fails. The absence of motive is stated by you in

noble words, I need not add anything to them. Telang reads अयुक्तव्याहारिणा (अयुक्तं यथा तथा व्याहरति इति—speaking unjustly). This hardly agrees with facts. Malayaketu's speech मौर्य्योऽसौ &c. is perfectly just. The reference is to *this* speech and not to anything that has gone before it, as is obvious from एवम् in Telang's एवमयुक्तव्याहारिणा &c.

2. कुतः—This explains how भवतैव निर्णयोदत्तः । Rakshasa brings out the निर्णय from the speech of Malayaketu himself which he repeats interchanging युष्मद् and अस्मद्, thus :—

मौर्य्योऽसौ स्वामिपुत्रः परिचरणपरा मित्रोपुत्रो मम त्वं
दाता सोऽर्थस्य मत्तः स्वमतमनुगतोऽहं तु तुभ्यं ददामि ।
दास्ये सत्कारपूर्वं ननु सचिवपदं तव मे स्वाम्यमत्र
स्वार्थे कस्मिन् समीक्षा पुनरधिकतरे मामनाद्य करोति ॥ १९ ॥

Translation and Expl. are left to the reader.

3. युष्मदस्मदोः &c.—युष्मच्च अस्मच्च युष्मदस्मदौ । तयोरन्वयः विपर्य्यासः, तेन । For कुतः, Telang reads भवतुतव को दोषः—Nevr mind, you are not to be blamed. This is in reference to the अयुक्तव्याहार of which Telang speaks. In that case the repetition of मौर्य्योऽसौ &c. becomes irrelevant, because it does not say who is to blame as it ought to do after having absolved Malayaketu of blame. Rakshasa should have either kept silence after the absoultion or should have said something to locate the blame. Besides, of मौर्य्योऽसौ &c. is really an अयुक्तव्याहार it is equally so also when coming from Rakshasa with an intercharge of युष्मद् and अस्मद् । Malayaketu however takes Rakshasa's repetition of the verse as a defence, for he turns round with the retort इदमिदानीं किम् । Hence we have rejected Telang's reading.

33. मलय—(लेखमलंकरणस्थगिकाञ्च निर्दिश्य) इदमिदानीं किम् ।

Mal.—(*Pointing at the letter and the parcel of jewellery*) What then is this ?

राक्षसः—(सवाष्पम्) विधिविलसितम्। कुतः—

भृत्यत्वे परिभावधामनि सति स्नेहात् प्रभूणां सतां
पुत्रेभ्यः कृतवेदिनां कृतधियां येषां न भिन्ना वयम्।
ते लोकस्य परीक्षकाः क्षितिभृतः पापेन येन क्षता-
स्तस्येदं विपुलं विधेर्विलसितं पुंसां प्रयत्नच्छिदः॥ २॥०

Rak—(*With tears*) Fate's play. (Do you ask) Whence? This is a vast display by Fate that cuts short human efforts—Fate the villain by whom were slain those kings who could see through men; who, being of trained intellect, were appreciators of service and were good masters to whom, through kindness, we were not different from sons, servitude, the abode of insults, notwithstanding.

CHARCHA

1. इदमिदानीम् &c.—This is a retort to Rakshasa who has ended with pressing the absence of motive as a ground to disbelieve the story against him. Malayaketu points at the letter and parcel of jewellery. If you have no motive why send this to Chandragupta? The fact is you *have* a motive which is at present hidden from us, but I say own it up.

2. विधि &c.—विलसितं विलासः भावे क्तः। विधेः विलसितम्। This is more than I know. Ask Fate. It is remarkable that even at this critical moment Rakshasa refrains from accusing Bhagurayana, Siddharthaka, Bhadrabhata &c. of plotting against him though they were well-known officers at the court of Chandragupta and necessarily known to Rakshasa who was not such a fool as not to see the hand of Bhagurayana &c. in the matter. More than once he has suspected these people, cf.—"पूर्णं मत्तादबलं चन्द्रगुप्तबलैः"—*Para* 19.

3. अन्वयः॥ कृतधियां कृतवेदिनां येषां सतां प्रभूणां वयं परिभावधामनि भृत्यत्वे सति स्नेहात् पुत्रेभ्यः भिन्ना न, ते लोकस्य परीक्षका चिन्तिभृतः येन पापेन चता: तस्य पुंसां प्रयत्नच्छिदः विधेः इदं विपुलं विलसितम्। व्याख्या—'कृता' समाहिता 'धीः' बुद्धिः येषां तेषां समाहितचित्तानाम् अतएव 'कृतं' कर्म 'विदन्ति' जानन्ति ये तादृशानां गुणज्ञानां 'येषां सता प्रभूणां' नृपोत्तमानां सम्बन्धे 'वयम्' अहं परिभावस्य अवमानस्य यत् 'धाम' आस्पदं तस्मिन् 'भृत्यत्वे' सेवकत्वे 'सति' तादृशस्यापि भृत्यभावस्य अनादरेण 'स्नेहात् पुत्रेभ्यः भिन्ना न' पुंत्ववदाहृताः 'ते' तथाविधाः 'लोकस्य' 'पुरुषस्य 'परीक्षकाः' विनिर्णयसमर्थाः 'चिन्तिभृतः' भूपालाः नन्दः इत्यर्थः [गौरवे बहुवचनम्] 'येन पापेन' दुराचारेण विधिना 'चताः' नाशिताः 'तस्य' तथाविधस्य 'पुंसां' पुरुषाणां 'प्रयत्नं' चेष्टां यः 'छिनत्ति' उत्सादयति तस्य 'विधेः' दैवस्य 'इदम्' एतत् लेख्यालंकरणादिहारेण 'विपुलं' विलसितं महतो किल लीला। तत् दैवमेव पृच्छ "इदमिदानीं किम्" न माम्। अन्यथा कृतः प्रयत्नः मया, अन्यथा पुनः परिणमितो दैवेन इति भावः! अत्र विधेः इति चाणक्यं प्रति कटाक्षः। चाणक्यस्य प्रयोग एष इति फलितम्।

4. भृत्यत्वे &c.—परिभव or परिभाव by "परौ भुवो वेज्ञाने"। अनादरे ञौ। भृत्यत्वमनादृत्य = सति भृत्यत्वे।

5. प्रभूणाम्—Refers to Nanda. गौरवे बहु—। Nanda's sons are excluded, because with reference to them पुत्रेभ्यो न भिन्नाः becomes meaningless as they had no issue.

6. सताम्—The insinuation is—you are not सत्।

7. कृतवेदिनाम्—&c.—कृतधी is one of trained intellect, कृतवेदिन् is ono who does not forget services received; because कृतधी therefore कृतवेदिन्। I served my masters and my services were appreciated. The point is, you are neither कृतधी, nor कृतवेदिन्। Hence you are insulting me in this manner. अत्र मे परिभावधाम भृत्यत्वमेव।

8. लोकस्य परीक्षकाः—Telang renders by—good judges of men. They knew how to find out the genuine and the fraud you are not so; hence cannot distinguish between me and Bhagurayana's party.

9. पुंसाम् &c.—I made the effort and in the right direc

tion, but Fate was against me. This is another way of saying what he has already said, viz. शठो: प्रयोग एष—all this is Chanakya's trickery.

34. मलय—(सरोषम्) किमद्यापि निह्नूयते एव ? विधेः किलैतत् व्यवसितं न लोभस्य ! अनार्य्य—

कन्यां तीव्रविषप्रयोगविषमां कृत्वा कृतघ्न त्वया
विश्रम्भप्रवणः पुरा मम पिता नीतः कथाशेषताम् ।
संप्रत्याहितगौरवेण भवता मन्त्राधिकारे रिपौ
प्रारब्धाः प्रलयाय मांसवदहो विक्रेतुमेते वयम् ॥ २१ ॥

Mal.—(*Angrily*) What ! Even now being concealed ! This is indeed the play of Fate not of Greed ! ! Ignoble man—By you, the traitor, previously, with a girl rendered dreadful through the application of a virulent poison, my father, who was prone to be trusting (Or—under control through confidence) was led to become one whose memory alone remains. Now (again), esteem having been placed in you in the department of counsel, our hapless selves are, alas ! going to be sold by you like meat to the enemy for utter extinction.

CHARCHA

1. किमद्यापि &c.—निह्नूयते being concealed प्रच्छाद्यते, *i. e*, the truth is being concealed. अरुचौ किल । The speech is a taunt. No one will believe you, when you say this is due to Fate. Say it is the play of *greed.*

2. अन्वयः ॥ हे कृतघ्न, पुरा त्वया तीव्रविषप्रयोगविषमां कन्यां कृत्वा विश्रम्भप्रवणः मम पिता कथाशेषतां नीतः । संप्रति अहो मन्त्राधिकारे आहितगौरवेण भवता एते वयं प्रलयाय रिपौ मांसवत् विक्रेतुं प्रारब्धाः । व्याख्या—हे 'कृतघ्न' उपकारकहेधिन् राक्षस 'पुरा' इतः पूर्वं 'त्वया तीव्रस्य' दारुणस्य 'विषस्य प्रयोगेण' नित्यसेवनेन 'विषमां' सौरां 'कन्यां कृत्वा' विषकन्यां विधाय 'विश्रम्भे' विश्वासे 'प्रवणः' उन्मुखः अनाशङ्क

इत्यर्थः 'मम पिता' पर्वतेश्वरः 'कथाशेषता' नाममात्रावस्थितत्वं 'नीतः' प्रापितः मृत्युमापादित इत्यर्थः। 'संप्रति' अधुना 'अहो' खेदे पूर्ववृत्तं तं अजानद्भिरस्माभिः 'मन्त्यस्य' मन्त्रणकार्यस्य यः 'अधिकारः' नियोगः तस्मिन् विषये 'आहितं' स्थापितं 'गौरवम्' आदरः यस्मिन् तथाविधेन सादरमाहूय मन्त्रकर्मणि व्यापारितेन अतएव कृतविश्वासेन 'भवता एते' विश्वस्ता 'वयं प्रलयाय समूलघाताय 'रिपौ' शत्रौ चन्द्रगुप्ते 'मांसवत्' मांसमिव निर्मंसं 'विक्रेतुं' प्रारब्धाः' पणायितुं प्रक्रान्ताः। विश्वस्त पितरं निपात्य पुत्रमपि विश्वस्त निपातयितुमुद्यतोऽसि इति भावः।

3 कन्याम् etc.—This information has onlyjust now reached Malayaketu. The impression previously was that Chanakya had killed Parvatesvara.

4. कथाशेषताम्—कथा नाममात्रं शेषः अस्य कथाशेषः one whose memory alone survives, *i. e.*, one dead. Cf. "देवव्रते यशःशेषे"।

5. आहितगौरवेण &c.—आहित placed. गौरव weight. I attached great weight to your counsels and requested you to advise me in everything relating to this expedition. Dhundhi explains differently thus—'मन्त्राधिकारे' मौर्य्यस्य मन्त्रिते 'आहितगौरवेण, धृताभिलाषेण इत्यर्थः। Telang follows and renders—'placing a high value on the counsellorship.' But supposing Rakshasa had indeed done so, wherein lies the censure? Disregard for other's interests to serve one's own, is the rule with worldly men and it would be surprising if Rakshasa furnished an exception. Our interpretation lends point to the censure. We trusted you to counsel us and you betrayed the trust by counselling our ruin. This is quite in keeping with your previous history of which we had no knowledge *then*. Father trusted you and suffered, I am about to suffer too through trusting you. The same संप्रति as पुरा। The leopard does not change his spots! You live by betrayal of trust. Cf.—"नाहंविश्रम्भघाती राक्षसः" below.

35. राक्षसः—(स्वगतम्) अयमपरो गण्डस्योपरि स्फोटः।

(प्रकाशम्—कर्णौ पिधाय) शान्तं :पापं शान्तं पापम् । नाहं पर्वतेश्वरे विषकन्यां प्रयुक्तवान् ।

Rak—(*To himself*) This is a fresh boil on the carbuncle. (*Aloud—blocking the ears*) Begone sin ! Begone sin ! I did not set the poison-girl on Parvatesvara.

मलय · केन तर्हि व्यापादितस्तातः ?

Mal.—By whom then was father killed.

राक्षसः—दैवमत्र प्रष्टव्यम् ।

Rak.—Fate should be questioned about it.

मलय—(सक्रोधम्) दैवमत्र प्रष्टव्यम् । न क्षपणको जीवसिद्धिः ।

Mal.—(*Angrily*) Fate should be questioned about it, not the mendicant Jivasiddhi !

राक्षसः—(खगतम्) कथं जीवसिद्धिरपि चाणक्यप्रणिधिः ! हन्त रिपुभिर्मं हृदयमपि स्वीकृतम् ।

Rak—(*To himself*) How so ! Jivasiddhi too an emissary of Chanakya ! Alas ! My heart too is owned by the enemies.

मलय—(सक्रोधम्) भासुरक, आज्ञाप्यतां शिखरसेनः सेनापतिः—य एते राक्षसेन सह सुहृत्तामुत्पाद्य अस्मच्छरीरद्रोहेण चन्द्रगुप्तमाराधयितुकामाः पञ्च राजानः कौलूतश्चित्रवर्मा, तलयनृपतिः सिंहनादः, काश्मीरः पुष्कराक्षः, सिन्धुराजः सुषेणः पारसीकाधिपो मेघनाद इति, एतेषु त्रयः प्रथमे मदीयां भूमिं कामयन्ते । ते गम्भीरख्भ्रमभिनीय पांशुभिः पूर्यन्ताम् । इतरौ हस्तिबलकामुकौ हस्तिनैव घात्येताम् इति ।

Mal.—*(In wrath)* Bhasuraka, let Shikharasena the commander-in-chief be ordered thus—Of these five kings—Chitravarman of Kuluta, Simhanada the king of Malaya, Puskaraksha of Kashmir, Sushen the king of Sindhu, Meghanada the lord of Parasika—who having contracted friendship with Rakshasa are bent upon serving Chandragupta by injuring our person, the first three covet my lands, let them be led to a deep hole and covered over with sand, let the other two who greed after my force of elephants, be killed with an elephant.

पुरुषः—जं कुमारो आणवेदि [यत् कुमार आज्ञापयति] (इति निष्क्रान्तः)।

Attendant.—As Prince commands. (*Exit*).

CHARCHA

1. अयमपरो &c.—Sakuntala has पिण्डः संवृत्तः for स्फोटः (Act. II).

2. दैवसत्त्व &c.—Rakshasa had no positive proofs against Chanakya, hence he preferred not to accuse him openly. It was Fate again that did it. Even if he had proofs, he would not have probably named Chanakya. Cf.—"तस्येदं विपुलं विधेर्विलसितम्"—Sl. 20, *ante*. Also cf.—"दैवं हि नन्दकुलशत्रुरसौ न विप्रः"—Act VI, Sl. 7.

3. हृदयमपि—Rakshasa had great confidence in जीवसिद्धि and confided all to him. Hence *he* being a spy, Rakshasa had no secrets from Chanakya. His very heart was Chanakya's own.

4. शिखरसेनः—Act IV calls him शिखरकः। This is by dropping सेन and by adding कन् स्वार्थे (witness भीमसेन for भीम)।

5. यमच्छरीर &c.—"क्रुधद्रुहोरुपसृष्टयोः—"इति कर्मत्वम् (see *ante*). कर्मषष्ठ्या समासः।

6. गम्भीरश्वभ्रम् &c—श्वभ्र is विल a hole. "गर्त्तावटौ भुवि श्वभ्रे" इत्यमरः। पूर्य्यन्ताम् is rather anomalous. पुर usuallay means to fill

np ; that may apply to श्रभ not to ते। Here the meaning is *to cover over.*

7. हस्तिबलस्य &c —हस्तिबलस्य कासुकौ। Here षष्ठी is not barred by "न लोका—"owing the वार्त्तिक "कर्मेरनिषेधः"।

36. **मलय—(सक्रोधम्) राक्षस राक्षस! नाहं विश्रम्भघातो राक्षसः। मलयकेतुः खल्वहम्। तद्गच्छ। समाश्रीयतां सर्वात्मना चन्द्रगुप्तः। पश्य—**

विष्णुगुप्तश्च मौर्य्यश्च सममप्यागतौ त्वया।
उन्मूलयितुमीशोऽहं विवर्गमिव दुर्नयः॥ २२॥

Mal.—(*Angrily*) Rakshasa! Rakshasa! I am indeed Malayaketu, not Rakshasa the murderer of the confiding. Go then, let Chandragupta be hugged with all your might. Behold—Vishnugpta too, Maurya also, though advanced with you, I am competent to extirpate as bad policy is of the group of three (piety, prosperity and propensity).

CHARCHA

1. विश्रम्भघातो—विश्रम्भं विश्वासं घातयति इति विश्रम्भ + हन + णिच् + णिनि कर्त्तरि ताच्छील्ये betrayer of trust. Betrayal of trust is a habit with you. Cf—Sl. 21, *ante.* Here the murder of the confiding is also implied. Hence नाहम् &c, means—I won't soil my hands by killing you.

2. मलयकेतुः खल्वहम्—There is a wide difference between us. One is Rakshasa a well known traitor, the other is Malayaktu the abode of noble qualities. For the construction, cf.—"नन्दोऽसौ न भवति चन्द्रगुप्त एषः"—Act II, Sl. 12.

3. अन्वयः॥ त्वया समम्पि आगतौ विष्णुगुप्तश्च मौर्य्यश्च अहं विवर्गं दुर्नय इव उन्मूलयितुमीशः। व्याख्या—'त्वया समं' सह 'अपि आगतौ' सामभियातौ विष्णुगुप्तश्च' चाणक्यमपि 'मौर्य्यश्च' सुरातनयं चन्द्रगुप्तश्च 'विवर्गं' धर्मार्थकामान् 'दुनय इव'

कुनीतिरिव 'अहम् उन्मूलयितुम्' अवरोपयितुम् 'ईशः' शक्तः। नीतिहीनो राजा यथा धर्मसमर्थं कामञ्च नाशयति तथा अहं त्वां चाणक्यं चन्द्रगुप्तञ्च युगपदपि प्राणं नाशयामि। तद्गच्छ समाधीयतां चन्द्रगुप्तः नाहं भवतां संघातं गणये।

4 आगतौ—विष्णुगुप्तश्च मौर्य्यश्च is the वाक्य of a द्वन्द्व compound and this is treated as equivalent to the compound विष्णुगुप्तमौर्य्यौ। Hence आगतौ in the dual.

5. दुर्ग्यः—"दुरः षत्वणत्वयोरुपर्गत्वप्रतिषेधः" इति न णत्वम्। The comparison a significent.

6 विवर्गम्—विवर्ग may be taken to mean धर्म, अर्थ and काम, and चय, स्थान, वृद्धि as well of the राज्यतन्त्र। Cp "तं राजा प्रणयन सम्यक विवर्गेणाभिवर्द्धते"—Manu VII दुर्ग्य destroys both धर्मादिविवर्ग and स्थानादि राज्यतन्त्रविवर्ग।

37. भागु—कुमार, क्रतं कालहरणेन। मम्मतं कुसुमपुरोपरोधाय आज्ञाप्यन्तामस्मद्बलानि।

गौड़ीनां लोध्रधूलीपरिमलबहलान् धूम्रयन्तः कपोलान्
क्लिश्यन्तः कृष्णिमानं भ्रमरकुलरुचः कुञ्चितस्यालकस्य।
पांशुस्नाता बलानां तुरगखुरपुटोच्छलब्धात्मलाभाः
प्रच्छायासुप्तमाद्गे गजमदसलिलक्लिन्नमूलाः पतन्तु ॥ २७ ॥

(इति सपरिजनो निष्क्रान्तो मलयकेतुः)।

Bhag.—Prince, away with wasting time. Let our forces be now ordered for the investment of Kusumapura. Let columns of dust, the attainment of whose self is derived from the pounding with the hoofs of the cavalry and whose bases are detached by the ichoral water of our elephants, descend on the heads of our enemies darkening the cheeks of Gauda women that are rich in the fragrance of the pollens of *Lodhra* flowers, and mitigating the darkness of their curly locks that have the lustre of black bees.

(*Exit Malayaketu with attedants*).

CHARCHA

1. क्रतम्—An अव्यय meaning अलम्। Cp "अथवा क्रतं सन्देहेन"—Sak.

2. सम्मतम्—अव्यय meaning सम्मति, *i. e.*, अधुना।

3. कुसुमपुर &c.—The city is not far off ; let us commence surrounding it.

4. अन्वयः ॥ बलानां तुरगखुरपुटक्षोभलब्धात्मलाभाः पांशुलम्बा गजमदसलिल-क्लिन्नमूलाः (सन्तः) गौड़ीनां लोध्रधूलीपरिमलवहलान् कपीलान् धूसयन्तः भमर-कुलकृष्णः कुत्रिचित्स्य अलकस्य क्लमिमानं क्लिश्नन्तः शत्रूणाम् उत्तमाङ्गे पतन्तु । व्याख्या —'बलानां' प्रयाणोद्यतानां सैन्यानां ये 'तुरगाः' अश्वाः तेषां 'खुरपुटैः' अविभक्तत्वात् पुटितैः खुरैः यः 'क्षोभः' संघट्टः ततो 'लब्धः' अधिगतः 'आत्मलाभः' स्वरूपप्राप्तिः पांशुलम्बरूपता इत्यर्थः यैः तादृशाः 'पांशुलम्बाः' धूलिप्रकाण्डाः 'गजाना मदसलिलैः' दानवारिभिः 'क्लिन्नमूलाः' निरस्तभूमिसम्पर्काः' सन्तः 'गौड़ीनां' गौड़रमणीनां 'लोध्रस्य' लोध्रकुसुमस्य या 'धूल्यः' परागाः तेषां 'परिमलेन' आसोदेन 'बहलाः' आढ्याः ये 'कपीला' गण्डाः तान् 'धूसयन्तः' 'धूसरवर्णान् कुर्वन्तः अपि च 'भमरकुलाना षट्पदपुञ्जानां राशीकृतभ्रमराणामित्यर्थः 'कृष्ण' कान्तिरिव 'कृष्ण' यस्य तादृशस्य किञ्च 'कुत्रिचित्स्य' अरालस्य तरङ्गितस्य इति यावत् 'अलकस्य' केशराशेः क्लमिमानं' कालतां 'क्लिश्नन्तः' अभिभवन्तः आत्मसम्पर्केण खर्वयन्तः 'शत्रूणाम् अरातीनां मागधानाम् 'उत्तमाङ्गे शिरसि [जातावेकवचनम्] 'पतन्तु' अवरोहन्तु । स्रग्धरा वृत्तम् ।

5. गौड़ीनाम्—गौड़ is a race of क्षत्रियs । गौड़ानां निवासी जनपद गौड़ाः the country called Gauda. गौड़ाः, विषयो देशः एषामिति गौड़ाः people of Gauda country ; these are not restricted to क्षत्रियs like the original word. गौड़ानामपत्यानि स्त्रियः इत्ति गौड़ + अण् + ङीप गौड्यः women of गौड़ । तासाम् । This looks cumbrous. But it is necessary, because गौडानाम् अपत्यानि स्त्रियः, with the original गौड़, would mean only the damsels of the क्षत्रिय class गौड़, whereas the poet speaks here of *all* females in the land without exception.

6. लोध्रधूली &c.—धूलि + ङीष् धूली । Now see व्याख्या । Telang reads बहुल for बहल ; either will do.

7. धूसयन्तः—धूस is धूसर । धूसं कुर्वन्तः इति धूस + णिच् + शतृ । Dhundhi reads धूसयन्तः (धूसवतः कुर्वन्तः । धूस + मतुप् + णिच् + शतृ &c.) ।

8. क्लिश्नन्तः &c.—कृष्ण black. तस्य भाव इति कृष्ण + इमनिच् कृष्णिमा blackness. तम् । For a similar idea, cf.—"अलकेषु चमूरेणुश्यामेषु प्रतिनिधीकृतः" । क्लिश means to "oppress". It is क्र्यादिगणीय ; cp "क्लिश्नाति भुवनत्रयम्" &c.

9. तुरगखुर &c.—See व्याख्या। Cf.—"धैरात्मलाभसुखया लभ्यः" &c. Act III, Sl. 1 ; also "उत्थापितः संयति रेणुरश्वैः" &c.

10. गजमद &c.—मूल is connection with the earth. The ichor converted the dust into clay ; no more dust was raised and the quantity already in the air floated hither and thither for sometime under the breeze, and then settled down nuder gravity. Cf.—"सः किन्नमूल' चतजेन रेणुस्तस्योपरिष्टात् पवनावधूतः" &c.

38. राक्षसः—(सावेगम्) हा धिक् ! कष्टम् ! तेऽपि घातताश्चित्रवर्मादयः यशस्विनः। तत् कथं सुहृद्विनाशाय राक्षसश्चेष्टते न रिपुविनाशाय। तत किमिदानीं मदभाग्यः करवाणि ?

किं गच्छामि तपोवनं न तपसा शास्येत् सवैरं मनः
किं भर्तृ ननुयामि जीवति रिपौ स्त्रीणामियं योग्यता।
किं वा खड्गसखः पतामि रिपुसैन्येनैतच्च युक्तं भवे-
च्चेतश्चन्दनदासमोचरभसं रुन्ध्यात् कृतघ्नं न चेत् ॥ २४ ॥

(इति निष्क्रान्ताः सर्वे)।

पञ्चमोऽङ्कः।

Rak.—(*With agitation*) Oh fie ! Oh woe ! They too poor Chitravarman and others are killed. How then ! Is it that Rakshasa is exerting for the extirpation of his friends and not for the destruction of his enemies ? Ill-starred as I am, what can I do now ? Should I retire to the penance grove ? A vengeful mind would not ease off by penance. The enemy still living, should I follow my master's ? This befits women (lit. this is the fitness of women). Should I fall upon the enemy forces with the sword for a companion ? No. This is just what would be the proper thing if my heart, eager for the release of Chandanadasa, did not check my ungrateful self (*Or*—"Shall I, with my sword for my companion, fall upon

the enemy's forces? That would not be proper either. My heart, anxious for the release of Chandnnasa, would prevent my doing that if it did not turn ungrateful"—*Telang*).

(*Exeunt all*),

END OF THE FIFTH ACT

CHARCHA

1. नैऽपि घातिताः &c.—अपि implies समुच्चय of friends with masters &c. My other friends all are dead and these too are killed.

2. तत् किमिदानीम् &c.—My efforts result in injury to myself. So away with efforts. What shall I do then? (See note 4).

3. अन्वयः॥ तपोवनं गच्छामि किम? सर्वैरं मनः तपसा न शाम्येत। रिपौ जीवति भर्त्तृन् अनुयामि किम? इयं स्त्रीणां योग्यता। खड्गसखो वा अरिबले पतामि किम? न। चन्द्रनदासमीक्षणक्षमं चेतः कृतघ्नं चेत् न कुर्य्यात् एतच्च युक्तं भवेत्। व्याख्या—एवं व्यपगते सर्वकर्त्तव्ये 'तपोवनं गच्छामि' मत्प्राणसमवलम्ब्य 'किम्' इति प्रश्ने? समाधत्ते—'सर्वैरं सामर्षं 'मनः' चेतः 'तपसा न शाम्यत' शान्तिं न लभेत। अग्निप्रवेशादिभिः आत्मत्यागमन्तरेण कार्य्य इति स्थिते 'रिपौ' चन्द्रगुप्ते 'जीवति सति "भर्त्तृन्' स्वामिनं नन्दं नन्दान वा 'अनुयामि' ततपदवीमारोहामि 'किम्' इति प्रश्ने? उत्तरमाह—'इयम्' एषा 'स्त्रीणा योग्यता' प्रतिविधानम्। ता एव भर्त्तरि हते सहमृता भवन्ति। तर्हि रिपुनाशनेन आत्मानं व्यापादयामि इत्याह 'खड्गसखो वा' पश्चात्तरं असिलतामात्रः सन् 'अरिबले' शत्रुसैन्ये—'पतामि' अरिहन्त्रे विशामि वीरोचितञ्च मरणं समाश्रये 'किम्' इति वितर्कं? निर्णयमाह—'न' मा भूदेवम्, प्रियसुहृदः 'चन्दनदासस्य मोक्षे' साधने 'रभसः' त्वरा यस्य तादृशं मदीयमित 'चेतः' एवंविधं प्राणत्यागमिच्छन्तं सुहृन्मोचने यत्नहीनम् अतएव 'कृतघ्नं' अकृतघ्नं मां चेत न कुर्य्यात्' यदि न प्रतिबध्नीयात् तदा 'एतच्च' इदमेव अरिबले पतनमेव 'युक्तं भवेत्' उचितं स्यात्। सुहृन्मोचे चेतो धावति तत् अरिबलेन न पतामि किन्तु कुसुमपुरं गत्वा चन्दनदासमेव कृते प्रयते इति भावः। शार्दूल विक्रीडितं वृत्तम्।

4. किं गच्छामि &c.—He has given up चेष्टा, because his चेष्टा leads to the destruction of friends only. Thus, having nothing to do, is he to renounce the world and retire to a hermitage for penance? No sooner he thinks of it than the idea is drop-

ped, because penance will not quiet down his vindictive mood. With the thirst for enemy-blood so strong in him, penance is but a mockery. Also see next.

5. किं भक्तेन् &c.—If the practice of penance too is precluded he has nothing left to do but to give up life. Should he then burn himself to death and follow his master ? The idea is repulsive to him. Redoubtable fighter as he is, why should he die the death of helpless women that follow their husbands on the funeral pyre ? Also see next.

6. किं वा खड्ग &c.—Well then, if I am to die, let me die like a hero. I outlived my master only with the object of killing master's enemy Chandragupta. In this I have failed. I have been out-manouvred and my state-craft has been out-classed by Chanakya. So away with diplomacy, I will now, sword in hand, meet Chandragupta's legions and lay down life after killing the flower of his soldiery As he is thus musing, the sad plight of his friend, the brave Chandanadasa who for his sake was now pining in prison, flashes across his mind. See next.

7. चेतश्चन्दन &c.—He is ashamed of himself ; that he could forget such a friend at this moment is downright ingratitude. He must hie to Kusumapura to work out his friend's rescure. रभस is वेग rapidity. "रभसो वेगहर्ष्योः" इति हैमः। रभसः अस्ति अस्य तस्मिन् रभसं त्वरायुक्तम्। Also see व्याख्या।

8. कृतघ्नम्—Refers to himself. He is कृतघ्न, because, in thinking of this course, he has forgotten the services of his friend who is now in dire straits. Dhundhi construes the last line thus—चन्दनदासमीक्षरभसं चेतः कुर्यात्। न चेत् कृतघ्नः भवेत् (my heart eager for the release of Chandandasa would cheek me ; it would be ungratetul if it did not).

षष्ठोऽङ्कः

1. (ततः प्रविशत्यलङ्कृतः सहर्षः सिद्धार्थकः)।

सिद्धा—

जअदि जअदग्गीलो केसवो केसिघादी
जअदि अ जणदिट्ठोचन्दमा चन्दउत्तो।
जअदि जअणकज्जं जाव काऊण सव्वं
पडिहदपरपक्खा अज्ज चाणक्कणीदी॥ १॥

दाव चिरस्स कालस्स पिअवअस्सं समिद्धत्थअं पेक्खामि।

[जयति जलदनीलः केशवः केशिघाती
जयति च जनदृष्टिचन्द्रमाश्चन्द्रगुप्तः।
जयति जयनकार्यं यावत् कृत्वा च सर्वं
प्रतिहतपरपक्षा आर्यचाणक्यनीतिः॥
तावच्चिरस्य कालस्य प्रियवयस्यं समिद्धार्थकं पश्यामि]।

(परिक्रम्यावलोक्य च) एसो मे पिअवअस्सो समिद्धत्थओ इदो एव्व उपसप्पदि। जाव णं उपसप्पामि [एष मे प्रियवयस्यः समिद्धार्थक इत एव उपसर्पति। यावदेनम् उपसर्पामि]।

(Now enter with joy Siddharthaka decorated). ***Siddh.***— Cloud-blue Kesava, the slayer of Keshin, prospers ; Chandragupta too, the moon to the eyes of the people, prospers ; also the diplomacy of noble Chanakya prospers after having done all the work of conquest with the hostile party sup-

pressed. After this long lapse I will see my dear friend Samiddharthaka. (*Going round and observing*) Here, my dear friend Samiddharthaka is coming this very way. Let me approach him.

CHARCHA

1. *Scene*—Street at Kusumapura.

2. अन्वयः ॥ जलदनीलः केशिघाती केशवः जयति। जनदृष्टिचन्द्रमाः चन्द्रगुप्तश्च जयति। आर्यचाणक्यनीतिश्च सर्वं जयनकार्यं कृत्वा प्रतिहतपरपक्षा (सती) यावज्जयति। व्याख्या—'जलदः' इव 'नीलः' अभवत्श्यामः दानवं केशिनं यो हतवान् स 'केशिघाती' केशिहन्ता 'केशवः' श्रीविष्णुः 'जयति' उत्कर्षं लभते। 'जनदृष्टेः' लोकलोचनस्य सम्बन्धे 'चन्द्रमाः' इन्दुरिव 'चन्द्रगुप्तश्च जयति' उत्कर्षं लभते। 'आर्यचाणक्यस्य नीतिश्च' सामादिप्रयोगोऽपि 'सर्वं' निखिलं 'जयनस्य' जयस्य अभिपराभवस्य 'कार्यम्' अनुष्ठानं 'कृत्वा' समाप्य 'प्रतिहतः' निराकृतः 'परपक्षः' शत्रुवर्गः यया तादृशी सती 'यावज्जयति' जयत्येव। यावदवधारणे। मालिनी वृत्तम्।

3. जयनकार्यम्—Dhundhi explains—"जयत्यनेन इति जयनं सैन्यम्। जयनेन जयकारणेन सेनादिना एव यत् कार्यं तत्"। The sense is चाणक्य's strategy achieves without an effort what an army does with great trouble and profuse bloodshed,

4. तावत्—Construe प्रेक्षामि तावत्। तावदवधारणे। "यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे।"

5. चिरस्य कालस्य—षष्ठी owing to some such thing as विगमे, अत्यये &c. understood ; चिरस्य कालस्य विगमे प्रेक्षामि &c. If कालस्य were absent, we could take चिरस्य as an अव्यय meaning चिर as in "चिरस्य वाच्यं न गतः प्रजापतिः"—*Sak.* Act V.

2. (ततः प्रविशति समिद्धार्थकः)।

समिद्धा—

मंदावे तारेसाणं गेह्णसवे सुहाअत्ताणं।
हिअअट्ठिदाणं विहवा विरहे मित्ताणं दूणन्दि ॥ २ ॥

सुदं मए मलअकेदुकडआदो पिअवअस्सओ सिद्धत्थओ आअदो त्ति। णं अण्णेसामि।

[सन्तापे तारेशानां गेहोत्सवे सुखायमानानाम्।
हृदयस्थितानां विभवा विरहे मित्राणां दूनयन्ति ॥

श्रुतं मया मलयकेतुकटकात् प्रियवयस्यः सिद्धार्थक आगत इति। एनमन्विष्यामि] (इति परिक्रम्य विलोक्य च) एसो सिद्धत्थओ [एष सिद्धार्थकः]।

(*Now enter Samiddharthaka*). *Samiddh.*—Riches pain in the absence of friends that dwell in the heart, that are like the moon at times of trouble, and that enjoy it at family festivals. I have heard that my dear friend Siddharthaka has come back from the camp of *Malayaketu*. I will search for him. (*Going round and observing*) Here is Siddharthaka ?

सिद्धा—(उपसृत्य) कहं समिद्धत्थओ! अवि सुहं पिअवअस्सस्स [कथं समिद्धार्थकः! अपि सुखं प्रियवयस्यस्य ? (इत्यन्योन्यमालिङ्गतः)।

Siddh.—(*Approaching*) Ha! Samiddharthaka! Is it well with my dear friend ? (*They embrace each other*).

समिद्धा—कुदो सुहं येण तुमं चिरप्पवासपच्चागदोवि अज्ज ण मे गेहं आअच्छसि [कुतः सुखं। येन त्वं चिरप्रवासप्रत्यागतोऽपि अद्य न मे गेहमागच्छसि]।

Samiddh.—Whence well, as you are not coming to my place though returned to-day after a long absence ?

अन्वयः॥ सन्तापे तारेशानां गेहोत्सवे सुखायमानानां हृदयस्थितानां मित्राणां विरहे विभवा दूनयन्ति। व्याख्या—'सन्तापे' दुःखे। 'तारेशानां' नक्षत्राणाम् 'ईशः'

स्वामी तारिशयन्द्रः लक्षणया प्रह्लादनः। 'तारिशानां' प्रह्लादनानाम्। 'सन्तापे तारिशानां' सन्तापहारिणामिति दृष्टिः। 'गेहे' गृहे यः 'उत्सवः' प्रमोदः तस्मिन् 'सुखायमानाना' सुखमनुभवताम् 'हृदये' मनसि 'स्थितानाम्' अनिशं स्मृतानामित्यर्थः 'मित्राणां विरहे' अदर्शने 'विभवाः' सम्पदः 'दूनयन्ति' दूनं दुःखितं कुर्वन्ति। सुखा विभवा यदि मित्रैः सह भुज्यन्ते नान्यथा इत्यर्थः।

CHARCHA

1. सुखायमानानाम्—सुखं वेदयन्ते इति सुख + क्यङ् + लटः शानच् सुखायमानाः feeling pleasure. Only an intimate friend feels pleasure at your prosperity. Cf.—"अनिर्वृतं भूतिषु बद्धवैरम्"।

2. दूनयन्ति—दू + क्त कर्त्तरि दूनः dejected. दूनं कुर्वन्ति इति दून + णिच (नामधातु) + लट अन्ति।

3. परिक्रम्य विलोक्य च—Telang reads "परिक्रामति। विलोक्य" which is an odd combination of लट् with ल्यप्।

4. चिरप्रवास &c.—चिरं प्रवासः चिरप्रवासः prolonged absence. तस्मात् प्रत्यागतः।

3. सिद्धा—पसीददु वअस्सो। दिट्ठमेत्तो एव्व अज्जचाणक्केण आणत्तोह्मि यह—'सिद्धत्थअ गच्छ। एदं पिओदन्तं देवस्स चन्द्रसिरिणो निवेदेदि' त्ति। तदो एदस्स निवेदिअ एव्वं अनुभूदपत्थिवप्पसादो अहं पिअवअस्सं पेक्खिदुं तुह एव्व गेहं चलिदोह्मि [प्रसीदतु वयस्यः। दृष्टमात्र एव आर्यचाणक्येन आज्ञप्तोऽस्मि यथा—"सिद्धार्थक, गच्छ। इमं प्रियादन्तं चन्द्रश्रियः निवेदय" इति। ततः एतस्य निवेद्य एवम् अनुभूतपार्थिवप्रसादः अहं प्रियवयस्यं प्रेक्षितुं तवैव गेहं चलितोऽस्मि]।

Siddh.—Let my friend be appeased. As soon as seen, I

am ordered by noble Chanakya thus—"Go Siddharthaka, report this happy termination to king Chandrasri. Having then reported to him and enjoyed the king's favour thus, I am going to the house of yourself to see you, my dear friend.

समिद्धा—वअस्स यदि मे सुनिदव्वं तदो कहेहि किं तं पिअं जं पिअदंसणस्स चन्दसिरिणो निवेदिदं [वयस्य, यदि मे श्रोतव्यं ततः कथय किं तत् प्रियं प्रियदर्शनस्य चन्द्रश्रियः निवेदितम्]।

Samiddh.—Friend, if I may know, then tell me what the happy news is that was reported to Chandrasri of pleasing presence.

सिद्धा—वअस्स किं तुहवि अकहिदव्वं अत्थि ? ता निसामेयि—अत्थि दाव चाणक्कबुद्धिमोहिदमदिना मलअकेदुहदएण णिक्कासिअ रक्खसं हदा चित्तवम्मप्पमुहा पञ्च पत्थिवा। तदो असमिक्खकारी एसो दुराआरो त्ति उज्झिअ मलअकेदुहदअभूमिं कुशलदाए भअविलोलसेससेणिकपरिवारेसु सभअं पत्थिदेसु पत्थिवेसु सकं विसअं, निव्विन्नहिअएसु सअलसामन्तेसु, भट्टभटपुलिसदत्तडिङ्गरादबलत्तराअसेणभाउराअणरोहिदक्खविजअवम्मप्पमुहेहिं संजमिअ गिह्हीदो मलअकुदु [वयस्य, किं तवापि अकथितव्यम् अस्ति। तन्निशामय—अस्ति तावत् चाणक्यबुद्धिमोहितमतिना मलयकेतुहृतकेन निष्कास्यराक्षसं हताश्चित्रवर्मप्रमुखाः प्रधानाः पञ्च पार्थिवाः। ततः असमीक्ष्यकारी एष दुराचार इति उज्झित्वा मलयकेतुहृतकभूमिं कुशलतया भयविलोलशेषसैनिकपरिवारेषु सभयं

प्रस्थितेषु पार्थिवेषु स्वकं विषयं, निर्विशङ्कहृदयेषु सकलसामन्तेषु, भद्रभट-पुरुषदत्त-डिङ्गरात- बलगुप्त-राजसेन-भागुरायण-रोहिताक्ष-विजयवर्मप्रमुखैः संयम्य गृहीतो मलयकेतुः]।

Siddh.—Friend, is there anything unmentionable even to you? So listen. The fact is—The five leading kings with Chitravarman at their head were killed by cursed Malayaketu, having dismissed Rakshasa, with his mind deluded by the diplomacy of Chanakya. Forthwith, the kings having nervously proceeded to their own kingdoms with safety (? omit either this or "cleverly" below) deserting the place of the cursed Malayaketu, because this miscreant acts thoughtlessly, all the chieftains having their spirit drooping, the remaining military attendants standing bewilderd in terror, Malayaketu was cleverly (? omit either this or "with safety" above) fettered and secured by Bhadrabhata, Purushadatta, Dingarata, Balagupta, Rajasena, Bhagurayana, Rohitaksha Vijayavarman and others.

CHARCHA

1. प्रसीदतु वयस्यः—Take no offence at this apparent neglect.

2. प्रियोदन्तम्—उदन्त news वार्त्ता। प्रियः उदन्तः &c. "वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्त" ।

3. देवस्य—शेषविवक्षया षष्ठी। देवाय was expected.

4. गेहं चलितः—Construe गेहं प्रति चलितः।

5. निशामय—See *ante*. "श्रावक निशामय"—Act V Para 3.

6. निष्काश्य राक्षसम् &c.—See तद्गच्छ समाश्वासयताम् &c. Act V, Para 36, and "पश्य राजानः" &c.—Act V, Para 35.

7. असमीक्ष्यकारी—सम् + ईक्ष् + ल्यप् समीक्ष्य having scrutintsed. न समीक्ष्य असमीक्ष्य without scrutiny. असमीक्ष्य कर्तुं शीलमस्य इति असमीक्ष्य + कृ + णिनि कर्तरि ताच्छील्ये, उपपदतत्—।

8. मलयकेतु &c.—For इतक see चाणक्यहतकेन—Act II, Para. भूमि is सेनानिवेशस्थान।

9. कुशलतया—This is an awkward epithet. Three constructions are possible—(i) कुशलतया उज्झित्वा having cleverly quitted (the encampment). the cleverness lies in eluding the grasp of Malayaketu . (ii) कुशलतया प्रस्थितेषु having left with safety, *i. e*, with their life . कुशल is safety , कुशलमस्ति अस्य इति कुशलः safe—अर्श आद्यच् । तस्य भावः कुशलता safety , or कुशलतया प्रस्थितेषु having cleverly left (as in कुशलतया उज्झित्वा) . (iii) कुशलतया संयम्य having c'evely fettered. Of these—(i) seems inadmissible because no attempt is said to have been made to restrain them, so there was no occasin for a display of cleverness (ii) is very .round about , (iii) involves दूरान्वय, but is on the whole preferble. Explain thus—'ततः एष दुराचारः असमीक्ष्यकारी, अविचिन्त्य एव कर्म कुरुते तत्र श्रेयोऽस्माकम् अवासस्थानम् 'इति' कृत्वा 'पार्थिवेषु' मितरराजेषु 'स्वके विषये' निजराज्ये 'सभये सादरं 'प्रस्थितेषु सत्सु 'सकलसामन्तेषु निखिलकरदभूपेषु 'निर्विण्ण' खिन्न' 'हृदयं' येषां तादृशेषु सत्सु 'भयेन विलोलेषु' विह्वलेषु 'शेषेषु' कालूतादपेक्षया शिष्टेषु 'सैनिकपरिवारिषु' मलयकेतुदेहरक्षिषु सैनिकेषु तानवाट्टल्य इत्यर्थः भद्रभट पुरुषदत्त डिङ्गरात बलगुप्त-राजसेन-भागुरायण-रोहिताक्ष-विजयवर्मप्रमुखैः कुशलतया' नैपुण्येन 'संयम्य' गृहीतो मलयकेतुः'।

10. पार्थिवेषु &c.—Two different classes of chiefs are referred to by पार्थिव and सामन्त। The former are allies (मित्रराज), and the latter tributary chiefs—minor chiefs living within Malayaketu's kingdom. The former left altogether, but the latter stayed on though dispirited (निर्विण्णहृदयेषु)। "निर्विण्णस्योपसंख्यानम्" इति णत्वम्।

11. भयविलोल &c.—विशेषेण लोलाः चञ्चलाः विलोलाः greatly agitated. भयेन विलोलाः भयविलोलाः। शेषाः सैनिकपरिवाराः, कर्मधा—। भयविलोलाः शेषसैनिकपरिवाराः। तेषु। अनादरे ७मी। This refers to the body-guard of Malayaketu. Rakshasa had told off the five kings Kauluta. &c. to guard Malayaketu's person (see "प्रस्थातव्यं पुरस्तात्—" Act V, Sl. 11). They form the Prin-

ce's सैनिकपरिवार। शेष refers to the remainder after the five, Kauluta &c., are killed. They stood perplexed in the tumult that followed, and Bhadrabhata &c. cleverly (कुशलतया) put Malayaketu in chains disregarding these remnants of his body-guard—अनादरं ७मो।

4. सामिद्धा—वअस्स, भद्दभटप्पमुहा किल देवस्स चन्द-उत्तस्स अवरत्ता मलअकेदुं समस्सिदेत्ति लोए मन्तीअदि। ता किं निमित्तं कुकविकिदणाडअस्स विअ अण्णं मुहे अण्णं णिव्वहणे [वयस्य, भद्रभटप्रमुखाः किल देवस्य चन्द्रगुप्तस्य अपरक्ता मलयकेतुं समाश्रिता इति लोके मन्त्र्यते। तत् किं निमित्तं कुकविकृतनाटकस्येव अन्यत् मुखे अन्यत् निर्वहणे] ?

Samid.—Friend, it is current among the people that the party headed by Bhadrabhata, disgusted with Chandragupta, has attached itself to Malayaketu. Why then, as in a drama written by a bad poet, one thing is in the opening and another in the *denoument*.

सिद्धा—वअस्स, दुवगदीए विअ असुणिदगदीए णमो चाणक्कणीदीए [वयस्य, दैवगत्या इव अश्रुतगत्यै नमश्चाणक्य-नीत्यै]।

Siddh—Friend. salutation be unto the state-craft of chanakya the course of which is unheard of like that of Fate.

सामिद्धा—तदो तदो [ततस्ततः] ?

Samid.—Next, what next ?

सिद्धा—तदो पभूदसारसाहणसमेदेण इदो निक्कमिअ अज्ज चाणक्केण पडिवण्णं सअलरायलोअसहिअं असेसं मेच्छबलं

[ततः प्रभूतसारसाधनसमेतेन इतो निष्क्रम्य आर्य्यचाणक्येन प्रतिपन्नं सकलराजलोकसहितमशेषं म्लेच्छबलम्]।

Siddh.—Then the entire Mlechha force, together with the whole host of kings, was captured by noble Chanakya sallying out from here accompained by an immense body of the flower of his army.

समिद्धा—वअस्स कहिं तं [वयस्य, कुत्र तत्]?

Samid.—Whither is that, friend?

सिद्ध—जहिं एदे [यत्र एते]—

अदिसअगुरुएण दाणदप्पेण दन्तिनः
सजलजलदलीलां उव्वहन्तो णदन्ति।
कसपहरभएण जाअकम्पा तुरन्ता
गिरिदजअणसज्जा संपअन्ते तुरङ्गाः॥ २॥

[अतिशयगुरुकेण दानदर्पेण दन्तो
सजलजलदलीलामुद्वहन्तो नदन्ति।
कशाप्रहारभयेन जातकम्पास्त्वरमाणा
गृहीतजयनसज्जा सम्पतन्ति तुरङ्गाः॥ २॥

CHARCHA

1. चन्द्रगुप्त—शेषे षष्ठी। चन्द्रगुप्तस्य सम्बन्धे अपरक्ताः।

2. अन्यत् मुखे &c.—अन्य and अन्य refer to mutually discordant elements. परम्परापेक्षया अन्यत्वम्। मुख is मुखसन्धि, the opening, आरम्भ। निरूह्यते इतस्तत आदाय पिण्डीक्रियते एकार्थीक्रियते अस्मिन् इति निर् + वह + घञ् अधिकरणे निर्वहणम् the close उपसंहारः। Cf.—"संहरन् कार्य्यजातम्"—Act IV, Sl. 3. The close of the drama should harmonise with the opening, similarly one should not profess one way and act

differently. Why then do Bhadrabhata &c. swearing allegiance to Malayaketu restrain him.

3. दैवगत्यै &c.—Chanakya's measures work in a peculiar manner, not at all like what other statesmen's do. Their course is as inscrutable as that of Fate itself. अश्रुता अनाकर्णिता गतिः प्रसरो यस्याः, *i. e.* they work *secretly*, no one gets the right report about them so long as they are at work. Comp.—"फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव"। Hence, know that you were wrongly informed about Bhadrabhata &c and the wrong information was taken by people as the right one solely through the charm of the incomprehensibility of Chanakya's methods.

4. प्रभूतसारसाधन &c.—साध्यते अनेन इति साध+ल्युट् करणे साधनम् army सैन्यम्। "साधनं सिद्धिसैन्ययोः" इति हैमः। सार best वर, *i. e.*, श्रेष्ठ। "सारो बले स्थिरांशे च न्याये क्लीबं वरे त्रिषु" इत्यमरः। सार साधनम्। प्रभूत सारसाधनम् &c. Telang reads प्रभृति for प्रभूत। ततः प्रभृति implies *continuation* of conditions, and is therefore rejected. प्रतिपन्न म्लेच्छबलम् refers to a *past* event; प्रतिपद्यमानम् would agree with Telang's reading.

5. प्रतिपन्नम्—प्रति+पद means 'to accept', 'to adopt' &c. Comp.—"किं प्रतिपन्नं मौर्य्येण" (*supra*), "प्रतिपेदे जयश्रियम्", "आत्मानं चेविषं मन्यमानः प्रतिपत्स्ये"—*Sak.* Act V &c. The secondary sense, which is the sense here, is 'to capture,' 'to annex' etc. प्रति+पद +क्त कर्मणि प्रतिपन्नम् captured.

6. अन्वयः—यत्र गृहीतजयनसज्ञाः एते दन्तिनः अतिशयगुरुकेण दानदर्पेण सजलजलदलीलामुद्वहन्तः नदन्ति, तुरङ्गाः कशाप्रहारभयेन जातकम्पाः त्वरमाणाः सम्पतन्ति। व्याख्या—'यत्र गृहीता' परिच्छिता 'जयनस्य' जयस्य 'सज्ञा' वेषः यैः तादृशाः विजयप्रमोदात वरवेषसज्जिता इत्यर्थः 'एते' पुरोवर्त्तिनः 'दन्तिनः' गजाः 'अतिशयेन गुरुकः' अतिप्रबलः यः 'दानजनितो दर्पः' मदमत्तता तेन 'सजलानां' जलपूर्णानां 'जलदानां' मेघानां 'लीलां' चरितम् 'उद्वहन्तः' अभिनयन्तः सन्तः 'नदन्ति' गर्जन्ति तत्र। अपि च यत्र गृहीतजयनसज्ञा एते 'तुरङ्गाः' अश्वाः 'कशा-प्रहारात् वेत्राघातात् यत् 'भयं' तेन 'जातः कम्पः' येषां तादृशाः अतएव 'त्वरमाणाः'

धावन्तः सन्तः 'सम्पतन्ति' सम्मिलन्ति तव तत् म्लेच्छबलं प्रतिपन्नं ततश्च प्रमोदात् विजयसज्जया सज्जितं करितुरगम्। मालिनीवृत्तम्।

7. सजलजलद etc.—सजल makes the clouds blue, hence the agreement with the elephants in colour. जलद carries the idea of pouring water, and दानदर्प suggests flow of ichor: hence we get another point of resemblance. Telang reads सजलजलदनीलाः qualifying दन्तिनः।

8. उद्वहन्तः—Lit. carrying. लीलाम् उद्वहन्तः displaying the character. Telang's reading is उद्भ्रमन्तः roaming.

9. नदन्ति—Water-laden clouds do roar, hence another point of resemblance. The colour, the downpour, the roars are all like those of clouds, hence the elephants are सजलजलद-लीलामुद्वहन्तः। With Telang's reading, translate the line thus—(Elephants) dark like water-laden clouds, roam and roar.

10. जातकम्पान्तरभागाः—Dhundhi reads जातकम्पोत्तरङ्गाः and explains जातकम्पाः अतएव उत्तरङ्गाः *i. e.*, through shaking, the body appears as if waves are playing on it.

11. गृहीतजयनसज्जाः—Dhundhi reads शब्दा for सज्जाः and explains—"जयनं जयः। तस्य शब्दः। गृहीतौ ज्ञातौ जयनशब्दौ यैस्ते तथाभूताः। जयघोषणं श्रुत्वा सर्वतः सम्पतन्ति इत्यर्थः"। We do not see much in it.

5. समिद्धा—वअस्स एदं दाव चिट्ठदु। तहा मल्ल-लोअप्पसक्खं उज्झिअ आहिआरो चिट्ठिअ अज्ज चाणक्को किं उणो वि तं एव्व मन्तिपदं आरूढो [वयस्य, एतत्तावत्तिष्ठतु। तथा सर्वलोकप्रत्यक्षम् उज्झितताधिकारः स्थित्वा आर्यचाणक्यः किं पुनरपि तदेव मन्त्रिपदमारूढः]?

Samid.—Friend, let this go. Why has Noble Chanakya again stepped into the very same office of 'minister' after having thrown up the appointment (lit.—standing with office renounced) in presence of all people (*Or*—the whole world) in that fashion ?

सिद्धा—अदिमुद्धोसि दाणीं तुमं जो अमच्चरक्खसेण वि अणवगाहिदपुव्वं अज्जचाणक्कचरिदं अवगाहिदुं इच्छसि [अतिमुग्धोऽसि इदानीं त्वं यः अमात्यराक्षसेनापि अनवगाहितपूर्वम् आर्यचाणक्यचरितम् अवगाहितुमिच्छसि]।

Siddh.—You are quite a simpleton that yot wish to gauge the moves of Noble Chanakya uncomprehended before even by Minister Rakshasa.

समिद्धा—वअस्स, अमच्चरक्खसो संपदं कहिं [वयस्य, अमात्यराक्षसः साम्प्रतं कुत्र]?

Samid.—Friend, where is Minister Rakshasa now?

सिद्धा—तस्सिं भअविलोले वट्टमाणे मलयकेदुकडआदो णिक्कमिअ उदुम्बरणामहेएण चरेण अणुमन्धिज्जमाणो इदं पाडलिउत्तं आअदोत्ति अज्जचाणक्कस्स णिवेदिदं [तस्मिन् भयविलोले वर्त्तमाने मलयकेतुकटकान्निष्क्रम्य उदुम्बरनामधेयेन चरेण अनुसन्धीयमानः इदं पाटलिपुत्रमागत इति आर्यचाणक्यस्य निवेदितम्]।

Siddh.—It is reported to Noble Chanakya that having slipped out of Malayaketu's camp, the same (camp) standing convulsed in terror, he has come here to Pataliputra watched by a spy named Udumbara.

CHARCHA

1. सर्वलोकप्रत्यक्षम्—See लोकप्रत्यक्षम्, Act III, Sl. 27. this refers to the scene in Act III, Para 39.

2. अतिमुग्ध etc.—मुग्ध simpleton मूढ। Why Chanakya throw-

ing up the appointment then, and why he takes it up now, has not been comprehended even by Minister Rakshasa, and you want to grasp the significance of it at once! You are indeed green yet.

3. तस्मिन् etc.—Refers to मलयकेतुकटक। भयेन विलोलं तस्मिन् वर्त्तमाने—that camp standing bewildered through fright. अनादरे or simple भावलक्षणे ङौ।

4. अनुसन्धीयमान—अनुसन्धान is अन्वेषण। अनु + सम् + धा + शानच कर्मणि अनुसन्धीयमान: अन्विष्यमाण: being followed.

6 समिद्धा—वअस्स, तहा णाम अमच्चरक्खसो णन्दरज्ज-पच्चाणअणे किदव्ववसाओ णिक्कमिअ संपदं अकिदत्थो पुणो वि इमं पाडलिउत्तं आअदो एव्व [वयस्य, तथा नाम अमात्य-राक्षस: नन्दराज्यप्रत्यानयने कृतव्यवसाय: निष्क्रम्यसाम्प्रतम कृतार्थ: पुनरपि इमं पाटलिपुत्रमागत एव]?

Samid—Having gone out and having made in such a manner an attempt to restore the sovereignty of Nanda, has Minister Rakshasa now really come back to this Pataliputra with his objcet unrealised?

सिद्धा—वअस्स, तक्केमि चन्दणदाससिणेहेण त्ति [वयस्य, तर्कयामि चन्दनदाससस्नेहेनेति]।

Siddh—Friend, I guess it is through love for Chandanadasa.

समिद्धा—वअस्स, चन्दनदासस्स मोक्खं विअ पेक्खामि [वयस्य, चन्दनदासस्य मोक्षमिव पश्यामि]।

Samid.—Friend, I can actually see as it were Chandanadasa's release.

सिद्धा—कुदो से अधण्णस्स मोक्खा। मोक्खु संपदं अज्ज-चाणक्कस्स आणत्तीए दुवेहिं अम्हेहिं वज्झट्ठाणं पवेसिअ वावाद इदव्वो [कुतोऽस्य अधन्यस्य मोक्षः ? स खलु साम्प्रतम् आर्य्य-चाणक्यस्य आज्ञया द्वाभ्यामावाभ्यां वध्यस्थानं प्रवेश्य व्यापा-दयितव्यः]।

Siddh.—Whence is the release of that unlucky chap ? He is even now at the command of Noble Chanakya to be killed after being led by both of us to the place of execution.

समिद्धा—(सक्रोधम्) किं अज्जचाणक्कस्स घादअजणो अण्णो णत्थि जेण अम्हे ईरिसेसु णिओजिआ अदिणिसंसेसु णिओएसु [किम् आर्य्यचाणक्यस्य घातकजनः अन्या नास्ति येन वयमी-दृशेषु नियोजिता अतिनृशंसेषु नियोगेषु] ?

Samid.—(*With warmth*) Has Noble Chanakya got no other executioners that we should be employed in such supremely murderous works ?

सिद्धा—वअस्स, को जीवलोए जविदुकामा अज्जचाणक्कस्स आणत्तिं पडिजलेदि ? ता एहि चंडालवेसधारिणा भविअ चन्दणदासं वज्झट्ठाणं णएम [यस्य, का जीवलोके जीवि-दुकामः आर्य्यचाणक्यस्य आज्ञप्तिं प्रतिकूलयति ? तत् एहि चण्डालवेषधारिणौ भूत्वा चन्दनदासं वध्यस्थानं नयावः]।

इत्युभौ निष्क्रान्तौ। प्रवेशकः।

Siddh.—Friend, who in the land of living, wishing life, will oppose the command of Noble Chanakya ? So come, becoming clad in the garb of *Chandalas*, we shall lead Chan-danadasa to the place of execution. (***Exeunt both***).

(*Pravesaka—Introduction*).

CHARCHA

1. तथा नाम etc.—Construe तथा कृतव्यवसायः। Refers to the *manner* of the attempt. He made a mighty attempt which has miscarried. how then can he have the face to come back here? This is inexplicable.

2. चन्दनदासस्य मोचनम् etc.—When Rakshasa tries for it, the release is as if already effected.

3. अधन्यस्य—अधन्य unlucky. Com. "धन्या कैयम्" Act I, Sl. 1.

4. आज्ञप्त्या—आ + ज्ञा + णिच् + क्तिन् भावे आज्ञप्ति order. तया।

5 अतिनृशंसेषु—नृन् शंसति निहन्ति इति नृ + शंस + अण कर्तरि नृशंसः murderous. नृशंसता attaches itself to the *agent*. By transference of epithets it is here attributed to his *office*. नियुक्तगता नृशंसता नियोगेषु आरोप्यते।

6. प्रतिकूलयति—प्रतिकूल opposed. प्रतिकूलेन योजयति इति प्रतिकूल + णिच् + लट् तिप्। Provides with an antagonist, *i. e*, opposes.

7. प्रवेशकः—प्रवेशयति इति प्र + विश + णिच् + ण्वुल् कर्तरि (See opening of Act V).

7. (ततः प्रविशति रज्जुहस्तः पुरुषः)।

पुरुषः—

छग्गुणसंजोअदिढा उवाअपरिवारिवाडिघडिअपासमुही।
चाणक्कणीदिरज्जू रिपुमंजमणक्कजुआ जअदि॥
[षड्गुणसंयोगदृढा उपायपरिपाटीघटितपाशमुखी।
चाणक्यनीतिरज्जू रिपुसंयमनऋजुका जयति]॥ ४॥

(परिक्रम्य अवलोक्य च) एसो सो पदेसो अज्जचाणक्कस्स पुरदो उदुम्बरएण कहिदो जहिं मए अज्जचाणक्काणत्तीए अमच्चरक्खसो पेक्खिदव्वो [एष स प्रदेशः आर्यचाणक्यस्य पुरतः

उदुम्बरकेण कथितः यच्च मया आर्य्यचाणक्यान्नप्तया अमात्यराक्षसः प्रेक्षितव्यः]। (विलोक्य) कहं एसो क्खु अमच्चरक्खसो किदसोमावगुण्ठणो इदो एव्व आअच्छइ। ता जाव इमेहिं उज्जाणपादवेहिं अन्तरिदसरीरो पेक्खामि कहिं आसणपरिग्गहं करेदि त्ति [कथम् एष खलु अमात्यराक्षसः कृतशीर्षावगुण्ठनः इत एव एवच्छति। तत् यावत् एभिः उद्यान्—पादपैः अन्तरितशरीरः प्रेक्षे कुत्र आसनपरिग्रहं करोति इति]। (इति परिक्रम्य स्थितः)।

(*Now enter a man with a rope in hand*). *Man*—The rope of Chanakya's policy triumphs being strong by the union of the six thread-like expedients, having at one end a noose made of a succession of devices, and straight when the enemy is entrapped (lit.—with the entrapping of the enemy). (*Going round and observing*) This is the place described to Noble Chanakya by Udumbara where at the command of Noble Chanakya I am to see Minister Rakshasa. (*Espying*) Ha! Here is Minister Rakshasa coming this very way with his head veiled. Well, with my person screened by these garden-trees, let me watch where he takes his seat. (*Stands after going round*).

अन्वयः॥ षड्गुणसंयोगदृढा उपायपरिपाटीघटितपाशसुखी रिपुसंयमनऋजुका चाणक्यनीतिरज्जुः जयति। व्याख्या—सन्धिविग्रहयानासनद्वैधाश्रयाख्याणां 'षण्णां गुणानां संयोगेन' सङ्घटनया 'दृढ़ा' दुर्भेदा, अपि च सामदानभेददण्डाख्यानाम् 'उपायानां प्रयोगचतुष्टयानां 'परिपाट्या' क्रमसमावेशेन 'घटितः' रचितः यः 'पाशः' वागुरा स 'सुखे' प्रान्ते यस्याः तादृशी, किञ्च कुटिला अपि 'रिपोः' शत्रोः यत् 'संयमनं' नियन्त्रणं तेन 'ऋजुका' ऋज्वी सरला चाणक्यस्य नीतिः' नय एव या 'रज्जुः' दाम सा 'जयति' जयेन युज्यते। कुटिला चाणक्यनीतिः नियन्त्रिते राक्षसे सरला भविष्यति,

अहमपि कुटिलां वागुरावतीं दृढाच्च इमां रज्जुं ऋजुं आवद्ध्य यदा लम्बिष्ये तदा इयं भारभरितप्राणा ऋज्वी भविष्यति इत्याशयः। इयमार्या।

CHARCHA

1. षड्गुण etc.—गुण is *thread* for the rope and *expedient* for strategy. A six-ply rope is a strong rope. The rope here is of course the one in the hand of the man. For समास see व्याख्या।

2. उपाय etc.—See व्याख्या। उपाय is *device* for the rope. परिपाटी is क्रम succession. There are several devices to make the noose at the end of the rope. The rope with the man had the noose set in it.

3. विप्रसयमन etc.—ऋज् is *thread* for the rope and *expedient* for नीति। The rope is in coils : it is not ऋजु now. But when I shall have hanged myself it will become straight under the weight of my body Chanakya's policy too is full of wiles at first but when the enemy, *i. e.*, Rakshasa, is trapped, it becomes guileless and squarely meets Rakshasa with the offer of Chandragupta's ministership.

4. आर्यचाणक्य etc.—Chanakya has commanded me to see Rakshasa, and this is the place where I am told I shall find him.

5. कृतशीर्ष etc —अव + गुठ + ल्युट् भावे अवगुण्ठन veiling. कृतं शीर्षस्य अवगुण्ठनमनेन (see शीर्षं कमलमुकुलाकारमञ्जलिम्" etc. Act I). This he has done to escape recognition

8. (ततः प्रविशति यथानिर्दिष्टः सशस्त्रो राक्षसः)।

राक्षसः—(सास्रम्) कष्टं, भोः कष्टम्।

उच्छिन्नाश्रयकातरेव कुलटा गोत्रान्तरे श्रीर्गता
तामेवानुगता गतानुगतिकास्त्यक्तानुरागाः प्रजाः।
आप्तैरप्यनवाप्तपौरुषफलैः कार्यस्य धुरुज्झिता
किं कुर्वन्त्यथवोत्तमाङ्गरहितैरङ्गैरिव स्थीयते ॥ ५ ॥

(*Now enter armed Rakshasa as described*). *Rak.*—(*With tears*) Woe ! O woe ! Like a harlot upset by the death of her supporter, Sri has passed on to another race. The people, given to following those that have gone before, have, with allegiance renounced, followed that very woman. Even by the trusted, with the reward of exertion unseen, the burden of work has been thrown down. Or what should they do ? They are lying like limbs without the head.

CHARCHA

1. यथानिर्दिष्टः—यथा यद्वत् निर्दिष्टः वर्णितः पुरुषेण । सुप्सुपा ।

2. अन्वयः ॥ श्रीः उच्छिन्नाश्रयकातरा कुलटा इव गोत्रान्तरं गता । गतानुगतिकाः प्रजाः त्यक्तानुरागाः (सत्यः) तामेव अनुगताः । आप्तैरपि अनवाप्तपौरुषफलैः (सद्भिः) कार्यस्य धूः उज्झिता । अथवा उत्तमाङ्गरहितैः अङ्गैरिव (तैः) स्थीयते किं कुर्वन्तु । व्याख्या—'श्रीः' लक्ष्मीः 'उच्छिन्नः' प्रनष्टः 'आश्रयः' आलम्बः अभिमतो जन इत्यर्थः यस्याः अतएव 'कातरा' व्याकुला 'कुलटा' स्वैरिणी नारी इव 'अन्यस्मिन् गोत्रे' नन्दैतरे वंशे मौर्य्यवंशे 'गता' संक्रान्ता । श्रीस्तु सर्वैरेव प्रार्थ्यते, तस्याः पुनराश्रयनाशे कथं कुलटाया इव कातरता ? अहो कष्टम् । 'गतस्य' प्राक्प्रस्थितस्य यत् 'अनुगतम्' अनुगमनं तच्छीलाः 'प्रजाः' जनाः 'त्यक्तः' परिहृतः 'अनुरागः' भक्तिः नन्दस्नेहः याभिः तथाभूताः सत्यः 'तामेव' श्रियम् 'अनुगताः' अनुसृत्य मौर्य्ये संसक्ताः । श्रीर्मौर्य्यं न केवलं संक्रान्ता अपि तु जनानुरागात् तस्मिन् स्थिरीभूता । अहो कष्टम् । प्रजासु पुनर्यं 'आप्ताः' अनुरक्ततमा माहात्म्या भृत्याः तैः 'अपि अनवाप्तम्' अनधिगतं 'पौरुषस्य' पुरुषकारस्य 'फलं' यैः तादृशैः विफलप्रयत्नैः सद्भिः 'कार्य्यस्य' मौर्य्यलक्ष्मीहरणरूपस्य 'धूः' भारः 'उज्झिता' त्यक्ता । हिततमैरस्माभिः स्थिरायां अपि मौर्य्यलक्ष्म्यामाश्वासने कृत एव महान् प्रयत्नः किन्तु दैवगत्या हृता नः सा जातः । अहो कष्टम् । वयमद्य निरुद्यमा वसाम इत्यहो कष्टतरम् । 'अथवा' पक्षान्तरे नैतत् सुतरां गर्ह्यं नः । 'उत्तमाङ्गेन' शिरसा 'रहितैः' वियुक्तैः अङ्गैरिव हस्तपादादिभिरिव नन्दवियुक्तैः तैरामैरस्माभिः विकलैः 'स्थीयते' अतः आप्ता उद्यमत्यागादन्यत् 'किं कुर्वन्तु' न किञ्चित् । छिन्ने शिरसि यथा कर्मसु हस्तपद न प्रसरति तथा नन्दे नष्टे आप्ता वयम् इति भावः । शार्दूलविक्रीडितं वृत्तम् ।

3. उच्छिन्न &c.—See व्याख्या । A harlot is helpless when her patron is dead. Not so *Sri*. Why then was she in such a hurry to attach herself to Chandragupta ?

4 कुलटा—अटति गच्छति परित्यज्य इति अट+अच् कर्तरि स्त्रियाम् अटा। कुलस्य अटा कुलटा उत्कुला। प्रकन्दादि।

5. गतानुगतिका:—अनुगतम् अनुगमनम्। भावे क्त:। गतस्य अनुगतम following of one that precedes. तत् अस्ति एषां शीलत्वेन इति गतानुगत +ठन् मत्वर्थे।

6. आप्तैरपि &c.—आप+क्त कर्मणि or कर्तरि आप्त trusted. The trusted have not followed the people nor attached themselves to Chandragupta, it is true, but they are lying indifferent now and no longer working. This is bad on their part.

7. अथवा &c.—This introduces पक्षान्तर, *i. e*, extenuating circumstances justifying the casting off of the burden of work (कार्यस्य धुरुज्झिता)। The आप्तs are like so many limbs as working under the direction of the king who is the *head.* The head is gone, how then can the limbs work? It is not strange that they are lying listless.

9. अपिच—

पतिं त्यक्त्वा देवं भुवनपतिमुच्चैरभिजनं
गता च्छिद्रेणाऽऽर्द्रबलमविनीतेव वृषली।
स्थिरीभूता चास्मिन् किमिह करवाम स्थिरमपि
प्रयत्नं नो येषां विफलयति दैवं द्विषदिव ॥ ६ ॥

Moreover,—Deserting her husband the king, of high family, that was the lord of the earth, Sri, like an ill-trained harlot, has, through a lapse (*Or*—at a time of stress), gone over to the Sudra and become permanent in him. In this matter what can we do whose efforts, though steady, Fate baffles like sn enemy?

अन्वय:—यौ: उच्चैरभिजनं भुवनपतिं पतिं देवं त्यक्त्वा अविनीता वृषली इव छिद्रेण वृषलं गता अस्मिन् स्थिरीभूता च। इह किं करवाम येषां न: स्थिरमपि प्रयत्नं द्विष-

दिव दैवं विफलयति। व्याख्या—'श्रीः' लक्ष्मीः 'उच्चैः' महान् अभिजनः' वंशो यस्य तादृशं 'भुवनपतिं' जगतप्रभुं 'पतिं' भर्तारं 'दैवं' राजानं नन्दं 'त्यक्त्वा' परित्यज्य 'अविनीता' अकृतविनया दुःशीला इत्यर्थः 'इयमपि' यद्वा 'इव' कामुकी इव इत्यर्थः 'छिद्रेण' रन्ध्रेण अर्थरत्नवधानतया 'दुर्घटा' सार्थसाधिता 'अस्मिन्' कौटिल्ये 'स्थिरीभूता च' अचला पुनर्वर्तते। 'उक्तं' अस्मिन् विषये 'किं करवाम' कर्तुं शक्ता भवाम वयं 'येषां न' अस्माकं स्थिरमपि दृढञ्च अनारतमपि 'प्रयत्नं' प्रयासं कुसुमपुराभियानरूपं 'दुर्घटिव' शक्नुवन्ति 'दैवं' नयति 'विफलयति' साधयति। सौस्थसाध्यता श्रीः, तस्मिन् स्थिरः, साधयत्नैरस्माभिः कार्यधुरा च उज्झिता इत्यादि पूर्वोक्तस्यैवार्थस्यानुवादः। तदनर्थान्यतरः प्रक्षिप्त इवाभाति। शिखरिणीवृत्तम्।

CHARCHA

1. भुवनपतिम्—Lord of the whole world, not of Magadha only. This shows power. Might, wealth &c. are in command, hence a desirable husband. Even he was forsaken.

2. उच्चैरभिजनम्—This is a compound अभिजन lineage. This is another recommendation. Add pedigree to wealth and power, what more do you want?

3. छिद्रेण—छिद्र opportunity, a lapse. The opportunity was offered by Nanda when he insulted Chanakya. Had Sri been a devoted wife she would have put up with the lapse. Comp. "भर्तृप्रकृतापि रोषणतया मास्म प्रतापं गमः"—Sak IV. She did not; hence अविनीतेव दुर्घटा श्रीः।

4. येषाम्—This refers to वयम् understood.

10. मया हि—

देवे गते दिवमतद्विधमृत्युयोगे
शैलेश्वरं तमधिकृत्य कृतः प्रयत्नः।
तस्मिन् हते तनयमस्य तथाप्यसिद्धि-
र्दैवं हि नन्दकुलगर्वुरसौ न विप्रः॥ ७॥

Sire, who suffered a death that did not befit him, having gone to heaven, effort was indeed made by me by winning over the mountain-prince (and next) his son, he getting killed. Still there was no success. It is really Fate that is the enemy of Nanda's race, not that Brahmana.

अन्वयः ॥ अतदिधमृत्युयोगे देवे दिवं गते तं शैलेश्वरम् अधिकृत्य प्रयत्नः कृतः, तस्मिन् हते तस्य तनयमधिकृत्य प्रयत्नः कृतः। तथापि असिद्धिः। देवं हि नन्दकुलस्य शत्रुः असौ विप्रः न। व्याख्या—दर्शितं पौरुषं तच्च निष्फलम् इति प्रागुक्तं प्रपञ्चयति। 'अतदिधः' आत्माननुरूपः 'मृत्युयोगः' विनाशघटना यस्य तादृशे अराजोचितमरणे कृत्यया अपमृत्युघातिते इति यावत् 'देवे' राजनि नन्दे दिवं गते' स्वर्गारूढे सति 'तं' प्रख्यातं 'शैलेश्वरं' पर्वतकम् 'अधिकृत्य' आश्रित्य 'प्रयत्नः कृतः' प्रयासो विहितः नन्दराज्यप्रत्यानयनमध्यवसितं प्रकाशञ्च। 'तस्मिन् शैलेश्वरे 'हते' चाणक्येन घातिते 'अस्य' तस्य शैलेश्वरस्य 'तनयं' पुत्रं मलयकेतुमधिकृत्य प्रयत्नः कृतः। 'तथापि' एवं स्थितेऽपि महत्यपि च प्रयासे 'असिद्धिः' कार्यासिद्धिर्नाभूत। तत् मन्ये 'दैवं हि' नियतिरेव 'नन्दकुलस्य शत्रुः' स एव नन्दवंशसमुत्सादयामास 'असौ विप्रः' ब्राह्मणचाणक्यः 'न' न शत्रुः। कालदष्टा नन्दाः चाणक्यं निमित्तमात्रमासाद्य प्रणष्टाः न तु चाणक्येनैव हताः इत्यर्थः। वसन्ततिलकं वृत्तम्।

CHARCHA

1. **अतदिध** &c.—तस्य विधा प्रकारः इव विधा अस्य तदिधः like him, *i. e.*, death in battle facing the enemy as befits a king—a warrior of his stamp. **मृत्युना योगः मृत्युयोगः** coming by death. Now see **व्याख्या**। The reference is to his death by Chanakya's magical rites. Comp.—"यस्याभिचारवज्रेण वज्रज्वलनतेजसः। पपात मूलतः श्रीमान् सपर्वा नन्दपर्वतः॥"—*Kamandaka.*

2. *Remark*—This verse explains the reference to the efforts in the preceding verses. It speaks of **शैलेश्वरं तम्**। The **तम्** shows that this prince was of great renown. His help was then the best that could be procured and it was rendered

whole-heartedly. The first effort was through him and the second through his son. Each time I was baffled in an unexpected manner ; hence Fate is against the Nandas ; so किमिह करवाम ।

11. अहो विवेकशून्यता म्लेच्छस्य । कुतः ?—
यो नष्टानपि बीजनाशमधुना शुश्रूषते स्वामिनः
सोऽयं वैरिभिरक्षतः कथमसौ सन्धास्यते राक्षसः ।
एतावद्धि विवेकशून्यमनसा म्लेच्छेन नालोचितं
दैवेनोपहतस्य बुद्धिरथवा सर्वा विपर्यस्यति ॥ ८ ॥

O the thoughtlessness of the barbarian! (Do you ask) Why ?—How will Rakshasa—he who even now serves his masters that disppeared like seeds—unscratched, side with the enemies ? This much was not indeed considered by the barbarian with mind devoid of discrimination. (Or, of one struck by Fate, the intellect in its entirety becomes perverse.)

CHAROHA

1. विवेक &c.—वि + विच + घञ् करणे विवेक discrimination. म्लेच्छति भाषान्तरं भाषते इति म्लेच्छः one whose tongue is different · here a *barbarian*. विवेकेन शून्यः । तस्य भावः । The म्लेच्छ is मलयकेतु । This is abuse ; it does not of necessity follow that he was really a म्लेच्छ ।

2. अन्वयः ॥ "यः अयं राक्षसः अधुना अपि बीजनाशं नष्टान् स्वामिनः शुश्रूषते सः असौ अक्षतः (सन्) कथं वैरिभिः सन्धास्यते" एतावत् विवेकशून्यमनसा म्लेच्छेन न हि आलोचितम् अथवा दैवेन उपहतस्य सर्वा बुद्धिः विपर्यस्यति । व्याख्या—"यः अयं राक्षसः अधुना अपि' गतेऽपि काले 'बीजानि इव नष्टान्' अदृश्यतां गतान् सतान् इत्यर्थः स्वामिनः' भर्तॄन् नन्दान् 'शुश्रूषते' परिचरति तत्कर्मसु सज्ज आस्ते इत्यर्थः 'सः असौ' राक्षसः अक्षतः शत्रु-शस्त्रैरनालीढः सन् 'कथं' केनप्रकारेण 'वैरिभिः' शत्रुभिश्चन्द्रगुप्तादिभिः 'सन्धास्यते' सन्धिमनुसंस्यते न कथमपि । 'एतावत्' एतन्मात्रं 'विवेकेन सदसद्विचारेण शून्यं'

विरहितं 'मनो' यस्य तादृशेन मूढमतिना म्लेच्छेन यवनेन मलयकेतुना न हि आलोचित नैव विचारितम्। 'अथवा' पक्षान्तरे इयं एव तं निन्दामि वस्तुतस्तु 'दैवेन' नियत्या 'उपहतस्य' ताडितस्य जनस्य 'सर्वा बुद्धि.' अशेषा धी: 'विपर्यस्यति' विपरीता भवति धिय: सर्वाङ्गीणा विपरीतता समापतति इत्यर्थ:। देवाभिभूतो वराको मलयकेतु:-विपरीता बुद्धिमाश्रित्य मा निरकालयत् न ह्यसौ तदा स्वस्थ। तत् सुष्ठैव तमाक्षिपामि इति भाव:। शार्दूलविक्रीडितम् छन्दम्।

3. बीजनाशम्—बीजानि इव नष्टा इति बीज+नश+णमुल् भावे बीजनाश नष्टा। "उपमाने कर्मणि च" इति चकारात् कर्तरि उपमाने णमुल्। It is difficult to see the significance of the comparison here. Perhaps it is intended to say that as seeds once destroyed will never germinate, so the rule of the Nandas now subverted cannot be restored, and my attempts are bound to prove fruitless.

4. यियूषतं—"ज्ञानुस्मृदृशां सन" इत्यत्मानेपदम्।

5. सोऽयम्—Telang reads तेषाम्। Now a तच्छब्द here would naturally go with the antecedent य:। But य: यियूषते तेषां वैरिभि is bad grammer and gives no sense

6. विपर्यस्यति—वि+परि+अस+लट् ति। अस क्षेपे is सकर्मक। Here it is used intransitively. Comp. "विपर्यस्त सौधम्", Sl. 11 *infra*.

12. तदिदानीमपि तावत् अरा तद्दस्तगतो विनश्येत् न तु राक्षसचन्द्रगुप्तेन सह सन्दधीत। अथवा मम काममसत्यमंध इति वरमयश: न तु शत्रुवञ्चनपराभूत इति। (समन्तादवलोक्य सास्रम्) एतास्ता देवपादक्रमणपरिचयपवित्रीकृतला: कुसुमपुरोपकण्ठभूमय:। इह हि—

शार्ङ्गाकर्षावमुक्तप्रशिथिलकविकाप्रग्रहेणात्र देशे
दैवेनाकारि पूर्वं प्रजवततुरगं बाणमोक्षश्वलेषु।
अस्यामुद्यानराजौ स्थितमिह कथितं राजभिस्तैर्विनेयं
सम्प्रत्यालोक्यमाना: कुसुमपुरभुवो भूयसा दु:खयन्ति ॥८॥

Thus, even now Rakshasa would indeed die fallen into the hands of his enemies, but would not side with Cbandragupta. Or, if infamy is to be, rather let it be that I am not true to my promise, but not that I am beaten by the enemy's strategy. (*Looking round—With tears*) These are those suburban grounds of Kusumapura whose surface is sanctified through experience of the footsteps of Sire. Here, formerly, the lodging of arrows tnto the moving mark was effected by Sire whose reins in the bit got slack being dropped while drawing the bow and the horse was running very fast; in this line of gardens he stopped. here he spoke to princes. Thus indeed, at this place, the precincts of Kusumapura now being seen without him greatly move me.

CHARCHA

1. अरातिं &c.—अरातिं enemy ; refers to चन्द्रगुप्त। तस्य हस्तः। तं गतः।

2. विनश्येत् &c.—I shall die before I make peace with चन्द्रगुप्त। Hence the injustice of Malayaketu's suspicions. It is infamous. But, whichever way I take it, I cannot avoid infamy. Malayaketu casts infamy on me by charging me with being in collusion with Chandragupta. I repudiate the infamy with all the emphasis at my command. The facts are, I have been outwitted by Chanakya. If Malayaketu had said so, would not that again be an infamy for a diplomat of my calibre ? So it seems I cannot avoid infamy and I am forced to choose between these two kinds of infamy. 'अथवा' पक्षान्तरे 'कामम्' अकामेनापि अयशः सुतरां परिहर्तुकामेनापि मया अभ्युपगन्तव्यं यत् अनयोर्मध्ये 'असत्यसन्धः' मलयकेतवे सकलनन्दराज्यमदत्त्वा मिथ्याप्रतिज्ञोऽहं जातः 'इति मम अयशो वरम्' दूषत् प्रियं 'त तु श्रुत्वचनेन' चाणक्यस्य शाब्देन 'पराभूतः' अहम् 'इति' वरम्' Hence though I am damned in the eyes of Malayaketu, it is

lucky for me that he takes me as a deceitful diplomat and not as an outwitted stategist.

3. देवपाद etc.—'देवस्य' राज्ञो नन्दस्य यत् 'पादक्रमणं चरणचारणं तस्य यः 'परिचयः' उपलब्धिः तेन 'परिचोक्षितं परिपूतं 'तलं' पृष्ठं यासां तादृश्यः 'ताः' पूर्व-परिचिता मे एताः कुसुमपुरस्य उपकण्ठे प्रान्ते स्थिताः 'भूमयः' स्थल्यः प्रदेशा इत्यर्थः।

4. अन्वयः॥ इह कुसुमपरभवः संप्रति तैर्विना आलोक्यमानाः (सत्यः)—दैवेन पूर्वम् अत्र देशे शार्ङ्गाकर्षावसृक्तप्रश्लिथिलकविकाग्रहेण (सता) प्रजविततुरगं चलेषु बाणमोचः अकारि. अस्याम् उद्यानराजौ स्थितम्, इह राजभिः कथितम् इत्यं—भूयसा हि दुःखयन्ति। व्याख्या—'इह' अस्मिन् पुरोपकण्ठे 'कुसुमपुरस्यभवः' पत्यन्त-भूमयः 'सम्प्रति' अधुना 'तैः' देवपादैः 'विना' केवलेन मया 'आलोक्यमानाः' दृश्यमानाः सत्यः—'दैवेन' नन्देन 'पूर्वं' प्राक् 'अत्र देशे' इह स्थले 'शार्ङ्गस्य' शृङ्ग-विकारस्य धनुषः 'आकर्षः' आकर्षणकर्मणि 'अवमृक्तः' इत्तात् पातितः अतएव 'प्रश्लिथिलः' अतिशयः 'कविकायाः' खलीनस्य 'ग्रहः' रश्मिः यस्य तथाविधेन सता [यद्वा—'प्रश्लिथिलेन' अतिशयेन 'कविकावग्रहेण' खलीनरश्मिना हेतुना | 'प्रजवितः' प्रवृद्धवेगः 'तुरगः' अश्वः यस्मिन् कर्मणि तद् यथा तथा 'चलेषु गतिशीलेषु लक्ष्येषु 'बाणमोचः' शरत्यागः 'अकारि' कृतः। लक्ष्यं चलं स्वयञ्च तुरगवेगात् चलं एव तथापि लक्ष्यं बिभेद इत्यर्थः। 'अस्याम् उद्यानानाम्' उपवनानां 'राजौ' पङ्क्तौ 'स्थितं' क्षणमुषितम् 'इह' अस्मिन् स्थले 'राजभिः' देवसन्दर्शनार्थमागतैः नृपैः सह 'कथितं'सम्भाषितम् इत्थम्' अनेन प्रकारेण—तत् तत् स्मृतिपथमानीय 'भूयसा हि नितरामेव दुःखयन्ति' तापयन्ति। स्वधरा।

5. इह हि—This इह is not redundant though अत्र, अस्याम् and इह appear again in the verse following. The first इह refers to the *whole* region in view, and अत्र, अस्याम् and इह that follow speak of *particular spots* there.

6. शार्ङ्गाकर्ष &c.—See व्याख्या। Of the two ways of dissolv-ing the compound that which ends with a कर्मधा—giving a हेतु-तृतीया to the whole is preferable (why ?).

7. पूर्वम्—Telang reads चित्रम् qualifying the क्रिया in बाणमोचः। चित्रं बाणमोचः = wonderful shooting of arrows.

8. प्रजवित &c.—प्रकृष्टो जवः प्रजवः great speed. सः सञ्जातः अस्य इति प्रजव + इतच् प्रजवितः। तादृशः तुरगः यस्मिन् कर्मणि तद् यथा तथा। Qual. the क्रिया in बाणमोचः।

9. तैः—Refers to नन्द (see अन्वय above). गौरवे बहुवचनम्।

10. इत्थम्—Refers to the way how दुःखयन्ति। They bring to memory all those incidents that occurred formerly here during the life time of Nanda, Compare a somewhat similar thought in—'तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियम्" &c.—*Svk.* Act III, where इति serves the same purpose which इत्थम् fulfils here.

13. तत् क्व नु गच्छामि मन्दभाग्यः। (विलोक्य) भवतु। दृष्टमेतत् जीर्णोद्यानम्! अत्र प्रविश्य कुतश्चित् चन्दनदासस्य प्रवृत्तिम् उपलप्स्ये। अलक्षितनिपाताः पुरुषाणां समविषमदशापरिणतयो भवन्ति। कुतः?—

पौरैरङ्गुलिभिर्नवेन्दुवदहं निर्दिश्यमानः शने-
र्यो राजेव पुरा पुरान्निरगमं राज्ञां सहस्रैर्वृतः।
भूयः संप्रति सोऽहमेव नगरे तत्रैव बन्धाश्रमो
जीर्णोद्यानकमेष तस्कर इव त्रासादिशामि द्रुतम्॥१०॥

Where now, ill-starred as I am, should I retire? (*Observing*) Well, I notice this garden in ruins. Entering into it I shall from somewhere gather information about Chandanadasa. The changes into the smooth and the rough stages of men's life are of unexpected advent. (Do you ask) Why (I say so)? That very self of mine which formerly stalked leisurely out of the city, attended like a king by thousands of princes and being pointed out (to each other) with their fingers by the citizens like the first moon, now again, in that very city, like a thief, with efforts baulked, hastily enters in fright into this despicable garden of ruins.

CHARCHA

1. अलक्षित &c.—न लक्षितः not noticed, *i. e.*, not expected. नि+पत+घञ् भावे निपात fall. अलक्षितः निपातः एषाम्। अतर्कितागमाः।

2. समविषम &c.—समाश्च विषमाश्च समविषमाः। तादृश्यः दशाः। तासां परिणतयः or तासु परिणतयः conversion into them.

3. कृतः—This is to explain by his own case how दशापरिणति is अलक्षितनिपाताः।

4. अन्वयः॥ यः अहं पुरा राज्ञा सहस्रैः वृतः राजा इव पौरैः अङ्गुलिभिः नवेन्दुवत् निर्दिश्यमानः (सन्) शनैः पुरात् निरगमं, बन्ध्यश्रमः स एव अहं सम्प्रति भूयः तत्रैव नगरे बन्ध्यश्रमः तस्कर इव त्रासात् द्रुतं जीर्णोद्यानकम् एष विशामि। व्याख्या—आत्मदशापरिणतेरतर्कितत्वं दर्शयति 'यः अहं पुरा' प्राक्जीवति नन्दे 'राज्ञां सहस्रैः वृतः' परिवारितः भूत्वा 'राजा इव' नन्द इव स्वयं 'पौरैः' पुरवासिभिः अङ्गुलिभिः नवेन्दुवत् प्रतिपच्चन्द्र इव 'निर्दिश्यमानः' अन्योन्यं दर्श्यमानः सन् 'शनैः' मन्दगति 'पुरात्' कुसुमपुरात् 'निरगमं' निर्गतोऽभूवं 'बन्ध्यश्रमः' नन्दराज्यप्रत्यानयने विफलप्रयासः 'स एव अहं सम्प्रति' अधुना 'भूयः' पुनरपि 'तत्रैव नगरे' तस्मिन्नेव पुरवासिषु सत्सु इत्यर्थः 'बन्ध्यश्रमस्तस्कर इव' व्यर्थीद्यमश्चौर इव उषसि 'त्रासात्' भयात् लोकलोचनपातभयात् 'द्रुतं सत्वर'' जीर्णोद्यानकं कुत्सितमिदमुद्यानं 'एष विशामि'। पुरा राजैव, अद्य चौर इव; पुरा पश्यन्तु लोका इति शनैः, अद्य लोका मा द्राक्षुरिति द्रुतम्; इत्यहो अतर्कितता दशापरिणतेः इति भावः।

5. पौरैः &c.—When a king is going out, people crowd on house-tops terraces &c. and point him out to each other with their finger with exclamations like, here he comes, there he turns the corner, yonder he has stopped, and so forth. Just the same they used to do with Rakshasa.

6. शनैः—Slowly. This is to let the people have a good view and is contrasted with द्रुतम् below.

7. राजेव—Contrast with तस्कर इव।

8. पुरात्—Contrat with जीर्णोद्यानकम्।

9. निरगमम्—Contrast with विशामि।

10. राज्ञां सहस्रैर्वृतः—Contrast implied by त्रासात्। If त्रासात् then the person is alone. But formerly he was राज्ञां सहस्रैर्वृतः।

11. बन्ध्यश्रमः—Applies to both अहम् and तस्करः। When a thief returns empty-handed in the morning, he hides himself somewhere to avoid notice, that is just what I am going to do. I have come without success like a thief and am now about to

to conceal my person among the ruins of this dilapidated garden.

12. जीर्णोद्यानकम्—जीर्णमुद्यानम्। कुत्सितं सत् इति कन् कुत्सिते।

14. अथवा येषां प्रसादादिदमासीत् त एव न सन्ति। (नाट्येन प्रविश्य अवलोक्य च) अहो जीर्णोद्यानस्य अरमणीयता। अत्र हि—

विपर्यस्तं सौधं कुलमिव महारम्भरचनं
सरः शुष्कं साधोर्हृदयमिव नाशेन सुहृदाम्।
फलैर्हीना वृक्षा विगुणनृपयोगादिव नया—
स्तृणैश्छन्ना भूमिर्मतिरिव कुनीतैरविदुषः॥ ११॥

Or, they themselves exist no longer to whose grace this was due. (*Acting entry and observing*) Alas! The repulsiveness of the garden in ruins!! Here indeed—The mansion made with elaborate preparation is upset like a family with extensive works of utility (*Or*—established with great efforts). The tank has dried up like the heart of an honest man by the loss of friends. The trees are devoid of fruits like measures through touch of a worthless king. The ground is overgrown with weeds like the mind of the unwise with bad counsels.

CHARCHA

1. येषां प्रसादात्—Refers to Nanda whose favourite he was (See Act II, Para 20). Nanda being dead his favourite also is pratically dead.

2. अन्वयः॥ महारम्भरचनं सौधं कुलमिव विपर्यस्तम्। सरः सुहृदां नाशेन साधोः हृदयमिव शुष्कम्। वृक्षाः विगुणनृपयोगात् नया इव फलैः हीनाः। भूमिः कुनीतैः अविदुषः मतिरिव तृणैश्छन्ना। व्याख्या—तामेव अरमणीयतां प्रपञ्चयति—'महता' विपुलेन 'आरम्भेण' परिकल्पनया द्रव्यसम्भारेण वा 'रचना' निर्माणं यस्य

तादृशं 'सौध' प्रासाद: 'कुलमिव' विपुल इव नन्दवंश: 'विपर्ध्यस्तं' विध्वस्तम्। 'मर:' एष दृश्यमान: कामार: 'मृदुतां' मिवाणां स्नेहवतां नन्दानां कीलूतादीनाञ्च इत्यर्थ: 'नाशेन साधो' सहृदयस्य मम 'हृदयमिव शुष्कं' जलहीन' नीरसञ्च जातम्। 'हता:' अमी उद्यानपादपा: 'विगुणस्य' गुणच्छोलस्य' 'नृपस्य' राज्ञ: मलयकेतो: 'योगात्' सम्पर्कात् 'नगा इव' मम नीतिप्रयोगा इव 'फले: हीना:' निष्फला: स्थिता:। 'भूमि:' अवत्या स्थली 'कुनीते:' कपटोपदेशे: भागुरायणप्रयुक्ते: 'अविदग्ध:' अपण्डितस्य मलयकेतो: 'मतिरिव' बुद्धिरिव 'तृणैरुत्का' परित्याक्ता।

3 महारम्भ &c.—Dhundhi t kes it with both सौध and कुल। Thus—"महारम्भा वचना शिल्पं यस्य सौधस्य, महारम्भा वचना धर्मादिपुरुषार्थक्रिया यस्य कुलस्य'। With reference to कुल he could have also said महता आरम्भेण रचनं प्रतिष्ठापनम् यस्य कुलस्य। It is said that Rakshasa took great pains in rearing the eight prematurely born sons of Nanda by placing them in oil, &c.

5. विगुण &c.—विगता गुणा अस्य विगुण:। Now see व्याख्या।

4. कुनीते:—नी + क्त भावे नीत lead, guiding &c. कुतसितानि नीतानि &c. *Or*—कुत्सितानि नीतानि एषाम् कुनीता: referring to Bhagurayana and his followers. See Tika also above.

15. अपि च—

क्षताङ्गानां नीचैः परशुभिरुदग्रक्लमभृतां
रुजा कूजन्तीनामविरतकपोतोपरुदितैः।
स्वनिर्मोकच्छेदैः परिचितपरिक्लेशकृपया
श्वसन्तः शाखानां व्रणमिव निबध्नन्ति फणिनः॥१३॥

Moreover,—The snakes are, as if out of pity for distressed acquaintances, tying up, sighing, the wounds of the boughs with lengths of their own sloughs—boughs with their body pierced with sharp axes showing great distress and groaning in pain with the ceaseless cooing of pigeons.

अन्वय:॥ नीचैः परशुभि: क्षताङ्गानाम् उदग्रक्लमभृतां रुजा (रुक् हेतुना) अविरत-कपोतोपरुदितैः कूजन्तीनां शाखानां व्रणं फणिन: परिचितपरिक्लेशकृपया श्वसन्त: (सन्त:)

स्वनिर्मोकच्छेदैः निबध्नन्ति इति। व्याख्या—'तीक्ष्णैः परशुभिः' सितधारैः कुठारैः 'चताङ्गानां भिन्नदेहानाम् अतएव 'उदग्रैः' कठोरैः यः 'क्लमः' क्लान्तिः तं बिभ्रति' याः ताडृशीनाम् अपि च 'रुजा' व्यतिवेदनया हेतुभूतया 'अविरतानि' अजस्राणि यानि 'कपोतानां' शाखाश्रितानां पारावतानां 'रुदितानि' कूजनानि तैः कूजन्तीनां क्रीयमानानां 'शाखानां' विटपानां यत् 'व्रणं' कठारक्षत चतं तत् [समान्य नपुंसकम्] 'फणिनः' शाखाश्रया सर्पाः 'परिचितस्य' सहवासविज्ञातस्य यः 'परिक्लेशः' यातना ततः सञ्जाता या 'कृपा' दया तया हेतुना 'त्रसन्तः' दुःखनिःश्वासं त्यजन्तः सन्तः 'स्वस्य' आत्मनः यः 'निर्मोकः' निर्मयनी तस्य 'कूटैः खण्डैः' 'निबध्नन्ति इव' योजयन्ति इव। रक्षक-वरहिते अस्मिन् व्याने इतः सर्पाः स्वच्छन्दं वृक्षेषु कृतनिलयाश्चिष्ठन्ति, इतः पुनरेषाहार-कामा कुठारैश्छिन्ना वृक्षाणां शाखाः—अहो अरमणीयता जीर्णोद्यानस्य इति भावः।

CHARCHA

1. चताङ्गानाम्—"अङ्गावकणठेभ्यश्च" इति ङीप्विकल्पः। पक्षे चताङ्गीनाम्।

2. उदग्र &c.—This is Dhundhi's reading. Telang adopts उदग्रैः चिनिरूहाम्। Construe तीक्ष्णैः उदग्रैः परशुभिः चताङ्गानाम् and चिनिरूहां शाखानां व्रणम्।

3. रुजा कूजन्तीनाम् &c.—रुज + क्विप् भावे रुज् distress. Note the misplacing of the epithets कूजन्तीनाम and रुदितैः। रुजा (वेदनया) रुदतीनाम् and कपोतोपकूजितैः are what is expected, because रोदन naturally goes with रुज् and कूजन with कपोत। छन्दोभङ्गभयात् शब्दयोर्व्यत्यासः।

4. *Remark*—In this verse Rakshasa pities the boughs, the trees themselves being noticed in the next verse. Verses 11, 12, 13 are to establish the अरमणीयता mentioned above.

16. एते च तपस्विनः—

अन्तःशरीरपरिशोषमुदग्रयन्तः
कोटचतिस्रुतिभिरस्रमिवोद्गिरन्तः।
छायावियोगमलिना व्यसने निमग्ना
वृक्षाः श्मशानमुपगन्तुमिव प्रवृत्ताः॥ १२॥

And these poor trees, plunged in distress, withered through the loss of shade, vomiting blood as it were by the exudation through holes bored by insects and thus aggravating the drying up of the interior of their trunk, are, as if preparing to go to the burning ground.

चन्दनदासः ॥ एते छायावियोगमलिनाः व्यसने निमग्नाः तपस्विनः द्रुमाश्च कीटचतिस्रुतिभिः असृक् उद्गिरन्त इव अन्तःशरीरपरिशोषम् उद्वमयन्तः (सन्तः) श्मशानम् उपगन्तुं प्रवृत्ता इव। व्याख्या—छिन्नासु शाखासु 'एते छायायाः वियोगेन' अपगमेन आतपपीड़िता अतएव 'व्यसने निमग्नाः' विपदि पतिताः 'तपस्विनः' दीना अनु कम्पार्हा इत्यर्थः। 'द्रुमाश्च' पादपा अपि 'कीटैः' कृता या 'चतयः' रन्ध्राणि ताभ्यः याः 'स्रुतयः' रससावाः ताभिः करणैः 'असृक्' शोणितम् 'उद्गिरन्त इव' अतएव 'अन्तः-शरीरस्य' अभ्यन्तरदेहस्य 'परिशोषं विशीर्णताम् 'उद्वमयन्तः' वर्द्धयन्तः असाध्यतरं कुर्वन्तः सन्तः 'श्मशानं' शवनिलयं प्रेतावासम् 'उपगन्तुम्' अभियातुं मर्त्तुमित्यर्थः 'प्रवृत्ता इव' प्रक्रान्ता इव। अनवेक्षणात् कीटदष्टा इमे द्रुमाः पुनः छिन्नासु शाखासु आतपदग्धाः सन्तः शुष्का मृता इव लक्ष्यन्ते इत्यहो अरमणीयता जीर्णोद्यानस्य।

CHARCHA

1. अन्तःशरीर &c.—अन्तर्गतं शरीरम् internal organs. These have commenced to dry up, because the trees are now exposed to the fierce rays of the sun, the boughs having been cut off as described in Sl. 12.

2. उद्वमयन्तः—उद्गतमयमस्त्र उदयः pointed, keen, grim &c. उदयं कुर्वन्तः इति उदय + णिच् + शतृ &c. The परिशोष is already there ; it is now being aggravated. How so (See असृमिव &c. below).

3. कीटचति &c.—See व्याख्या। The juice running through the bones is taken as identical with (अमेद) *blood*. Hence अमेदे करणे इया as in मौनवतौ नयनाभ्याम्।

4. असृमिव &c.—असृ is blood. The vomiting of blood is always a grave symptom in the sick. Besides being *itself* capable of killing, the loss of blood aggravates the परिशोष that

has commenced inside. Dhundhi takes अय an अयु । अस्रमुद्गमन्त: —weeping. "अस्रमुद्गमणि श्रीणिते" ।

5. क्षायाविरोग &c.—मलिन faded. The reason for it is क्षायाविरोग which exposes them to the sun. The क्षायाविरोग again is due to the loss of boughs (Sl. 12.)

6. श्मशानम् &c.—Dhundhi supposes the trees to be near the funeral pyre of the Nandas and are going to die through pity for the Nandas—"व्यसने निमग्ना नन्दवन्धव इव नन्दानां श्मशानं तदेव वर्त्तमानम् उपगन्तुं प्रवृत्ता इव" ।

17. यावदस्मिन् विषमदशापरिणामसुलभे भिन्नशिलातले मुहूर्त्तमुपविशामि । (उपविश्य आकर्ण्य च) अये किमिदमस्मिन् काले पटुपटहशङ्खमिश्रो नान्दीनादः । य एषः—

प्रमृद्नन् श्रोत्राणां श्रुतिपथमुसारं गुरुतया
बहुत्वात् प्रासादैः सपदि परिपीतोज्झित इव ।
असौ नान्दीनादः पटुपटहशङ्खध्वनियुतो
दिशां द्रष्टुं दैर्घ्यं प्रसरति सकौतूहल इव ॥ १४ ॥

I will sit down for a moment on this broken slab of stone (of this mansion), easily available in the fullness of the rough time. (*Sitting down and listening*) Ha ! What is this ? Sound of festive music at this hour wtth deep notes of drums and conches intermingled ! (*Or*—Wherefor is this sound...intermingled ?) The note of music mingled with the deep notes of drums and conches, which is drunk and through its magnitude instanly thrown up by the big mansions, proceeds as it were with curiosity to know the expanse of the quarters as if bursting the powerless ear-holes of listeners by its volume.

CHARCHA

1. विषमदशा &c.—विषमा दशा rouge stage. तस्याः परिणामः develoment of the rouge stage. तस्मिन् सुलभः easily available at the turn of the rouge stage. *Or*—दशायाः परिणामः change of stage. विषमः दशापरिणामः dire change of stage &c. The विषमदशा refer sto the mansion ruined (विषर्यस्तं सौधम्, Sl. 11). Broken slab of massions and marbles are scattered all over the place and become easily accessible (सुलभ) to the wearied traveller wishing to sit down like myself. Dhundhi takes the विषमदशा with reference to Rakshasa . thus—"विषमदशापरिणामवत् सुलभं । विषमदशा सम्प्रति सुलभा अतर्कितापनता तस्या इदं शिलातलं दैवाद्वब्धम्"—This marble-slab here is a unexpectedly seen as my reverse of fortune. This is not a very happy sense though pressed out with a good deal of twisting

2. अये किमिदम् &c.—नान्दी is festive music. तस्या नादः। पटु deep. पटह drum अस्मिन् काले implies that the music is untimely and unexpected.

3. अन्वयः॥ यः असौ बहुत्वात् प्रासादैः सपदि परिपीतोज्झितं पटुपटह-शब्दध्वनियुत. नान्दीनादः दिशां दीर्घत्वं दृष्ट्वा सकौतूहल इव गुरुतया श्रोतृणां असारं श्रुतिपथं प्रसहन् इव एष प्रसरति। व्याख्या—'यः असौ बहुत्वात्' प्रभूततया 'प्रासादैः' राजभवनैः कर्तृभिः 'सपदि' ततक्षणम् एकस्मिन्नेव क्षणे इत्यर्थः। 'परिपीतः' प्रथम निगीर्णः ततः 'उज्झितः' प्रतिध्वनिव्याजेन उद्गीर्णः 'पटुभिः' महद्भिः 'पटहध्वनिभिः' दक्कानादैः 'शब्दध्वनिभिः' जलजस्वनेरपि 'युतः' मिश्रः 'नान्दीनादः' मङ्गलतूर्यघोषः 'दिशां' दशानामपि ककुभां 'दीर्घत्वं' आयामं 'दृष्ट्वा' युगपदेव उपलभ्य 'सकौतूहल इव' कुतूकवानिव 'गुरुतया' दुर्वहत्वेन 'श्रोतृणाम्' आकर्णयितॄणाम् 'असारम्' अशक्तं 'श्रुतिपथं' कर्णविवरं 'प्रसहन्निव' निर्षिषयन्निव 'एष प्रसरति' समन्तात् सम्मूर्छति।

4. असारम्—सार strength. अविद्यमानः सारः अस्य &c. It is a fact that a loud report pains the ear. Dhundhi explains—"असारं सङ्कुचितामत्यर्थः।...तथा सङ्कुचिते रन्ध्रे गुरुर्मुद्गरादिः प्रविशंस्तदुपसङ्क्रामति तद्वत्"।

5. गुरुतया—प्रभूतया इति दृष्टिः। But बहुत्व has the same idea.

It is better to take it with reference to the intensity or volume of the note.

6. परिपीतोज्झित इव—The इव seems to be misplaced ; it is better taken with प्रस्खलन्। Either way it implies उत्प्रेक्षा। Dhundhi has—"बहु पीत जलादि यथा उद्गिरन्ति तथा अन्तः असान्तं नान्दीनादं प्रतिध्वनित्याजेन साँधा उद्गिरन्तीव इत्युत्प्रेक्षा"।

7. नान्दीनादः—This is superfluous, because यैः, in य एषः, being in a subsequent clause (उत्तरवाक्यगत) does the work of नान्दीनादः which precedes it.

8. दिशा दिग्भिः &c.—The plural in दिशाम् implies that all the quarters were simultaneously pervaded.

18. आः ज्ञातम्। एष हि मलयकेतुसंयमनमज्ञातो राजकुलस्य—(इत्यर्धोक्ते सासूयम्) मौर्य्यकुलस्य अधिकपरितोष प्रिशुनयति। (सवाष्पम्) कष्टं भोः कष्टम्।

आविशोऽस्मि श्रियं शत्रोरभिनीय च दर्शितः।
अनुभावयितुं मन्ये यत्नः सम्प्रति मां विधेः॥ १५॥

O I see! This indeed declares the great joy of the royal family—(*At this half-utterance with spite*)—of the Maurya family caused by the capture of Malayaketu. (*With tears*) Hard! O hard! I was informed of the fortune of the enemy and have been dragged up to it and made to see it. Methinks Fate's object (lit.—effort) now is to make me feel it.

CHARCHA

1. आ ज्ञातम् एष हि &c.—'एष हि' नूनमयं 'मलयकेतोः संयमनात्' यद्ज्ञात् 'मज्ञातः' उद्गतः नान्दीनादः 'राजकुलस्य'—नहि नहि 'मौर्य्यकुलस्य'—'अधिकम्' अतिगुरुकं 'परितोषं' 'प्रिशुनयति' सूचयति मलयकेतुर्गृहीत इतिचन्द्रगुप्तभवने अद्य उत्सवो वर्त्तते ततोऽयमज्ञानि नान्दीनादः। आः implies impatience, pique &c सज्ञातम् seems better than सज्ञातः।

2. अन्वयः॥ शत्रोः श्रियं आविशः, अभिनीय दर्शितश्च अस्मि। मन्ये सम्प्रति माम् अनुभावयितुं विधेः यत्नः (वर्त्तते)। व्याख्या—विधिना 'शत्रोः'

CHARCHA

1. विषमदशा &c.—विषमा दशा rouge stage. तस्याः परिणामः develoment of the rouge stage. तस्मिन् सुलभः easily available at the turn of the rough stage. *Or*—दशायाः परिणामः change of stage. विषमः दशापरिणामः direct change of stage &c. The विषमदशा refer sto the mansion ruined (विषमदशस्य सौधम्, Sl. 11). Broken slab of massions and marbles are scattered all over the place and become easily accessible (सुलभ) to the wearied traveller wishing to sit down like myself. Dhundhi takes the विषमदशा with reference to Rakshasa , thus—"विषमदशापरिणामवत् सुलभं । विषमदशा सम्प्रति सुलभा अतर्कितोपनता तस्या इदं शिलातलं दैवात्प्राप्तम्"—This marble-slab here is as unexpectedly seen as my reverse of fortune. This is not a very happy sense though pressed out with a good deal of twisting.

2. अये किमिदम् &c.—नान्दी is festive music. तस्या नादः। पटु deep. पटह drum. अस्मिन् काले implies that the music is untimely and unepected.

3. अन्वयः॥ यः असौ बहुत्वात् प्रासादैः सपदि परिपीतोज्झितं पटुपटहशङ्खध्वनियुतः नान्दीनादः दिशां दैर्घ्यं द्रष्टुं सकौतूहल इव गुरुतया श्रोतृणां असारं श्रुतिपथं प्रस्खलन् इव एष प्रसरति। व्याख्या—'यः असौ बहुत्वात्' प्रभूततया 'प्रासादैः' राजभवनैः कर्तृभिः 'सपदि' तत्क्षणम् एकस्मिन्नेव क्षणे इत्यर्थः। 'परिपीतः' प्रथमं निर्गौर्णः ततः 'उज्झितः' प्रतिध्वनिव्याजेन उद्गीर्णः 'पटुभिः' महद्भिः 'पटहध्वनिभिः' दक्कानादैः 'शङ्खध्वनिभिः' जलजस्वनैरपि 'युतः' मिश्रः 'नान्दीनादः' मङ्गलतूर्यघोषः 'दिशां' दशानामपि ककुभां 'दैर्घ्यम्' आयामं 'द्रष्टुं' युगपदेव उपलब्धुं 'सकौतूहल इव' कुतुकवानिव 'गुरुतया' दुर्धरत्वेन 'श्रोतृणाम्' आकर्ण्यताम् 'असारम्' अशक्तं 'श्रुतिपथं' कर्णविवरं 'प्रस्खलन्निव' निर्गच्छन्निव 'एष प्रसरति' समन्तात् सम्मूर्छति।

4. असारम्—सार strength. अविद्यमानः सारः अस्य &c. It is a fact that a loud report pains the ear. Dhundhi explains—"असारं सङ्कुचितमित्यर्थः।...तथा सङ्कुचिते रन्ध्रे गुरुर्मुद्गरादिः प्रविशंस्तदुपघातति तद्वत्"।

5. गुरुतया—प्रभूतया इति दृष्टिः। But बहुल has the same idea.

It is better to take it with reference to the intensity or volume of the note.

6. परिपीतोज्झित इव—The इव seems to be misplaced ; it is better taken with प्रसृत्वन्। Either way it implies उत्प्रेक्षा। Dhundhi has—"बहु पीतं जलादि यथा उद्गिरन्ति तथा अन्तः अमान्तं नान्दीनादं प्रतिध्वनिव्याजेन सौधा उद्गिरन्तीव इत्युत्प्रेक्षा"।

7. नान्दीनादः—This is superfluous, because यः, in य एषः, being in a subsequent clause (उत्तरवाक्यगत) does the work of नान्दीनादः which precedes it.

8. दिशा देर्घ्यम् &c.—The plural in दिशाम् implies that all the quarters were simultaneously pervaded.

18. आः ज्ञातम्। एष हि मलयकेतुसंयमनसञ्जातो राजकुलस्य—(इत्यर्धोक्ते सासूयम्) मौर्य्यकुलस्य अधिकपरितोष पिशुनयति। (सवाष्पम्) कष्टं भोः कष्टम्।

आवितोऽस्मि श्रियं शत्रोरभिनीय च दर्शितः।
अनुभावयितुं मन्ये यत्नः सम्प्रति मां विधेः ॥ १५ ॥

O I see ! This indeed declares the great joy of the royal family—(*At this half-utterance with spite*)—of the Maurya family caused by the capture of Malayaketu. (*With tears*) Hard ! O hard ! I was informed of the fortune of the enemy and have been dragged up to it and made to see it. Methinks Fate's object (lit.—effort) now is to make me feel it.

CHARCHA

1. आ ज्ञातम् एष हि &c.—'एष हि' नूनमयं 'मलयकेतोः संयमनात्' यद् ज्ञात् 'सञ्जातः' उद्गतः नान्दीनादः 'राजकुलस्य'—नहि नहि 'मौर्य्यकुलस्य'—'अधिकम्' अतिगुरुकं 'परितोषं' पिशुनयति' सूचयति मलयकेतुर्गृहीत इतिचन्द्रगुप्तभवने यद उत्सवो वर्त्तते ततोऽयमक्षरो नान्दीनादः। आः implies impatience, pique &c. सञ्जातम् seems better than सञ्जातः।

2. अन्वयः॥ श्रवोः श्रियं श्रावितः अस्मि, अभिनीय दर्शितश्च अस्मि। मन्ये सम्प्रति माम् अनुभावयितुं विधेः यत्नः (वर्त्तते)। व्याख्या—विधिना 'श्रवोः

विरोधचन्द्रगुप्तस्य 'श्रियं' राजलक्ष्मीं तत्सम्बन्धिनीं कथामित्यर्थः 'आवितः अस्मि' प्राक् विराधगुप्तकरभकादिभिः। 'अभिनीय' तदन्तिकं प्रापय्य तां श्रियं 'दर्शितस्मास्मि' विधिना। श्रवणात् कष्टतरं दर्शनमिति प्रतिकूलो विधिर्मामदा श्रुतसम्बन्धिदर्शनार्थमिहानीतवान्। एतावताप्यसौ' अतुष्टः। 'मन्ये' शङ्के 'सम्प्रति' अधुना 'मां' श्रवोः श्रियम् 'अनुभावयितुम्' उपलम्भयितुं 'विधेः' दैवहतकस्य 'यत्नः' प्रयासो वर्तते। घोरस्य तस्यैवानुभवस्य प्रारम्भोऽयं कर्णपीड़ाकरो नान्दीनादः इति भावः।

3. आवितः—The णिच् here is irrregularly supposed to give कर्मत्व to the अधिकर्तृ। Thh rule "गतिबुद्धि—" does not apply (see *ante*).

4. अभिनीय—अभि + नी here does not mean *acting*, as in Act I, Sl. 2. The sense is 'to take up to' as in "खड्गमभिनीय रक्षसि"—Act I.

5. दर्शितः—The कर्मत्व here is regular by "दृशेरनिषेधः"।

6. अनुभावयितुम्—अनु + भू is बुद्ध्यर्थ as in अनुभव which means बोध। Hence the rule "गतिबुद्धि—" applies. अहं श्रियम् अनुभवामि = मां श्रियम् अनुभावयति।

19. पुरुषः—आसीणो अअं। जाव अज्जचाणक्कादेसं संपादेमि [आसीनोऽयम्। यावदार्यचाणक्यादेशं सम्पादयामि] (राक्षसमपश्यन्निव तस्याग्रतो रज्जुपाशेन कण्ठमुद्बध्नाति)।

Man.—He is seated ; I will execute Noble Chanakya's orders. (*He ties up his neck with the noose of the rope as though without seeing Rakshasa*).

राक्षसः—(विलोक्य) अये कथमात्मानमुद्बध्नात्ययम्! अहमिव दुःखितस्तपस्वी। भवतु पृच्छाम्येनम्। (उपसृत्य प्रकाशम्) भद्रः किमिदमनुष्ठीयते?

Rakshasa—(*Observing*) How so! This man hangs himself! The poor fellow is distressed like myself. Well I will question him. (*Advancing—Aloud*) Good man what is it you are doing?

पुरुषः—(सबाष्पम्) अज्ज जं पिअवअस्सविणासदुःखिदो अम्हारिसो मन्दभग्गो जनो अणुचिट्ठदि [आर्य्य, यत् प्रियवयस्यविनाशदुःखितः अस्मादृशो मन्दभाग्यो जनः अनुतिष्ठति]।

Man.—(*With tears*) What an ill-fated man like myself does, Noble Sir, grieved by the loss of his dear friend.

राक्षसः—(आत्मगतम्) प्रथममेव मया ज्ञातं नूनम् अहमिव आर्त्तस्तपस्वीति। (प्रकाशम्) हे व्यसनसब्रह्मचारिन्, यदि न गुह्यं नातिभारिकं वा ततः श्रोतुमिच्छामि।

Rakshasa—(*To himself*) At the very outset it was guessed by me that this poor fellow was surely distressed like myself. (*Aloud*) O fellow-student-in-the-school-of-misfortune, if no secret or not very painful then I wish to hear it.

पुरुषः—अज्ज ण रहस्सं णादिगुरुअं किंदु ण सक्कोमि पिअवअस्सविणासदुःखिदहिअओ एत्तिअमेत्तं वि मरणस्स कालहरणं कादुं [आर्य्य, न रहस्यं नातिगुरुकम्। किन्तु न शक्नोमि प्रियवयस्यविनाशदुःखितहृदयः एतावन्मात्रमपि मरणस्य कालहरणं कर्त्तुम्]।

Man.—Noble Sir, it is no secret, nor very painful, but with my heart stricken at the loss of my dear friend, I cannot brook even this much loss of time in dying.

राक्षसः—(निःश्वस्यात्मगतम्) कष्टम् एते सुहृद्व्यसनेषु परमुदासीना प्रत्यादिश्यामहे वयमनेन। (प्रकाशम्) भद्र, यदि न रहस्यं नातिगुरु तच्छ्रोतुमिच्छामि।

Rakshasa—(*Sighing—To himself*) Hard ! This self of mine, supermely indifferent in his friend's straits, is being shamed by this man. (*Aloud*) Good man, if it is neither a secret, nor very painful, I wish to hear it.

CHARCHA

1. रज्जुपाशेन—रज्जुखितः पाशः the noose at the end of the rope. तेन ।

2. व्यसनसब्रह्म &c.—ब्रह्मन् is वेद । By transference of epithets the vow to be taken, the rites to be observed &c., while reading the Vedas are also ब्रह्मन् । In this sense ब्रह्म चरति इति ब्रह्मन् + चर + णिनि कर्तरि व्रते = ब्रह्मचारी one observing the vow necessary to read the Vedas, *i. e.*, a student of the Vedas. Next समानो ब्रह्मचारी सब्रह्मचारी a fellow student in the Vedas. समान becomes स by the rule "चरणे ब्रह्मचारिणि" । Now by another transference of epithets सब्रह्मचारिन् is here made to mean a fellow student only (not necessarily in the Vedas, but in any branch of knowledge). Again व्यसन, which means a calamity, is taken here as a subject of study !! व्यसने सब्रह्मचारी व्यसनसब्रह्मचारी &c. The sense is, both of us are equally in distress—mourning an intimate friend.

3. गुह्यम्—गुह संवरणे + क्यप कर्मणि गुह्यम् to be concealed. गोह्यम् is also available, because the Varttika "शंसिदुहिगुहिभ्यो वा", as seen in the Kasika, makes क्यप् optional with ण्यत् ।

4. अतिभारिकम्—भार weight. अतिशयितो भारः अतिभारः a great burden. सः अस्ति अस्य अस्मिन् वा इति अतिभार + ठन् मत्वर्थे अतिभारिकम् very oppressive, *i. e.*, painful to relate.

5. सुहृद्व्यसनेषु—The व्यसन was mani-fold. His life was threatened ; his belongings all confiscate ; his wife and child thrown into prison. Cf.—"गृहीतगृहसारमेनं सपुत्रकलत्रं संयम्य &c. Act I. Hence the plural in व्यसनेषु ।

6. प्रत्यादिश्यामहे—प्रत्यादेश is निराकृति supplanting, putting to

shade &c. Cf.—"प्रत्यादिश्यो रूपवतीनाम्", *Sak.* Act II. I think I am very fond of my friend and doing for him what no one else would have done. Hence I am at the top of the list of men that are devoted to their friend. But here is a man with a better sense of one's duty to a friend. This man has ousted me from my position at the top of the list —प्रत्यादिश्यामहे वयमनेन।

20. पुरुषः—अहो णिव्वन्धो अज्जस्स। का गई। णिवेदेमि। अत्थि दाव एत्थ णअरे मणिआरसेट्ठी विण्हुदासो नाम। [अहो निर्बन्धः आर्यस्य! का गतिः? निवेदयामि। अस्ति तावदत्र नगरे मणिकारश्रेष्ठी विष्णुदासो नाम]।

Mal.—Oh the insistence of Noble Sir! What help? I will tell you. There is a banker jeweller in this city named Vishnudasa.

राक्षसः—(आत्मगतम्) अस्ति विष्णुदासश्चन्दनदासस्य सुहृत्। (प्रकाशम्) किं तस्य?

Rakshasa.—(*To himself*) There is Vishnudasa Chandanadasa's friend. (*Aloud*) What of him?

पुरुषः—सो मम पिअवअस्सो [स मम प्रियवयस्यः]।

Man.—He is my dear friend.

राक्षसः—(सहर्षमात्मगतम्) अये प्रियवयस्य इत्याह अत्यन्तसंनिकृष्टःसम्बन्धः। हन्त ज्ञास्यति चन्दनदासस्य वृत्तान्तम्। (प्रकाशम्) भद्रं किं तस्य?

Rakshaka.—(*With joy—to himself*) Ha! he says his dear friend. The relationship is very close. Oh joy, he must know the news of Chandandasa. (*Aloud*) What of him, my good man?

पुरुषः—सो संपदं दिण्णाभरणादिविहवो जलणं पवेसिदुकामो णअरादो णिक्कन्तो। अहं वि जाव तस्स असुणिदव्वं ण सुणेमि ताव अत्ताणं उव्वन्धिअ वावादयिदुं इमं जिण्णुज्जाणं आअदो [स सम्प्रति दत्ताभरणादिविभवो ज्वलनं प्रवेष्टुकामो नगरान्निष्क्रान्तः। अहमपि यावत् तस्य अश्रोतव्यं न शृणोमि तावदात्मनम् उद्बध्य व्यापादयितुम् इदं जीर्णोद्यानमागतः]।

Man—He, now, with jewellery and other wealth given away, has gone out of the town with a mind to enter fire. I too have come to this garden in ruins to kill myself by hanging before I hear of the unhearable about him.

CHARCHA

1. निर्बन्धः—Importuny उपरोधः।

2. अत्यन्तसंनिकृष्टः &c.—अत्यन्तं संनिकृष्टः very close. सुपसुपा। Hence possibly he can tell me what has become of Chandanadasa.

3. दत्ताभरण &c.—आभरणानि आदिरस्य आभरणादिः। स चासौ विभवश्च। दत्तः आभरणादिविभवः अनेन।

4. अश्रौतव्यम्—Not fit for the ears (cf.—"किमनेन अश्रौतव्येन श्रुतेन"—Act V, Para 8), *i. e.*, the news of death.

21. राक्षसः—भद्र, अग्निप्रवेशे सुहृदस्ते को हेतुः ?

"किमौषधपथातिगैरुपहतो महाव्याधिभिः"—

Rakshasa.—Good man, what is the reasou for your friend entering the fire ? Is he stricken by fell diseases beyond the reach of remedies ?

पुरुषः—णहि णहि [नहि नहि]।

Man.—No, no,

राक्षसः—"किमग्निविषकल्पया नरपतेर्निरस्तः क्रुधा।"

Rak.—Is he cast off (*i.e.*, persecuted) by the king's wrath which is all but fire and poison ?

पुरुषः—अज्ज सन्तं पावं सन्तं पावं। चन्दगुत्तस्स जणवदे ण णिसंसापडिवत्ति [आर्य्य, शान्तं शापं शान्तं पापम्। चन्द्रगुप्तस्य जनपदे न नृशंसाप्रतिपत्तिः]।

Man—Begone sin ! Begone sin ! Noble Sir, there is no adoption of cruelty in the kingdom of Chandragupta.

राक्षसः—"अलभ्यमनुरक्तवान् कथय किं नु नारोजनं"—

Rak.—Did he feel interested in some unapproachable female ?

पुरुषः—(कर्णौ पिधाय) सन्तं पावं। अभूमि क्खु एसो अविणअस्स [शान्तं पापम्। अभूमिः खलु एषः अविनयस्य]।

Man—(*Blocking his ears*) Begone sin ! He is no subject for indecorum.

राक्षसः—"किमस्य भवतो यथा सुहृद एव नाशोऽवशः" ॥१६॥

Rak.—Has unavoidable loss of friend happened to him as to you ?

पुरुषः—अज्ज अह इं [आर्य्य, अथ किम्]।

Man—What else, Noble Sir (*i. e.*, Yes).

राक्षसः—(सावेगमात्मगतम्) चन्दनदासोऽस्य प्रियसुहृत् इति तद्विनाशो हुतभुजि प्रवेशहेतुः इति यत्सत्यं चलितमेवास्ते युक्तस्नेहपक्षपातात् हृदयम्। (प्रकाशम्) तद्विनाशश्च, प्रिय-सुहृदत्सलतया मर्त्तव्ये व्यवसितस्य सुचरितश्च, विस्तरेण श्रोतुमिच्छामि।

Rak.—(*With agtation—To himself*) Chandanadasa is his dear friend ; so ***his*** death is the reason for entering into fire ; thus really my heart indeed stands trembling from a reasonable partiality through affection. (*Aloud*) I wish to hear in detail of his friend's death and of the good deeds of him who is about to die through love for his dear friend.

CHARCHA

1. किमौषध &c.—औषधानां पन्थाः औषधपथः with the समासान्त affix अ। तम् अतिगच्छन्ति इति औषधपथ + अति + गम + ड कर्तरि। स ते मित्रम् 'औषधानां' भेषजानां 'पन्थानं' वर्त्म 'अतिगच्छन्ति' अतीत्य वर्त्तन्ते ये तादृशैः; अचिकित्स्यैः 'महाव्याधिभिः' क्रूररोगैः 'उपहतः' प्रपीड़ितः 'किम्' येन स प्राणान् परित्यज्य रोगयन्त्रणां परिहर्तुमिच्छति ?

2. किमग्नि &c.—अग्निश्च विषञ्च अग्निविषे fire and poison. ईषदसमाप्ते अग्निविषे इति अग्निविष + कल्पप् स्त्रियाम्। स ते मित्रं न चेद्दीर्घगम्लानः; तर्हि 'अग्निविषकल्पया' अग्नितुल्यया विषतुल्यया वा नरपतेः' दुरात्मनो राक्षसस्य 'क्रूधा' अकारणरोषेण 'निरस्तः' समाक्षिप्तः 'किम्' येन आत्मानं व्यापाद्य राजरोषं परिहर्तुमिच्छति ?

3. नृशंसा &c.—शंसनम् इति शंस + अभावे स्त्रियां शंसा killing. नृणां शंसा नृशंसा killing of men ; hence *cruelty*. नृशंसायाः प्रतिपत्तिः adoption of cruelty. *Or*—नृशंसा निष्ठुरा प्रतिपत्तिः प्रवृत्तिः cruel measure Translate—No cruel measures are adopted &c.

4. अलभ्यम् &c.—'कथय' ब्रूहि स ते मित्रम् 'अलभ्यं' दुष्प्रापं 'नारीजनम् अनु' स्त्रियं कामिदनुसन्धाय 'किं नु रक्तवान्' किं वा प्रणयवान् आसीत् येन तदप्राप्तौ सर्विद्धः प्राणान् त्यक्तुमुद्यतः ?

5. अनुरक्तवान्—अनु should be separated as a कर्मप्रवचनीय। *Or* say उपसर्गवशात् सकर्मकत्वम्।

6. नारीजनम्—कर्मप्रवचनीययोगे २या (see above).

7. अभूमिः—अपात्रम्, अयोग्यः। वि + नी + अच् भावे विनय decorum. अविनय indecorum.

8. किमस्य &c.—'अस्य' मित्रस्य ते 'अवस्थः' अप्रतीकार्यः 'सुहृदः' मित्रस्य 'प्राण एव किं' जातः 'यथा अवस्थः' ? अवाप्तिव क्षीऽपि मित्रनाशादेव म्रियते किम् ?

The four lines under inverted commas make up a complete verse.

9. चन्दनदासः &c.—चन्ददासः अस्य विष्णुदासस्य 'प्रियसुहृत् इति' अतो हेतोः 'तस्य' चन्दनदासस्य 'विनाशः' विष्णुदासस्य 'इतभुजि' अग्नौ 'प्रवेशहेतुः' प्रवेशकारणम् 'इति' अस्मात् 'यत्सत्यं' नूनं 'युक्तः' युक्तियुक्तः' यः 'स्नेहस्य' अनुरागस्य 'पक्षपातः' अभिनिवेशः तस्मात् 'हृदयं चलितमेव' भिया वेपमानमेव 'आस्ते'। चन्दनदासस्य मृत्युः प्राप्तः इति अप्रत्यक्षमपि युक्त्या अनुमातुं शक्यते अतस्तस्य पापभङ्गया कम्पते मे हृदयम्। Telang reads चन्दनदासस्य प्रियसुहृत्—this man is Chandanadasa's dear friend. This makes no difference in the sense. युक्तपक्षपातात् is Telang's reading, Dhundhi reads युक्तं पक्षपातात् which seems better. पक्षपातात् हेतोः चलितमेव आस्ते इति युक्तम्। Dhundhi construes—"चलिमास्ते इति यत् तत् युक्तमेव इति व्यवहितेनान्वयः"।

10. तद्विनाशम्—His death *i. e.*, the *Story* of his death. Obj. of श्रोतुम्।

11. प्रियसुहृत &c.—वत्सलः is कामवान् स्नेहवान्। प्रियसुहृदि वत्सलः। तस्य भावः। तया हेतुना 'मर्त्तव्ये' मरणे 'व्यवसितस्य' उद्युक्तस्य विष्णुदासस्य सुचरितं पावनं हृत्तम् च श्रोतुम् &c. विस्तरेण has प्रकृत्यादितया।

22 पुरुषः—अदो अवरं ण सक्कणोमि मन्दभग्गो मरणस्स विग्घमुप्पादेदुं [अतः अपरं न शक्नोमि. मन्दभाग्यः मरणस्य विघ्नमुत्पादयितुम्]।

Man—Ill-fated as I am, I cannot raise, after this, another obstacle to my death.

राक्षसः—भद्र श्रवणीयां कथां कथय।

Rak.—Good man, relate this story which is worth listening to.

पुरुषः—का गई। एसो क्खु णिवेदेमि। सुणादु अज्जो [का गतिः ? एष खलु निवेदयामि। शृणोतु आर्यः]।

Man—What help? Here I am telling; let Noble Sir listen.

राक्षसः—भद्र, अवहितोऽस्मि ।

Rak.—Good man, I am attentive.

पुरुषः—अत्थि एत्थ णअरे मणिआरसेट्ठी चन्दणदासो णाम [अस्ति अत्र नगरे मणिकारश्रेष्ठी चन्दनदासो नाम] ।

Man—In this city lives the banker-jeweller Chandanadasa by name.

राक्षसः—(सविषादमात्मगतम्) एतदपावृतमस्मच्छोकदौष्ट्राद्यं दैवेन । हृदय स्थिरीभव किमपि ते कष्टतरमाकर्णनीयमस्ति । (प्रकाशम्) भद्र, श्रूयते मित्रवत्सलः साधुः । किं तस्य ?

Rak.—(*In despair—to himself*) Here is opened by Fate the door to my initiation of grief. O heart, be steady ; there is something very terrible for you to listen to. (*Aloud*) Good man, it is reported that his honourable self is affectionate towards his friends. What of him ?

पुरुषः—सो एदस्स विण्हुदासस्स पिअवअस्सो होदि [स एतस्य विष्णुदासस्य प्रियवयस्यो भवति] ।

Man—He is a dear friend to this Vishnudasa.

राक्षसः—(स्वगतम्) सोऽयमभ्यर्णः शोकवज्रपातो हृदयस्य ।

Rak—(*To himself*) Here, the stroke of the thunderbolt of grief of my heart is imminent.

पुरुषः—तदो विण्हुदासेण वअस्ससिणेहसरिसं अज्ज विण्णविदो चन्दगुत्तो [ततः विष्णुदासेन वयस्यस्नेहसदृशम् अद्य विज्ञापितश्चन्द्रगुप्तः] ।

Man—Now Chandragupta was informed to-day by Vishnudasa as befitting the love for his friend.

राक्षसः—कथय किमिति ।

Rak—Say what it was.

पुरुषः—देव मह गेहे कुडुम्बभरणपज्जत्ता अत्थवत्ता अत्थि । ता एदिणा विणिमएण मुच्चिज्जदु पिअवअस्सो चन्दणदासोत्ति [देव, मम गेहे कुटुम्बभरणपर्य्याप्ता अर्थवत्ता अस्ति । तत् एतेन विनिमयेन मुच्यतां प्रियवयस्यश्चन्दनदासः इति] ।

Man—Sire, there is money enough in my house to support your dependents ; so, in exchange for it, let my dear friend Chandanadasa be released.

CHARCHA

1. अद्यच्छोक &c.—दीक्षणं दीक्षा initation. शोके दीक्षा । अद्याकं शोकदीक्षा । तस्याः दारम् । As yet Rakshasa has not wept, deaths and other calamities notwithstanding. He would weep now —receive his initiation at weeping.

2. अभ्यर्थः—अभि + अर्द + क्त कर्तरि अभ्यर्थ or अभ्यर्दित । The former means *near*, at hand ; the second signifies *distressed* (better क्त कर्मणि) । Cp—"अभ्यर्थमागस्कृतं" &c.—Raghu. The blow is at hand, *i. e.*, the man is going to utter the terrible words announcing Chandanadasa's death.

3. वयस्यस्नेह &c.—कुटुम्ब is पोष्यवर्ग । कुटुम्बानां भरणम् maintenance of dependants. तस्मै पर्य्याप्त enough for their maintenance. Here कुटुम्ब is ambiguous. It may be taken as referring either to विष्णुदास or to चन्द्रगुप्त । It is usually taken with reference to विष्णुदास । But then the offer becomes a contemptible one, at least not big enough to tempt Chandragupta. Why should Chandragupta design to accept as ransom for Chandanadasa the petty allowance which a shop-keeper gives to his relatives ? It seems better to take कुटुम्ब as referring to चन्द्रगुप्त । "I

have immense wealth, equal to what your majesty spends after your relatives. All that is at your disposal ; may it please your majesty to accept it as ransom for Chandanadasa ?" This would be in keeping with the position of Chandanadasa and also of Chandragupta, besides being "प्रियबन्धुसख स्नेहसदृशम्" as the text asserts.

23. राक्षसः—(स्वगतम्) साधु भो विष्णुदास साधु। अहो दर्शितो मित्रस्नेहः। कुतः ?

पितॄन् पुत्राः पुत्रान् परवदभिहिंसन्ति पितरो
यदर्थं सौहार्दं सुहृदि च विमुञ्चन्ति सुहृदः।
प्रियं मोक्तुं तद् यो व्यसनमिव सद्यो व्यवसितः
कृतार्थोऽयं सोऽर्थस्तव सति वणिक्त्वेऽपि वणिजः॥ १७॥

(प्रकाशम्) भद्र, ततस्तथाभिहितेन किं प्रतिपन्नं मौर्य्येण ?

Rakshasa—(*To himself*) Bravo, O Vishnudasa, Bravo ! Love for friend is truly shown by you. (Do you ask) How ?—That wealth of thine, a trader who is prepared forthwith to avoid like a calamity that dear thing for the sake of which sons kill fathers and fathers kill sons like enemies and friends renounce friendship in their friends, has served its ends, your trade-instinct notwithstanding. (*Aloud*) Good man, what was done by Maurya thus informed ?

अन्वयः॥ यदर्थं पुत्राः पितॄन्, पितरः पुत्रान् परवत् अभिहिंसन्ति, सुहृदः सुहृदि सौहार्दं विमुञ्चन्ति च सः अयम् अर्थः वणिजस्तव वणिक्त्वे सत्यपि कृतार्थः, यः (त्वं) तत् प्रियं व्यसनमिव सद्यो मोक्तुं व्यवसितः। व्याख्या—'यदर्थं यन्निमित्तं यस्य हेतोः 'पुत्राः पितॄन्' पूज्यान् जनकान् 'पितरः पुत्रान्' प्रियान् सुतान् 'परवत्' रिपव इव 'अभिहिंसन्ति' निघ्नन्ति 'सुहृदः,' सखायः 'सुहृदि' सुहृद्विषये यत् "सौहार्दं सख्यित्वं तत् 'विमुञ्चन्ति च' विजहत्यपि 'सः अयं' सर्वातिशायी 'अर्थः' धनं 'वणिजः' पण्यजीविनः 'तव वणिक्त्वे' वणिग्भावे 'सत्यपि' तं वणिग्भावमनाहृत्य 'कृतार्थः' सफलो जातः 'यः'

त्वं 'तत् प्रियं' प्रार्थनीयं वस्तु अर्थमिति यावत् 'व्यसनमिव' विपदमिव 'सद्यः' तत्क्षणम् एकपदे इत्यर्थः 'मोक्तुं' हातुं 'व्यवसितः' प्रयतसे। अर्थलुब्धा हि वणिजो भवन्ति, वणिक् च त्वमसि। तथापि अकातरं सन्निमित्ते त्यजसि तत् सर्वथा सफला ते अध्यवसा इत भावः।

CHARCHA

1. सौहार्दम्—सुहृदो भावः इति सुहृत् + अण्। "हृन्नसिन्भ्यन्ते पूर्वपदस्य च" इत्युभयपदवृद्धिः। सुहृदयस्य भाव इति तु सौहृदम्। See also Sakuntala.

2. प्रियम्—सामान्ये नपुंसकम्। Refers to प्रियवस्तुभाव। Hence तत् is in the neuter.

3. व्यसनम् &c.—व्यसन is विपद्। Peopls avoid disasters with promptitude (सद्यः)। You are renouncing wealth without hesitation. Hence the resemblance. Dhundhi takes it differently thus—"स्त्रीद्यूतपानादिव्यसनमिव। तद्धि व्यसनिभिः अतिप्रियतया दुस्त्यजम् इति भावः"। That is to say, just as wine, woman and similar vices are hard to discard to the ordinary run of men, so is wealth to a trader. Hence construe—व्यसनमिव प्रियं तत् यः सद्यो मोक्तुं व्यवसितः &c. Step by step is one weaned of these vices, but you leave fortune at one bound (सद्यः)—a good construction undoubtedly.

4. सति वणिक्—अनादरे ङी। Or, if it be contended that अनादर is already expressed by अपि, then take it as भावे ङी।

5. किं प्रतिपन्नः मौर्य्येण—What course did Maurya adopt?

24. **पुरुषः—अज्ज, तदो एवं भणिदेण चन्दउत्तेण पडिभणिदो सेट्ठी विल्लभदासो—'ण मए अत्थस्स कारणेण चन्दणदासो संजमिदो किंदु पच्छादिदो अणेण अमच्चरक्खसस्स घरअणो त्ति बहुसो जाणिदं। तेण वि बहुसो जाचिदेण ण समप्पिदो त्ति। ता जदि तं समप्पेदि ततो अत्थि से मोक्खो। अण्णहा प्राण-**

हरो से दण्डो" त्ति भणिअ वज्झट्ठाणं आणीदो चन्दणदासो। तदो जाव वअस्स चन्दणदासस्स असुणिदव्वं ण सुणोमि ताव जलणं प्पविसामि त्ति सेट्ठी विण्हुदासो णअरादो णिक्कन्दो। अहं वि विण्हुदासस्स असुणिदव्वं जाव ण सुणोमि ताव डव्वन्धिअ अप्पाणं वावादेमि त्ति इदं जिसु ज्जाणं आअदो [आर्य, ततः एवं भणितेन चन्द्रगुप्तेन प्रतिभणितः श्रेष्ठी विष्णुदासः—"न मया अर्थस्य कारणेन चन्दनदासः संयमितः किन्तु प्रच्छादितः अनेन अमात्यराक्षसस्य गृहजनः इति बहुशो ज्ञातं तेनापि बहुशो याचितेन न समर्पित इति। तत् यदि तं समर्पयति ततः अस्ति तस्य मोक्षः अन्यथा प्राणहरोऽस्य दण्डः"। इति भणित्वा वध्यस्थानमानायितश्चन्दनदासः। ततो "यावद्वयस्य-चन्दनदासस्य अश्रोतव्यं न शृणोमि तावत् ज्वलनं प्रविशामि" इति श्रेष्ठी विष्णुदासो नगरान्निष्क्रान्तः। अहमपि विष्णुदासस्य अश्रोतव्यं यावन्न शृणोमि तावदुद्दध्य आत्मानं व्यापादयामि इति इदं जीर्णोद्यानमागतः]।

Man—Noble Sir, thus informed, Chandragupta replied thus to Banker Vishnudasa—Chandanadasa is imprisoned by me not through the inducement of (*i. e.*, for the sake of) money, but because it has transpired from many sources that Minister Rakhasa's wife is concealed by him, He again has not delivered her up though repeatedly asked (to do so). Well, if he delivers her up, there is release for him, otherwise sentence that will take away life. Saying this he caused Chandanadasa to be led to the place of execution. Next Banker Vishnudasa went out of the city thus resolved—"I

will enter fire by the time I do not hear the unhearable of friend Chandanadasa." I too have come to this garden in ruins with a view to kill myself by hanging by the time I do not hear the unhearable about Vishnudasa.

CHARCHA

1. भणितेन—भण + क्त कर्मणि भणित addressed &c.

2. अर्थस्य कारणेन—कृ + णिच् + ल्युट् भावे कारण urging. अर्थस्य धनस्य यत् कारणं प्रेरणा तेन हेतुना। कारण should not be taken here as 'cause'; for then अर्थ and कारण, become identical and must take the same विभक्ति yielding अर्थेन कारणेन instead of अर्थस्य कारणेन।

3. प्राणहरः—प्राणान् हरतीति प्राण + हृ + अच् कर्तरि।

4. आनायितः—आ + नी + णिच् + क्त कर्मणि।

25. राक्षसः—भद्र, न खलु व्यापादितश्चन्दनदासः ?

Rak.—Good man, I hope Chandanadasa is not killed yet.

पुरुषः—अज्ज दाव वावादोअदि। सो क्ख संपदं पुणो पुणो अमच्चरक्खसस्स घरअणं जाचीअदि। ण क्ख सो मित्तवच्छलदाए समप्पेदि। ता एदिणा कालखेणेण होदि से मरणस्स कालहलणं [अद्य तावद्व्यापाद्यते। स खलु साम्प्रतं पुनः पुनः अमात्यराक्षसस्य गृहजनं याच्यते। न खलु सः मित्रवत्सलतया समर्पयति। तत् एतेन कारणेन भवति तस्य मरणस्य कालहरणम्]।

Man—He will be killed to-day. He is now being repeatedly demanded (the delivery of) the wife of Minister Rakshasa, but through his love for his friend, he does not deliver her up; for this reason there is being loss of time in his execution.

राक्षसः—(सहर्षमात्मगतम्) साधु, वयस्य चन्दनदास साधु।

शिविनेव समुद्भूतं शरणागतरक्षणात्।
निचीयते त्वया साधो यशोऽपि सुहृदा विना ॥१८॥

Rak.—(*With joy—to himself*) Bravo ! Friend Chandanadasa, Bravo ! Good man, as by Sivi, fame from the protection of a refugee is being earned by you through your friend as the bird.

CHARCHA

1. सः गृहीजनं याचते—सः is the अप्रधानकर्म or याच्यते। It has become उक्त by "अप्रधाने दुहादीनाम्"।

2. भवति अस्य—Telang reads न करोमि। The sense then becomes—I cannot delay my death, because Chandanadasa is firm in his refusal. This is obviously absurd.

3. अन्वयः॥ हे साधो, सुहृदा विना त्वया अपि शिविना इव शरणागतरक्षणात् समुद्भूतं यशः निचीयते। व्याख्या—हे 'साधो' सज्जन 'सुहृदा' मित्रेण मित्ररूपेण इत्यर्थः 'विना' पक्षिणा मल्लक्षणेन कपोतेन करणभूतेन 'त्वया अपि शिविना इव' औशीनरेण राज्ञा यथा तथैव 'शरणं' रक्षितारम् 'आगतस्य' प्राप्तस्य जनस्य 'रक्षणात्' त्राणात् 'समुद्भूतं' जातं यत् 'यशः' तत् 'निचीयते' अर्ज्यते। शरणागतपालक इति शिवेर्यशः कपोतात् जातं तवापि तदेव यशो मत्तः इति भावः। पुरा किल शिवेः परीक्षार्थं कपोतमूर्त्तिमग्निमभिधावन् श्येनरूप इन्द्रः प्राप्तः। कपोतो राजानं शरणमाप स च स्वदेहमर्पयित्वा तं श्येनात् ररक्ष इति पौराणिकी कथा।

4. शिविनेव—Dhundhi reads शिवेरिव, but also notices शिविनेव in his commentary. Dr. Hillebrandt's collation also includes शिविनेव। With शिवेरिव Dhundhi is forced to adopt the bad construction सुहृदा विना अपि।

5. सुहृदा विना—This has puzzled Dhundhi who takes विना as the privative अव्यय and explains—"तेन (शिविना) हि शरणागतस्य सन्निधावेव स्वविनाशोऽभ्युपगतः त्वया तु सुहृदा विनापि...मम असन्निधाने इदं यशो निचीयते इत्यतो शिवेरपि त्वमधिकगुणः"। We take वि in the sense of

पक्षिन्। "विः स्यात् पक्षिण्यण्डजम्" इति विश्वः। Also Comp वि meaning (bird) in "अनुस्मृताखण्डलसूनुविक्रमः"—in Kirat I Sl. 24. Sivi earned his fame with a bird (कपोत); in your case I am the bird (see व्याख्या)।

26. (प्रकाशम्) भद्र गच्छ गच्छेदानीं शीघ्रम्। विष्णुदासं ज्वलनप्रवेशाद्विवारय। अहमपि चन्दनदासं मरणान्मोचयामि।

(*Aloud*) Go, good man, go quick ; stop Vishnudasa from entering into fire. I too will save Chandanadasa from death.

पुरुषः—अह ङ्ण केण उवाएण तुमं चन्दणदासं मरणादो मोचेसि [अथ पुनः केनोपायेन त्वं चन्दनदासं मरणात् मोचयसि]?

Man—By what means will you now save Chandanadasa from death ?

राक्षसः—(खड्गमाकृष्य) ननु अनेन व्यवसायसुहृदा निस्त्रिंशेन। पश्य—

निस्त्रिंशोऽयं विगतजलदाकाशसङ्काशमूर्त्ति-
र्युद्धश्रद्धापुलकित इव प्राप्तसख्यः करेण।
सत्त्वोत्कर्षात् समरनिकषे दृष्टसारः परैर्मे
मित्रस्नेहादिवशमधुना साहसे मां नियुङ्क्ते॥ १९॥

Rak.—(*Drawing his sabre*) Verily, with this sword the friend at darings. Behold ! This sword now drives me to deeds of daring, overpowered as I am through love of friend —the sword whose look shines like that of the sky with clouds vanished ; which, with union secured with my hand and through exuberance of valour is as if overjoyed from its fondness for a fight ; which has its might witnessed by my enemies on the touch-stone of battle.

CHARCHA

1. जलनप्रवेशात्—"वारणार्थानाम् ईप्सितः" इति अपादानत्वात् ५मी।

2. मरणात्—"भीत्रार्थानां भयहेतुः" इत्यपादानत्वात् ५मी।

3. व्यावसायसुहृदा निस्त्रिंशेन—वि+अव+सो+घञ् भावे व्यवसाय enterprise. निर्गतः त्रिंशतः इति निर्+त्रिंशत्+डच् समासान्त निस्त्रिंशः literally that which has passed thirty, *i. e*, more than thirty. Hence a sword measuring more than thirty *finger breadths* is निस्त्रिंशः (निर्गतस्त्रिंशतः अङ्गुलिभ्यः)। Again age exceeding thirty years gives निस्त्रिंशानि वर्षाणि &c. व्यवसायस्य सुहृत् a companion at my darings &c. This sword has helped me out of many tight situations, it will stand by me now too. In other words—"With this sword I will rescue him from the executioners."

4. अन्वयः॥ विगतजलदाकाशसङ्काशमूर्त्तिः समरनिकषे परैः दृष्टसारः, सत्त्वोत्कर्षात् युद्धश्रद्धापुलकित इव करेण प्राप्तसख्यः अयं मे निस्त्रिंशः मित्रस्नेहात विवशं मामधुना साहसे नियुङ्क्ते। व्याख्या—'विगताः' दूरीभूताः 'जलदाः' मेघाः यस्मात् तादृशं यत् 'आकाशं' तेन 'सङ्काशा' सदृशी 'मूर्त्तिः' रूपं तस्य तादृशः नभोनील इत्यर्थः अपि च 'समरूपे' रणस्थलीरूपे 'निकषे' परीक्षापाषाणे 'परैः' शत्रुभिः 'दृष्टः' कृतःपूर्वमनुभूतः 'सारो' बलं यस्य तादृशः अतएव अभयप्रदः पुनश्च 'सत्त्वस्य' आत्मनः शौर्य्यस्य 'उत्कर्षात्' प्राचुर्य्यात् हेतोः 'युद्धे' रणकर्मणि या 'श्रद्धा' आत्यन्तिकी इच्छा तया 'पुलकित इव' जातपुलक इव सन् 'करेण' मम दक्षिणेन हस्तेन सह 'प्राप्तं' लब्धं 'सख्यं' साहचर्य्यं येन तादृशः निष्काशः करेण धृतो भूत्वा इत्यर्थः 'अयं मे निस्त्रिंशः' खड्गः मित्रस्नेहात् सुहृद्दात्सख्यात् 'विवशं परायत्तम् आत्मनि अप्रभुमिति यावत् 'मां' अधुना' अस्मिन् क्षणे 'साहसे' हठकर्मणि घातकविद्रावणरूपे 'नियुङ्क्ते' भृत्यमिव व्यापारयति एतत् पश्य इति पूर्वेण सम्बन्धः।

5. विगतजलद &c.—See व्याख्या। Polished steel is often compared to the blue sky. Thus असिश्यामा in "ते चाकाशमसिश्याममुत्पत्य परमर्षयः"। Dhundhi reads सजलजलदव्योमसङ्काशमूर्त्तिः and explains 'सजलः जलधारासहितश्चासौ जलदव्योमसङ्काशमूर्त्तिश्च...धाराजलसहितत्वादेव युद्धश्रद्धापुलकित इव इत्युत्प्रेक्षा धाराजलकणिकानां पुलकसादृश्यसम्भवात्"। He first compounds जलद and व्योम into a द्वन्द्व। The sword resembles both—"नैल्यनैर्मल्यगुणाभ्यां जलदव्योमदृष्टान्तः"। Next he supposes it was drizzling at the time, and the sword struck by a few of

the falling drops looked like having hairs on end. The idea seems far-fetched ; besides there is nothing in the text to show that it was raining then ; on the contrary Rakshasa was sitting in the open on a marble-slap which points to a fair day. By trasference of epithets पुलकित may well mean *glad* without reference to actual पुलक (see next).

6. युद्धश्रद्धा &c.—पुलक horripilation. पुलकः सञ्जातः अस्य इति पुलक + इतच् तारकादि पुलकितः having hairs on end. But generally *pleasure* sets the hairs on end ; hence by लक्षणा, पुलकित means *delighted*, which is its sense here. Now see व्याख्या ।

7. प्राप्तसख्यः &c.—We may say—The sword is delighted at the prospect of a fight and hence has joined the hand—युद्धश्रद्धापुलकितः अतएव प्राप्तसख्यः करेण सह ; *Or*—As Rakshasa draws the sword, the weapon, in touch with the hand, expects a fight and is delighted—करेण सह प्राप्तसख्यः अतएव युद्धश्रद्धापुलकितः ।

8. सत्त्वोत्कर्षात्—A weak person funks a fight, but the sword in its plenitude of prowess longs for it—it has युद्धश्रद्धा । हेतौ पञ्मी । The prowess of the wielder of it is attributed to the sword.

9. विवशम्—वशम् आयत्तता । विगतं वशमस्य विवशः powerless. I cannot resist the urgings of the sword, love for friend has possessed me, I have lost control of myself.

10. नियुङ्क्ते—नि + युज + लट् ते । नि + युज has the idea of *command*. The sword commands me, I cannot say 'nay', because I am विवश ।

27. पुरुषः—अज्ज एवं सेट्ठिचन्दणदासजीवितप्पदाणपि-सुणिदं विसमदसाविपाअणिपडिदं साधु ण सक्कोमि तुमं णिसीअ पडिवत्तुं । किं सुगिहीदणामहेआ अमच्चरक्खसपादा तुम्हे दिट्ठिआ दिट्ठा [आर्य, एवं श्रेष्ठिचन्दनदासजीवितप्रदान-

पिशुनितं विषमदशाविपाकनिपतितं साधु न शक्नोमि त्वां निर्णेय प्रतिपत्तुम्। किं सुगृहीतनामधेया अमात्यराक्षस-पादा यूयं दिष्ट्या दृष्टाः]? (इति पादयोः पतति)।

Man—Noble Sir, you, thus disclosed by the grant of life to Banker Chandanadasa, but fallen into a turn of the rough stage of life, I cannot very well make out with certainty. Are you the revered Minister Rakshasa of auspicious name luckily seen (by me)? (*Falls at his feet*).

राक्षसः—उत्तिष्ठोत्तिष्ठ, अलमिदानीं कालहरणेन। निवेद्यतां विष्णुदासाय एष राक्षसश्चन्दनदासं मरणान्मोचयति (इति "निस्त्रिंशोऽयम्—" इत्यादि पठन्नाकृष्टखड्गः परिक्रामति)।

Rak.—Get up, get up, away with loss of time. Let Vishnudasa be informed that Rakshasa here is saving Chandanadasa from death. (*Goes round with sword drawn repeating* the verse "निस्त्रिंशोऽयम्" &c)

पुरुषः—ता करेहि मे पसादं संदेहणिस्सएण [तत् कुरु मे प्रसादं सन्देहनिर्णयेन]।

Mad.—Then do me the favour by removing my doubts.

राक्षसः—सोऽहमनुभूतभर्तृविनाशः सुहृद्विपत्तिहेतुः अनार्यो दुर्गृहीतनामधेयो यथार्थो राक्षसः।

Rak.—He am I, Rakshasa in its true sense, who saw the death of his master; who is the source of calamity to his friends; who is ignoble and of inauspicious name.

CHARCHA

1. आर्य &c.—'एवम्' अनेन प्रकारेण 'विषमदशायाः विपाके निपतितं श्रेष्ठिनः चन्दनदासस्य जीवितप्रदानेन' जीवितप्रदानप्रतिज्ञया 'पिशुनितं' सूचितम्

अमात्यराक्षसस्य स्याः इति तर्कितं 'त्वां निर्णीय प्रतिपत्तु' स एव त्वमिति निश्चित्य गृहीतु' 'साधु न शक्नोमि'। तत् पृच्छामि 'किं सुगृहीतनामधेया अमात्यराक्षसपादाः यूयं दिष्ट्या' भाग्यबलेन 'मया दृष्टाः' ?

2. आक्रान्तखड्गः—Telang's आक्रम्य खड्गम् is rejected, because the खड्ग is already आक्रान्त। See above—(खड्गमाक्रम्य) नन्दनेन &c. We cannot say that खड्गमाक्रम्य above should be dropped, because there the खड्ग is described as प्राप्तसख्यः करेण which becomes inconsistent if the खड्ग is not already आक्रान्त।

3. अनुभूत &c.—'अनुभूतः भर्तुः' नन्दस्य 'विनाशः' अनेन। तथापि न मृतः अतएव यथार्थो राक्षसः।

4. सुहृद्विपत्ति &c.—'सुहृदां' कौलूतादीनां 'सुहृदः चन्दनदासस्य च वा 'विपत्तिः' विनाशः तस्य हेतुः। तथापि भवन्त इव मरणे न कृतव्यवसायः अतएव अनार्य्याचरणात् यथार्थो राक्षसः।

5. दुर्गृहीत &c.—किं ब्रवीषि 'आर्य्य' इति 'सुगृहीतनामधेयः' इति च? 'अनार्य्यः दुर्गृहीतनामधेयः' इति ब्रूहि।

6. यथार्थो राक्षसः—अन्वर्थनामा राक्षसोऽहम्। Comp. "अन्वर्थसोऽपि ननु राक्षस राक्षसोऽसि"—Act V, 7.

28. पुरुषः—(सहर्षं पुनः पादयोः पतित्वा) हो हो मानहे! दिट्ठिआ दिट्ठोसि। प्पसीदंदु अमच्चपादाः। अत्थि दाव एत्थ पढ़मं चन्दउत्तहदएण अज्जसगडदासस्स वधो आणत्तो। सो अ केन वि अवहरिअ देसन्तरं णीदो। तदो चन्दउत्तहदएण कोस एसो प्पमादो किदो त्ति अज्जसगडदासे समुज्जलिदो कोववह्नी घादअजणणिहरणेण णिव्वाविदो। तदो पहुदि घादआ जं (?) कं वि गिहिदसत्थं अपुव्वं पुरुसं पिट्ठदो वा अग्गदो वा पेक्खन्ति तदो अत्तणो जीविदं परिरक्खन्तो अप्पमत्ता वज्झट्ठाणे (?) वज्झं वावादेन्ति। एवं च गिहिद-सत्थेहिं अमच्चपादेहिं गच्छन्तेहिं सेट्ठिचन्दणदासस्स वहो तुव-

रिदो होदि [आश्चर्यम्, दिष्ट्या दृष्टोऽसि । प्रसीदन्तु अमात्यपादाः । अस्ति तावत् अत्र प्रथमं चन्द्रगुप्तहतकेन आर्य्यशकटदासस्य वधः आज्ञप्तः । स च केनापि अपहृत्य देशान्तरं नीतः । ततश्चन्द्रगुप्तहतकेन कस्मादेष प्रमादः कृत इति आर्य्यशकटदासे समुज्ज्वलितः कोपवह्निः घातकजननिहननेन निर्वापितः । ततः प्रभृति घातका यं (?) कमपि गृहीतशस्त्रम् अपूर्वं पुरुषं पृष्ठतो वा अग्रतो वा प्रेक्षन्ते ततः आत्मनः जीवितं परिरक्षन्तः अप्रमत्ता वध्यस्थाने (?) वध्यं व्यापादयन्ति । एवञ्च गृहीतशस्त्रैरमात्यपादैः गच्छद्भिः श्रेष्ठिचन्दनदासस्य वधः त्वरायितो भवति] । (इति निष्क्रान्तः) ।

Man.—(*Joyfully falling again at his feet*) O wonder! Luckily are you seen. Let revered Minister be pleased. The fact is—Here, previously, Noble Sakatadasa's execution was ordered by cursed Chandragupta, and he was removed by some one from the place of execution and carried to another country. Then the fire of wrath kindled on Noble Sakatadasa was quenched by cursed Chandragupta with the execution of the executioners, saying—"Why was such carelessness shown." Since then executioners, saving their own life, kill the doomed renouncing carelessness (*i. e.*, without fail), in the place of execution (?) if they see any strange person, armed, before them or behind. Thus really the execution of Banker Chandanadasa becomes hastened by revered Minister's going there with arms taken up (*i. e.*, sword drawn). (*Exit*).

CHARCHA

1. शकटदासस्य वध आज्ञप्तः—Telang reads शकटदासः वध्यस्थान-

नाम्नम्:—Sakatadasa was ordered to the place of execution. But this is bad grammar unless we take it as equivalent to शकटदासः वध्यस्थानं प्रति आज्ञप्तः which again does not fully bring out the sense intended.

2. यं कमपि—Here यं is meaningless. The sense wanted is यदि प्रच्यवते ततो व्यापादयन्ति। Is जं in the प्राकृत a copyists' slip for अइ ?

3. अपूर्वम्—पूर्व here means पूर्वदृष्ट। न पूर्वः अपूर्वः।

4. वध्यस्थान &c.—This seems superfluous. अप्रमत्ता वध्यं व्यापादयन्ति fully expresses the meaning. प्रमाद is अनवधानता carelessness. प्रमत्त careless. न प्रमत्तः not careless. अप्रमत्ता वध्यं व्यापादयन्ति kill the doomed guarding against carelessness. Some of Telang's manuscripts read अप्राप्तवध्यस्थानं वध्यं व्यापादयन्ति—They kill the victim even before they have reached the place of execution. This seems to agree better with वधत्वरायितो भवति।

5. त्वरायितः—Expedited. See त्वरायितोऽस्मि, Act V, Pare 14.

20. राक्षसः—(स्वगतम्) अहो दुर्बोधश्चाणक्यवटोर्नीतिमार्गः। कुतः—

यदि स शकटो नीतः शत्रोर्मतेन ममान्तिकं
किमिति निहतस्तेनैवायं वधाधिकृतो जनः
अथ न सुकृतं तादृक् कष्टं कथं नु विभावये-
दिति मम मतिस्तर्कारूढा न पश्यति निश्चयम् ॥ २० ॥

Kak—(*To himself*) Ha ! Inscrutable is the course of the policy of the brat Chanakya. (Do you ask) How ?—If Sakata was really led up to my presence at the instance of the enemy, why then were the men employed for his execution killed by himself ? If, on the other hand, all this is not a hoax, how could he (Sakata) think of such a terrible step ? Thus embarking on guesses my mind sees no conclusion.

अन्वयः ॥ स शकटः यदि शत्रोर्मतेन ममान्तिकं नीतः तेनैव अयं वधाधिकृतो

अनः किमिति निहतः ? अथ इतकं म, ताडक् कष्टं कथ नु विभावयेत् ? मम मतिः इति तर्कारूढा निश्चयं न पश्यति। व्याख्या—'स' मम मित्र 'शकटः यदि शत्रोर्मतेन' चरित्रचन्द्रगुप्तस्य सन्ध्या 'मम अन्तिकं' समीपं 'नीतः' प्रापितः सिद्धार्थकेन ततः 'तेनैव' अनुष्ठा चन्द्रगुप्तेनैव 'अयं वधे' हनने 'अधिकृतः' नियोजितः 'जनः' घातकजनः 'किमिति निहतः' कथ नाशितः ? नेदमुपपद्यते। तन्नासौ शत्रोर्मतेन नीतः। 'अथ' पक्षान्तरे 'कृतक' मिथ्या 'न' शकटदासस्य मदन्दिकप्राप्तिः अरिकृतकपटता मूलकं यदि न स्यात् तदा सः शकटः 'ताडक्' तथाविधं 'कष्टं' विषममनुष्ठानं कूटलेख्यलेख-नादिकं 'कथं नु' केन वा प्रकारेण 'विभावयेत्' चिन्तयेत् ? अत्र प्रजापैरदूषितस्य शकटदासस्य मित्रोत्तमस्य तथा करणं न सम्भवति। 'मम मतिः' मदीयं मनः 'इति' अनेन प्रकारेण 'तर्कारूढा' ऊहे प्रवृत्ता सती 'निश्चयं' सिद्धान्तं 'न पश्यति' नाव-धारयति। उभयथापि असामञ्जस्यदर्शनात् अन्यतरपक्षाश्रयणे असमर्था अन्तरा एव आस्ते इत्यहो दुर्बोधमाणक्यवटोर्नीतिमार्गः।

CHARCHA

1. तेनैवायम्—For this Dhundhi reads क्रोधावेशात्। क्रोधस्य आवेशः आविर्भावः तस्मात्। He means that anger is absurd at one's own doing.

2. कष्टम् &c.—"कष्टं कुत्सितं स्वामिद्रोहं कथं नु विभावयेत् कर्त्तव्यत्वेन चिन्तयेत् आचरेदित्यर्थः। चिन्तनमपि तस्य अनुचितं किमुत आचरणम्"—*Dhundhi.*

30. (विचिन्त्य)

नायं निश्चिंश्यकालः प्रथममिह कृते घातकानां विघाते
नीतिः कालान्तरेण प्रकटयति फलं किं तया कार्यमत्र।
औदासीन्यं न युक्तं प्रियसुहृदि गते मत्कृते घातिघोरां
व्यापत्तिं ज्ञातमस्यं स्वतनुमहमिमां निष्क्रियं काययामि ॥२१॥

(इति निष्क्रान्ताः सर्वे)।

षष्ठोऽङ्कः।

(*Reflecting*) This is no time for the sword, the execution of the executioners having been carried out previously in a similar matter. Diplomacy bears fruit after an interval of time (*i, e.*, takes time to bear fruit) ; what is its use here ? Indifference is not proper, my dear friend having come to this dire pass for the sake of myself. I have it—I will offer this my own person as his ransom. (*Exeunt all*).

END OF THE SIXTH ACT

अन्वयः ॥ इह प्रथमं घातकानां विघाते कृते अयं निस्त्रिंशकालो न। नीतिः कालान्तरेण फलं प्रकटयति, अत्र तया किं कार्य्यम ? प्रियसुहृदि मत्कृते एव घोरां व्यापत्तिं गते औदासीन्यं न युक्तम्। ज्ञातम्—अहमिमां स्वतनुम् अस्य निष्क्रयं कल्पयामि। व्याख्या—'इह' अस्मिन् वध्यविमोचनकर्मणि 'प्रथमं' प्राक्शकटदास-मोचनकाले 'घातकानां विघाते' वधे 'कृते' सति 'अयं निस्त्रिंशस्य' 'कालो न' खड्गिन इह फलं न स्यात्। तत् किं नीतिःप्रयोक्तव्या ? न इत्याह—'नीतिः' नय-प्रयोगः 'कालस्य अन्तरेण' अवकाशेन व्यतीते काले इत्यर्थः 'फलं' सिद्धिं साफल्यमित्यर्थः 'प्रकटयति' दर्शयति। तत् 'अत्र' अस्मिन् कालान्तराचमे कर्मणि 'तया' नीत्या 'किं' कार्य्यं' फलं स्यात् ? न किञ्चिदपि। इत्थं सह निस्त्रिंशेन यदि नीतिरपि याता तदा औदासीन्येन स्थातव्यं किम् ? न इत्याह—'प्रियसुहृदि' मित्रोत्तमे चन्दनदासे 'मम एव कृते' मदर्थमेव 'घोरां दारुणां 'व्यापत्तिं गते' विपदं प्राप्ते सति 'औदासीन्य' निर्लिप्तता 'न युक्तं' न समीचीनम्। तत् किं कर्त्तव्यम् ? आ 'ज्ञातं' कर्त्तव्यं मया निर्णीतम्। किं तत् इत्याह—'अहम् इमां स्वतनुं' एतदात्मशरीरम् 'अस्य' चन्दनदासस्य 'निष्क्रयं' मूल्यं 'कल्पयामि' उपस्थापयामि। खड्गिणोऽयं निग्रहेऽस्य मूल्यं भविष्यति इत्यर्थः।

CHARCHA

1. नायम् &c.—The reason is, as suggested by the man, this will hasten Chandanadasa's death.

2. कालान्तरेण—अन्तरम् an interval. कालस्य अन्तरम् an interval of time. तेन। अपवर्गे तृया।

3. किं तया &c.—Because there is no time to lose.

4. औदासीन्यम्—ऊर्ध्वमासीन: ऊदासीन: standing aloof. तस्य भाव इति ष्यञ्। I have been lying idle too long already. I first got news trom Viradhagupta and should have been at work from then. There must not be further indifference now.

5. मत्कृते—कृते is an अव्यय meaning अर्थे। मम कृते। The whole is an अव्यय। Telang reads मत्कृताम्—मया कृता, ताम्। The reason with either reading is—I entrusted my family to his care and this has led to all this trouble and it is I that should answer for it.

6. निष्क्रयम्—निष्क्रीयते अनेन इति निर् oy निस्+क्री+अच् करणे निष्क्रय: purchase money, ransom.

सप्तमोऽङ्कः

(ततः प्रविशति चण्डालः)

1. चण्डालः—ओसलेह ओसलेह। अवेह अवेह।

जइ इच्छह लक्खिदव्वे प्पाणे विहवे कुले कलत्ते अ।

ता पलिहलह विसमं लाआपत्थं सुदूलेण ॥ १ ॥

अवि अ

होदि पुलिसस्स वाहो मलणं वा सेविदे अपत्थम्मि।

लाआपत्थे उण सेविदे सअलं वि कुलं मलदि ॥ २ ॥

ता जइ ण पतिज्जह ता एह पेक्खह एअं लाआपत्थकालिणं सेट्ठिचन्दणदासं सउत्तकलत्तं वज्झट्ठाणं णीयमाणम्।

[अपसरत अपसरत, अपेत अपेत।

यदि इच्छत रक्षितव्याः प्राणा विभवः कुलं कलत्रञ्च।

तत् परिहरत विषमं राजापथ्यं सुदूरेण ॥

अपि च।

भवति पुरुषस्य व्याधिर्मरणं वा सेविते अपथ्ये।

राजापथ्ये पुनः सेविते सकलमपि कुलं म्रियते ॥

तत् यदि न प्रतीथ तत् अत्र प्रेक्षध्वमेनं राजापथ्यकारिणं श्रेष्ठिचन्दनदासं सपुत्रकलत्रं वध्यस्थानं नीयमानम्]।

(आकाशे) अज्जा किं भणह—'अत्थि कोवि मोक्खोवाओ त्ति। अज्जा अत्थि अमच्चरक्खसस्स घरअणं जइ

समप्पेदि [आर्याः किं भणथ—अस्यस्य कोऽपि मोक्षोपाय इति ? अस्ति अमात्यराक्षसस्य गृहजनं यदि समर्पयति]। (पुनराकाशे) किं भणह—एसे सलणागदवच्छले अत्तणो जीविदमेत्तस्स कालणे ईदिसं अकज्जं ण करिस्सदि त्ति ? अज्जा तेन हि अवधारेह से सुहां गदिम्। किं दाणिं तुह्माणं एत्थ पडिआरविआरेण [किं भणथ—एष शरणागतवत्सल आत्मनो जीवितमात्रस्य कारणे ईदृशमकार्यं न करिष्यति इति ? आर्याः तेन हि अवधारयत अस्य सुखां गतिम्। किमिदानीं युष्माकमत्र प्रतीकारविचारेण] ?

(Now enter a Chandala). *Chand.*—Away ! Away ! Off ! Off ! If you deem that life, wealth, race and wife are worth preserving, then avoid by a long way that dreadful thing—injury to the king. Besides—death or disease visits a man on his taking what is unwholesome, but even the whole race dies what is unwholesome to the king being done. Well, if you do not believe, come and see this evil-doer to the king, the banker Chandanadasa, being led to the place of execution with son and wife. (*In the air*) Noble Sirs, do you ask if there is any means of his release ? There is, Noble Sirs, if he delivers up the wife of Minister Rakshasa. (*Again in the air*) Do you say—this one ever kind to refugees will not do such a foul deed for the sake of mere life ! Noble Sirs, then be assured of his pleasant passage ! What comes of your discussion of the remedy in this matter ?

यदीति—अन्वयः ॥ प्राणाः रक्षितव्याः, विभवः कुलं कलत्रञ्च (इति) यदि वृच्छत तत् विषमं राजापथं सुदूरेण परिहरत। व्याख्या—'प्राणा रक्षितव्याः, जीवनं रक्षणीयं, 'विभवः' धनम् रक्षितव्या 'कुलं' वंशः रक्षितव्यः 'कलत्रञ्च' भार्या अपि रक्षितव्य

इति 'यदि इच्छत' अनुमन्यध्वं चेत् 'तत्' तदा 'विषमं' घोरं 'राजापथ्यं' भूपतीरक्षितं 'सूदूरेण' अतिदूरात् 'परिहरत' त्यजत। राजरोषात् सर्वं लभ्यति इत्यर्थः। भवतीति—अन्वयः॥ अपथ्ये सेविते पुरुषस्य मरणं व्याधिर्वा भवति। राजापथ्यं सेविते पुनः सकलं कुलमपि म्रियते। व्याख्या—सुबला।

CHARCHA

N. B. Scene—Street at Kusumapura.

1. प्रतीष—प्रति + इ + क्त + ष। The root प्रति + इ means to believe. Cf.—"बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम्"—*Sak.* Act. V.

2. आकाशे—See Act II. Telang adds श्रुत्वा which then means—listening to something outside the stage.

3. जीवितमात्रस्य कारणे—जीवितमात्रस्य यत् कारणं प्रेरणा तस्मिन विषये। Cf.—"अर्थस्य कारणेन" Act VI, Para 24.

4. सुखां गतिम्—This is sarcastic. Death on the stake must be very painful.

5. प्रतीकार &c.—Here प्रतीकार is anything that will save Chandanadasa. In that case you need not waste your time with a discussion of the means of his release.

2. (ततः प्रविशति द्वितीयचण्डालानुगतो वध्यवेशधारी शूलं स्कन्धेनादाय कुटुम्बिन्या पुत्रेण च अनुगम्यमानश्चन्दनदासः)।

चन्दन—(सवाष्पम्) हद्धी हद्धी! अच्चारिसाणं वि णिच्चं चारिचभङ्गभीरुणं चोरजणोचिदं मरणं होदि त्ति चमो क्खिदन्तस्स। अहवा ण णिसंसाणं उदासीणेसु इदरेसु वा विग्गेसोत्थि। तह हि

मोत्तूण आमिसादं मरणभयेण तिक्खदिं जीवन्तम्।
वाहाणं सुहहरिणं हन्तुं को णाम णिग्घिणो॥ २॥

[हा धिक् हा धिक्। अस्माद्दृशानामपि नित्यं चारित्र-भङ्गभीरूणां चोरजनोचितं मरणं भवतीति नमः कृतान्तस्य। अथवा न नृशंसानाम् उदासीनेषु इतरेषु वा विशेषोऽस्ति। तथा हि—

मुक्ता आमिषाणि मरणभयेन तृणैर्जीवन्तम्।
व्याधानां मुग्धहरिणं हन्तुं को नाम निर्बन्धः॥]

(समन्तादवलोक्य) भो पिअवअस्स विण्हुदास। कहं पडिवअणं वि ण मे पडिवज्जसि। अहवा दुल्लहा ते क्खु माणुसा ये एदस्सिं काले दिट्ठिपथे वि चिट्ठन्ति [भो प्रियवयस्य विष्णुदास! कथं प्रतिवचनमपि न मे प्रतिपद्यसे। अथवा दुर्लभास्ते खलु मानुषा ये एतस्मिन् काले दृष्टिपथेऽपि तिष्ठन्ति]। (सवाष्पम्) एदे अम्हपिअवअस्सा अंसुपादमेत्तकेण खिदणिवावसलिला विअ कहं वि पडिणिव्वत्तमाना सोअदीण-वअणा वाहगुरुआए दिट्ठीए मं अनुगच्छन्दि [एते अस्मत्प्रिय-वयस्या अश्रुपातमात्रेण कृतनिवापसलिला इव कथमपि प्रति-निवर्त्तमानाः शोकदीनवदना वाष्पगुर्व्या दृष्ट्या मामनुगच्छन्ति] (इति परिक्रामति)।

(*Now enters Chandanadasa wearing the dress of the doomed carrying the stake on his shoulder followed by his son and wife and a second Chandala*). *Chandana.*—(*In tears*) Oh fie! Oh fie! Salutation to Death, as death suiting a thief comes even unto those of my stamp that are always apprehensive of loss of character. Or, to the heartless, no distinction exists between the unconcerned and the rest. Thus what forsooth is (not) the

persistency of hunters in killing the guileless deer that, through fear of killing, live on grass renouncing meat! (*Looking round*) Ho! Dear friend Vishnudasa. How so! You do not even vouchsafe me a reply. Or, rare indeed are such people as at such a time stand even within the range of sight. (*With tears*) Here is my dear friend, as if returning somehow with oblation of water offered by merely shedding tears, with face pale through grief, following me with eyes heavy with tears.

(*Goes round the stage*).

CHARCHA

1. कुटुम्बिन्या—कुटुम्बिनी wife. Cf.—"भवतु कुटुम्बिनीमाहूय पृच्छामि" Act I.

2. चारित्र &c.—चरित्रमेव चारित्रम्, अण् प्रज्ञादि। तस्य भङ्गः। तस्मात् भीरवः। तेषाम्।

3. नमः कृतान्तस्य—षष्ठी for ४थी। *Or* कृतान्तस्य सम्बन्धे नमः। We submit to the decision of Death without protest; there is no knowing of "the why" in it.

4. अथवा &c.—Here he changes his attitude and gives a reason why Death acts so capriciously, 'नृशंसानां' सम्बन्धे 'उदासीनेषु' निर्लिप्तेषु पापं परिहरत्सु विषये 'इतरेषु' लिप्तेषु पापिषु वा विषये 'विशेषो' भेदो 'न' नास्ति। नृशंसोऽयं कृतान्तः पापिनमिव मामपि अभेदेनैव दण्डयति सैवास्य नृशंसता।

5. अन्वयः॥ मरणभयेन आमिषाणि मुक्त्वा तृणैर्जीवन्तम् सुग्धहरिणम् हन्तुं व्याधानां को नाम निर्बन्धः। व्याख्या—'मरणात्' प्राणिनः कस्यचित् मरणात् यत् 'भयं' तेन हेतुना प्राणिहत्या भवति इति भयेन 'आमिषाणि मुक्त्वा' मांसानि वर्जयित्वा 'तृणैर्जीवन्तम्' प्राणान् धारयन्तं 'सुग्धं' सरलं 'हरिणं हन्तुं' नाशयितुं 'व्याधानां' नृशंसानां लुब्धकानां 'को' नाम 'कुत्सितो' निर्बन्धः आग्रहातिशयः नृशंसस्य कृतान्तस्य पापापापविवेके नृशंसा व्याधाः प्रमाणं यतस्ते, पापान् सिंहव्याघ्रान् अपापान् हरिणांश्च अभेदेनैव मारयन्ति।

6. मरणभयेन—Through fear of killing. मरण is the death of the animal that is made into meat. मारणभयेन would have been better.

7. को नाम—This implies जुगुप्सा। "नाम प्राकाश्यसम्भाव्यक्रोधोपगम-जुगुप्सासु" इत्यमरः।

8. भोः प्रिय &c—This call is unanswered. Hence he is touched, and exclaims कथं प्रतिवचनमपि &c.

9. अथवा दुर्लभाः &c.—Cf. "राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः"। दृष्टिपथेऽपि किं पुनः श्रुतिपथे। Vishnudasa is not within hearing distance; no blame, people would be outside even the range of rision!!

10. सबाष्पम्—He now notices Vishnudasa at a distance coming his way; and this brings tears into his eyes. Vishnudasa has come back on hearing of Minister Rakshasa's attempt to save Chandanadasa. See Act WI, Para 27.

11. एते &c.—The plural implies गौरव। The reference is to Vishnudasa. The epithet प्रियवयस्याः cannot apply to a crowd specially after the remark, "दुर्लभास्ते खलु मनुष्याः"।

12. अश्रुपात &c.—'कृतम्' अनुष्ठितं 'निवापसलिलं' प्रेतदेयजलगण्डूषदानकर्म येः तथाविधाः सन्तः 'कथमपि प्रतिनिवर्त्तमाना इव'—He looks like one who had gone to offer libations to the head that was dear, and was thereafter returning. Such a person becomes extremely dejected and looks like one more dead than alive. Similar was the look that Vishnudasa wore; he had offered libations of tears (अश्रुपातमात्रेण) to Chandanadasa.

3. चण्डालौ—अज्ज चन्दनदास, आअदोसि वज्झट्ठाणं ता विसज्जेहि परिअणं [आर्य्य चन्दनदास, आगतोऽसि वध्यस्थानं तत् विसर्जय परिजनम्]।

Chandalas—Noble Chandanadasa, you have reached the place of execution, so dismiss your family.

चन्दनदासः—कुटुम्बिनि, निवर्त्तेहि सम्प्रदं सपुत्ता। ण जुत्तं खु अदो वरं अनुगच्छिदुम् [कुटुम्बिनि, निवर्त्तस्व साम्प्रतं सपुत्रा। न युक्तं खलु अतः परमनुगन्तुम्]।

Chandana.—Wife, return now with children ; it is not proper to follow me beyond this.

कुटुम्बिनी—(सवाष्पम्) परलोअं पत्थिदो अज्जो ण देसन्तरं [परलोकं प्रस्थितः आर्य्यः न देशान्तरम्]।

Wife—(*With tears*) Noble Sir is going to another world not to another country.

चन्दनदासः—अज्जे, अअं मित्तकज्जेण मे विणासो ण उण पुरिसदोसेण। ता अलं विसादेण [आर्य्ये, अयं मित्रकार्य्येण मे विनाशो न पुनः पुरुषदोषेण। तदलं विषादेन]।

Chandana.—Noble wife, this death of mine is in my friend's cause, not through human failings, so away with grief.

कुटुम्बिनी—अज्ज जइ एवं ता दाणिं अकालो कुलजणस्स णिवट्टिदुम् [आर्य्य, यदि एवं तदिदानीमकालं कुलजनस्य निवर्त्तितुम्]।

Wife—Noble Sir ! if so then this is no time now for the wife (lit. the mistress of the house) to turn back.

चन्दनदासः—अह किं ववसिदं कुडुम्बिणीए [अथ किं व्यवसितं कुटुम्बिन्या]।

Chandana—Well, what is intended by my wife ?

कुटुम्बिनी—भत्तुणो चलणे अनुगच्छन्तीए अप्पाणुग्गहो होदुत्ति [भर्त्तुश्चरणौ अनुगच्छन्त्या आत्मानुग्रहो भवतु इति]।

Wife—That good come to the soul of myself from following the feet of my husband.

चन्दनदासः—अज्जे, दुव्ववसिदं एदं तुए। अअं पुत्तओ अणुणिदलोअसंववहारो बालो अणुगेण्हिदव्वो [आर्य्ये, दुर्व्यव-

सितमिदं त्वया। अयं पुत्रकः अश्रुतलोकसंव्यवहारो बालः अनुग्रहीतव्यः]।

Chandana—Noble wife, yours is an unwise resolve ; this poor boy, young and inexperienced in the ways of the world, has to be helped.

कुटम्बिनी—अणुगिह्णन्दु णं पसण्णाओ देवदाओ। जादपुत्तअ पत पच्छिमेसु पिदुणो पादेसु [अनुगृह्णन्तु एनं प्रसन्नाः देवताः। जात पुत्रक, पत पश्चिमयोः पितुः पादयोः]।

Wife—Let the gods be pleased to help him. Child, my son, fall at the feet of thy father for the last time.

पुत्रः—(पादयोर्निपत्य) ताद किं दाणिं मए तादविरहिदेण अणुचिट्ठिदव्वं [तात, किमिदानीं मया तातविरहितेन अनुष्ठातव्यम्]।

Son—(*Falling at the feet*) Father, what is to be done by me forsaken by father ?

चन्दनदासः—पुत्त, चाणक्कविरहिदे देसे वसिदव्वम् [पुत्र, चाणक्यविरहिते देशे वस्तव्यम्]।

Chand.—Son, you have to live in a land unfrequented by Chanakya.

CHARCHA

1. अतः परम्—Telang renders अतो वरं by अतः अपरम्। But अतः परम् is the usual phrase in the sense 'more than this', 'beyond this', &c. अतः अपरम् generally means 'other than this'. एतेन आ ग्रसमानादनुव्रजनमिति शाब्दमसौति भाति परन्तु नोपलभ्यते।

2. परलोकम्—प्र + स्था is सकर्मक। Cf.—"ततः प्रतस्थे कौबेरीं भास्वानिव रघर्दिशम्"। कर्मणि २या।

3. मित्रकार्येण &c.—This has already occurred in Act I (which see).

4. यदि एवम्—If you are going to die (*i. e.*, यदि तव विनाश एव इत्यर्थः) then I cannot return—it is no time for a devoted wife to return. कुल is गृह। कुलस्य जनः। Same as गृहजन in the sense of wife *ante*.

5. आत्मानुगतः &c.—आत्मनः अनुगतः &c. Following the husband in death is good for the soul of the wife. Hence I will not go back.

6. पुवकः—अनुकम्पितः पुनः इति पुवा + कन्।

7. अश्रुत &c.—See "अदृष्टलोकव्यवहारमूढधीः", Act IV, Sl, 14.

8. पश्चिमेषु—पश्चिम last ; hence now available to you for the last time. "अन्त्यपाश्चात्यपश्चिमम्" इत्यमरः। Cf.—"पश्चिमात् यामिनीयामात् प्रसादमिव चेतना"।

4. चण्डालः—अज्ज चन्दणदास, णिखादे सूले, ता सज्जो होहि [आर्य चन्दनदास, निखातं शूलं तत् सज्जो भव]।

Chand.—Noble Chandanadasa, the stake is driven, so get ready.

कुटुम्बिनी—अज्जा परित्तायध परित्तायध [आर्याः परित्रायध्वं परित्रायध्वम्]।

Wife—Help ! Noble sirs, Help !

चन्द्रनदासः—अज्जे अह किं एत्थ आक्रन्दसि। सग्गं गदाणं दाव देवा दुक्खिदं परिअणं अणुकम्पन्ति। अहं अ मित्तकज्जेण मे विणासो ण अजुत्तकज्जेण। ता किं इदिसट्ठाणे विरोदीअदि [आर्ये, अथ किमत्र आक्रन्दसि ? स्वर्गं गतानां तावद् देवाः दुःखितं परिजनमनुकम्पन्ते। अन्यच्च मित्रकार्येण मे विनाशो नायुक्तकार्येण। तत् किं ईदृशस्थानेऽपि क्रियते]।

Chandana—Well, Noble wife, why do you mourn in this matter? Gods do indeed pity the grieved family of those that go to heaven. Besides my death is in friend's cause, not in an unworthy cause. Why then lamentations are made even in a matter for joy.

प्रथमश्चण्डालः—अले विल्लपत्त, गुह्ह चन्दणदासं। सअं एव्व परिअणो गमिस्सदि [अरे विल्वपत्र, गृह्याण चन्दनदासं। स्वयमेव परिजनो गमिष्यति]।

First Chand.—Sirrah Vilvapatra, seize Chandanadasa; the family will then retire spontaneously.

द्वितीयश्चण्डालः—अले वज्जलोमा, एसे गुह्लामि [अरे वज्रलोमन्, एष गृह्णामि]।

Second Chand.—Sirrah! Vajraloman, here I seize him.

चन्दन—भद्द, मुहुत्तं चिट्ठ जाव पुत्तअं सन्तआमि [भद्र, मुहूर्तं तिष्ठ। यावत् पुत्रकं सान्त्वयामि]। (पुत्रं मूर्ध्नि आघ्राय) जाद, अवस्सं भविदव्वे विणासे मित्तकाज्जं समुव्वहमाणो विणासमणुभवेमि [जात, अवश्यं भवितव्ये विनाशे मित्रकार्यं समुद्वहमानो विनाशमनुभवामि]।

Chandana.—Good man, wait a moment, till I console my boy. (*Smelling the boy at his head*) Child, death being inevitable, I suffer death upholding the friend's cause.

पुत्रः—ताद, किं एदं वि भणिदव्वं। कुलधम्मो खु एसो अम्हाणं [तात, किमिदमपि भणितव्यम्। कुलधर्मः खल्वेषः अस्माकम्]। (इति पादयोः पतति)।

Son—Father has this too to be told? This is indeed our family vow. (*Falls at his feet*).

प्रथमचण्डालः—अले गेण्ह एणं [अरे गृहाणैनम्]।

First Chand.—Sirrah ! Seize him.

कुटुम्बिनी—(सोरस्ताडम्) अज्जा, परित्तायध परित्तायध [आर्याः परित्रायध्वं परित्रायध्वम्]।

Wife—(*Beating the breast*) Help ! Noble Sirs, help !

CHARCHA

1. परित्रायध्वम्—This is an appeal to the crowd to save Chandanadasa.

2. किमव &c—हर्षस्य स्थानम् an occasion for joy. Who will save me here ? Your appeal is useless, so stop ; there is nothing to be done *for me*. As *for you*, the gods do look after the family of those who like myself are carried to heaven by their deeds. Such a death as mine is rare ; thousands of ways of ignoble deaths threaten one born in this wicked world ; luckily do I avoid them. I die in friend's cause so rejoice now, do not weep.

3. अवश्यं भवितव्यं &c.—Death is inevitable. Every one has to die ; but how many are fortunate like me to die in the service of a friend ? So do not mourn me.

4. किमिदमपि भणितव्यम् &c.—I need not be reminded of it. I bear it well in my mind, for this is our family vow. Cf.—"सतामेतद्धि गोत्रव्रतम्", Act II, Sl. 18.

5. गृहाणैनम्—एनम् refers to चन्दनदास (See *ante*—गृहाण चन्दनदासम्)।

6. सोरस्ताडम्—ताडनमिति ताडि + घञ्, or अच् भावे ताडः beating, उरसः ताडः beating of the breast. तेन सह। तत् यथा तथा।

5. (प्रविश्य पटाक्षेपेण) राक्षसः—भवति, न भेतव्यम्। भोः भोः शूलायतनाः, न खलु व्यापादयितव्यश्चन्दनदासः।

येन स्वामिकुलं रिपोरिव कुलं दृष्टं विनश्यत् पुरा
मित्राणां व्यसने महोत्सव इव स्वस्थेन येन स्थितम् ।
आत्मा यस्य वधाय वः परिभवश्चेक्षितोऽपि प्रिय-
स्तस्येयं मम मृत्युलोकपदवी वध्यस्रगावध्यताम् ॥ ४ ॥

Rak.—(*Entering with a toss of the curtain*) Fear not, good lady, Ho ! Ho ! Ye in charge of the stake, Chandanadasa must not be killed.—Let this wreath of the doomed, the road to the realms of Death, be fastened on him, this self of mine, by whom his master's race was formerly seen perishing as if it were his enemy's race ; who stood unmoved at the death of of his friends as if at high festivities ; whose person, though made into a butt of indignities, is dear to him for your destruction.

CHARCHA

1. पटाक्षेपेण—आ सम्यक् क्षेपः अपसारणम् आक्षेपः। पटस्य आक्षेपः removal of the screen. तेन। The entry is unannounced. He removes the screen himself and enters ; this implies hurry (सम्भ्रम)। "असूचितस्य सहसा सम्भ्रमेण प्रवेशः पटाक्षेपः"—*Dhundi.*

2. भवति—Vocative singular of भवती। Addressed to Chandanadasa's wife.

3. यूलायतनाः—आयत्यते अव इति आ+यत+ल्युट् अधिकरणे आयतनम् place of work. यूलम् आयतनमेषाम्।

4. अन्वयः—येन पुरा रिपोः कुलमिव स्वामिकुलं विनश्यत् दृष्टम् ; येन मित्राणां व्यसने महोत्सवे इव स्वस्थेन स्थितम् ; यस्य परिभवश्चेक्षितोऽपि आत्मा वः वधाय प्रियः ; तस्य मम इयं मृत्युलोकपदवी वध्यस्रक् आवध्यताम्। व्याख्या—'येन' जनेन 'पुरा' इतः पूर्वं 'रिपोः' शत्रोः 'कुलमिव' इतोः कुलमिव 'स्वामिकुलं' भर्तृवंशः 'विनश्यत्' विध्वंसमानं 'दृष्टं' न च तेन तत्र सह स्वयमपि ध्वस्तम्, 'येन' जनेन 'मित्राणां' बौद्धादीनां 'व्यसने' वधे 'महोत्सवे इव' प्रमोदवासरे इव 'स्वस्थेन' निर्विकारेण सता 'स्थितं' न तु प्रविशतम्, 'यस्य' जनस्य स्वामिनिमित्तवाक्यादिना यः

'परिभवः' अवमानना तस्य 'देव' भाजन' सम्पद्यमानः अपि 'आत्मा' स्वदेहः 'वः वधाय' 'युष्माकं चन्द्रगुप्तवर्गीयाणां हननाय रक्षितव्य इति 'प्रियः' प्रार्थनीयः 'तस्य मम' राक्षसस्य 'इयं मृत्युलोकस्य' यमभवनस्य 'पदवी' पद्धतिः मार्गरेखा इत्यर्थः 'वध्यस्रक्' वध्यमाला 'आबध्यताम्' गले समालम्ब्यताम्। निवर्त्तेरात् मौर्य्यवंशसमुच्छेदप्रयासे जलाञ्जलिं दत्त्वा स्वदेहो मया चन्दनदासस्य निष्क्रयत्वेन उपस्थापितः तन्मुञ्चैनम् इत्यर्थः।

5. परिभव &c.—स्वामिनाम and निवर्तनाम are affronts to Rakshasa. Life with affronts is unbearable, yet I wish to live, because living, I can retaliate. Comp. "न तावन्निर्वोढ्यः परपरिभवाक्रान्तिजपणः" &c. Act II, Sl. 10. When that was said the friends were alive and the loss of the master's family alone was rankling in his mind.

6. मृत्युलोकपदवी—पदवी road, foot-path. The wreath is an emblem of death. One with this on, is on the track to the regions of death. Qual. वध्यस्रक्।

7. *Remark.*—Life is dear to me (आत्मा प्रियः) not for the sake of living, but as a means to a noble end, viz., the chastisement of people of your stamp who have espoused the cause of Chandragupta neglecting that of Nanda. Yet I shall sacrifice life to save my friend.

6. चन्दन—(सवाष्पं विलोक्य) अमच्च किं एदं [अमात्य, किमिदम्] ?

Chandana.—(*Observing—With tears*) Minister, what is this ?

राक्षसः—त्वदीयसुचरितैकदेशस्य अनुकरणं किलैतत्।

Rak—This is a poor imitation of a part of your noble career.

चन्दन—अमच्च, सव्वं वि इमं प्पआसं णिप्फलं करन्तेण तुए किं अणुचिट्ठिदं [अमात्य, सर्वमपि इमं प्रयासं निष्फलं कुर्वता त्वया किमनुष्ठितम्] ?

Chandana—What is done by you, Minister rendering all this attempt fruitless ?

राक्षसः—सखे स्वार्थ एवानुष्ठितः, कृतमुपालम्भेन। भद्रमुख, निवेद्यतां दुरात्मने चाणक्याय—

Rak.—Friend, our own interest indeed is served, away with remonstrations. Good man, go report to the vile-hearted Chanakya—

वज्रलोमा—किं त्ति [किमिति] ?

Vajra—What (shall I report) ?

राक्षसः—

दुष्कालेऽपि कलावसज्जनरुचौ प्रायैः परं रक्षता
नीतं येन यशस्विनातिलघुतामौशीनरीयं यशः।
बुद्धानामपि चेष्टितं सुचरितैः क्लिष्टं विशुद्धात्मना
पूजार्होऽपि स यत्कृते तव गतः शत्रुत्वमेषोऽस्मि सः ॥ ५ ॥

Rak.—Here I am he for whose sake even that adorable one incurred your enmity—the one by whose famous self the fame of Ausinara is reduced to insignificance by saving another with life even in the wicked *Kali* age when people's tastes have become perverse ; by whom, the pure-hearted, even the deeds of the Buddhas are shaded with his noble deeds.

CHARCHA

1. सुचरित &c.—खाडु चरितं सुचरितम्। एकी देशः एकदेशः। सुचरितस्य एकदेशः। किल expresses जवचि। I am but an imitator, not of your noble deeds in their entirety, but of a part only ; and the imitation is a clumsy one (जवचि)। The reason is, mine is forced while yours is a spontaneous sacrifice.

2. स्वार्थ एव &c.—I have served my own interest. My स्वार्थ is the saving of your life, and this will achieve it.

3. अन्वयः—अकृत्यजनरुचौ दुष्काले अपि प्रायैः परं रक्षता यशस्विना येन

औशीनरोयं यशः अतिलघुतां नीतम् ; विशुद्धात्मना (येन) सुचरितैः बुद्धानां चेष्टितमपि क्लिष्टम् ; पूजार्होऽपि सः यत्कृते तव शत्रुत्वं गतः स एषः अग्नि । व्याख्या—'असती' असाध्वी 'जनवृत्तिः' लोकप्रवृत्तिः यस्मिन् तस्मिन् अतएव 'दुष्काले' [युगाधमे 'कलौ अपि प्राणैः' आत्मजीवनेन 'परं रक्षता' आत्मेतरं त्रायमाणेन अतएव 'यशस्विना' विपुलयशसा 'येन' जनेन 'औशीनरोयम्' औशीनरस्य शिबेः 'यशः' कपोतपरित्राणजा कीर्तिः 'अतिलघुतां नीतं' तुच्छत्वमापादितम् ; अपि च 'विशुद्धः' अनाविलः 'आत्मा' स्वरूपं यस्य तथाविधेन पूतचरितेन येन जनेन 'सुचरितैः' सत्कर्मभिः 'बुद्धानां चेष्टितमपि' आर्हतानां चरितञ्च 'क्लिष्टं' तिरस्कृतम्, 'पूजार्होऽपि' सत्कारपात्रमपि, 'सः' चन्द्रदासः 'यत्कृते' यस्य 'कृते' हेतोः 'तव शत्रुत्वं गतः' रिपुरिव जातः 'सः' राजसः 'एषः अग्नि' अयमहं ते वधो जातः तन्मा त्वतां चन्द्रदासः इति निवेद्यताम् ।

4. दुष्काले &c.—दुःस्थितः कालः दुष्कालः evil times. "शिबिना पुरुषे कृतयुगे तत् कृतमिति नात्र चित्रम् । पापे कलियुगे ईदृशं कर्म कुर्वाणस्ततोऽप्यतिशयितः"—*Dhundhi.*

5. असत् &c.—See व्याख्या । Telang renders—"Which does not satisfy good persons." This amounts to अविद्यमाना सज्जनानां वृत्तिः अस्मिन् ।

6. औशीनरोयम्—उशीनर was a prince of the race of पूरु । उशीनरस्य अपत्यं पुमान् इति उशीनर+अञ् औशीनर (उत्सादि) । This is शिबि who was the son of उशीनर by one of his wives दृषद्वती । "दृषद्वत्यास्तु संजज्ञे शिबिरौशीनरो नृपः" । तस्येदम् इति औशीनर+छ औशीनरीयम् that which belonges to औशीनर । Again, उशीनर founded a kingdom in बाह्लीक or North Punjab. His followers being called उशीनर by लक्षणा, we get उशीनराणां निवासो जनपदः उशीनराः (the province in) North Punjab. तेषां राजा इति उशीनर+अञ् (तद्राज) औशीनर which means king उशीनर himself. Hence another derivation for औशीनरीय is—औशीनरस्य अपत्यं पुमान् औशीनिः by "अत इञ्" । शिबि goes by this name also. औशीनरेः इदम् औशीनरीयम् by छ as before.

7. बुद्धानाम्—The followers of बुद्ध are here called बुद्ध by transference of epithets. From this Telang argues that the poet flourished at a time when Buddhism was still in possession of its old purity. This must be much earlier than the

11th centry A. D., which is Prof. Wilson's estimate of the age of the poet. See also Intro.

8. एषोऽस्मि सः—अस्मि is an अव्यय meaning अहम्। This is complete surrender of self.

7. प्रथमः—अले विल्लपत्तअ, तुमं दाव चन्दणदासं गेण्हिअ इह एदस्स मसाणपादवस्स छाआए मुहुत्तं चिट्ठ जाव अहं अज्जं चाणक्कस्स निवेदेमि गिहीदो अमच्चरक्खसो त्ति [अरे विल्वपत्रक, त्वं तावच्चन्दनदासं गृहीत्वा इह एतस्य श्मशान-पादपस्य छायायां मुहूर्त्तं तिष्ठ यावदहमार्य्यचाणक्यस्य निवेदयामि गृहीतः अमात्यराक्षस इति]

First—Sirrah ! Vilvapatraka, do you wait here for a moment taking Chandanadasa with you under the shade of this tree of the burning-ground, while I report to Noble Chanakya that Minister Rakshasa is taken.

द्वितीयः—अले वज्जलोमा गच्छ [अरे वज्रलोमन्, गच्छ]। (इति सपुत्रदारेण चन्दनदासेन सह निष्क्रान्तः)।

Second—Sirrah ! Vajraloman, go. (*Exit with Chandanadasa and his wife and son.*)

प्रथमः—एदु अमच्चो [एतु अमात्यः]। (राक्षसेन सह परिक्रम्य) अत्थि एत्थ को वि ? निवेदेह दाव णन्दकुलणग-कुलिसस्स मौलिअकुलपडिट्ठावअस्स अज्जचाणक्कस्स—[अस्त्यत्र कोऽपि ? निवेदय तावत् नन्दकुलनगकुलिशस्य मौर्य्यकुल-प्रतिष्ठापकस्य आर्य्यचाणक्यस्य—]।

First—Let Minister come. (*Going round with Rakshasa*). Is there any ony here ? Do report to Noble Chanakya the

thunderbolt to the hill of the house of Nanda, the founder of the house of Maurya—

राक्षसः—(स्वगतम्) एतदपि नाम श्रोतव्यम्।

Rak.—(*To himself*) Even this has to be listened to !

प्रथमः—एसो अज्जणीदिसंजमिदबुद्धिपलिसले गिहीदे अमच्चरक्खसे त्ति [—एषः आर्य्यनीतिसंयमितबुद्धिपरिसरः गृहीतः अमात्यराक्षस इति]।

First—That Minister Rakshasa, the flight of whose wit has been checked by the state-craft of Noble Sir, is taken.

CHARCHA

1. चाणक्यस्य—शेषे षष्ठी। Or say चाणक्यस्य = चाणक्याय with चतुर्थी by "कर्मणा यमभिप्रैति—", the कर्म being इति।

2. एतु अमात्यः—They proceed towards the audience-room whither Chanakya must have gone and was waiting with Chandragupta in expecatation of the news.

3. नन्दकुल &c.—नन्दकुलमेव नगः पर्वतः। तस्य सम्बन्धे कुलिशं वज्रम्। The thunder bolt had lopped off the wings of mountains, and Chanakya did more than that with respect to the family of Nanda. The former merely crippled while the latter smashed his enemies.

4. मौर्य्यकुल &c.—प्रति + स्था + णिच + ल्यु ल, कर्तरि प्रतिष्ठापक founder. मौर्य्यकुलस्य प्रतिष्ठापकः, शेषषष्ठ्या समासः। Now that Rakshasa is taken, the permanency of the मौर्य्यकुल is assured and the epithet is appropriate.

5. आर्य्यचाणक्य—See above. Under चाणक्यस्य।

6. एतदपि &c.—I have to bear this, though the words burn my ear-holes.

7. आर्य्यनीति &c.—परि + सृ गतौ + भावे परिसरः flight. बुद्धेः परिसरः the flight of wit. आर्य्यस्य चाणक्यस्यनीतिः। तया संयमितः। आर्य्य-नीतिसंयमितः बुद्धिपरिसरः अस्य।

8 (ततः प्रविशति जवनिकाहृतशरीरो मुखमात्रदृश्य-श्चाणक्यः) ।

चाणक्यः—भद्र कथय कथय—

केनोत्तुङ्गशिखाकलापकपिलो बद्धः पटान्ते शिखी
पार्श्वैः केन सदागतेरगतिता सद्यः समापादिता ।
केनानेकपदानवासितसटः सिंहोऽर्पितः पञ्जरे
भीमः केन च नैकनक्रमकरो दोर्भ्यां प्रतीर्णोऽर्णवः ॥६॥

(*Now enter Chanakya with his person covered by a veil and face alone visible*). *Chanakya*—Tell me, good man tell me—By whom is tied in the skirt of his garment the fire red with the mass of its high-soaring flames? By whom is forthwith brought about with chains the motionlessness of the ever-moving air? By whom is put into a cage the lion with his manes scented by the ichor of (अनेकप *i. e.*,) elephants? And by whom is crossed with his arms the grim sea with numerous murderous sharks and alligators?

CHARCHA

1. जवनिका &c.—जु is a सौत्र root meaning 'to move'. जु + ल्युट् करणे + कन् स्वार्थे स्त्रियाम् जवनिका a screen. "प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा" इत्यमरः । The derivation is Bhanuji's who also notices the variant यवनिका । It is not clear why Chanakya comes thus attired. No foul play was suspected, for on coming up to Rakshasa, he removes the screen. Comp. जवनिकामपनीय &c. *Supra.*

2. मुखमात्र &c.—मुखं मात्रा यस्य मुखमात्रः । तादृशश्चासौ दृश्यश्च । *Or* मुखं मात्रा यस्मिन् मुखमात्रम् । तत् यथा तथा दृश्यः । मुखमिव मुखमात्रम् involves a difficulty, because by the rule "नपुंसकादन्यतरस्याम्" further compounding is generally barred and we get मुखमात्रेण दृश्यः uncompounded. Acc. to Bhoja however भूतपूर्वसकादि compounds lead in a compound, so in मुखमात्रेण दृश्यः, समास is allowed. Cp "देशान्तरस्थिते कर्त्री" &c.

8. अन्वयः ॥ उत्तुङ्गशिखाकलापकपिलः शिखी केन पटान्ते बद्धः ? केन पाशैः सदागतेरगतिता सद्यः समापादिता ? अनेकप-दानवासितसटः सिंहः केन पञ्जरे अर्पितः ? नैकनक्रमकरः भीमः अर्णवश्च केन दोर्भ्यां प्रतीर्णः ? व्याख्या—'उत्तुङ्गैः' महोच्छ्रायैः 'शिखाकलापैः' ज्वालामालाभिः 'कपिलः' पिङ्गः यः 'शिखी' अग्निः स 'केन' विपुलबुद्धिना जनेन 'पटान्ते' वस्त्रान्ते 'बद्धः' धृतः ? 'केन' महामतिना 'पाशैः' रज्जुभिः 'सदागतेः' चिरचारिणो वायोः 'अगतिता' अचलता 'सद्यः' तत्क्षणं 'समापादिता' प्रापिता ? 'अनेकपानां' दिपानां गजानामित्यर्थः 'दानैः' मदजलैः 'वासितः' क्लताधिवासः 'सटाः' केसराः यस्य तादृशः 'सिंहः केन' महाशूरेण 'पञ्जरे अर्पितः' नियन्त्रितः ? 'नैके' असंख्याः 'नक्राः' कुम्भीराः 'मकराः' ग्राहाश्च यस्मिन् तादृशः अतएव दुरवगाहः आत्मना च 'भीमः' भीषणः 'अर्णवश्च' सागरोऽपि 'केन' साहसिकेन बलिना च जनेन 'दोर्भ्यां' बाहुभ्यामेव 'प्रतीर्णः' उत्तीर्णः ? बली साहसिकः महाशूरो विपुलबुद्धिश्च राक्षसोऽपि गृहीतः अहो आश्चर्यम् । ब्रूहि कस्यात्र कृतित्वम् इति भावः ।

4. उत्तुङ्ग &c.—See व्याख्या। To tie up such fire in the skirts seems impossible. It requires almost superhuman ingenuity to do it. The implication is that the depth of Rakshasa's intelligence is profound. Still he is captured.

